समवेतान्तनिवेशादन्यपुरुषकृतपरीक्षायाः पूर्ववृत्तत्वेऽपि न क्षतिः ।

●

समवेताऽनुमानप्रामाण्यपरीक्षागोचरकृतिक्षणध्वंसाऽनधिकरणक्षणवृत्तित्वरूपमिति फलितम् इत्येतदेव उपदर्शयति - **कृतौ** = अनुमानप्रामाण्यपरीक्षागोचरकृतौ **आद्यत्वञ्च तत्कृतिसमवायिसमवेत-प्रामाण्यपरीक्षागोचरकृतिक्षणध्वंसाऽनधिकरणक्षणवृत्तित्वम्** = आद्यत्वेनाऽभिमतकृतिसमवायि-गङ्गेशोपाध्यायसमवेताऽनुमानप्रामाण्यपरीक्षागोचरकृतिक्षणध्वंसाऽनधिकरणक्षणवृत्तित्वम् ।

समवेतान्तप्रवेशप्रयोजनं प्रचिकटयिषुः प्राह - **समवेतेति** । **समवेतान्तनिवेशाद्** = आद्यत्वलक्षणे तत्कृतिसमवायिसमवेतत्वस्य प्रवेशात्, पञ्चम्यर्थः प्रयोज्यत्वं तस्य च क्षत्यभावेऽन्वयः । **अन्य-पुरुषकृतपरीक्षायाः पूर्ववृत्तत्वेऽपि** = आद्यत्वेनाऽभिमतकृतिविशिष्टगङ्गेशोपाध्यायभिन्नपुरुष-समवेताऽनुमानप्रामाण्यपरीक्षागोचरकृतिक्षणध्वंसस्य प्रथमक्षणे आद्यत्वेनाऽभिमतकृत्यधिकरणीभूते सत्त्वेऽपि **न क्षतिः** = अव्याप्त्यभावः, तथा च तत्कृतिसमवायिसमवेतत्वप्रवेशप्रयोज्यः तत्कृति-समवायिगङ्गेशोपाध्यायभिन्नपुरुषसमवेताऽनुमानप्रामाण्यपरीक्षागोचरकृतिक्षणध्वंसनिष्ठतत्कृत्य-धिकरणनिरूपितवृत्तित्वप्रयोज्याऽव्याप्त्यभावः इत्यखण्डार्थः ।

तत्कृतिसमवायिसमवेतत्वम् = आद्यत्वेनाऽभिमतकृतिनिरूपितसमवायविशिष्टनिरूपित-

●

ક્ષણમાં તો ન જ રહે. માટે, અનુમાનપ્રામાણ્યપરીક્ષાવિષયકકૃતિક્ષણધ્વંસઅનધિકરણીભૂતક્ષણ માત્ર પ્રથમ ક્ષણ જ થશે. તાદૃશક્ષણવૃત્તિત્વ માત્ર પ્રથમક્ષણવૃત્તિઆદ્યકૃતિમાં જ જશે. આ રીતે લક્ષણસમન્વય થઈ જ જાય છે. તો પછી તત્કૃતિ(=અનુમાનપ્રામાણ્યપરીક્ષા-વિષયકકૃતિ)સમવાયિસમવેત કહેવું નિરર્થક જ છે ને ?

ઉત્તર :- (समवे.) જો સમવેત સુધીનું નહીં કહો તો પ્રથમક્ષણવૃત્તિ કૃતિ પણ આદ્ય કૃતિ નહીં બની શકે. કારણ કે ગંગેશ ઉપાધ્યાયની પહેલા અન્ય પુરુષોએ (= વાચસ્પતિ મિશ્ર વગેરેએ) પણ અનુમાનપ્રામાણ્યની પરીક્ષા કરેલી જ છે. તે લોકોની અનુમાનપ્રામાણ્યપરીક્ષાવિષયકકૃતિનો ધ્વંસ ગંગેશ ઉપાધ્યાયની આદ્યકૃતિવિશિષ્ટ જે પ્રથમ ક્ષણ તેમાં વિદ્યમાન જ છે. માટે પ્રથમક્ષણવૃત્તિકૃતિ કે જે તમને આદ્યકૃતિ તરીકે અભિપ્રેત છે તેમાં અનુમાનપ્રામાણ્યપરીક્ષાવિષયકકૃતિવિશિષ્ટક્ષણધ્વંસઅધિકરણક્ષણવૃત્તિત્વ જ રહેશે. પણ, અનુમાનપ્રામાણ્યપરીક્ષાવિષયકકૃતિવિશિષ્ટક્ષણધ્વંસઅનધિકરણક્ષણવૃત્તિત્વ

समवायसम्बन्धाऽवच्छिन्नवृत्तित्वम् । तत्कृतिनिरूपितत्वप्रवेशाद् आद्यत्वेनाऽभिमतकृतिभिन्नकृति-समवायिपूर्वाचार्यसमवेतानुमानप्रामाण्यपरीक्षागोचरकृतिक्षणध्वंसाधिकरणवृत्तित्वस्य आद्यत्वेनाऽ-भिमतकृतौ सत्त्वेऽपि न क्षतिः, पूर्वाचार्यवृत्तिकृतिनिरूपितसमवाये तत्कृतिनिरूपितत्वाभावात् ।

न च तत्कृतिसमवायिसमवेताऽनुमानप्रामाण्यपरीक्षागोचरं यत् तत्क्षणध्वंसाऽनधिकरणक्षण-वृत्तित्वमेव प्रवेश्यतामलं कृतिपदोपादाने ***नेति वाच्यम्;*** अनुमानप्रामाण्यपरीक्षागोचरेच्छादिक्षणध्वंसस्य तत्कृत्यधिकरणीभूतक्षणेऽपि सत्त्वेनाऽव्याप्त्यापत्तेः । तत्प्रवेशे तादृशकृतिक्षणध्वंसस्य तादृशक्षणेऽ-वृत्तित्वेनाऽव्याप्त्यभावात् ।

अनधिकरणत्वञ्च स्वरूपसम्बन्धावच्छिन्नाधिकरणत्वाभावरूपम्, तेन तत्कृतिसमवायिसमवेताऽ-नुमानप्रामाण्यपरीक्षागोचरकृतिक्षणध्वंसनिरूपित-समवायादिसम्बन्धावच्छिन्नाऽधिकरणत्वाभावविशिष्ट-द्वितीयादिक्षणवृत्तित्वस्य द्वितीयादिक्षणवृत्तिकृतौ सत्त्वेऽपि न क्षतिः ।

न चैवमपि तत्कृतिसमवायिसमवेताऽनुमानप्रामाण्यपरीक्षागोचरकृतिध्वंसाऽनधिकरणक्षणवृत्तित्वमेव निवेश्यतामलं क्षणपदोपादाने ***नेति वाच्यम्;*** कृतेः योग्यविभुविशेषगुणत्वमङ्गीकृत्य 'योग्यविभुविशेष-

●

नहीं रहे. आ रीते तमने अभिप्रेत आद्यत्वनुं लक्षण लक्ष्यमां अवृत्ति होवाथी अव्याप्ति दुर्वार बने. जो तत्कृतिसमवायिसमवेत कहेवामां आवे तो आ दोष रहेतो नथी. कारण के वाचस्पति मिश्र वगेरे अन्यपुरुषीय कृति ते ते कर्तामां समवेत छे. प्रस्तुतमां जे कृतिमां आद्यत्व अभिप्रेत छे ते तत्पदग्राह्य छे. तेना समवायी तो गंगेश उपाध्याय ज छे. नहीं के वाचस्पति मिश्र वगेरे अन्य पुरुषो पण. माटे, गंगेश उपाध्यायमां समवेत जे अनुमानप्रामाण्यपरीक्षाविषयककृति तेनाथी विशिष्ट जे - जे क्षणो तेनो ध्वंस द्वितीयादिक्षणोमां ज रहेशे. प्रथम क्षणमां नहीं रहे. माटे ते क्षणमां वृत्ति कृति एे अनुमानप्रामाण्यपरीक्षागोचरकृतिविशिष्ट(=समवायि)समवेतअनुमानप्रामाण्यपरीक्षा-विषयककृतिविशिष्टक्षणध्वंसअनधिकरणक्षणवृत्ति बनशे. माटे ते ज कृतिमां अभिप्रेत आद्यत्वनुं लक्षण जशे, अन्यमां नहीं जाय. आ रीते अव्याप्तिने अवकाश रहेतो नथी. फलतः तत्कृतिसमवायिसमवेत लखवुं पण जरूरी छे.

शब्दार्थ आ प्रमाणे - तत्कृतिसमवायिसमवेतनो प्रवेश करवाने कारणे अन्य पुरुषे करेली अनुमान प्रामाण्यनी परीक्षा पती गई होय, मतलब के तेनो ध्वंस गंगेश उपाध्यायनी प्रथमक्षणविशिष्टकृतिने समानाधिकरण होय तो पण अव्याप्ति नहीं आवे.

गुणानां स्वोत्तरवर्त्तिगुणनाश्यत्वम्' इति नियमवशेन कृतेः स्वोत्तरवर्त्तिगुणनाश्यत्वोपपादनेऽपि द्वितीयक्षणवृत्तिकृतौ तत्कृतिसमवायिसमवेताऽनुमानप्रामाण्यपरीक्षागोचरकृतिध्वंसाऽनधिकरणक्षणवृत्तित्वस्य सत्त्वेनाऽतिव्याप्त्यापत्तेः दुर्वारत्वात् । तत्प्रवेशे क्षणे स्वोत्तरवर्त्तिक्षणनिरूपितवृत्तित्वाभावस्य प्रसिद्धत्वेन द्वितीयक्षणे कृतिविशिष्टप्रथमक्षणध्वंसस्य सत्त्वान्नाऽतिव्याप्तिः ।

न चैवमपि तत्कृतिसमवायिसमवेताऽनुमानप्रामाण्यपरीक्षागोचरकृतिक्षणध्वंसाऽनधिकरणवृत्तित्वमेवोपादीयताम्, अलं क्षणपदे***नेति वाच्यम्;*** तादृशक्षणध्वंसाधिकरणत्वेन द्वितीयादिक्षणानामेव प्राप्त्या, आत्मादौ तादृशक्षणध्वंसस्याऽभावेन तत्र च द्वितीयादिक्षणवृत्तिकृतेः वृत्तित्वेन द्वितीयादिक्षणवृत्तिकृतौ अपि तत्कृतिसमवायिसमवेताऽनुमानप्रामाण्यपरीक्षागोचरकृतिक्षणध्वंसाऽनधिकरणात्मादिवृत्तित्वस्य सत्त्वादतिव्याप्त्यापत्तेः । तत्प्रवेशे आत्मादीनां क्षणत्वाभावेन तादृशाऽनधिकरणक्षणत्वेन प्रथमक्षणस्यैव प्राप्तेः तत्र च द्वितीयक्षणवृत्तिकृतेरसत्त्वान्नातिव्याप्तिः ।

एवमेव अधिकरणत्वाभावीयप्रतियोगिताऽवच्छेदकाऽधिकरणताऽवच्छेदकसम्बन्धौ वृत्तितानियामकसम्बन्धश्च प्रवेश्याः तत्कार्यञ्च स्वयमवसेय**मिति दिक्** ।

यद्यपि "आद्यकृतित्वं च स्वसमानविषयकस्वसमवायिसमवेतकृतिध्वंसाऽसमानकालीनकृतित्वम्, स्वम् = आद्यत्वेनाऽभिमतकृतिः । तथा च आद्यत्वेनाऽभिमतकृतिसमानविषयिणी आद्यत्वेनाऽभिमतकृतिसमवायिगङ्गेशोपाध्यायसमवेता या कृतिः तद्ध्वंसाऽसमानकालीनकृतित्वम् इति तदर्थः । भिन्नविषयककृतिध्वंसमादायाऽव्याप्तिपरिहाराय स्वसमानविषयकत्वप्रवेशः इत्यादिकं पदकृत्यं पूर्ववद् ऊह्यम्" - इत्येवमपि व्याख्यानं सम्भवति, ***तथापि*** द्वितीयक्षणे कृतिध्वंसस्याऽसत्त्वेन तदसमानकालीनत्वस्य तदनधिकरणकालवृत्तित्वरूपत्वेन च तादृशक्षणवृत्तिकृतौ स्वसमानविषयकस्वसमवायिसमवेतकृतिध्वंसाऽसमानकालीनत्वस्य सत्त्वादतिव्याप्त्यापत्तेः, तदसमानकालीनत्वस्य तदधिकरणकालाऽवृत्तित्वरूपत्वे तादृशकृतिध्वंसाधिकरणीभूततृतीयक्षणे द्वितीयक्षणवृत्तिकृतेः सत्त्वेनाऽतिव्याप्तिनिराकरणेऽपि द्वितीयक्षणवृत्तितावि‌शिष्टकृतौ तदापत्तेः अनिवार्यत्वात्, कृतावाद्यत्वस्यैवाऽत्र जिज्ञासितत्वेन कृतित्वस्य चाऽजिज्ञासितत्वेन व्याख्येयकोटौ तत्प्रवेशानौचित्याच्च तदुपेक्षैव ग्रन्थकृता कृता ।

अत एव "स्वातन्त्र्येणैवाद्यत्वलक्षणं क्रियताम्, किमर्थं कृतिनिष्ठत्वस्य व्याख्येयकोटौ प्रवेशः ?" ***इत्यारेकाऽपि समाहिता;*** कृतिनिष्ठाद्यत्वस्यैव स्वारस्येण जिज्ञासितत्वेन तत्प्रवेशे अनौचित्याभावात् । अत एव कृत्यादिघटितमपि लक्षणं सङ्गच्छते, कृतिभिन्ननिष्ठाद्यत्वस्याऽलक्ष्यत्वात् ।

य
शो
ल
ता

गू ढा *आरब्धत्वकथनेन प्रामाण्यपरीक्षाया वृत्तत्वनिरासेन तदुपयोगि-व्याप्तिग्रहोपायप्रतिपादनादेर्वैफल्यशङ्का निरस्ता ।*

●

ननु संवृत्ताऽनुमानप्रामाण्यपरीक्षाकारणीभूतेत्यादिरीत्यैव कथनं युक्तम्, अनुमानप्रामाण्यपरीक्षायाः आरब्धत्वकथनस्य निरर्थकत्वाद् इत्याशङ्कायामाह - **आरब्धत्वे**ति । यथा घटनिर्वृत्तौ घटकारण-विषयकाकाङ्क्षाऽपि निवर्तते तथा अनुमानप्रामाण्यपरीक्षायाः वृत्तत्वे = समाप्तत्वे तत्कारणीभूतस्य व्याप्तिग्रहोपायप्रतिपादनस्य तत्कारणीभूतस्य च व्याप्तिस्वरूपनिरूपणस्य अनाकाङ्क्षितत्वप्राप्त्या तन्निरूपणस्याऽसङ्गतत्वापत्तिरिति । यथा घटनिर्वृत्तौ तत्कारणाऽऽनयनस्य वैफल्यमेवं प्रकृतेऽपि अनुमानप्रामाण्यपरीक्षायाः निष्ठितत्वे तत्कारणीभूतव्याप्तिग्रहोपायप्रतिपादनादिकं वैफल्यमेवाभजेत् ।

य शो ल ता यदि आरब्धत्वं कथ्यते तदा तस्याऽनिष्ठितत्वं फलितं भवति, तथा च तत्कारणीभूतव्याप्ति-ग्रहोपायप्रतिपादनादेर्न वैफल्यम्, तस्य तदुपयोगित्वात्, तत्साहाय्येनैव चाऽनुमानप्रामाण्यपरीक्षायाः समाप्तत्वसम्भवात् । एवञ्चाऽऽरब्धत्वकथनं न निरर्थकमित्याशयेनाऽऽह - **आरब्धत्वकथनेन** = अनुमानप्रामाण्यपरीक्षा आरब्धा, न तु समाप्तेति ज्ञापकस्याऽऽरब्धपदस्य दीधितिकृता कथितत्वेन = समारब्धाऽनुमानप्रामाण्येत्याद्युक्त्या अनुमानप्रामाण्यपरीक्षायाः आरब्धत्वकथनेनेति यावत्, **प्रामाण्य-परीक्षायाः** = अनुमानप्रामाण्यपरीक्षायाः **वृत्तत्वनिरासेन** = समाप्तत्वनिरासेन **तदुपयोगिव्याप्ति-ग्रहोपायप्रतिपादनादेः** = अनुमानप्रामाण्यपरीक्षोपयोगिव्याप्तिग्रहोपायप्रतिपादनादेः आदिग्रहणाद् व्याप्तिस्वरूपनिरूपणादेर्ग्रहः, व्याप्तिस्वरूपनिरूपणस्य व्याप्तिग्रहोपायप्रतिपादनं प्रति कारणत्वेन, अनुमानप्रामाण्यपरीक्षां प्रति साक्षात्कारणत्वाऽभावेन कारणत्वं विहाय, उपयोगित्वस्य साक्षात्परम्पर-कारणसाधारणत्वेन, तदुपादानमतः एवादिपदेन व्याप्तिस्वरूपनिरूपणस्य ग्रह इत्यवधेयम् ।

●

✲ આરબ્ધ કહેવાનું પ્રયોજન ✲

वि ना म्रा **પ્રશ્ન** :- દીધિતિકારે '**समारब्ध**' જણાવેલ છે. એના કરતા '**कृत**' કહ્યું હોત તો શું વાંધો ? આરબ્ધ કહેવાનું વિશેષ પ્રયોજન શું ? ઉલટું આરબ્ધ તો આરંભથી ઘટિત છે અને આરંભની વ્યાખ્યા તમે કરી તે મુજબ તો આદ્યકૃતિ થાય, એમાં પાછું આદ્યત્વનું લક્ષણ.... ઘણું ગૌરવ આવે. એના કરતા કૃત લખવામાં ઘણું લાઘવ છે. વિશેષ પ્રયોજન ન હોય તો આરબ્ધ શબ્દનો પ્રયોગ દીધિતિકારે ન કરવો જોઈએ.

ઉત્તર :- (**आर.**) આરબ્ધ કહીને 'પરીક્ષા કૃત નથી' - તેવું તો ખાસ જણાવવું

वैफल्यशङ्का = निष्फलत्वशङ्का **निरस्ता** । कथनोत्तरतृतीयार्थप्रयोज्यत्वस्य निरासेऽन्वयः, निरासपदोत्तरतृतीयार्थप्रयोज्यत्वस्य च वैफल्यशङ्काप्रतियोगिकनिरासेऽन्वयः, एवञ्च प्रामाण्य-परीक्षोपयोगिव्याप्तिग्रहोपायप्रतिपादननिष्ठवैफल्यविषयकशङ्का आरब्धत्वकथनप्रयोज्यप्रामाण्य-परीक्षानिष्ठवृत्तत्वप्रतियोगिकनिरासप्रयोज्यनिरासनिरूपितप्रतियोगित्वविशिष्टेत्यर्थः ।

ननु आरम्भविशेषणत्वेन समीचीनत्वम् उक्तं भवता, तत् समीचीनत्वं किम् ? अभिलषितत्वम्

●

છે. મતલબ કે અનુમાનપ્રામાણ્યની પરીક્ષા શરૂ થઈ છે, તેનો આરંભ થઈ ગયો છે. પણ, પૂર્ણ નથી થઈ ગઈ. જો અનુમાનપ્રામાણ્યની પરીક્ષા પૂર્ણ થઈ ગઈ હોય, તેનું પરિણામ આવી ગયું હોય તો પરીક્ષામાં ઉપયોગી એવું વ્યાપ્તિગ્રહના ઉપાયનું પ્રતિપાદન અને તેમાં ઉપયોગી વ્યાપ્તિસ્વરૂપનું નિરૂપણ નક્કામું થઈ જાય. કારણ કે અનુમાનપ્રામાણ્યની પરીક્ષા વિદ્યમાન હોય, પૂર્ણ ન થઈ હોય તો શ્રોતાની જિજ્ઞાસા ઉત્થિત જ હોય. તેના ઉપાયોને જાણવાની જિજ્ઞાસા પણ વિદ્યમાન જ હોય. જો એમ કહી દો કે - 'અનુમાનપ્રામાણ્યની પરીક્ષા પૂર્ણ થઈ ગઈ' તો શ્રોતાની જિજ્ઞાસા શાંત થઈ જાય. પછી જો તાદૃશપરીક્ષામાં ઉપયોગી ઉપાયોનું પ્રતિપાદન કરવામાં આવે તો તે માટે શ્રોતાની જિજ્ઞાસા ઉત્થાપ્ય બને. અર્થાત્ શાંત જિજ્ઞાસાને પુનઃ ઉત્થિત કરવી પડે, જે દોષરૂપ છે. ગ્રંથના પ્રતિપાદ્ય વિષયનું સાતત્ય તેમાં જળવાતું નથી માટે, દીધિતિકારે **आरब्ध** કહ્યું. પણ, **कृत** કે **वृत्त** [वृत् (वर्त्) ધાતુનું કર્મણિભૂતકૃદન્ત] ન કહ્યું.

शब्दार्थ - અનુમાનપ્રામાણ્યપરીક્ષાને આરબ્ધ કહેવા દ્વારા (એટલે કે તેમાં આરબ્ધત્વ છે - તેવું કહેવા દ્વારા) અનુમાનનિષ્ઠપ્રામાણ્યની પરીક્ષા પૂર્વવૃત્ત છે - તેવી શંકાનો નિરાસ થઈ ગયો. મતલબ કે હજુ અનુમાનનિષ્ઠપ્રામાણ્યની પરીક્ષા વિદ્યમાન જ છે, તેનો આરંભ થઈ ગયો છે. 'પરીક્ષા પૂર્વવૃત્ત છે (= પૂર્ણ થઈ ગઈ છે. પહેલા જ પૂરી થઈ ગઈ છે)'- આવી શંકાનો નિરાસ કરવા દ્વારા "અનુમાનનિષ્ઠપ્રામાણ્યની પરીક્ષામાં ઉપયોગી વ્યાપ્તિગ્રહના ઉપાયોનું પ્રતિપાદન વગેરે (આદિપદથી વ્યાપ્તિગ્રહઉપાયના પ્રતિપાદનમાં ઉપયોગી વ્યાપ્તિસ્વરૂપનિરૂપણનું ગ્રહણ કરવું) નક્કામા છે, વિફલ છે. કારણ કે અનુમાનપ્રામાણ્યની પરીક્ષા તો પૂરી થઈ ગઈ છે. હવે તેને બતાવવાનો ફાયદો શું ?"- આવી શંકાનો પણ નિરાસ થઈ ગયો.

❀ समीचीनत्वनी व्याख्या ❀

(समी.) પૂર્વે 'सम्' ઉપસર્ગનો અર્થ સમીચીનત્વ છે' - તે જણાવી દીધું. સમીચીનત્વ,

गू *समीचीनत्वञ्चेष्टसाधनत्वादिप्रमाजन्यत्वम् । तेन कृतेः संवादित्व-*

●

= અભિલાષાવિષયત્વં સમીચીનત્વમિતિ ચેત્ ? મૂઢજનસ્ય વિષભક્ષણાદેઃ સ્વશક્તિમતિક્રમ્ય ક્રિયમાણસ્ય ચ સમીચીનત્વાપત્તેઃ ઇત્યાશઙ્કાયામાહ – **समीचीने**તિ । 'इदं मदिष्टसाधनम्' - इतिज्ञानजन्यः यः आरम्भः स एव समीचीनः, तादृशज्ञानजन्यत्वमेव तत्रत्यं समीचीनत्वम् । ***न च*** મૂઢપુરુષસ્ય વિષભક્ષણાદિવિશેષ્યકેષ્ટસાધનત્વજ્ઞાનસત્ત્વે તજ્જન્યત્વસ્ય વિષભક્ષણાદૌ સત્ત્વાત્તત્ર સમીચીનત્વલક્ષણાતિવ્યાપ્તિ***रिति वाच्यम्;*** તાદૃશજ્ઞાનસ્ય ભ્રમરૂપત્વાત્, અત્ર ચ પ્રમાજ્ઞાનસ્યૈવ વિવક્ષિતત્વાત્। તથા ચ ઇષ્ટસાધનત્વાદિપ્રમાજ્ઞાનજન્યત્વમેવ સમીચીનત્વમ્ ।

य ***न च*** શક્તિમતિક્રમ્ય પ્રવૃત્તસ્ય જનસ્ય સ્વકાર્યે ઇષ્ટસાધનત્વજ્ઞાનમસ્તિ એવેતિ તત્રાऽતિવ્યાપ્તિ***रिति*** शो ***वाच्यम्;*** આદિપદેન કૃતિસાધ્યત્વાદિપ્રકારકપ્રમાજ્ઞાનસ્યાऽપિ ગ્રહણાત્, શક્તિમતિક્રમ્ય પ્રવૃત્તસ્ય ल જનસ્ય 'इदं मत्कृतिसाध्यम्' ઇતિ જ્ઞાનાભાવાત્ તાદૃશજ્ઞાનસત્ત્વેऽપિ તસ્યાऽપ્રમાત્વાન્નાતિવ્યાપ્તિઃ ।

ता આરમ્ભસ્ય સમીચીનત્વે તદનુકૂલકૃતેઃ ઇષ્ટફલજનનં પ્રતિ અવન્ધ્યોપાયત્વસિદ્ધ્યા તાદૃશ-કૃતિવિષયીભૂતાऽનુમાનપ્રામાણ્યપરીક્ષા-તત્કારણીભૂતવ્યાપ્તિગ્રહોપાયપ્રતિપાદન-તત્કારણીભૂતવ્યાપ્તિ-સ્વરૂપનિરૂપણાનામપિ સફલત્વસિદ્ધેઃ એતેષામુપાદેયત્વં દીધિતિકૃતા વ્યક્તીકૃતમ્ ।

અત એવ આરમ્ભનિષ્ઠસમીચીનત્વલક્ષણં વિહાય ગ્રન્થકૃતા સાર્વત્રિકસમીચીનત્વલક્ષણમુપાદર્શિ ઇત્યવધેયમ્ ।

યુક્તઞ્ચૈતત્, ધર્મવિષયકકૃતેઃ સમીચીનત્વે ધર્મ-તત્કારણીભૂતરાગદ્વેષાદિત્યાગાદીનાં સફલત્વં સિધ્યત્યેવ । ધર્માદીનાં નિરર્થકત્વે ધર્મવિષયકકૃતેરપિ અસમીચીનત્વમેવ સ્યાત્ । એવમત્રાપિ।

●

જે આરંભમાં રહે છે તે, કિંસ્વરૂપ છે ? તે હવે બતાવે છે. ગંગેશ ઉપાધ્યાયનો આરંભ સમીચીન છે. એટલે કે 'આ મારો આરંભ મારા ઈષ્ટનો સાધક બનશે, મારા ઈષ્ટમાં આ કારણ છે'- આવા સાચા જ્ઞાનથી જન્ય ગંગેશ ઉપાધ્યાયનો આરંભ છે. મતલબ વિ કે અવિચારી પ્રવૃત્તિ ગંગેશ ઉપાધ્યાયે નથી કરી. કિંતુ 'આ મારા ઈષ્ટમાં = મોક્ષાદિમાં ल સાધન છે' - એવું જ્ઞાન થયું પછી પ્રવૃત્તિ કરી છે. માટે, ગંગેશ ઉપાધ્યાયનો આ આરંભ સમીચીન છે.

भ्रा

અહીં આદિ શબ્દથી મત્કૃતિસાધ્યતાનું જ્ઞાન પણ લઈ લેવું. એટલે કે 'આ કાર્ય ઈષ્ટનું સાધન છે' - આવું જ્ઞાન થવા છતાં પણ જો 'મારા દ્વારા આ કામ થઈ શકશે કે નહીં ? મારી કૃતિ દ્વારા સાધ્ય છે કે નહીં ?' - આ પ્રમાણે વિચારવામાં ન આવે

लाभेन तद्विषयपरीक्षा-तत्कारणव्याप्तिग्रहोपायप्रतिपादन-तत्साधन-व्याप्तिस्वरूपनिरूपणानां फलवत्त्वलाभेन उपादेयत्वव्यक्तिः ।

●

एतदेव दर्शयति - **समीचीनत्वञ्च** = समारब्धपदार्थघटकीभूतम् अनुगतं समीचीनत्वञ्च **इष्टसाधनत्वादिप्रमाजन्यत्वम्** = 'इदं मदिष्टसाधनम्', 'इदं मत्कृतिसाध्यम्' - इत्यादिप्रमाज्ञान-जन्यत्वम्, अत्रादिपदेन कृतिसाध्यत्वपरिग्रहात् । **तेन** = आरम्भस्य समीचीनत्वेन समीचीनत्वस्य च इष्टसाधनत्वादिप्रमाजन्यत्वरूपत्वेन **कृतेः** = आरम्भानुकूलकृतेः **संवादित्वलाभेन** = नियत-फलजनकत्वलाभेन, इष्टसाधनत्वकृतिसाध्यत्वादिप्रमाजन्यस्य फलजननं प्रति अवन्ध्यत्वात् **तद्विषयपरीक्षा-तत्कारणव्याप्तिग्रहोपायप्रतिपादन-तत्साधनव्याप्तिस्वरूपनिरूपणानां** = तादृशसंवादिकृतिविषयीभूतानुमानप्रामाण्यपरीक्षा-तादृशपरीक्षाकारणीभूतव्याप्तिग्रहोपायप्रतिपादन -तादृशप्रतिपादननिदानीभूतव्याप्तिस्वरूपनिरूपणानां **फलवत्त्वलाभेन** = सफलत्वप्राप्त्या **उपादेय-त्वव्यक्तिः** = 'अनुमानप्रामाण्यपरीक्षा-व्याप्तिग्रहोपायप्रतिपादन-व्याप्तिस्वरूपनिरूपणानि प्रेक्षावद्भिः

●

તો તે આરંભ દુઃસાહસરૂપ બની જવાને કારણે અનુકરણીય ન બને. માટે, કૃતિસાધ્યતાનું જ્ઞાન પણ જરૂરી છે. આવા ઈષ્ટસાધનતાના, કૃતિસાધ્યતાના ઈત્યાદિના પ્રમા જ્ઞાનથી તે જન્ય છે, માટે તે સમીચીન છે. તથા પ્રસ્તુતમાં પ્રમા શબ્દ વાપર્યો છે, જ્ઞાન નહીં. તેના દ્વારા ઈષ્ટસાધનતાદિના ભ્રમનું વારણ કર્યું. જો ઈષ્ટસાધનતા આદિના ભ્રમથી આરંભ કરેલ હોય તો તે સમીચીન ન પણ હોઈ શકે.

❁ કાર્ય સમીચીન તો કારણ પણ સમીચીન ❁

(**तेन.**) આરંભ = આદ્યકૃતિ સમીચીન છે - તેવું કહેવા દ્વારા 'ગંગેશ ઉપાધ્યાયની કૃતિ એ સંવાદી છે = ફલ માટે અવંધ્ય કારણ છે' - આવું નક્કી થાય છે. કારણ કે ગંગેશ ઉપાધ્યાયે 'આ મારા ઈષ્ટનું સાધન છે' - એમ જાણી પ્રસ્તુત કૃતિ કરી છે. એનો મતલબ એ જ કે આ ઈષ્ટ પ્રત્યે સંવાદી સાબિત થશે. આમ, જે રીતે ગંગેશ ઉપાધ્યાયની કૃતિ એ સંવાદી છે તે રીતે તે કૃતિનો જે વિષય અનુમાનનિષ્ઠપ્રામાણ્યની પરીક્ષા અને તે પરીક્ષામાં ઉપયોગી વ્યાપ્તિજ્ઞાનના ઉપાયોનું પ્રતિપાદન તે પણ સંવાદી છે - ફલોત્પાદક છે - એવું પ્રાપ્ત થયું. તે જ રીતે પ્રસ્તુત વ્યાપ્તિસ્વરૂપનું નિરૂપણ પણ ફલવત્ છે, માટે તે ઉપાદેય છે - આ પ્રમાણે નિર્દ્ધારિત થયું. આમ, પ્રસ્તુતવ્યાપ્તિસ્વરૂપનિરૂપણ વગેરેમાં પણ ઉપાદેયતાની અભિવ્યક્તિ દીધિતિકારે સમારબ્ધમાં **सम्** ઉપસર્ગના પ્રયોગ દ્વારા કરી.

अनुमानप्रामाण्यपरीक्षेति । *परमतनिराकरणपूर्वं स्वमतव्यवस्थापनं परीक्षा* ।

●

उपादेयानि' - इति व्यक्तीभूतम् = अभिव्यक्तीभूतं दीधितिकृदुक्त्येत्यर्थः ।

ज्ञानत्वस्य भ्रम-प्रमासाधारणत्वेन प्रमात्वग्रहणमत्र । अत एव स्मृतेरपि प्रमात्वेन इष्टसाधनत्वादिविषयकस्मृतिजन्ये नाऽव्याप्तिः, तदुक्तं **विश्वनाथपञ्चाननभट्टाचार्येण न्यायसिद्धान्तमुक्तावल्यां** साक्षेप-परिहारं स्मृतेरपि प्रमात्वसिद्ध्यर्थम् - "तद्वद्विशेष्यकत्वे सति तत्प्रकारकं ज्ञानं प्रमेत्यर्थः। ***अथैवं*** स्मृतेरपि प्रमात्वं स्यात्, ततः किमिति चेत् ? तथा सति तत्करणस्याऽपि प्रमाणान्तरत्वं स्यादिति ***चेद् ? न***, यथार्थानुभवकरणस्यैव प्रमाणत्वेन विवक्षितत्वाद्" इति (न्या.सि.मु.कारिका - १३६, पृ. १७८) ।

समारब्धेति व्याख्यायाऽनुमानप्रामाण्यपरीक्षेति व्याचिख्यासुः उपक्रमते - **अनुमानेत्यादि** । **परमतनिराकरणपूर्वं** = पराऽभ्युपगमस्य निराकरणं कृत्वा **स्वमतव्यवस्थापनं** = स्वमतस्य व्यवस्थापनं **परीक्षा** । परीक्षाफलं कदाग्रहादिविनिर्मुक्तपरस्य स्वमतस्वीकारः । केवलं स्वमतस्यैव व्यवस्थापने पराऽभ्युपगततत्त्वादरस्याऽक्षीणत्वेन न परीक्षाफलं लभ्यते, अत एव न तादृशव्यवस्थापनस्य परीक्षात्वम् । केवलं परमतखण्डनेऽपि न स्वमतादरजन्म येन परीक्षाफलं लभ्येत, अत एव न तादृशपरमतनिराकरणस्य परीक्षात्वम् ।

"निराकरणञ्च दृष्टेष्टबाधितत्वाभिव्यक्त्यनुकूलव्यापारः, व्यवस्थापनञ्च दृष्टेष्टाऽबाधितत्वाभिव्यक्त्यनुकूलव्यापारः, दृष्टत्वं = प्रत्यक्षाद्यविरुद्धत्वम्, इष्टत्वम् = आप्तागमाद्यविरुद्धत्वमिति ध्येयम् । अत एव तर्कमात्रकृतनिराकरणम् आपातत एव, न तात्त्विकं तत्, आगममात्रकृतनिराकरणमपि तथैव । एवमेव व्यवस्थापनमपि ज्ञेयम् । परमतनिराकरणं विना स्वमतव्यवस्थापन-

●

❋ પરીક્ષાનું લક્ષણ, લક્ષણની પરીક્ષા ❋

(**અનુ.**) સમારબ્ધ શબ્દની અંદર રહેલ રહસ્યને આવિર્ભૂત કરી હવે અનુમાનપ્રામાણ્યપરીક્ષા પદની વ્યાખ્યા કરે છે. જગદીશે કરેલી 'પરમતનિરાકરણપૂર્વક સ્વમત મુજબ અનુમાનમાં પ્રામાણ્યની સિદ્ધિ એ અનુમાનપ્રામાણ્યની પરીક્ષા' - આવી ફક્ત અનુમાનનિષ્ઠપ્રામાણ્યપરીક્ષાસ્થલીય વ્યાખ્યાનું અવલંબન લઈ પરીક્ષાની સર્વસ્થલીય વ્યાખ્યા બતાવતા જણાવે છે કે - બીજાના મતના નિરાકરણ પૂર્વક પોતાના મતનું વ્યવસ્થાપન કરવું તે પરીક્ષા. હવે પ્રસ્તુત વ્યાખ્યામાં જ રહેલ દરેક પદનો તાત્પર્યાર્થ

परमतं = परकीयमतिविषयः अनुमानप्रामाण्याभावः, तन्निराकरणं = तज्ज्ञानेऽप्रामाण्यज्ञापनम्।

●

स्याऽशक्यत्वात्, 'इदं न तत्त्वम्' इति ज्ञाते 'किं तत्त्वम्' - इत्याकाङ्क्षोदयेन परमतनिराकरणाऽनन्तरमेव स्वमतव्यवस्थापनस्यौचित्यात्, आदावेव स्वमतव्यवस्थापने 'इदमेव कथं तत्त्वम् ?' इति जिज्ञासायाः प्रतिबन्धकत्वाच्च परमतनिराकरणस्यादावुपन्यासः" - इत्यभियुक्ताः । शब्दभेदेन एतदेव ग्रन्थकृद्वक्ष्यति ।

अत्र परीक्षाया एव जिज्ञासितत्वेन परीक्षालक्षणमुपदर्शितम्, तथा च "अनुमानप्रामाण्यपरीक्षा = परमतनिराकरणपूर्वकं स्वमतेनाऽनुमानप्रामाण्यसाधनम्" इति व्याख्यानोपेक्षा उचितैव । सामान्येन परीक्षालक्षणकथनाऽनन्तरं प्रकृताऽनुमानप्रामाण्ये तद्योजनस्योचितत्वादग्रे तद्दर्शयिष्यतीत्यवधेयम्। 'परीक्षा = अनुमानप्रामाण्याभावनिराकरणपूर्वकाऽनुमानप्रामाण्यव्यवस्थापनम्' इतिव्याख्यानमपि निराकृतम्, अनुमानप्रामाण्येत्यस्य वैफल्यापत्तेः ।

ननु किमत्र परमतत्वं ? किं च निराकरणादिकम् ? अनुमानप्रामाण्ये च कथं तद्योजनेत्याह - **परमतमिति** । 'ज्ञातः घटः' इत्यत्र निष्ठाप्रत्ययस्य यथा विषयत्वम् अर्थः, तथाऽत्रापि विषयत्वमेव निष्ठाप्रत्ययार्थः, तथा च 'अनुमानम् अप्रमाणम्' इत्यादिचार्वाकादिपरमतिविषयः अनुमानप्रामाण्याभाव एव परमतम्, तस्य निराकरणम् = 'अनुमानम् अप्रमाणम्' इत्याकारकं चार्वाकादीनां ज्ञानं भ्रमः = अप्रमाणमित्येवं तज्ज्ञाने अप्रामाण्यख्यापनम् इत्याशयेनाह - **परमतं = परकीयमतिविषयः अनुमानप्रामाण्याभावः** = चार्वाकादिपरवादिनिष्ठाऽनुमानप्रामाण्याभावविषयकमतिविषयः अनुमानप्रामाण्याभावः इत्यर्थः ।

ननु 'परमतं = परकीयमतिविषयः' इत्येवोच्यताम्, अलमनुमानप्रामाण्याभावोपादाने***नेति चेद् ? न***, 'अयं घटः' इत्यादिप्रमाज्ञानस्य चार्वाकादिनिष्ठस्य विषयः यः घटः तन्निराकरणस्याऽशक्यत्वात्, प्रकृते अनुमानप्रामाण्याभावस्यैव निराकृतत्वात्, अनुमानप्रामाण्ये परीक्षालक्षणयोजनस्य क्रियमाणत्वाच्च । मतिशब्दस्य ज्ञानपर्यायत्वेन परकीयाऽनुमानाऽप्रामाण्यविषयकज्ञानस्य भ्रमरूपत्वेऽपि तत्र मतिशब्दप्रयोगः औचित्यं बिभर्ति ।

●

અને પ્રસ્તુતમાં તેની યોજના બતાવે છે. પરમત = બીજાની બુદ્ધિનો વિષય. પ્રસ્તુતમાં ચાર્વાકાદિની બુદ્ધિનો વિષય જે અનુમાનમાં પ્રામાણ્યનો અભાવ તેનું નિરાકરણ કરવું એટલે કે ચાર્વાકનું પોતાનું જે જ્ઞાન છે, પોતાની જે માન્યતા છે તેમાં અપ્રામાણ્યની

ગૂ ઢા
ય શો લ તા
વિ ન ભ્રા

तन्निराकरणं = तज्ज्ञानेऽप्रामाण्यज्ञापनम्, तथा च 'परकीयमतिविषयाऽनुमानप्रामाण्याभाव-
य विषयकज्ञानम् अप्रमाणम्' इत्येतज्ज्ञापनमेव परकीयमतिविषयनिराकरणम् । अनुमानप्रामाण्याभावस्य
शो असत्त्वेन तन्निराकरणस्याऽनुचितत्वाद् अनुमानप्रामाण्याभावविषयकज्ञानस्यैव निराकरणौचित्यात्
'तन्निराकरणं = तत्राऽप्रामाण्यज्ञापनम्' - इतिव्याख्यानमुपेक्ष्य 'तन्निराकरणं = तज्ज्ञानेऽप्रामाण्य-
ल ज्ञापनम्' इति व्याख्याने आदरः दर्शितः । तज्ज्ञानेऽपि अप्रामाण्यस्य स्वतः एव विद्यमानत्वेन
ता न तदुत्पादनं सम्भवति । किन्तु नैयायिकमते अप्रामाण्यस्याऽपि परतोग्राह्यत्वेन तज्ज्ञापनमेवाऽ-
नुमानादिना कर्तव्यम् । अत एव गङ्गेशोपाध्यायेन न चार्वाकादिनिष्ठज्ञाने अप्रामाण्यमुत्पादितम्,

●

= ભ્રમત્વની સિદ્ધિ કરવી. એટલે કે ચાર્વાકની 'અનુમાન અપ્રમાણ છે, ભ્રમ છે' - આવી માન્યતા ભ્રમરૂપ છે, દોરડામાં સાપની બુદ્ધિની જેમ મિથ્યા છે, કારણ કે તેનો વિષય મિથ્યા છે - તેવું સાબિત કરવું, તે જ પરમતનું નિરાકરણ. ટૂંકમાં, અનુમાન પ્રામાણ્યનો અભાવ અપ્રમાણ છે, પ્રમાણસાધ્ય નથી - એવું સાબિત કરવું.

પ્રશ્ન :- તમે જે પરમતનો અર્થ પરમતિવિષય કરો છો તે સંગત નથી. કારણ કે પ્રસ્તુતમાં તત્ત્વચિંતામણિકારે ચાર્વાકની જે બુદ્ધિ = જ્ઞાન તેનું નિરાકરણ કરેલ છે, મતલબ કે ચાર્વાકે '**अनुमानं न प्रमाणम्, प्रमाणाभासत्वात्**' - આવા પ્રકારના જે અનુમાનો
વિ આપેલા છે તેનું ખંડન કરેલ છે. આ બુદ્ધિનો જે વિષય અનુમાનપ્રામાણ્યાભાવ તે તો
ન મિથ્યા જ છે, શશશૃંગની જેમ અસત્ જ છે. તેનું શું નિરાકરણ કરવાનું હોય ? મતલબ
કે કોઈ માણસ જો માનતો હોય કે 'શશશૃંગ દુનિયામાં છે' તો તેની માન્યતાનું
મા નિરાકરણ કરવાનું હોય, નહીં કે તેની માન્યતાના વિષયભૂત શશશૃંગનું નિરાકરણ.
કારણ કે તે તો સ્વયં નિરાકૃત છે.

તથા ગંગેશ ઉપાધ્યાયે પણ ચાર્વાકના અનુમાનનું જ ખંડન કર્યું છે. અનુમાનપ્રામાણ્ય-અભાવનું કે જે તેના અનુમાનનો વિષય બને છે તેનું નહીં. જો કે અર્થાપત્તિ દ્વારા તે વાત સાબિત થઈ જ જાય અને મતિ અપ્રમાણ ઠરવાથી મતિવિષય પણ અપ્રમાણ ઠરી જ જાય તો પણ પ્રસ્તુતમાં સાક્ષાત્ મતિમાં = અનુમતિમાં જ દોષ દેખાડ્યા છે. માટે, તેવા પ્રકારની પરમતનિરાકરણની વ્યાખ્યા બતાવવી વધુ વ્યાજબી ઠરે.

નિરાકરણ = તેના જ્ઞાનને અપ્રમાણ ઠેરવવું - આવો અર્થ સ્વીકારીએ તો પછી પરમતનિરાકરણ = પરકીયમતિવિષયકજ્ઞાનઅપ્રામાણ્યજ્ઞાપન - આવો અર્થ ફલિત થાય. સ્પષ્ટ છે કે આ અર્થ ગુરુ ઠરે છે. પરકીયમતિમાં અપ્રામાણ્યજ્ઞાપન = પરમતનિરાકરણ -

यद्वा परमतं = परमतिः, सा च 'नानुमानं प्रमाणम्' इत्याकारिका, तन्निराकरणं = तत्राप्रामाण्यज्ञापनम्, तच्चाऽसिद्ध्याद्युद्भावनम् ।

●

किन्तु जिज्ञासूनां तज्ज्ञापनमेव कृतम् । अप्रामाण्यस्य स्वतोग्राह्यत्वे तु तज्ज्ञापनमनुचितमेवेति ***दिक्*** ।

ननु [1]द्राविडप्राणायामः किमर्थं भवता क्रियते ? '**परमतं = परकीयमतिविषयः तन्निराकरणं = तज्ज्ञानेऽप्रामाण्यज्ञापनमि**'त्युक्त्या 'परमतनिराकरणं = परकीयमतिविषयविषयकमत्य-प्रामाण्यज्ञापनम्' इति फलितं भवति, विषयप्रवेशमादृत्य मतेः वारद्वयोपादानं निरर्थकमत्र, 'परकीयमत्यप्रामाण्यज्ञापनं = परमतनिराकरणम्' इत्यस्यैव उचितत्वादित्याशङ्कायां द्वितीय-कल्पमुपदर्शयति - **यद्वेति** । **परमतं = परमतिः** = चार्वाकादिज्ञानम्, तच्च घटादिविषयकं प्रमाऽपि सम्भवतीति तद्व्यवच्छेदायाह - **सा चेति** । **सा** = परमतिः '**अनुमानं न प्रमाणम्' इत्याकारिका** ग्राह्या । **तन्निराकरणं = तत्राऽप्रामाण्यज्ञापनम्** = 'अनुमानं न प्रमाणम्' इत्याकारकमतौ अप्रामाण्यज्ञापनम् । **तच्च** = अप्रामाण्यज्ञापनञ्च **असिद्ध्याद्युद्भावनम्** ।

अयमाशयः - 'अनुमानं न प्रमाणम्, प्रमितिकरणताऽवच्छेदकधर्मशून्यत्वाद्' - इत्यनुमानप्रयोगः चार्वाकेणोपदर्शितः, तथा च 'अनुमानं न प्रमाणम्...' इत्याद्यनुमितिरेव परमतिः, तत्र च हेतौ

●

આ અર્થ જ સીધો અને લઘુ સિદ્ધ થાય.

❋ પરીક્ષા લક્ષણનો અન્યથા અર્થ ❋

ઉત્તર :- (**यद्वा.**) તમારી આ શંકાને ધ્યાનમાં રાખીને જ **यद्वा** કહી અન્ય વિકલ્પ દર્શાવતા જણાવે છે કે પરમત = પરની મતિ = ચાર્વાક વગેરેની બુદ્ધિ/અનુમિતિ. તે 'અનુમાન પ્રમાણ નથી...' ઈત્યાદિ આકારિકા છે. તેનું નિરાકરણ કરવું એટલે કે તે અનુમાન પ્રયોગને અપ્રમાણ સાબિત કરવો, તેમાં અપ્રામાણ્ય જણાવવું. અને અપ્રામાણ્યજ્ઞાપન એટલે જ ચાર્વાકના અનુમાન પ્રયોગમાં અસિદ્ધિ, બાધ વગેરે દોષો બતાવવા. જેમ કે ચાર્વાકે અનુમાન પ્રયોગ કર્યો કે '**अनुमानं न प्रमाणम्, प्रमाणाऽऽभासत्वात्**' - આ અનુમાન પ્રયોગમાં પ્રમાણાભાસત્વ હેતુ પક્ષમાં રહેતો જ નથી. કારણ કે અનુમાન પ્રમાણ છે, પ્રમાણાભાસ નહીં. તે જ રીતે અપ્રામાણ્ય સ્વરૂપ સાધ્ય પણ પક્ષમાં નહીં રહે. કારણ કે તેમાં પ્રામાણ્ય નિશ્ચિત છે, ક્લૃપ્ત છે = પ્રમાણસિદ્ધ છે. આમ, ચાર્વાકની મતિ

---

१. ऋजुपथं त्यक्त्वा वक्रपथाश्रयणम् । प्राणायामस्य द्राविडपद्धतौ तथा क्रियते इति एवं नाम ।

असिद्ध्यादिदोषोद्भावनमेव तत्राऽप्रामाण्यज्ञापनम् । असिद्धिपदेन स्वरूपाऽसिद्धिरत्र विवक्षिता, स्वरूपाऽसिद्धिः = पक्षे हेत्वभावः हेत्वभाववत्पक्षो वा, तथा च अनुमाने प्रमितिकरणतावच्छेदक-धर्मशून्यत्वाभावसाधनेन असिद्धिदोषोद्भावनम् एव तत्राऽप्रामाण्यज्ञापनम् । आदिपदेन बाधादीनां ग्रहणम् । बाधः = पक्षे साध्याभावः, साध्याभाववत्पक्षः वा । 'प्रामाण्याभावलक्षणसाध्यस्य अनुमानेऽसत्त्वाद् बाधः भवत्यत्रे'त्युद्भावनं बाधदोषस्य तत्राऽप्रामाण्यज्ञापनमिति फलितम् । एवमेवाऽन्यदप्यूह्यम् ।

अत एव "गङ्गेशोपाध्यायेन चार्वाकस्थापिताऽनुमानप्रयोगा एव तत्रासिद्ध्यादिदोषोद्भावनेन खण्डिताः, न तु तदीयमतिविषयः अनुमानप्रामाण्याभावः, तथा च 'परमतं = परकीयमतिविषयः' इत्यर्थकरणे गङ्गेशोपाध्यायकृतानुमानप्रामाण्यनिरूपणस्य परीक्षात्वाऽसङ्गतेः, निराकरणस्य 'तज्ज्ञानेऽप्रामाण्यख्यापनमि'त्यर्थकरणे उक्तदोषाभावेऽपि तादृशार्थस्य लक्षणालभ्यत्वेनानुपादेयत्वाद्" ***इति शङ्का अपहस्तिता;*** 'परमतं = परकीयमतिः' इत्यर्थकरणे उक्तदोषाभावात् ।

न च परमतस्य परमतिरित्यर्थः कथं भवति ? ***इति वाच्यम्;*** भावे निष्ठाप्रत्ययस्य सम्भवेन भावप्रधाननिर्देशाल्लक्षणाया वाऽऽश्रयणात्तादृशार्थलाभसम्भवात् ।

एवञ्च परमतनिराकरणं = चार्वाकादिकल्पिताऽनुमानप्रामाण्याभावसाधकहेत्वादा असिद्ध्याद्युद्भावनमिति फलितम् ।

ननु परमतनिराकरणपूर्वकत्वस्य कोऽर्थः ?

दण्डपूर्वकः घटः इत्यत्र यथा दण्डजन्यत्वं दण्डपूर्वकत्वस्याऽर्थः तथाऽत्र परमतनिराकरण-जन्यत्वं परमतनिराकरणपूर्वकत्वस्याऽर्थः इति चेत् ?

तथा सति परमतनिराकरणस्य वैयर्थ्यापत्तेः, स्वमतव्यवस्थापनकारणरूपत्वेन परमत-निराकरणस्य स्वमतव्यवस्थापने कृते तत्पूर्वं परमतनिराकरणस्याऽपि अवश्यम्भावात्, कारणं विना कार्यस्याऽसम्भवात्, तथा च व्यावर्तकत्वाभावान्नैष्फल्यमेवापद्येत तस्य ।

एवञ्च केवलस्वमतव्यवस्थापनस्य केवलपरमतनिराकरणस्य वाऽसम्भवात् सर्वेषां निरूपणानां

●

= ઉક્ત અનુમાન પ્રયોગ. તેનું નિરાકરણ કરવું એટલે કે ઉક્તરીત્યા તે અનુમાન પ્રયોગમાં બાધ, અસિદ્ધિ વગેરે દોષોનું ઉદ્ભાવન કરવું. પરમતનિરાકરણનો આવો અર્થ કરવાથી તમે કરેલી શંકાનું સમાધાન પણ સ્પષ્ટતયા થઈ જ જાય છે.

तत्पूर्वकं = तदुत्तरकालिकम् ।

स्वमतम् = अनुमानप्रामाण्यम्, तद्व्यवस्थापनम् = अप्रामाण्य-ज्ञानानास्कन्दिततद्गोचरज्ञानानुकूलव्यापारः ।

●

स्वमतव्यवस्थापन-परमतनिराकरणोभयप्रवृत्तत्वान्न गङ्गेशोपाध्यायकृतनिरूपणे किमपि वैशिष्ट्यं ख्यापितं भवति इति परमतनिराकरणजन्यं स्वमतव्यवस्थापनमित्यर्थस्तु सर्वथाऽनुपादेयः तथाऽननुभवादिति आरेकायामाह - **तत्पूर्वकम्** = अनुमानप्रामाण्याभावविषयकचार्वाकादिनिष्ठमतौ असिद्ध्याद्युद्भावनपूर्वकं = **तदुत्तरकालिकम्** = अनुमानप्रामाण्याभावविषयकचार्वाकादिमतिनिराकरणाऽनन्तरम्, एवञ्च न प्रागुक्तदोषाणामवकाशः, तदुत्तरवर्त्तिनः तत्कार्यत्वाऽनियमात् ।

ननु स्वमतव्यवस्थापनमित्यत्र स्वमतस्य कोऽर्थः ? स्वमतिश्चेत् ? किं तस्य व्यवस्थापनम्, स्वतः व्यवस्थितत्वात्, निराकरणमेव ज्ञानस्य भवति, व्यवस्थापनं तु ज्ञानविषयस्यैवेति चेद् ?

●

❋ पूर्वकत्वनो अर्थ ❋

(तत्पू.) આ રીતે પરીક્ષાવ્યાખ્યાગત પરમતનિરાકરણ પદનો અર્થ દર્શાવ્યો. હવે, પૂર્વકત્વનો અર્થ બતાવે છે કે - પરમતનિરાકરણપૂર્વક સ્વમતનું વ્યવસ્થાપન એટલે કે પરમતનિરાકરણ કર્યા પછી સ્વમતનું વ્યવસ્થાપન કરવું. પૂર્વક શબ્દ ઘણી વાર કાર્યતાને પણ સૂચવતો હોય છે. દા.ત. **दण्डपूर्वकः घटः** પ્રસ્તુતમાં પૂર્વશબ્દ કાર્ય-કારણભાવને જણાવે છે. કારણ કે કારણ હંમેશા અવ્યવહિત પૂર્વવર્ત્તી હોય. ઉક્ત વાક્યનો વિગ્રહ થશે - **दण्डः पूर्वं यस्य सः = दण्डपूर्वकः घटः**, બહુવ્રીહિમાં **क**પ્રત્યય સ્વાર્થમાં લાગ્યો છે. ફલિતાર્થ એ થયો કે **'दण्डः कारणं यस्य सः = दण्डपूर्वकः घटः'** ટૂંકમાં, **दण्डजन्यः घटः = दण्डजन्यताविशिष्टः घटः**। આમ, પૂર્વક શબ્દ કાર્યવાચી પણ હોવાથી તથા પ્રસ્તુતમાં તે અર્થ અભિપ્રેત ન હોવાથી પૂર્વકની વ્યાખ્યા 'ઉત્તરકાલિક' એ પ્રમાણે કરી. પરમતનિરાકરણજન્ય તો સ્વમતવ્યવસ્થાપન છે જ નહીં. કારણ કે, પરમતનું નિરાકરણ કરવા માત્રથી સ્વમતનું વ્યવસ્થાપન નથી જઈ જતું. હા, પરમતનિરાકરણઉત્તરકાલિક સ્વમતવ્યવસ્થાપન જરૂર થાય. ઉલટું, જો પરમતનિરાકરણ કર્યા પછી સ્વમતનું વ્યવસ્થાપન ન કરો, તેની પહેલા કરી દો તો તે પરીક્ષા રૂપ જ ન સંભવે - આ વાત આગળ જણાવશે. ટૂંકમાં, પરમતનિરાકરણપૂર્વક = પરમતનિરાકરણઉત્તરકાલિક આવો અર્થ ફલિત થયો.

❋ स्वमतव्यवस्थापननी व्यवस्था ❋

(स्वम.) સ્વમતવ્યવસ્થાપનમાં રહેલ સ્વમત એટલે કે અનુમાનપ્રામાણ્ય. 'અનુમાન

उच्यते - **स्वमतं** = स्वकीयमतिविषयः = **अनुमानप्रामाण्यम्, तद्व्यवस्थापनम्** = **अप्रामाण्यज्ञानाऽनास्कन्दिततद्गोचरज्ञानाऽनुकूलव्यापारः** = अप्रामाण्यज्ञानाऽनास्कन्दिताऽनुमानप्रामाण्यगोचरज्ञानाऽनुकूललेखन-भाषणादिव्यापारः । इदमत्राकूतम् - 'अनुमानप्रामाण्यमेव वास्तवम्, अनुमानप्रामाण्याभावस्तु शशशृङ्गसहोदरः...' इत्यादिरीत्या अनुमाने अध्येतृ-श्रोतृप्रभृतीनां प्रामाण्यज्ञानं यथा भवेत् तथा लेखनादिकव्यापारः एव स्वमतस्य व्यवस्थापनम् ।

कदाचित्केचन विद्वांसः स्वसम्मतदर्शनभिन्नदर्शनप्रतिपादकग्रन्थव्याख्यातारः दृश्यन्ते, तत्र च परकीयमतं व्यवस्थापयन्ति ते । तद्व्यवस्थापनस्याऽपि मा भूत् स्वमतव्यवस्थापनत्वमित्याह - **अप्रामाण्यज्ञानाऽनास्कन्दितेति** । यथा चार्वाकः नैयायिकग्रन्थं यदाकदाचिद् व्याकरोति, तदा 'अनुमानं प्रमाणम्' इति व्यवस्थापयत्यपि, किन्तु 'एतद् अप्रमाणम्' इति ज्ञानं तस्य आत्मनि वर्तते एव । अतः एव चार्वाकादीनां व्यापारः अप्रामाण्यज्ञानाऽऽस्कन्दितः, न तु अनास्कन्दितः । आस्कन्दितत्वम्, अवरुद्धत्वम्, अवबद्धत्वम् अनुविद्धत्वमिति पर्यायाः ।

●

પ્રમાણ છે' - આવો મત એ જ સ્વમત. તેનું વ્યવસ્થાપન એટલે કે 'અનુમાન પ્રમાણ છે' - આવા જ્ઞાનનો જનક વ્યાપાર. ટૂંકમાં, અનુમાન પ્રમાણ છે - તેવું જ્ઞાન સહુમાં ઉત્પન્ન થાય તેને અનુકૂલ પોતાની ગ્રંથલેખનાદિ જે પ્રવૃત્તિ તે જ તાદૃશ જ્ઞાનઅનુકૂલવ્યાપાર.

પ્રશ્ન :- ક્યારેક કોઈક દાર્શનિકો સ્વમાન્ય દર્શન સિવાયના અન્ય દર્શનના ગ્રંથો ઉપર વ્યાખ્યા કરનારા દેખાય છે. જો કોઈ ચાર્વાક ન્યાયદર્શનના ગ્રંથ ઉપર વૃત્તિ લખે, તેમાં 'અનુમાન પ્રમાણ છે...' ઇત્યાદિ બાબત અપ્રમાણ છે - તેવું પોતે જાણવા છતાં તાદૃશજ્ઞાનજનકવ્યાપાર ગ્રંથલેખનાદિ કરે જ છે. તેને સ્વમતવ્યવસ્થાપન કેવી રીતે કહેવાય ? પૂર્વપક્ષમાં પણ તે - તે મતનું વ્યવસ્થાપન તો કરવામાં આવે જ છે. પૂર્વપક્ષ ગ્રંથ દ્વારા તો 'પૂર્વપક્ષીય બાબત જ પ્રમાણ છે' - તે રીતે જ પૂર્વપક્ષ રજૂ કરવામાં આવે છે. તો શું તે પણ સ્વમતવ્યવસ્થાપન કહેવાય ? માટે, તમે કહેલ સ્વમતવ્યવસ્થાપનની વ્યાખ્યા વ્યાજબી નથી.

ઉત્તર :- અરે ભાઈ ! હજુ અમારી સ્વમતવ્યવસ્થાપનની વાત ક્યાં પૂરી થઈ છે ? અપ્રામાણ્યજ્ઞાનઅનાસ્કન્દિત એવું વિશેષણ હજુ મૂકવાનું જ છે. જ્યારે ચાર્વાક વગેરે ન્યાયદર્શનના ગ્રંથ ઉપર વૃત્તિ લખે ત્યારે 'અનુમાન પ્રમાણ છે' - તે વાતનું વ્યવસ્થાપન કરે તો પણ 'તે જ્ઞાન અપ્રમાણ છે' - એવું જ્ઞાન તો તેના દિલમાં પડેલું જ હોય છે. મતલબ કે તેનું તાદૃશનિરૂપણ - પ્રતિપાદન અપ્રામાણ્યજ્ઞાનથી આસ્કન્દિત છે, ઘેરાયેલ છે. જ્યારે નૈયાયિક વગેરેનું પ્રતિપાદન કે 'અનુમાન પ્રમાણ છે' તે અપ્રામાણ્યજ્ઞાનથી અનાસ્કન્દિત

तथा च न तस्य व्यापारस्य स्वमतव्यवस्थापनरूपता । एवमेव पूर्वपक्षादिरूपेण परकीयमतनिरूपण-व्यापारस्याऽपि न स्वमतव्यवस्थापनत्वरूपतेत्यवधेयम् । एवञ्च अनुमानाऽप्रामाण्यविषयकचार्वाका-दिनिष्ठमतिप्रभृतिषु असिद्ध्याद्युद्भावनोत्तरकालिकः यः अनुमानप्रामाण्यज्ञानगोचरोऽप्रामाण्य-ज्ञानाऽनास्कन्दितव्यापारः स एव अनुमानप्रामाण्यपरीक्षेति फलितम् ।

ननु स्वमतव्यवस्थापनस्य कथं परमतनिराकरणोत्तरकालिकत्वम् ? 'आदौ परमतनिराकरणे कृते एव स्वमतव्यवस्थापनस्य परीक्षात्वं भवति' इति नियमे प्रमाणाऽभावात्, आदौ स्वमतव्यवस्थापने कृते सति पश्चात् परमतनिराकरणं सम्भवति एव, तत्कथं तस्य परीक्षात्वाभावः ? तथा च पौर्वापर्यभावरहितमेव परीक्षालक्षणमुचित***मिति चेद् ? मैवम्;*** यतः स्वमतव्यवस्थापनस्य 'अनुमानं प्रमाणम्' इतिज्ञानजनकव्यापाररूपत्वम्, 'अनुमानम् अप्रमाणम्' इति ज्ञानम् अप्रमाणम् - इति

●

છે. કારણ કે તેને 'આ વાત અપ્રમાણ છે'- એવું જ્ઞાન નથી. માટે તે જે વ્યવસ્થાપન કરે તે સ્વમતવ્યવસ્થાપન જ થશે. તે જ રીતે જ્યારે પૂર્વપક્ષના રૂપમાં શિષ્યના મગજમાં અન્યના મતનું વ્યવસ્થાપન કરવામાં આવે તો તે વખતે 'આ જ્ઞાન અપ્રામાણ્યવિશિષ્ટ છે' - તેવું હોય જ છે. માટે, શિષ્યના મગજમાં કરવામાં આવતું તે પૂર્વપક્ષના મતનું વ્યવસ્થાપન અપ્રામાણ્યજ્ઞાનઆસ્કંદિત જ છે. ટૂંકમાં, અધ્યાપકના મગજમાં અપ્રામાણ્યજ્ઞાનઅનાસ્કંદિત જે જ્ઞાન તેના દ્વારા અધ્યેતાના મગજમાં પણ તથાવિધ બોધ ઉત્પન્ન કરવાનો પ્રયત્ન તે સ્વમતવ્યવસ્થાપન. આમ, સ્વમતવ્યવસ્થાપન = અપ્રામાણ્યજ્ઞાનઅનાસ્કંદિતઅનુમાન-પ્રામાણ્યગોચરજ્ઞાનઅનુકૂલવ્યાપાર - એમ ફલિત થયું.

❁ પહેલા શું ? ખંડન કે મંડન ? ❁

(अनु.) પરમતનિરાકરણ બાદ જે સ્વમતવ્યવસ્થાપન કરવામાં આવે છે તેમાં જે જ્ઞાનજનકત્વ વ્યાપારમાં કહ્યું તે તો જ સંભવી શકે જો પહેલા પરમતનું નિરાકરણ કરી દેવામાં આવ્યું હોય - આ હકીકતને હવે ઉજાગર કરે છે. 'અનુમાન અપ્રમાણ છે'- આવું અનુમાનનિષ્ઠઅપ્રામાણ્યવિષયક જે ચાર્વાકનું જ્ઞાન તેમાં જ્યાં સુધી અપ્રામાણ્યનું જ્ઞાન ન થાય એટલે કે 'અનુમાન અપ્રમાણ છે'- આવું જ્ઞાન અપ્રમાણ છે - તેવું જ્ઞાન જ્યાં સુધી ન થાય ત્યાં સુધી 'અનુમાન પ્રમાણ છે' - આવું જ્ઞાન ઉત્પન્ન થવું શક્ય ન હોવાથી પરમતનિરાકરણપૂર્વકત્વ સ્વમતવ્યવસ્થાપનમાં ઘટી શકશે. મતલબ કે પહેલા 'અનુમાન અપ્રમાણ છે' - આવા જ્ઞાનનું નિરાકરણ થાય, આવું જ્ઞાન અપ્રમાણ છે - એવું જ્ઞાન થાય, તદુત્તરકાલમાં જ 'અનુમાન પ્રમાણ છે' - આવું સ્વમતનું વ્યવસ્થાપન થઈ શકે. માટે,

गू ढा र्थ *अनुमानाऽप्रामाण्यज्ञानेऽसति अप्रामाण्यज्ञाने अनुमानप्रामाण्य-ग्रहोत्पत्तेरसम्भवेन व्यापारस्य न ज्ञानजनकत्वसम्भव इति भवति तस्य परमतनिराकरणपूर्वकत्वम् ।*

●

ज्ञानं यावन्न जायते तावद् लेखनादिव्यापारः 'अनुमानं प्रमाणम्' इति ज्ञानजनकः न भवति, तथा च परमतनिराकरणरहिततादृशलेखनव्यापारस्य स्वमतव्यवस्थापनत्वमेव न भवति तत्कथं तस्य परीक्षात्वं सम्भवेद् ? इत्याशयेनाह - **अनुमानाऽप्रामाण्यज्ञाने** = अनुमानाऽप्रामाण्यविषयक-चार्वाकादिपरकीयज्ञाने **असति अप्रामाण्यज्ञाने**, अर्थाद् चार्वाकानुमाने असिद्ध्यादिदोषाः सन्ति - इत्येवं तत्राऽप्रामाण्यज्ञापने अकृते जिज्ञासूनाम् 'अनुमानम् अप्रमाणम्' इति ज्ञानम् अप्रमाणम् इति ज्ञानं न भवति, तादृशज्ञाने अविद्यमाने **अनुमानप्रामाण्यग्रहोत्पत्तेः असम्भवेन** = अनुमान-प्रामाण्यविषयकज्ञानाऽनुकूलव्यापाररूपस्वमतव्यवस्थापनफलभूतस्य ग्रन्थाध्येतृप्रभृतिषु 'अनुमानं प्रमाणम्' इति ज्ञानोत्पादस्याऽशक्यत्वेन अनुमानप्रामाण्यगोचरज्ञानजननाय क्रियमाणस्य लेखना-दिरूपस्य **व्यापारस्य न ज्ञानजनकत्वसम्भवः** = ग्रन्थाध्येतृप्रभृतिषु 'अनुमानं प्रमाणम्' इति ज्ञानजनकत्वं न सम्भवति **इति** हेतोः, तस्माद् इत्यर्थः । **भवति तस्य** = अप्रामाण्यज्ञानानास्कन्दि-तानुमानप्रामाण्यगोचरज्ञानानुकूलव्यापाररूपस्वमतव्यवस्थापनस्य **परमतनिराकरणपूर्वकत्वम्** = अनुमानाऽप्रामाण्यविषयकचार्वाकादिपरकीयमतिनिष्ठासिद्ध्याद्युद्भावनरूपपरमतनिराकरणोत्तर-

य शो ल ता

●

વિ ના મ્રા

પરમતનિરાકરણપૂર્વકત્વ સ્વમતવ્યવસ્થાપનમાં = 'અનુમાન પ્રમાણ છે' ઈત્યાદિજ્ઞાન-અનુકૂલવ્યાપારમાં આવશે. આ રીતે પરીક્ષાની વ્યાખ્યા બતાવવામાં આવી. શબ્દાર્થ જોઈ લઈએ - 'અનુમાન અપ્રમાણ છે' - એવા જ્ઞાનમાં '**असति अप्रामाण्यज्ञाने**' = અપ્રામાણ્યનું જ્ઞાન ન થાય ત્યાં સુધી 'અનુમાન પ્રમાણ છે' - આવુ જ્ઞાન ઉત્પન્ન થવું અસંભવિત હોવાથી 'અનુમાન પ્રમાણ છે'- આવા જ્ઞાનને ઉત્પન્ન કરવા માટે જે વ્યાપાર કરવામાં આવે છે તે ઉક્ત જ્ઞાનને ઉત્પન્ન કરી ન શકે. માટે સ્વમતવ્યવસ્થાપનસ્વરૂપ જ્ઞાનજનક વ્યાપારમાં પરમતનિરાકરણપૂર્વકત્વ સંગત થશે જ.

પરીક્ષાત્વકથનપ્રયોજન

પ્રશ્ન :- ભાઈ ! તમે આટલું લાંબું લાંબું શા માટે કરો છો ? સમારબ્ધઅનુમાનપ્રામાણ્ય-પ્રતિપાદન...આમ જ કહો. પરીક્ષા શબ્દ કહો તો પછી પરીક્ષાની વ્યાખ્યા વગેરે માથાકૂટ થાય ને ? પરીક્ષા પદની વ્યાખ્યામાં સ્વમત - પરમત સમાવિષ્ટ હોવાથી ગૌરવ દોષ પણ

अनुमानप्रामाण्यप्रतिपादकग्रन्थस्य परीक्षात्वोक्त्या केवलस्वमत-

●

कालिकत्वम् ।

ननु समारब्धाऽनुमानप्रामाण्यप्रतिपादनकारणीभूतेत्यादि एव वक्तव्यम्, अनुमानप्रामाण्य-प्रतिपादकग्रन्थस्य परीक्षात्वोक्त्या किं फलं लभ्यते ? न तस्य किमपि फलम्; तथा च न कर्तव्यमेव परीक्षापदोपादानम्, अर्थाऽबाधेऽप्यधिकलेखनस्याऽयुक्तत्वात्, परीक्षात्वस्योक्तरीत्या स्वमत-परमतादिघटिततयाधिकत्वादित्याशङ्कायामाह - **अनुमानेति** । अयमाशयः - अनुमानप्रामाण्य-प्रतिपादनकारणीभूतेत्यादिकथने अनुमानप्रामाण्यप्रतिपादकग्रन्थस्य केवलस्वमतप्रतिपादकत्वप्राप्त्या नैयायिका एव तं ग्रन्थं पठेयुः, न चार्वाकादयः अनुमानाऽप्रामाण्यखण्डनजिज्ञासवश्च । अनुमान-प्रामाण्यप्रतिपादकग्रन्थस्य परीक्षात्वकथनेन तस्य परमतनिराकरण-स्वमतव्यवस्थापनोभयकारित्वप्राप्त्या (१) स्वमतव्यवस्थापकत्वाद् नैयायिकानाम्, (२) स्वमतनिराकरणकारित्वात् चार्वाकादीनाम्, (३) नैयायिक-चार्वाकोभयमतस्योत्तरपक्ष-पूर्वपक्षरूपेण निरूपकत्वात् तज्जिज्ञासूनाम्, एवं सर्वेषाम् एषः ग्रन्थः पठनीयः स्यात्, तथा चैतस्य ग्रन्थस्य सर्वैरुपादेयत्वमिति व्यक्तीकर्तुमुपादत्तं दीधितिकृता परीक्षापदम् इत्याशयेनाह -

अनुमानप्रामाण्यप्रतिपादकग्रन्थस्य परीक्षात्वोक्त्या = परमतनिराकरणपूर्वकस्वमतव्यवस्थापन-कारित्वोक्त्या, परीक्षात्वस्यैव परमतनिराकरणपूर्वकस्वमतव्यवस्थापनत्वरूपत्वेन ग्रन्थस्य च परीक्षाकारित्वादेवमुक्तमस्माभिः, ***केचित्तु*** ग्रन्थस्यैव उपचारात् तादृशव्यवस्थापनत्वरूपत्वेन परीक्षात्वोक्त्या = परमतनिराकरणपूर्वकस्वमतव्यवस्थापनत्वोक्त्येत्यर्थः ***इत्याहुः,***

तन्न, 'केवलस्वमतप्रतिपादकत्वे'त्यग्रिमोक्तिविरोधाऽऽपत्तेः, तत्र ग्रन्थे प्रतिपादनकारित्वस्य = व्यवस्थापनकारित्वस्यैवोक्तत्वात्, तथा चात्र परीक्षात्वपदस्य परीक्षाकारित्वार्थकत्वाभ्युपगमः

●

લાગુ પડશે, પ્રતિપાદન શબ્દ લખતા આવું કોઈ ગૌરવ નહીં આવે. તો પછી સમારબ્ધ-અનુમાનપ્રામાણ્યપ્રતિપાદન...એવું જ કહેવું જોઈએ ને ? સમારબ્ધઅનુમાનપ્રામાણ્ય-પરીક્ષા...કહેવાની આવશ્યકતા શી ?

⚅ પરીક્ષાત્વના પ્રવેશથી મહાન લાભ ⚅

ઉત્તર :- (અનુ.) તમારી શંકાના સમાધાન માટે જ હવે ગ્રંથકાર બતાવે છે - અનુમાન-પ્રામાણ્યપ્રતિપાદક જે ગ્રંથ છે તેને પ્રસ્તુતમાં પરીક્ષા સ્વરૂપ કહ્યો. અનુમાનપ્રામાણ્યનું જે

गू ढा *प्रतिपादकत्वनिराकरणादशेषजिज्ञास्वध्ययनयोग्यतालाभेन व्याप्तिस्वरूप-निरूपणस्यापि तल्लाभः ।*

●

आवश्यकः, वस्तुतः व्यवस्थापनस्योक्तरीत्या तादृशव्यापाररूपत्वेन ग्रन्थस्य अक्षरादिसमूहरूपत्वेन च तादृशलेखनादिव्यापारविषयः तज्जन्यो वा ग्रन्थः उपचारात् परीक्षा इति ***दिक्*** ।

केवलस्वमतप्रतिपादकत्वनिराकरणात् = प्रकृतग्रन्थस्य अनुमानाऽप्रामाण्यज्ञाननिराकरणरहित-केवलाऽनुमानप्रामाण्यप्रतिपादनकारित्वनिराकरणाद् **अशेषजिज्ञास्वध्ययनयोग्यतालाभेन** = नैयायिक-तदितराऽशेषजिज्ञास्वध्ययनयोग्यत्वस्य प्रकृतग्रन्थे लाभात्, नैयायिकादयः सर्वेऽपि न च 'एतत् पठिष्यन्त्येवे'ति नियमः, किन्तु प्रकृतग्रन्थः सर्वेषां पठनीयः इत्येव एतदुक्त्या ज्ञायते । अतः अशेषजिज्ञास्वध्ययनविषयत्वलाभेनेति अनुक्त्वा अशेषजिज्ञास्वध्ययनयोग्यत्वलाभेनेत्युक्तम् ।

य शो ल ता

ननु एवं सति व्याप्तिग्रहोपायप्रतिपादनस्य व्याप्तिस्वरूपनिरूपणस्याऽपि च परीक्षात्वं वक्तव्यं स्यात्, न च तदुक्तम***िति चेद् ? न,*** अनुमानप्रामाण्यप्रतिपादकग्रन्थस्य अशेषजिज्ञास्वध्ययनयोग्यत्व-लाभेन तत्कारणत्वाद् व्याप्तिग्रहोपायप्रतिपादनस्य व्याप्तिस्वरूपनिरूपणस्य च अशेषजिज्ञास्वध्ययन-योग्यत्वप्राप्त्या परीक्षात्वोक्तिफलस्य एवमेव प्राप्तेः ।

यथा मोक्षस्य सर्वाभिलषनीयत्वसिद्ध्या तत्कारणस्याऽपि सर्वाभिलषनीयत्वं सिद्ध्यत्येव तथाऽत्राऽपि । तथा च व्याप्तिग्रहोपायप्रतिपादनादेः परीक्षात्वोक्तेः फलस्य अशेषजिज्ञा-स्वध्ययनयोग्यत्वलाभरूपस्य परीक्षात्वकथनं विनाऽपि सम्भवान्निरर्थकमेव तयोः परीक्षात्वकथनमत एव तन्नोक्तमित्याशयेनाऽऽह - **व्याप्तिस्वरूपनिरूपणस्याऽपि** अन्त्यदीपकन्यायेन उपलक्षणाद्वा

●

પ્રતિપાદન ગંગેશ ઉપાધ્યાયે કરેલ છે તે પરમતનિરાકરણપૂર્વક સ્વમતવ્યવસ્થાપન સ્વરૂપ હોવાથી પરીક્ષા સ્વરૂપ છે. આમ, પ્રતિપાદક ગ્રંથ પણ પરીક્ષા સ્વરૂપ જ થાય. અને જો એ ગ્રંથ પરીક્ષા સ્વરૂપ થાય તો તે તમામ જિજ્ઞાસુઓ માટે ઉપયોગી સાબિત થાય. મતલબ કે અનુમાનપ્રામાણ્યપ્રતિપાદક ગ્રંથ પરીક્ષા સ્વરૂપ છે - આવું કહેવા દ્વારા આ ગ્રંથ ફક્ત 'અનુમાન પ્રમાણ છે' - આવા સ્વમતનું જ વ્યવસ્થાપન કરશે - તેવું ન રહ્યું. કિંતુ પરીક્ષાસ્વરૂપ હોવાને કારણે પરમતનું નિરાકરણ પણ તેમાં કરવામાં આવશે. તેથી, તમામ જિજ્ઞાસુઓ માટે આ ગ્રંથ ભણવા યોગ્ય બનશે. કારણ કે આ ગ્રંથમાં પૂર્વપક્ષ રૂપે ચાર્વાક આદિના મતનું પણ ઉપસ્થાપન કરવામાં આવશે જ. માટે, ચાર્વાકમતના જિજ્ઞાસુઓ પણ આ ગ્રંથને ભણશે. તદુપરાંતમાં ચાર્વાક દર્શનના જે વ્યક્તિઓ છે તે પણ નૈયાયિકે કરેલ

વિ ન ભા

व्याप्तिग्रहोपायप्रतिपादनस्याऽपि **तल्लाभः** = अशेषजिज्ञास्वध्ययनयोग्यत्वलाभः, तथा च न तदर्थं परीक्षात्वोक्तेः अन्यत्राऽऽवश्यकतेत्यवधेयम् ।

अनुमानप्रामाण्यपरीक्षाकारणीभूतत्वं व्याप्तिग्रहोपायप्रतिपादनस्य कथमित्येतद् दर्शयितुम् उपक्रमते - **यत्रेति** ।

इदमत्र हृदयम् - चार्वाका हि एवं प्रतिपादयन्ति - अनुमानं न प्रमाणम्, यतः अनुमानेनाऽनुमितिरूपफलं न भवति । तथाहि - भवदभ्युपगमाऽनुसारेण 'पर्वतो वह्निमान्' इत्याद्याकारिकाऽनुमितिः तदैव भवति यदा धूमनिष्ठवह्निनिरूपितव्याप्तिग्रहो भवति । व्याप्तिग्रह एव प्रकृते न सम्भवति, व्यभिचारशङ्कायाः प्रतिबन्धकत्वात् । 'यत्र यत्र धूमः तत्र तत्र वह्निः' - इत्याद्याकारकव्याप्तिग्रहं प्रति 'अस्तु धूमः मास्तु वह्निः तर्हि को दोषः ?' इतिव्यभिचारशङ्का प्रतिबन्धिका भवति, तथा च एतच्छङ्काऽनिवृत्तौ नैव भवति व्याप्तिग्रहः, एतन्निवारणाय तर्कः अपेक्ष्यते भवता, तर्कः नाम प्रकृते 'यदि वह्निं विनाऽपि धूमः स्यात्तदा धूमः वह्निजन्यः न स्यात्' इत्यादिरूपः । किन्तु एतत्तर्कज्ञानमन्यदनुमित्यपेक्षि । अर्थाद् एतत्तर्कस्य सिद्ध्यर्थम्

●

પોતાના દર્શનના ખંડનને જાણવા માટે આ ગ્રંથને ભણશે. તે સિવાયના 'અનુમાન પ્રમાણ છે'- આ પ્રમાણેની માન્યતાવાળા લોકો માટે તો આ ગ્રંથ અધ્યયન કરવા યોગ્ય બનશે જ. આ રીતે નૈયાયિક, નૈયાયિકેતર સર્વ માટે આ ગ્રંથ અધ્યયન કરવા યોગ્ય છે - તેવું 'પરીક્ષા' શબ્દ દ્વારા પ્રાપ્ત થાય. જો અનુમાનપ્રામાણ્યપ્રતિપાદક ગ્રંથ અશેષ જિજ્ઞાસુઓ માટે અધ્યયન કરવા યોગ્ય બન્યો તો વ્યાપ્તિસ્વરૂપનું નિરૂપણ પણ અશેષ જિજ્ઞાસુઓ માટે અધ્યયનયોગ્ય બનશે જ - આટલો ઊંડો આશય રાખી દીધિતિકારે સમારબ્ધઅનુમાનપ્રામાણ્યપ્રતિપાદન....ઈત્યાદિ ન કહેતા સમારબ્ધઅનુમાનપ્રામાણ્યપરીક્ષા...ઈત્યાદિ કહેલ છે. પ્રસ્તુતમાં અનુમાનપ્રામાણ્યપ્રતિપાદક ગ્રંથ બધાં લોકો ભણવાના નથી... પણ, બધાં ભણી શકે, દરેકનું ઈષ્ટ આ ભણવાથી સધાય...એવું પ્રસ્તુત ગ્રંથમાં રહેલું છે. માટે જ 'અશેષ જિજ્ઞાસુઓ આના અધ્યેતા બનશે' - તેવું જણાવવાના બદલે 'અશેષ જિજ્ઞાસુઓના અધ્યયનની યોગ્યતા આ ગ્રંથમાં આવી ગઈ' - આ પ્રમાણે જણાવ્યું છે.

⌘ व्याप्तिग्रहोपायप्रतिपादन कारण केम ? ⌘

(**कारणी.**) दीधितिकारे प्रामाण्यपरीक्षाना कारण तरीके जे व्याप्तिग्रहोपायप्रतिपादनने जणावेल छे ते केवी रीते संगत थाय ? तेनुं रहस्य बतावता कहे छे - (એક વાત ધ્યાનમાં રાખવી કે જગદીશે **तत्कारणीभूतो यो व्याप्तिग्रहः** - આવું કહેવા દ્વારા અનુમાનપ્રામાણ્ય-

अनुमितिः नूतना कर्तव्यैव स्यादिति व्यक्ताऽनवस्था । एवञ्च अनवस्थाभयेन तर्कः नैव प्रदर्श्यते, ततश्च तर्काऽनिवर्त्या तादृशव्यभिचारशङ्का भवति, व्याप्तिग्रहोत्पत्तिश्च तयाऽवरुध्यते, तथा च व्याप्तिग्रहस्यैवाऽनुत्पत्त्या भविष्यति कथम् अनुमितिः ?

एवञ्च 'अनुमानं प्रमाणम्, प्रमितिकरणतावच्छेदकधर्मवत्त्वाद्' इत्याकारकाऽनुमानप्रामाण्यसाधकाऽनुमितिरपि तदितराऽनुमितिवद् व्याप्तिग्रहस्याऽसम्भवेन न सम्भवति इति कथम् अनुमानस्य प्रामाण्यम् ? तथा च अनुमानकार्यभूताऽनुमितेरेवाऽसत्त्वाद् नैव सेत्स्यति अनुमाने प्रमितिकरणताऽवच्छेदकधर्मवत्त्वम्, अभिमतानुमितिलक्षणप्रमितिकरणत्वस्यैवाऽनुमानेऽसिद्धेः।

एवं प्रलपतः चार्वाकादीन् प्रति एवमेव उत्तरः दातव्यः यदुत - कथं व्याप्तिग्रहः न भविष्यति ? व्याप्तिग्रहश्च भविष्यत्येव । तद्यथा - व्याप्तिग्रहोपायत्वेन व्यभिचाराऽग्रहः, सहचारग्रहश्च प्राप्येते । अन्वय-व्यतिरेकाभ्यां सहचारग्रहस्य हेतुता, एवमेव व्यभिचाराऽग्रहस्यापि, व्यभिचारग्रहस्य प्रतिबन्धकत्वेन तदभावस्य कारणत्वाऽनपायात् । भूयोदर्शनेन व्यभिचारशङ्का निवर्तते। यत्र तु भूयोदर्शनादपि शङ्का नापैति तत्र विपक्षे बाधकस्तर्कः अपेक्षितः । तथाहि - वह्निविरहिण्यपि धूमः स्यादित्याशङ्का यदि भवति तदा सा वह्नि-धूमयोः कार्यकारणभावस्य

●

પરીક્ષાના કારણ તરીકે વ્યાપ્તિજ્ઞાનને બતાવેલ છે, નહીં કે વ્યાપ્તિગ્રહઉપાયપ્રતિપાદનને. જ્યારે ગૂઢાર્થતત્ત્વાલોકકાર '**व्याप्तिग्रहोपायप्रतिपादनस्य भवति परीक्षाकारणत्वम्**' - આવું કહેવા દ્વારા વ્યાપ્તિગ્રહઉપાયપ્રતિપાદનને અનુમાનપ્રામાણ્યપરીક્ષાના કારણ તરીકે વર્ણવે છે, નહીં કે વ્યાપ્તિગ્રહને.) ચાર્વાક વગેરે અન્ય લોકોનું કહેવું એમ છે કે - **पर्वतो वह्निमान् धूमात्** વગેરે કોઈ પણ અનુમાન પ્રમાણ થઈ જ ન શકે. કારણ કે તેનાથી અનુમિતિ ઉત્પન્ન જ થઈ શકતી નથી. તે આ રીતે - કોઈને શંકા થાય કે 'શું જ્યાં જ્યાં ધૂમ હોય ત્યાં ત્યાં વહ્નિ હોય જ ? ન હોય તો શું વાંધો ? **अस्तु धूमः मास्तु वह्निः तर्हि को दोषः ?**' આવા પ્રકારની વ્યભિચારની શંકા દૂર કરવા માટે તમારે તર્ક આપવો પડે કે '**यदि धूमः वह्निं विनाऽपि स्यात् तर्हि वह्निजन्यः न स्यात्**'. પણ, આ તર્કની સિદ્ધિ માટે નૂતન અનુમાન પ્રમાણની જરૂરત પડે. આ રીતે અનવસ્થા દોષ લાગુ પડે. આ અનવસ્થાને કારણે તમે ઉક્ત વ્યભિચારની શંકા દૂર નહીં કરી શકો. આ અનિવર્ત્ય એવી વ્યભિચારની શંકાને કારણે વ્યાપ્તિગ્રહ જ ન થાય. વ્યાપ્તિગ્રહની ઉત્પત્તિ જ અવરુદ્ધ થઈ જાય, રુંધાઈ જાય. તેના કારણે = વ્યાપ્તિગ્રહ ગેરહાજર હોવાને કારણે અનુમિતિ રૂપ ફળ = '**पर्वतो वह्निमान्**' આવા પ્રકારની જે તમને સમ્મત અનુમિતિ તે ઉત્પન્ન જ નહીં થઈ શકે. માટે, જે વસ્તુ ઉત્પન્ન

कारणीभूतेति । यत्रानवस्थादुस्थतर्काऽनिवर्त्यव्यभिचारशङ्का-वरुद्धोत्पत्तिकव्याप्तिग्रहासत्त्वनिबन्धनानुमितिरूपफलाऽनुत्पत्त्याऽ-

●

प्रतिसन्धानान्निवर्तते - 'यद्ययं वह्निमान् न स्यात् तदा धूमवान्न स्यात्, कारणं विना कार्याऽनुत्पत्तेः, यदि च क्वचित् कारणं विनाऽपि कार्यं भविष्यति तदा अहेतुकमेव भविष्यति' इत्येवंरूपेण । यदि तत्राऽप्याशङ्का भवेत्, तदा सा व्याघाताद् अपसारणीया, 'यदि हि कारणं विना कार्यं स्यात्, तदा धूमार्थं वह्नेः तृप्त्यर्थं भोजनस्य वा नियमत उपादानं तवैव न स्यादि'ति एवंरीत्या । इत्यादिरीत्याऽभ्युपगमे नास्त्यनवस्था, तर्कसिद्ध्यर्थमन्यदनुमितेरनपेक्षितत्वात् । भविष्यत्येवं तर्कनिवर्त्या व्यभिचारशङ्का । व्याप्तिग्रहश्चाऽपि भविष्यति । एवमनुमितेरपि सम्भवाद् अनुमानस्य प्रामाण्यमनायासेन सेत्स्यति । एतावतेदं फलितं यदुत उक्तक्रमेण व्याप्तिग्रहोपायप्रतिपादनेनैवाऽनुमानप्रामाण्यं साधयितुं शक्यम्, अतः व्याप्तिग्रहोपायप्रतिपादनं भविष्यति अनुमानप्रामाण्यपरीक्षाकारणीभूतमित्याशयेनाह -

यत्र विप्रतिपत्तौ **'अनवस्थादुस्थतर्काऽनिवर्त्यव्यभिचारशङ्काऽवरुद्धोत्पत्तिकव्याप्तिग्रहाऽसत्त्वनिबन्धनाऽनुमितिरूपफलाऽनुत्पत्त्या'** = 'दुस्थम् = दुःखेन तिष्ठति यत् तत्, दुस्थत्वं वा

●

જ થઈ શકે તેમ ન હોય તેના કારણને પ્રમાણ માનવાનો કોઈ અર્થ નથી. તેથી, અનુમાન અપ્રમાણ છે. તમે જણાવેલ કે 'અનુમાન પ્રમાણ છે, કારણ કે તે પ્રમિતિકરણતાઅવચ્છેદક-ધર્મવાન છે.' હવે જ્યારે અનુમિતિ ઉત્પન્ન જ નથી થતી તો અનુમિતિકરણતાઅવચ્છેદક-ધર્મવત્ત્વ પણ અનુમાનમાં ન જ જાય ને !

જ્યાં ચાર્વાકો આ રીતે અનુમાનનું પ્રામાણ્ય સ્વીકારતા ન હોય ત્યાં સૌપ્રથમ એને વ્યાપ્તિગ્રહ કરવાના ઉપાયો જ બતાવવા પડે. કારણ કે તેણે જણાવ્યું તે મુજબ વ્યાપ્તિજ્ઞાન જ થવું સંભવિત નથી. જો એને વ્યાપ્તિજ્ઞાનના ઉપાયો ન બતાવો તો અનુમાનનું પ્રામાણ્ય કેવી રીતે સાબિત કરી શકાય ? આ પ્રમાણે વ્યાપ્તિગ્રહઉપાયનું પ્રતિપાદન એ અનુમાનઅપ્રમાણ્યનું નિરાકરણ કરવા પૂર્વક અનુમાનપ્રામાણ્યવ્યવસ્થાપન સ્વરૂપ પરીક્ષાનું કારણ બની જશે - એ પ્રમાણે ભાવ છે.

शब्दार्थ જોઈએ - જ્યાં ચાર્વાક વગેરે અન્ય લોકો, અનવસ્થા દોષને (= દુસ્થને) કારણે (અથવા અનવસ્થાથી) દુસ્થ (દુષ્ટ) એવા તર્ક દ્વારા દૂર ન કરી શકાય એવી વ્યભિચારની શંકાને કારણે અવરુદ્ધ થઈ ગઈ છે ઉત્પત્તિ જેની એવા વ્યાપ્તિગ્રહની ગેરહાજરીના

गू ढा र्थ *प्रामाण्यमनुमानस्य मन्यन्ते परे चार्वाकादयः, तत्र नानभिधाय व्याप्ति-ग्रहोपायं प्रामाण्यमनुमानस्य व्यवस्थापयितुं शक्यमिति व्याप्तिग्रहोपाय-प्रतिपादनस्य भवति परीक्षाकारणत्वमिति भावः ।*

●

भावप्रधाननिर्देशाद् दोष इत्यर्थः, दुस्थम् दुष्टं वा, तथा च अनवस्थया दुस्थः यः तर्कः तेनाऽनिवर्त्या अनवस्थादोषेण तर्काऽनिवर्त्या, अनवस्थादुष्टः वा यः तर्कः तेन अनिवर्त्या या व्यभिचारशङ्का तयाऽवरुद्धा उत्पत्तिः यस्य स तादृशः अवरुद्धोत्पत्तिको व्याप्तिग्रहः, उत्पत्त्यनन्तरं द्वितीयादिक्षणे व्याप्तिग्रहावरोधेऽपि अवरुद्धव्याप्तिग्रहत्वकथनस्य शक्यत्वेन तदुपेक्ष्य अवरुद्धो-त्पत्तिकव्याप्तिग्रहत्वमुक्तम्, तथा च व्याप्तिग्रहस्योत्पत्तिरेव न भविष्यतीत्याशयः, तस्माद् एतादृश-व्याप्तिग्रहः असन् एव, तादृशव्याप्तिग्रहाऽसत्त्वनिबन्धना या अनुमितिफलाऽनुत्पत्तिः तया' इत्यर्थः, तृतीयार्थः प्रयोज्यत्वं तस्य च मन्धात्वर्थेऽन्वयः, इत्थं तादृशफलाऽनुत्पत्त्या **अनुमानस्याऽ-प्रामाण्यं परे चार्वाकादयः मन्यन्ते तत्र व्याप्तिग्रहोपायम् अनभिधाय** = व्याप्तिग्रहोपायप्रतिपादनं विना **अनुमानस्य प्रामाण्यं व्यवस्थापयितुं** = अप्रामाण्यज्ञानाऽनास्कन्दिताऽनुमानप्रामाण्यगोचर-ज्ञानाऽनुकूलव्यापाररूपस्वमतव्यवस्थापनं परमतनिराकरणपूर्वकं परीक्षापदवाच्यं **न शक्यम् इति** हेतोः = तस्माद् **व्याप्तिग्रहोपायप्रतिपादनस्य परीक्षाकारणत्वं भवति** = सिध्यति **इति भावः** ।

व्याप्तिग्रहस्य व्यभिचारशङ्काऽवरुद्धोत्पत्तिकत्वकथनेन व्यभिचाराऽग्रहस्य व्याप्तिग्रहोपायत्व-मावेदितम् । तर्काऽनिवर्त्याया एव व्यभिचारशङ्काया व्याप्तिग्रहोपत्त्यवरोधकत्वादितरव्यवच्छेदफलं तर्काऽनिवर्त्यपदं सार्थकम् । तन्मात्रोक्तौ कथं तर्काऽनिवर्त्यत्वं व्यभिचारशङ्कायाः ? इति जिज्ञासाऽनुपशान्तेः अनवस्थादुस्थपदोपादानमप्यावश्यकमिति विभावनीयम् ।

अथ व्याप्तिग्रहोपायप्रतिपादनोपादानमेव निरर्थकं प्रकृते, व्याप्तिस्वरूपनिरूपणस्याऽपि अनुमान-प्रामाण्यपरीक्षाकारणत्वेन 'समारब्धाऽनुमानप्रामाण्यपरीक्षाकारणीभूतं व्याप्तिस्वरूपनिरूपणम् आरभते'

●

કારણે અનુમિતિસ્વરૂપ ફલની ઉત્પત્તિ ન થતી હોવાથી 'અનુમાન અપ્રમાણ છે' - આ વિ પ્રમાણે માને છે. ત્યાં વ્યાપ્તિગ્રહના ઉપાયોને જણાવ્યા વિના અનુમાનનું પ્રામાણ્ય વ્યવસ્થાપિત ન કરવું શક્ય નથી. આ રીતે વ્યાપ્તિગ્રહઉપાયનું પ્રતિપાદન પરીક્ષાનું કારણ થઈ જશે - એ પ્રમાણે પ્રસ્તુતમાં ભાવ છે.

હવે...'**प्रतिपादननिदान**' કહેવાનું પ્રયોજન બતાવે છે.

इत्येतावतैवाऽभिलषितसिद्धेः, अनुमानप्रामाण्यपरीक्षारूपप्रकृतोपपादकत्वमस्त्येव व्याप्तिस्वरूपनिरूपणे, भविष्यति ततः उपोद्घातसङ्गतेरपि लाभः, ततः किमर्थं व्याप्तिग्रहोपायप्रतिपादनस्य निवेश आदृतो दीधितिकृतेति चेद् ? न,

"व्याप्तिग्रहोपायप्रतिपादन-व्याप्तिस्वरूपनिरूपणोभययोः परीक्षाकारणत्वे समानेऽपि 'व्याप्तिग्रहोपायश्च वक्ष्यते' इत्यनेन व्याप्तिग्रहोपायप्रतिपादनस्य प्रतिज्ञातत्वेन तस्यैव प्राथम्यमुचितम्, न तु व्याप्तिस्वरूपनिरूपणस्य, उपायप्रतिपादनस्य प्रतिज्ञातत्वेन तत्प्रतीक्षायाः अनुचितत्वाद्" इत्याशङ्कायाः तथा सति असमाधानात् ।

इदञ्चात्रावधेयम् - "व्याप्तिग्रहोपायश्च वक्ष्यते - इत्युक्तं प्राक्, निरूप्यते च व्याप्तिरित्यर्थान्तरम्....." इत्यादिजगदीशोक्त्या 'व्याप्तिग्रहोपायश्च वक्ष्यते' - इत्यनेन तत्त्वचिन्तामणिकृता व्याप्तिग्रहोपायप्रतिपादनस्य प्रतिज्ञा कृता इति अधुना तदेव कर्तव्यम्, तदकरणे व्याप्तिस्वरूपनिरूपणे चाऽर्थान्तरदोषः - इत्येवमर्थोऽभिव्यज्यते ।

वस्तुतो 'व्याप्तिग्रहोपायश्च वक्ष्यते' - इत्यनेन ग्रन्थकृता न तत्प्रतिज्ञा दर्शिता, किन्तु व्याप्तिग्रहोपायप्रतिपादनज्ञानाय प्रतीक्षाकरणमेव उपदिष्टम्, यतः इयं हि पङ्क्तिः 'ननु अनुमितिहेत्वि'त्यादिपङ्क्तेरव्यवहितपूर्वा, तस्य प्रतिज्ञारूपत्वे 'वक्ष्यते' इतिस्थाने 'उच्यते' इत्येव कथनीयं स्यात्, अतः तत्तात्पर्यार्थः एवमवसीयते यदुत अनुमानप्रामाण्यपरीक्षाऽनन्तरं व्याप्तिग्रहोपायप्रतिपादनमावश्यकम्, किन्तु तदधुना नोच्यते, भविष्यत्काले वक्ष्यते इति तत्प्रतीक्षां विदधातु ।

●

✲ व्याप्तिग्रहोपायप्रतिपादननिदान કહેવાનો ફાયદો શું ? ✲

प्रश्न :- ભાઈ ! સમારબ્ધઅનુમાનપ્રામાણ્યપરીક્ષાકારણીભૂત વ્યાપ્તિસ્વરૂપનિરૂપણ શરૂ કરે છે - આટલું જ કહો ને ? કારણ કે વ્યાપ્તિસ્વરૂપનું નિરૂપણ પણ અનુમાનપ્રામાણ્યપરીક્ષાનું કારણ તો છે જ. તો પછી વચ્ચે વ્યાપ્તિગ્રહઉપાયને નાંખવાની જરૂરત શી પડી ?

❀ अग्रिमनिरूपणની संगति એ જ લાભ ❀

उत्तर :- (व्याप्ति.) જો વ્યાપ્તિગ્રહઉપાયપ્રતિપાદનનિદાન ન કહેવામાં આવે તો પ્રસ્તુતમાં વ્યાપ્તિસ્વરૂપનું નિરૂપણ જ અસંગત થઈ જશે. કારણ કે કોઈ કહે - "વ્યાપ્તિસ્વરૂપનું નિરૂપણ અનુમાનપ્રામાણ્યપરીક્ષામાં કારણ છે, માટે તેનું નિરૂપણ તમે કરો છો. કિંતુ, વ્યાપ્તિગ્રહઉપાયનું પ્રતિપાદન પણ અનુમાનપ્રામાણ્યમાં કારણ છે જ. આમ, બંનેનું પલ્લું સરખું થાય છે. તદુપરાંતમાં **'व्याप्तिग्रहोपायश्च वक्ष्यते'** કહેવા દ્વારા તમે તેના નિરૂપણની

• अत्र शङ्का स्यादेव - किमर्थं तत्प्रतीक्षाविधानम् ? अधुनैव तत्कथयतु ।

तच्छङ्कानिवारणार्थं दीधितिकृतोक्तम् - व्याप्तिग्रहोपायप्रतिपादननिदानमिति । अर्थाद् व्याप्तिग्रहोपायप्रतिपादनं प्रति व्याप्तिस्वरूपनिरूपणं कारणम् । अतो नानभिधाय व्याप्तिस्वरूपनिरूपणं व्याप्तिग्रहोपायप्रतिपादनं शक्यमिति । अत्रोक्तविशेषः सूक्ष्मधीगम्य इति विभावनीयमेतत् ।

यथा 'प्रत्यक्षाद्यागमपर्यन्तप्रमाणेषु किमर्थं प्रत्यक्षस्यादौ निर्वचनम् ?' इति शङ्कायां प्रत्यक्षस्योपजीव्यत्वं तत्प्रतिपादनबीजतयोपवर्ण्यते, यतः अनुमानादिप्रमाणानि प्रत्यक्षमुपजीव्यैव उत्पद्यन्ते, प्रत्यक्षमन्तरेणैकस्याऽपि प्रमाणस्योत्पत्तिः नैव भवति । अतः प्रत्यक्षस्य उपजीव्यत्वं = कारणत्वम्, तद्भिन्नप्रमाणानाम् उपजीवकत्वं = कार्यत्वम् । अवष्टभ्नाति यः स उपजीवकः, अवष्टभ्यते यत्तदुपजीव्यमिति व्युत्पत्तेः । कार्यं हि उपजीवति कारणम् । प्रत्यक्षगतमेतदुप-

●

प्रतीक्षा કરવાનું કહ્યું છે. મતલબ કે અનુમાનપ્રામાણ્યપરીક્ષા પછી તરત વ્યાપ્તિગ્રહોપાય કહેવા જોઈએ. છતાં તમે તેની પ્રતીક્ષા કરવાનું કહો છો. વ્યાપ્તિગ્રહોપાયપ્રતિપાદન સાક્ષાત્ ઉપયોગી છે, પરીક્ષા પ્રત્યે, વ્યાપ્તિસ્વરૂપનિરૂપણ પરંપરાએ. એટલે સૌ પ્રથમ વ્યાપ્તિગ્રહઉપાયનું જ પ્રતિપાદન કરવું જોઈએ. વ્યાપ્તિસ્વરૂપનું નહીં. વ્યાપ્તિગ્રહોપાયના પ્રતિપાદન માટે રાહ જોવી અનુચિત છે.'' આવી શંકાનું સમાધાન જો 'વ્યાપ્તિગ્રહોપાયપ્રતિપાદનનિદાન' લખવામાં ન આવે તો શક્ય નથી. તેનો પ્રવેશ કરવામાં આવે તો તેના દ્વારા વ્યાપ્તિસ્વરૂપનિરૂપણ ઉપજીવ્ય અને વ્યાપ્તિગ્રહોપાયપ્રતિપાદન ઉપજીવક છે - તેવું જણાઈ આવે છે. તાત્પર્યાર્થ એ છે કે જેમ સૌ પ્રથમ પ્રત્યક્ષપ્રમાણનું પ્રતિપાદન કરવાનું કારણ તેનું ઉપજીવ્યત્વ રજૂ કરવામાં આવે છે. મતલબ કે અનુમાન વગેરે પ્રમાણો ઉપજીવક છે, પ્રત્યક્ષ પ્રમાણ ઉપજીવ્ય છે. ઉપજીવક = ટેકો લેનાર. ઉપજીવ્ય = ટેકો લેવા યોગ્ય = ટેકો આપનાર. હંમેશા સૌ પ્રથમ ઉપજીવ્યનું પ્રતિપાદન કરવામાં આવે પછી ઉપજીવકનું. અનુમાન વગેરે પ્રમાણો પ્રત્યક્ષનો ટેકો લેનારા છે, માટે સૌ પ્રથમ પ્રત્યક્ષપ્રમાણનું નિરૂપણ કરવું વ્યાજબી છે. આ જ રીતે અનુમાનપ્રામાણ્યપરીક્ષા પ્રત્યે (૧) વ્યાપ્તિગ્રહોપાયપ્રતિપાદન અને (૨) વ્યાપ્તિસ્વરૂપનિરૂપણ - બન્ને કારણ હોવા છતાં પણ વ્યાપ્તિગ્રહોપાયપ્રતિપાદન ઉપજીવક છે, વ્યાપ્તિસ્વરૂપનિરૂપણ ઉપજીવ્ય છે. કારણ હંમેશા ઉપજીવ્ય હોય. કાર્ય હંમેશા ઉપજીવક હોય. વ્યાપ્તિગ્રહોપાયપ્રતિપાદનનિદાન કહેવા દ્વારા વ્યાપ્તિસ્વરૂપનિરૂપણ કારણ અને વ્યાપ્તિગ્રહોપાયપ્રતિપાદન કાર્ય - એમ જણાવ્યું. તેના દ્વારા વ્યાપ્તિસ્વરૂપનિરૂપણ એ ઉપજીવ્ય અને વ્યાપ્તિગ્રહોપાયપ્રતિપાદન ઉપજીવક સાબિત થયું. આમ, વ્યાપ્તિગ્રહોપાયપ્રતિપાદન અને વ્યાપ્તિસ્વરૂપનિરૂપણ ઉભય સમાનતયા અભિધેય

"व्याप्तिस्वरूपनिरूपणस्य परीक्षाकारणत्वेऽपि व्याप्तिग्रहोपाय-प्रतिपादनस्यापि तादृशतया 'व्याप्तिग्रहोपायश्च वक्ष्यते' - इत्यनेन

●

जीव्यत्वमेव तत्प्रतिपादनस्य प्राथम्ये निमित्तम्, उपजीव्यत्वस्य बलवत्त्वेनोपजीव्यस्यैव प्रथमं निरूपणौचित्यात्, तथा व्याप्तिग्रहोपायप्रतिपादनं व्याप्तिस्वरूपनिरूपणं विना न शक्यम्, अतः व्याप्तिग्रहोपायप्रतिपादनस्य उपजीवकत्वं = कार्यत्वम्, व्याप्तिस्वरूपनिरूपणस्य उपजीव्यत्वं = कारणत्वम्, उपजीव्यस्यैव प्रथमं निरूपणाऽर्हत्वेन भविष्यति व्याप्तिस्वरूपनिरूपणस्य प्राथम्यार्हता। तथा च परीक्षां प्रति उभयोरपि कारणत्वे सत्यपि व्याप्तिग्रहोपायप्रतिपादनोपजीव्यत्वस्य व्याप्तिस्वरूपनिरूपणे सत्त्वात्तस्य निरूपणमुचितमेव इति व्याप्तिस्वरूपनिरूपणप्राथम्यबीजभूतमुपजीव्यत्वं दर्शयितुं दीधितिकृता व्याप्तिग्रहोपायप्रतिपादननिदानत्वस्याऽपि प्रवेशः आदृतः इत्याशयेनाह -

व्याप्तिस्वरूपनिरूपणस्य परीक्षाकारणत्वेऽपि = व्याप्तिस्वरूपनिरूपणस्याऽपि परीक्षाकारणत्वेन 'समारब्धाऽनुमानप्रामाण्यपरीक्षाकारणीभूतं व्याप्तिस्वरूपनिरूपणम् आरभते' - इत्युक्तौ उपोद्घातसङ्गतिलाभसम्भवेऽपि "**व्याप्तिग्रहोपायप्रतिपादनस्याऽपि तादृशतया** = 'व्याप्तिस्वरूपनिरूपणवद् अनुमानप्रामाण्यपरीक्षाकारणत्वेन '**व्याप्तिग्रहोपायश्च वक्ष्यते' इत्यनेन** = उक्तकथनेन गङ्गेशोपाध्यायेन व्याप्तिग्रहोपायप्रतिपादनस्य प्रतीक्षाविधानं कर्तव्यतयोपदर्श्यते, किन्तु अनुमित्युपपादकतया तस्यैव कथनमुचितमिति 'व्याप्तिग्रहोपायश्च वक्ष्यते' इत्यनेन गङ्गेशोपाध्यायेन

●

હોવા છતાં પણ વ્યાપ્તિસ્વરૂપનિરૂપણ ઉપજીવ્ય બનવાને કારણે સૌ પ્રથમ અભિધેય બનશે. એટલે જ દીધિતિકારે માત્ર 'સમારબ્ધઅનુમાનપ્રામાણ્યપરીક્ષાકારણીભૂત વ્યાપ્તિસ્વરૂપનિરૂપણ ...' ન કહેતા 'સમારબ્ધઅનુમાનપ્રામાણ્યપરીક્ષાકારણીભૂતવ્યાપ્તિગ્રહોપાયપ્રતિપાદનનિદાન વ્યાપ્તિસ્વરૂપનિરૂપણ....' આ પ્રમાણે કહેલ છે.

શબ્દાર્થ જોઈ લઈએ - ''વ્યાપ્તિસ્વરૂપનું નિરૂપણ પરીક્ષાનું કારણ હોવા છતાં પણ વ્યાપ્તિગ્રહઉપાયનું પ્રતિપાદન પણ તાદશઅનુમાનપ્રામાણ્યની પરીક્ષાનું કારણ હોવાને કારણે '**व्याप्तिग्रहोपायश्च वक्ष्यते**' - આવું કહીને વ્યાપ્તિગ્રહોપાયપ્રતિપાદનની રાહ જોવી અનુચિત છે'' - આવી આશંકાના નિરાકરણ માટે, વ્યાપ્તિસ્વરૂપના અજાણકાર વ્યક્તિ પ્રત્યે વ્યાપ્તિગ્રહોપાયનું પ્રતિપાદન અશક્ય હોવાને કારણે વ્યાપ્તિગ્રહોપાયના પ્રતિપાદનની પહેલા વ્યાપ્તિસ્વરૂપનું નિરૂપણ કરવામાં બીજભૂત (= કારણ) એવું જે વ્યાપ્તિસ્વરૂપનિરૂપણમાં

गू ढा र्थ *तत्प्रतीक्षाविधानमनुचितम्"- इत्याशङ्कानिरासाय व्याप्तिस्वरूपमविद्वांसं प्रति व्याप्तिग्रहोपायप्रतिपादनस्याऽशक्यतया तत्प्रथमं स्वरूपाभिधान-बीजभूतं तदुपजीव्यत्वं दर्शयितुं परीक्षाकारणव्याप्तिग्रहोपायकारणत्वेन स्वरूपनिरूपणं दर्शितं* ***प्रतिपादननिदानमित्यनेन*** *।*

●

सूचितं यत् **तत्प्रतीक्षाविधानं** = व्याप्तिस्वरूपनिरूपणपर्यन्तव्याप्तिग्रहोपायप्रतिपादनप्रतीक्षाकरणम्, तद् **अनुचितं** = शिष्यजिज्ञासायाः प्रतिबन्धकत्वेनाऽशक्य**मि"ति आशङ्कानिरासाय** = इत्येवं यदि आशङ्केत कोऽपि तम्प्रति तदुत्तरदर्शनाय **व्याप्तिस्वरूपम् अविद्वांसम्** = अज्ञायकं **प्रति व्याप्तिग्रहोपायप्रतिपादनस्याऽशक्यतया तत्प्रथमं** = व्याप्तिग्रहोपायप्रतिपादनपूर्वमेव **स्वरूपा-भिधानबीजभूतं** = व्याप्तिस्वरूपनिरूपणकारणं **तदुपजीव्यत्वं** = व्याप्तिस्वरूपनिरूपणनिष्ठ-व्याप्ति-ग्रहोपायप्रतिपादननिरूपितोपजीव्यत्वं **दर्शयितुं** "समारब्धाऽनुमानप्रामाण्यपरीक्षाकारणीभूत-व्याप्तिग्रहोपायप्रतिपादननिदानं व्याप्तिस्वरूपनिरूपणम्" - इत्येवं **परीक्षाकारणव्याप्तिग्रहोपाय-कारणत्वेन** = अनुमानप्रामाण्यपरीक्षाकारणीभूतव्याप्तिग्रहोपायप्रतिपादनकारणत्वेन **स्वरूपनिरूपणं** = व्याप्तिस्वरूपनिरूपणं **दर्शितं प्रतिपादननिदानमित्यनेन** = इत्येवम् उक्त्येत्यर्थः ।

य शो ल ता

एवं च अनुमानप्रामाण्यपरीक्षां प्रति व्याप्तिग्रहोपायप्रतिपादनस्य व्याप्तिग्रहोपायप्रतिपादनं प्रति व्याप्तिस्वरूपनिरूपणस्य कारणत्वं फलितम्, ***एतेन*** "तत्कारणीभूतो यो व्याप्तिग्रहः तदुपाय-प्रतिपादनमित्यर्थः" - इत्येवंरूपेण अनुमानप्रामाण्यपरीक्षाकारणीभूतत्वं व्याप्तिग्रहस्येतिनिरूपणप्रवणं व्याख्यानमपि ***निराकृतम्;*** 'इति व्याप्तिग्रहोपायप्रतिपादनस्य भवति परीक्षाकारणत्वमि'त्युक्त्या ग्रन्थकृता स्पष्टतया तत्कारणत्वस्य व्याप्तिग्रहोपायप्रतिपादने एव प्रस्थापितत्वात्, युक्तञ्चैतत्, यत्र च चार्वाकादयः 'व्याप्तिः व्याप्तिग्रहः वा नास्ति, व्याप्तिग्रहस्य व्यभिचारशङ्कादिनाऽनुत्पत्तेः अतः न अनुमितिः भविष्यति' इत्येवं स्वमतं प्रस्थापयन्ति तत्र तान् प्रति व्याप्तिग्रहोपायप्रतिपादनमेव युक्तम्, तादृशोपायप्रतिपादने 'व्याप्तिग्रहः भविष्यति' इति तेषां स्वीकार्यमेव । तथा चाऽनुमितिरूप-फलोत्पत्त्या भविष्यति अनुमानस्य प्रामाण्यमेवम् अनुमानप्रामाण्यपरीक्षां प्रति व्याप्तिग्रहोपाय-

●

વિ ના રહેલું ઉપજીવ્યત્વ તેને દેખાડવા માટે 'પ્રતિપાદનનિદાન' કહેવા દ્વારા અનુમાનપ્રામાણ્ય-પરીક્ષાના કારણભૂતવ્યાપ્તિગ્રહોપાયપ્રતિપાદનના કારણ તરીકે વ્યાપ્તિસ્વરૂપનિરૂપણને દેખાડ્યું.

प्रतिपादनस्य कारणत्वदर्शनमेवोचितम्, अत एव 'व्याप्तिग्रहोपायश्च वक्ष्यते' इत्यनेन व्याप्तिग्रहोपायप्रतिपादनस्य प्राथम्याऽऽशङ्का भवति, व्याप्तिग्रहस्यैव कारणत्वे 'व्याप्तिग्रहं प्रति व्याप्तेर्विषयतया कारणत्वेन तन्निरूपणं प्रथमम्' इत्येवं व्याप्तिस्वरूपनिरूपणप्राथम्योपपादने च व्याप्तिग्रहोपायप्रतिपादननिदानमित्यस्य वैयर्थ्यापत्तिः, तादृशपरीक्षाकारणीभूतव्याप्तिग्रहनिदानम्... इत्याद्युक्त्या भवदभिप्रेतार्थलाभसम्भवाद् इति ***दिक्*** ।

अत एव "समारब्धा या अनुमानप्रामाण्यपरीक्षा = परमतनिराकरणपूर्वकं स्वमतेनाऽनुमानप्रामाण्यसाधनं तत्कारणीभूतो यो व्याप्तिग्रहस्तदुपायप्रतिपादनमित्यर्थः" - इत्येवंरूपव्याख्यानस्य ***यत्*** "अनुमानप्रामाण्यसाधनम् = अनुमाननिष्ठं यत् प्रामाण्यं तद्विधेयकाऽनुमितिः, तत्कारणीभूतः = निरुक्ताऽनुमितिकारणीभूतः । व्याप्तिग्रह इति प्रामाण्यव्याप्यप्रमितिकरणतावच्छेदकरूपवदनुमानमित्याकारकनिश्चय इत्यर्थः । तदुपायप्रतिपादनं = तस्य व्याप्तिग्रहस्य य उपायः कारणं तत्प्रतिपत्त्यनुकूलव्यापारः" - इत्येवं व्याख्यानं ***तदपि पराकृतम्;***

अनुमानप्रामाण्यसाधनस्य अनुमानप्रामाण्यपरीक्षापदार्थत्वेनोपन्यासात्तस्य 'अनुमानं प्रमाणम्, प्रमितिकरणताऽवच्छेदकधर्मवत्त्वादि'त्यनुमितिरूपत्वकथनस्यानुचितत्वात्, यतः तादृशानुमितेः परीक्षात्वं न सम्भवति एव, तस्याः परमतनिराकरणरूपत्वाभावात्, परप्रदर्शितहेतौ असिद्ध्याद्युद्भावनस्यैव तथात्वात्, अस्याः अनुमितेः परमतनिराकरणत्वे परमतनिराकरण-स्वमतव्यवस्थापनयोरैक्यापत्त्या तत्पूर्वकत्वकथनाऽसङ्गतेश्च । एवञ्च प्रामाण्यसाध्यकाऽनुमितिकारणीभूतः यः व्याप्तिग्रहः इत्यादिकं विवरणमपि न सङ्गच्छते, तथाव्याख्याने पूर्वोक्तलाभाऽसम्भवादिति सम्यग्विभावनीयम् ।

अनुमानप्रामाण्यपरीक्षाकारणीभूतत्वं व्याप्तिग्रहोपायप्रतिपादने यथाऽस्ति तथा दर्शितम्, अधुना तद्दर्शनस्य प्रकृते यत् प्रयोजनं तद् दर्शयितुमादौ पूर्वपक्षम् उपस्थापयति - **यद्यपी**ति ।

ननु "व्याप्तिस्वरूपनिरूपणस्य व्याप्तिग्रहोपायप्रतिपादनस्य चेत्युभययोः अनुमानप्रामाण्यपरीक्षाकारणत्वेऽपि किमर्थं व्याप्तिस्वरूपनिरूपणमेव प्रथममुक्तम् ?" इति शङ्कानिरासाय 'व्याप्तिग्रहोपायप्रतिपादननिदानं व्याप्तिस्वरूपनिरूपणम्' - इत्येव वक्तव्यम्, एतावतैव व्याप्तिस्वरूपनिरूपणस्य व्याप्तिग्रहोपायप्रतिपादननिरूपितोपजीव्यत्वसिद्ध्या उपजीव्यस्य तस्यैव प्राथम्ये औचित्यात् । तथा च अनुमानप्रामाण्यपरीक्षाकारणीभूतत्वं व्याप्तिग्रहोपायप्रतिपादने अस्तीत्येतद्दर्शनमत्र व्यर्थम्, दीधितिकृता 'व्याप्तिग्रहोपायप्रतिपादननिदानं व्याप्तिस्वरूपनिरूपणम् आरभते' इत्येव वक्तव्य-

गू ***यद्यपि*** *उक्तशङ्कानिवृत्तिः कारणान्ताऽवचनेऽपि भवत्येव;*

●

मित्याशयेनाह - **यद्यपि उक्तशङ्कानिवृत्तिः** = "व्याप्तिग्रहोपायप्रतिपादनस्याऽपि अनुमानप्रामाण्य-परीक्षाकारणत्वेन 'व्याप्तिग्रहोपायश्च वक्ष्यते' - इतिकथनेन तत्प्रतीक्षाविधानम् अनुचितम्" - इत्याशङ्कायाः निवृत्तिः **कारणाऽन्ताऽवचनेऽपि** = कारणीभूताऽन्ताऽकथनेऽपि = 'समारब्धानुमान-प्रामाण्यपरीक्षाकारणीभूत' इत्यकथनेऽपि, 'व्याप्तिग्रहोपायप्रतिपादननिदानं व्याप्तिस्वरूपनिरूपणम् आरभते' - इत्येतावदुक्तौ अपि **भवत्येव**, न तु न भवत्यपि, अयोगव्यवच्छेदार्थकत्वादेतदेवकारस्येति या निष्फलं समारब्धाऽनुमानप्रामाण्यपरीक्षाकारणीभूतेत्यस्योपादानम् ***इति चेत् ?***

शो ***न,*** तथा सति अनुमानप्रामाण्यपरीक्षाऽनन्तरं व्याप्तिस्वरूपनिरूपणस्य सङ्गतत्वाऽलाभात्। ल अनुमानप्रामाण्यपरीक्षाकारणत्वस्य व्याप्तिग्रहोपायप्रतिपादने तत्कारणत्वस्य च व्याप्तिस्वरूपनिरूपणे ता 'समारब्धे'त्यादिकथनेन ज्ञानाद् अनुमानप्रामाण्योपपादकत्वं व्याप्तिस्वरूपनिरूपणे ज्ञातं भवति। अनुमानप्रामाण्यपरीक्षाग्रन्थ-व्याप्तिग्रन्थयोरेकवाक्यताप्रतिपत्तये सङ्गतिप्रदर्शनमावश्यकं भवति । एकवाक्यता = पूर्वग्रन्थार्थज्ञानप्रयोजनाऽभिन्नप्रयोजनकप्रतिपत्तिविषयार्थकत्वम्।

इदमत्राकूतम् - अनुमानप्रामाण्यप्रतिपादकग्रन्थार्थज्ञानस्याऽनन्तरं फलं प्रामाण्यसिद्धिः परम्परया मुक्तिश्च । तदेव प्रयोजनं व्याप्तिग्रन्थार्थज्ञानस्य । अतः अनुमानप्रामाण्यप्रतिपादकग्रन्थार्थ-प्रतिपत्ति(= ज्ञान)प्रयोजनाऽभिन्नप्रयोजनकप्रतिपत्ति(= ज्ञान)विषयीभूतः अर्थः व्याप्तिग्रन्थार्थः,

●

❖ 'समारब्ध...' ईत्यादिकथनप्रयोजन ❖

प्रश्न :- (यद्य.) "व्याप्तिस्वरूपनुं निरूपण अने व्याप्तिग्रहोपायनुं प्रतिपादन बन्ने समानतया अभिधेय होवा छतां पण शा माटे व्याप्तिस्वरूपनुं निरूपण पहेला कर्युं ?" - आवी शंकाना निराकरण माटे दीधितिकारे व्याप्तिग्रहोपायप्रतिपादननिदान आवुं कहेवा वि द्वारा व्याप्तिग्रहोपायप्रतिपादन अने व्याप्तिस्वरूपनिरूपण बंने वच्चे उपजीवक-उपजीव्य न भाव दर्शावी व्याप्तिस्वरूपनिरूपणनुं पल्लुं भारे करी सौ प्रथम व्याप्तिस्वरूपना निरूपणने म्रा व्याजबी ठेरव्युं. पण, हवे अमारो प्रश्न ए छे के - तमारे खाली उपजीव्य-उपजीवक भाव ज देखाडवो होय तो आटलुं लांबु लखवानी जरूरत छे ज नहीं. समारब्धअनुमान प्रामाण्यपरीक्षाकारणीभूत... आटलुं 'कारणान्त' न कहो तो पण वांधो नथी. फक्त 'व्याप्तिग्रहोपायप्रतिपादननिदानव्याप्तिस्वरूपनिरूपणनो आरंभ करे छे' - आटलुं ज कहो. आटलुं कहेवा द्वारा पण उपजीव्य-उपजीवकभाव तो प्रदर्शित थाय ज छे अने तेना

तादृशाऽर्थकत्वं व्याप्तिग्रन्थे । अतः व्याप्तिग्रन्थः अनुमानप्रामाण्यग्रन्थेन समम् एकवाक्यताऽऽपन्नः भवति । अतः अनुमानप्रामाण्यनिरूपितसङ्गतिमान् व्याप्तिग्रन्थः भवति । "सप्रसङ्ग उपोद्घातो हेतुताऽवसरस्तथा । निर्वाहकैक्यकार्यत्वे षोढा सङ्गतिरिष्यते।।" इत्युक्त्या षोढा सङ्गतिः । तत्र प्रकृते उपोद्घातसङ्गतिः वर्तते । उपोद्घातलक्षणं "चिन्तां प्रकृतसिद्ध्यर्थामुपोद्घातं विदुर्बुधाः" इत्येवम्, प्रकृतसिद्ध्युपपादकत्वमिति तदर्थः । प्रकृतसिद्धिः प्रकृते अनुमानप्रामाण्यसिद्धिः, यदि अनुमानप्रामाण्योपपादकत्वं व्याप्तिस्वरूपनिरूपणे भवेत् तदैव अनुमानप्रामाण्यनिरूपितोपोद्घात-सङ्गतिमद् व्याप्तिस्वरूपनिरूपणं भवेत्, तदैव च व्याप्तिस्वरूपनिरूपणम् अनुमानप्रामाण्याऽनन्तरं कृतं शोभेत, तन्निरूपिततन्निष्ठसङ्गतेः तदनन्तरं तन्निरूपणप्रयोजकत्वमिति नियमात् ।

यदि च 'अनुमानप्रामाण्यपरीक्षाकारणीभूते'ति न निवेश्यते तदा अनुमानप्रामाण्योपपादकत्वं व्याप्तिस्वरूपनिरूपणे ज्ञातं न भवति, अतः उपोद्घातसङ्गतिमत्त्वमपि तस्य न ज्ञायते, तन्निवेशे तत्कारणत्वस्य व्याप्तिग्रहोपायप्रतिपादने तत्कारणत्वस्य च व्याप्तिस्वरूपनिरूपणे ज्ञानाद् अनुमान-प्रामाण्यसिद्ध्युपपादकत्वं व्याप्तिस्वरूपनिरूपणे सुज्ञातं भवति । एवञ्च अनुमानप्रामाण्यपरीक्षा-निरूपितोपोद्घातसङ्गतिमद् व्याप्तिस्वरूपनिरूपणं भवतीति अनुमानप्रामाण्यपरीक्षाऽनन्तरं तन्निरूपणं सङ्गतं भवतीत्येवम् उपोद्घातसङ्गतिलाभाय समारब्धेत्यादिकथनं दीधितिकृता कृतमित्या-

य शो ल ता

●

द्वारा 'व्याप्तिग्रहोपायप्रतिपादन अने व्याप्तिस्वरूपनिरूपण बंने समानतया अभिधेय होवा छतां पण शा माटे व्याप्तिस्वरूपनिरूपण पहेला करवामां आवे छे ?' - आ शंकानुं निराकरण थई ज शके छे. तो पछी 'समारब्धअनुमानप्रामाण्यपरीक्षाकारणीभूत...' कहेवानी जरूरत शी छे ?

⁂ छ प्रकारनी संगति ⁂

वि न मा

उत्तर :- (तथा.) तमारी वात साची छे, उक्त आशंकानुं निराकरण तो समारब्ध-अनुमानप्रामाण्यपरीक्षाकारणीभूत...न कहेवा छतां पण थई ज जाय छे, पण दीधितिकारने अनुमानप्रामाण्यनी परीक्षा पछी व्याप्तिस्वरूपना निरूपणमां संगति प्रदर्शित करवी हती. ते माटे समारब्ध ईत्यादि लखवुं अनिवार्य छे. एक नियम छे के जयां असंगतनुं निरूपण करवामां आवतुं होय ते ग्रंथ पण असंगत लेखाय. जो अनुमानप्रामाण्यपरीक्षा अने व्याप्तिस्वरूपनिरूपण वच्चे कोई संगति न होय तो तादृशनिरूपण असंगत लेखाय. अने तादृशनिरूपण करनार ग्रंथ पण असंगत गणाय. माटे, अनुमानप्रामाण्यपरीक्षा अने व्याप्तिस्वरूपनिरूपण वच्चे संगति बतावती अनिवार्य छे. संगति छ प्रकारनी होय छे.

गू ढा *तथापि अनुमानप्रामाण्यनिरूपणनिरूपितोपोद्घातसङ्गतिलाभाय तदुक्तिः ।*

●

शयेन आह - **तथापि** = उक्तशङ्कानिवृत्तये कारणीभूतान्तकथनस्याऽनावश्यकत्वेऽपि **अनुमानप्रामाण्यनिरूपणनिरूपितोपोद्घातसङ्गतिलाभाय** = अनुमानप्रामाण्यपरीक्षानिरूपितोपोद्घातसङ्गतिमत्त्वस्य व्याप्तिस्वरूपनिरूपणे लाभाय **तदुक्तिः** = समारब्धाऽनुमानप्रामाण्यपरीक्षाकारणीभूतेत्युक्तिः दीधितिकृतामिति शेषः ।

य शो ल ता ***ननु*** समारब्धाऽनुमानप्रामाण्यपरीक्षाकारणीभूतव्याप्तिग्रहोपायप्रतिपादननिदानं व्याप्तिस्वरूपनिरूपणं करोतीत्येवोच्यताम्, 'समारब्धाऽनुमानप्रामाण्यपरीक्षाकारणीभूतव्याप्तिग्रहोपायप्रतिपादननिदानं व्याप्तिस्वरूपनिरूपणमारभते' इति कथमुक्तम् ? आरम्भस्य पूर्ववद् आद्यकृतिरूपत्वेन आद्यत्वस्य च तत्कृतिसमवायिसमवेतव्याप्तिस्वरूपनिरूपणविषयककृतिक्षणध्वंसाऽनधिकरणक्षणवृत्तित्वरूपत्वेन निरर्थकगौरवाऽऽपत्तेरिति चेद् ? न,

व्याप्तिस्वरूपनिरूपणस्याऽत्रादौ अक्रियमाणत्वेन व्याप्तिविषयकपूर्वपक्षस्यैवादौ अभिधास्यमानत्वेनाऽऽरम्भस्यैवोचितत्वात् ।

●

(૧) પ્રસંગ સંગતિ, (૨) ઉપોદ્ઘાત સંગતિ, (૩) હેતુતા સંગતિ, (૪) અવસર સંગતિ, (૫) નિર્વાહઐક્ય સંગતિ, (૬) કાર્યઐક્ય સંગતિ.

❋ ઉપોદ્ઘાતસંગતિનું લક્ષણ ❋

પ્રસ્તુતમાં સમારબ્ધઅનુમાનપ્રામાણ્યપરીક્ષાકારણીભૂત કહેવા દ્વારા દીધિતિકારે અનુમાનપ્રામાણ્યનિરૂપણ અને વ્યાપ્તિસ્વરૂપનિરૂપણ વચ્ચે ઉપોદ્ઘાત સંગતિ દર્શાવી. વિ ઉપોદ્ઘાતસંગતિ એટલે પ્રકૃતબાબતની સિદ્ધિ માટે ઉપયોગી. **चिन्तां प्रकृतसिद्ध्यर्थामुपोद्घातं विदुर्बुधाः** આ વચન દ્વારા પણ 'પૂર્વે જે જણાવેલ હોય તેની જ સિદ્ધિ માટે જે પછી ચિંતા ન કરવામાં આવે તે ઉપોદ્ઘાતસંગતિથી સંગત કહેવાય' - આ પ્રમાણે ફલિત થાય છે. પ્રા પ્રસ્તુતમાં પણ અનુમાનપ્રામાણ્યનિરૂપણ પછી જે વ્યાપ્તિસ્વરૂપનું નિરૂપણ કરવામાં આવે છે તે વચ્ચે ઉપોદ્ઘાત સંગતિ બતાવવી છે. વ્યાપ્તિસ્વરૂપનું નિરૂપણ અનુમાનપ્રામાણ્યનું ઉપપાદન કરનાર જ છે. કારણ કે અનુમાનપ્રામાણ્યપરીક્ષામાં વ્યાપ્તિગ્રહોપાય જરૂરી છે. અને તેમાં વ્યાપ્તિસ્વરૂપનિરૂપણ ઉપયોગી છે. આ રીતે વ્યાપ્તિસ્વરૂપનિરૂપણ પણ અનુમાનપ્રામાણ્યની સિદ્ધિમાં ઉપયોગી હોવાથી વ્યાપ્તિસ્વરૂપનિરૂપણ ઉપોદ્ઘાત સંગતિથી સંગત કહેવાય. વ્યાપ્તિસ્વરૂપનિરૂપણ સંગત છે = ઉપોદ્ઘાતસંગતિથી વિશિષ્ટ છે. તે

अत एव 'व्याप्तिस्वरूपं निरूपयति' - इत्येव कथं नोक्तम् ? 'आरभते' इत्यस्य निरर्थकत्वादिति ***शङ्काऽपि समाहिता;*** तादृशवाक्यार्थस्यैवाऽघटमानत्वात् । तथा हि - तत्र निपूर्वकरूबध्यात्वर्थः निरूपणम्, तच्च ज्ञानाऽनुकूलः व्यापारः शब्दात्मकः, व्याप्तिस्वरूपमित्यत्र द्वितीयार्थो विषयत्वं तस्य च धात्वर्थैकदेशज्ञानेऽन्वयः । एवञ्च 'व्याप्तिस्वरूपं निरूपयति' इत्यस्य 'व्याप्तिस्वरूपविषयकज्ञानानुकूलशब्दात्मकव्यापाराऽनुकूलवर्तमानकालीनकृतिविशिष्टः एकत्वसङ्ख्याविशिष्टः ग्रन्थकारः' इत्यर्थः, स च बाधितः, प्रतियोग्यसमानाधिकरणेत्यादिरूपसिद्धान्तव्याप्तेरेव व्याप्तित्वेन तद्विषयकज्ञानाऽनुकूलशब्दात्मकव्यापाराऽनुकूलवर्तमानकालीनकृतेः अविद्यमानत्वात्, पूर्वपक्षीयव्याप्तिविषयकज्ञानाऽनुकूलशब्दात्मकव्यापाराऽनुकूलकृतेरेव विद्यमानत्वात् ।

किञ्च, दीधितिकृताऽग्रे 'नन्वित्यादिना' इतिपदमपि निवेशितं वर्तते, तत्रत्यतृतीयाविभक्तेः अभेदोऽर्थः, यथा 'धान्येन धनवान्' इत्यत्र धान्याऽभिन्नधनवान् इति बोधः । तस्य चाऽन्वयो व्याप्तिस्वरूपनिरूपणे भवति । व्याप्तिस्वरूपनिरूपणस्य सिद्धान्तव्याप्तिनिरूपणरूपत्वे तादृशाऽन्वयोऽपि बाधितः भवति ।

ननु 'आरभते' इत्युक्तौ अपि व्याप्तिस्वरूपनिरूपणस्य सिद्धान्तव्याप्तिनिरूपणरूपत्वेन सिद्धान्तव्याप्तिनिरूपणविषयकाद्यकृतेश्च वर्तमानेऽविद्यमानत्वेन तदापत्तितादवस्थ्यम् ।

न च परमतनिराकरणपूर्वकत्वविशिष्टो यः व्याप्तिस्वरूपविषयकज्ञानाऽनुकूलो व्यापारः स एव व्याप्तिस्वरूपनिरूपणपदार्थः, तथा सति परमतनिराकरणस्य क्रियमाणत्वेन तदनुकूलाद्यकृतेः विद्यमानत्वान्न दोष ***इति वाच्यम्;***

नन्वित्यादेरभेदस्य तादृशनिरूपणपदार्थेऽनन्वयात् ।

न च परमतनिराकरणे तस्याभेदान्वयः सम्भवति, पूर्वपक्षतया क्रियमाणस्य परमतनिरूपणस्यापि तत्त्वतः परमतनिराकरणान्तर्गतत्वात् । यद्वा नन्वित्यादेः परमतनिरूपणरूपत्वे परमतनिरूपणपूर्वकत्वमपि उक्तनिरूपणपदार्थे निवेश्यम्, तथा च न दोषः ***इति वाच्यम्;***

तथा सति 'आरभते' इत्यस्य व्यर्थत्वापत्तेः, निरूपणपदार्थे परमतनिराकरणस्य परमत-

●

સંગતિ અનુમાનપ્રામાણ્યનિરૂપણની અપેક્ષાએ આવે છે = અનુમાનપ્રામાણ્યથી નિરૂપિત છે. જો ઉપમાનપ્રામાણ્યનું નિરૂપણ ચાલતું હોત તો તેની સંગતિ વ્યાપ્તિસ્વરૂપનિરૂપણમાં ન આવે. આમ, ફલિત એ થયું કે અનુમાનપ્રામાણ્યનિરૂપિત, વ્યાપ્તિસ્વરૂપનિરૂપણનિષ્ઠ ઉપોદ્‌ઘાત સંગતિ છે. આવા પ્રકારની ઉપોદ્‌ઘાત સંગતિના લાભ માટે સમારબ્ધઅનુમાનપ્રામાણ્ય ઇત્યાદિ લખવું જરૂરી છે, અનિવાર્ય છે. શબ્દાર્થ સુગમ છે.

निरूपणस्य वा प्रवेशेन तस्य च क्रियमाणत्वेन करोत्यर्थाऽबाधात् ।

न च 'आरभते' इत्युक्तौ 'ग्रन्थः न अद्याऽवधि प्रारब्धः, अधुनैव तस्य प्रारम्भो भवति' इति फलितं भवति, तथा च शिष्याः जिज्ञासवश्च तत्पठितुं झटिति उत्सहन्ते, करोत्युक्तौ करोतेः आरम्भाऽनन्तरमपि अभिधातुं शक्यत्वेन न तथा उत्सहन्ते इत्यतः आरभते इत्युक्त***मिति वाच्यम्;***

'व्याप्तिस्वरूपनिरूपणस्याऽक्रियमाणत्वेने'ति ग्रन्थकृदुक्त्या तत्र क्रियमाणत्वस्य भवताऽनभ्युपगन्तव्यत्वात् 'हेत्वाभासाः निरूप्यन्ते' - इत्यादौ उक्तनिरूपणपदार्थस्य बाधाच्च, तत्र पूर्वपक्षादेरनभिधानात् ।

न चाऽत्र निरूपणपदस्य उक्तार्थे लक्ष***णेति वाच्यम्;***

लक्षणायाः जघन्यवृत्तित्वात्, लक्ष्यतावच्छेदकस्यातिगुरुत्वेन महागौरवाऽऽपत्तेः, तादृशलक्षणास्वीकारे शक्यार्थबाधादिप्रयोजनाऽभावा***च्चेति चेद्*** ?

●

આ રીતે समारब्धअनुमानप्रामाण्यपरीक्षा ઇત્યાદિ તમામ પદોની સાર્થકતા સાબિત કરી. હવે અંતિમ **आरभते** પદની સાર્થકતા બતાવે છે. અર્થાત્ **आरभते** પદ જ શા માટે મૂક્યું ? **कुरुते** પદ કેમ ન મૂક્યું ? તેનું કારણ જણાવે છે. જો **कुरुते** પદ લખવામાં આવે તો એક પ્રશ્ન થાય -

'कुरुते' કહેવામાં આપત્તિ

प्रश्न :- તમે જણાવો છો કે 'तत्त्वचिंतामणिकार व्याप्तिस्वરૂપનું નિરૂપણ કરે છે.' જ્યારે અત્યારે તો સૌ પ્રથમ પૂર્વપક્ષીય વ્યાપ્તિપંચકનું નિરૂપણ આવશે. ત્યાર બાદ સિંહવ્યાઘ્રાદિલક્ષણ આવશે, આ બધાં तत्त्वचिंतामणिकारના મતે વ્યાપ્તિસ્વરૂપ તો છે જ નહીં. જ્યારે સિદ્ધાન્તલક્ષણની વ્યાપ્તિ બતાવવામાં આવે ત્યારે વ્યાપ્તિસ્વરૂપનું નિરૂપણ કર્યું કહેવાય. આમ, तत्त्वचिंतामणिकार વ્યાપ્તિસ્વરૂપનું નિરૂપણ કરતા જ નથી જ્યારે, ત્યારે 'તે વ્યાપ્તિસ્વરૂપનું નિરૂપણ કરે છે' - આવું કહેવું કેવી રીતે સંગત ઠરે ?

'आरभते' કહેવામાં લાભ

उत्तर :- (व्याप्ति.) ભાઈ ! તમારી આ શંકાને લક્ષ્યમાં રાખીને જ તો दीधितिकारે **कुरुते** પદ ન મૂકતા **आरभते** પદ મૂક્યું. મતલબ કે સૌ પ્રથમ અહીં વ્યાપ્તિસ્વરૂપવિષયક પૂર્વપક્ષ જ કહેવાનો છે, વ્યાપ્તિસ્વરૂપનું નિરૂપણ કરવામાં નથી આવવાનું. છતાં પણ

व्याप्तिस्वरूपगोचरपूर्वपक्षस्यैव प्रथममभिहितत्वेन व्याप्तिस्वरूपनिरूपणस्याऽक्रियमाणत्वेऽपि तदनुकूलगोचरकृतेर्विद्यमानतयाऽऽरभ्यमाणत्वं तत्रास्त्येवेति कुरुत इत्यनुक्त्वा ***आरभत*** *इत्युक्तमिति।*

गू ढा र्थ

●

न, पूर्वपक्षनिरूपण-तत्समीक्षणादीनामपि आरम्भणरूपतायाः स्वीकृतत्वात्, तथा चोक्तं **गदाधरेण** "पूर्वपक्षाभिधान-तत्खण्डनयोरपि तदारम्भणरूपता" इति । तथा च 'आरभते' इत्युक्तिरेव साध्वीत्याशयेनाह - **व्याप्तिस्वरूपगोचरपूर्वपक्षस्य** = पूर्वपक्षसम्मतव्याप्तिलक्षणनिरूपणस्य **एव**, एवकारेण उत्तरपक्षसम्मतप्रतियोगिव्यधिकरणादिरूपव्याप्तिस्वरूपनिरूपणस्य व्यवच्छेदः क्रियते, **प्रथमम्** = उत्तरपक्षीयव्याप्तिनिरूपणपूर्वम् **अभिहितत्वेन** = क्रियमाणत्वेन **व्याप्तिस्वरूपनिरूपणस्य**, वस्तुतः प्रतियोग्यसमानाधिकरणादिरूपस्यैव व्याप्तित्वेन **अक्रियमाणत्वेऽपि**, तथा च करोत्यर्थबाधेऽपि **तदनुकूलगोचरकृतेः** = व्याप्तिस्वरूपनिरूपणाऽनुकूलं यत् तद्विषयकपूर्वपक्षोपस्थापनतत्खण्डनादि तद्विषयककृतेः, उत्तरपक्षनिरूपणस्य पूर्वपक्षखण्डनं विना दुःशक्यत्वेन, तत्खण्डनस्य तदुपस्थापनं विना दुःशक्यत्वेन च भवति तत्तदुपस्थापनादीनां व्याप्तिस्वरूपनिरूपणाऽनुकूलत्वम्, समवायेन एतद्ग्रन्थरचनाकालीनगङ्गेशोपाध्यायस्याऽऽत्मनि **विद्यमानतया आरभ्यमाणत्वम्** = आरम्भविषयत्वं **तत्र** = व्याप्तिस्वरूपनिरूपणे **अस्ति एव**, उक्तयुक्त्या पूर्वपक्षखण्डनोपस्थापनादेरपि आरम्भणत्वाद् **इति** = तस्मात् '**कुरुते**' **इत्यनुक्त्वा** '**आरभते**' **इत्युक्तम्**, दीधितिकृतेति ध्येयम् ।

य शो ल ता

●

વ્યાપ્તિસ્વરૂપનિરૂપણઅનુકૂલકૃતિ તો આત્મામાં પ્રગટી જ ગઈ છે. માટે આરભ્યમાણપણું તો આવી જ જશે. તાત્પર્ય એ છે કે - પૂર્વે જણાવ્યા મુજબ આરંભ એટલે આદ્ય કૃતિ. અને વ્યાપ્તિસ્વરૂપવિષયક પૂર્વપક્ષ બતાવવામાં આવે ત્યારે વ્યાપ્તિસ્વરૂપનિરૂપણવિષયકકૃતિનો જન્મ તો થઈ જ ગયો કહેવાય. કારણ કે જેનું નિરૂપણ તમે કરવા માંગતા હો તે સંબંધી પૂર્વપક્ષ રજૂ કરવામાં આવે ત્યારે તે નિરૂપણનો આરંભ થઈ ચૂક્યો જ કહેવાય. જેમ ચા બનાવવાના ઉદ્દેશથી 'ગેસ' ચાલુ કરવામાં આવે ત્યારે 'ચા બનાવવાની ક્રિયા કરે છે' - તેમ ભલે ન કહેવાય, પરંતુ ચા બનાવવાની ક્રિયાનો આરંભ તો થઈ જ ગયો કહેવાય ને ! એટલે જ દીધિતિકારે '**आरभते**' જણાવ્યું, '**कुरुते**' એ પ્રમાણે ન જણાવ્યું.

વિ ન મ્રા

शाब्दार्थ :- પ્રસ્તુતમાં વ્યાપ્તિસ્વરૂપવિષયકપૂર્વપક્ષ જ સૌ પ્રથમ કહેલો હોવાને કારણે વ્યાપ્તિસ્વરૂપનું નિરૂપણ તો ક્રિયમાણ છે જ નહીં. છતાં પણ વ્યાપ્તિસ્વરૂપનિરૂપણઅનુકૂલકૃતિ

गू ***नन्वित्यादिना*** *इति मूले* ***नन्वित्यादि*** *। नन्विति प्रश्नः, अनुमितेः*

●

नन्वेवमपि दीधितिकृता 'अनुमानप्रामाण्यं निरूप्य व्याप्तिस्वरूपनिरूपणम् आरभते' इत्येव । वक्तव्यम्, किमर्थं समारब्धेत्यादिगुरुतरपथाश्रयण***मिति चेद्*** ?

न, तथा सति निरूप्येत्यत्र ल्यबर्थस्य ध्वंसकालीनत्वस्य व्याप्तिस्वरूपनिरूपणेऽन्वयाद् अनुमानप्रामाण्यनिरूपणध्वंसकालीनस्य तस्य वैयर्थ्यं दुर्वारमेव स्यात्, तद्ध्वंसे तदुपायवैयर्थ्य-
य ध्रौव्यादिति उक्तयुक्त्येति अवधेयम् ।

शो दीधितिकृता य'न्नन्वित्यादिने'त्युक्तं तन्मूलस्थ'नन्वि'त्यादेः प्रतीकम्, तत्रत्यतृतीयाविभक्तेः
ल अभेदोऽर्थः, अन्वयश्च तस्य व्याप्तिस्वरूपनिरूपणे, नन्वित्यादिवाक्यसमूहस्यैव व्याप्तिस्वरूपनिरूपण-
ता त्वात्, यद्वा आरम्भे तस्याऽन्वयः, नन्वित्यादिवाक्यसमूहस्य व्याप्तिस्वरूपगोचरपूर्वपक्षनिरूपण-
रूपत्वेऽपि व्याप्तिस्वरूपनिरूपणाऽऽरम्भरूपतायाः तत्राऽनपायादित्येवं सोपपत्तिकं दीधितिग्रन्थं व्याख्याय 'ननु अनुमितिहेतुव्याप्तिज्ञाने का व्याप्तिः ?' इत्यादितत्त्वचिन्तामणिं सविस्तरं व्याचिख्यासुः उपक्रमते - **'मूले'** इत्यादि ।

मूले = शाखा-प्रशाखादिकल्पदीधिति-जागदीश्यादीनां मूलमिव मूलं यत् तस्मिन् **तत्त्वचिन्तामणौ नन्वित्यादी**ति । अत्र **ननु इति प्रश्नः**, "प्रश्नश्च ज्ञीप्सा, भावे नङो विधानात् । सा च

●

તो વિદ્યમાન જ હોવાને કારણે આરભ્યમાણત્વ તો વ્યાપ્તિસ્વરૂપનિરૂપણમાં છે જ. માટે **'कुरुते'** એ પ્રમાણે ન કહેતા **'आरभते'** એ પ્રમાણે કહ્યું. આ રીતે દીધિતિની પંક્તિનો અર્થ પૂર્ણ થયો. હવે દીધિતિકારે લખેલ **नन्वित्यादिना**માં રહેલ મૂળ ગ્રંથના પ્રતીકને લઈ મૂળ તત્ત્વચિંતામણિકારની પંક્તિમાં રહેલા રહસ્યાર્થને પ્રકટ કરતા કહે છે -

❀ तत्त्वचिंतामणिनी व्याख्यानो आरंभ ❀

वि (**नन्वि.**) દીધિતિકારે જે **'नन्वित्यादि'** જણાવ્યું છે તે મૂળ તત્ત્વચિંતામણિમાં રહેલ
न ननु... ઈત્યાદિ પંક્તિનું પ્રતીક છે. હવે ગૂઢાર્થતત્ત્વાલોકકાર તત્ત્વચિંતામણિ ઉપર વ્યાખ્યા
भा કરે છે. **'ननु'** એ પ્રશ્નસૂચક છે. 'અનુમિતિહેતુવ્યાપ્તિજ્ઞાનમાં વ્યાપ્તિ શું છે ?' - આ અર્થક તત્ત્વચિંતામણિગ્રંથની પંક્તિમાં અનુમિતિપદ દ્વારા સ્વેતરભેદની અનુમિતિ લેવી. એટલે કે **अनुमितिः स्वेतरभिन्ना व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यज्ञानत्वात् । अर्थ** :- અનુમિતિ પોતાના કરતા અન્ય જે પ્રત્યક્ષાદિ દુનિયાની તમામ વસ્તુ તેનાથી ભિન્ન છે. કારણ કે તે પરામર્શજન્ય છે. પરામર્શ = વ્યાપ્તિવિશિષ્ટ પક્ષધર્મતાનું જ્ઞાન. ∵ **वह्निव्याप्यधूमवान् अयं पर्वतः** - આ

ज्ञानविषयकेच्छा" (र.ग.पृ.७००) इति **रसगङ्गाधरे पण्डितजगन्नाथोक्तिः** । **न्यायकोशे** च "अविज्ञातप्रार्थनं च प्रश्न इत्यभिधीयते" इति उक्तम् । तथा च अत्र व्याप्तिज्ञीप्सा, अत एव अविज्ञातव्याप्तिस्वरूपज्ञापनाय प्रार्थनं क्रियते यदुत 'का व्याप्तिः ?' इत्यादि । अतो ननु = अविज्ञातार्थप्रार्थनम् इति अर्थः योज्यः इति विभावनीयम् ।

अधुना 'अनुमितिहेतुव्याप्तिज्ञाने' इतितत्त्वचिन्तामणिम् अन्येषाम् अभिप्रायेण विवृणोति - **अनुमिते**रित्यादि ।

पूर्वं व्याप्तिप्रकारकपक्षधर्मताज्ञानजन्यज्ञानत्वम् अनुमितिलक्षणम् अभिहितम्, 'पर्वतो वह्निमान्' इत्याद्यनुमितीनां 'वह्निव्याप्यधूमवान् पर्वतः' इत्यादिपरामर्शज्ञानजन्यत्वेन, तदितरज्ञानानां तादृशत्वविरहेण, उक्तपरामर्शज्ञाने वह्निनिरूपितव्याप्तेः धूमे प्रकारविधया भानाद् धूमस्य च पर्वतरूपपक्षधर्मविधया भानादुक्तपरामर्शज्ञानस्य व्याप्तिप्रकारकपक्षधर्मताज्ञानरूपत्वसिद्ध्या च भवति लक्षणसमन्वयः । लक्षणकार्यञ्च तत्तद्रूपेण व्यवहारप्रयोजकत्वम्, इतरभेदाऽनुमापकत्वञ्च । यथा सास्नादिमत्त्वं लक्षणं 'इयं गौः' इत्यादिव्यवहारप्रयोजकं 'गौः स्वेतरभिन्ना सास्नादिमत्त्वाद्' - इत्याद्यनुमितिहेतु च । एवमेव प्रकृतेऽपि उक्ताऽनुमितिलक्षणस्य भवति स्वेतरभेदानुमापकत्वम्, यतः भवति अनुमितिः - 'अनुमितिः स्वेतरभिन्ना, व्याप्तिप्रकारकपक्षधर्मताज्ञानजन्यज्ञानत्वात् ।' एतदनुमितौ हेतुभूतं व्याप्तिप्रकारकपक्षधर्मताज्ञानजन्यज्ञानत्वम्, तद्घटकीभूतं व्याप्तिप्रकारकज्ञानं = व्याप्तिज्ञानम्, तद्विषयिणी व्याप्तिः का ? इति अर्थः ।

●

પરામર્શનો આકાર છે. આનો અર્થ થાય - વહ્નિવ્યાપ્તિવિશિષ્ટધૂમવાન પર્વત છે. મતલબ કે વ્યાપ્તિવિશિષ્ટ જે ધૂમ તે પક્ષમાં છે - આવું જણાય. એટલે કે વ્યાપ્તિવિશિષ્ટધૂમમાં પક્ષધર્મતાનું જ્ઞાન થાય. આમ, વ્યાપ્તિવિશિષ્ટપક્ષધર્મતાજ્ઞાન = પરામર્શ. અનુમિતિ તેનાથી જન્ય જ્ઞાનસ્વરૂપ હોવાથી, પ્રત્યક્ષ વગેરેથી ભિન્ન નક્કી થાય છે. આ અનુમિતિમાં હેતુ = વ્યાપ્તિવિશિષ્ટવૈશિષ્ટ્યઅવગાહિજ્ઞાનજન્યજ્ઞાનત્વ. વ્યાપ્તિવિશિષ્ટવૈશિષ્ટ્યઅવગાહી જ્ઞાન એટલે જ પરામર્શ. કારણ કે પૂર્વે જણાવ્યું તે મુજબ વ્યાપ્તિવિશિષ્ટધૂમનું વૈશિષ્ટ્ય પર્વતમાં જણાય તે જ્ઞાન = પરામર્શ. મતલબ કે પરામર્શના બે ઘટક થયા. (૧) વ્યાપ્તિજ્ઞાન, (૨) પક્ષધર્મતાજ્ઞાન. આમાં એક ઘટક વ્યાપ્તિજ્ઞાન પણ છે જ. એટલે **अनुमितिहेतुव्याप्तिज्ञानम्** = **अनुमितिहेतौ व्याप्तिज्ञानम्** = **अनुमितिहेतुघटकीभूतव्याप्तिज्ञानम्** આ રીતે અર્થ કરવો. મતલબ કે અનુમિતિહેતુ જે વ્યાપ્તિવિશિષ્ટવૈશિષ્ટ્યઅવગાહી જ્ઞાન તેમાં ઘટકીભૂત જે વ્યાપ્તિજ્ઞાન તેનો વિષય વ્યાપ્તિ શું છે ? - આવો અર્થ થાય. વિષયકા = વિષયીભૂતા.

गू ढा = *इतरभेदानुमितेः कारणं यद् व्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानजन्य-ज्ञानत्वरूपहेतुस्तद्घटकव्याप्तिज्ञानविषया' (= विषयीभूता) का इत्यर्थः।*

●

प्रकृते अनुमितिलक्षणरूपं यत् प्रकृतम्, तदुपपादकत्वं = अनुमितिलक्षणकार्यस्वेतरभेदानुमिति-हेतुघटकीभूतव्याप्तिज्ञानसाधकत्वम्, एवञ्च व्याप्तौ व्याप्तिज्ञानसाधकत्वस्य विषयरूपत्वेन निर्विवादतया भवति व्याप्तिस्वरूपनिरूपणं प्रकृतोपपादकत्वरूपोपोद्घातसङ्गतिविशिष्टम् । तथा च प्रकृतेऽपि उपोद्घातसङ्गतिरेव व्यक्तीक्रियते तत्त्वचिन्तामणिकृता इति आशयः एतेषाम् । एतदेव निरूपयन्नाह - **अनुमितेः = इतरभेदाऽनुमितेः** = अनुमितिः स्वेतरभिन्ना, व्याप्तिप्रकारकपक्षधर्मताज्ञानजन्यज्ञानत्वाद् - इत्यनुमितेः **कारणं** = प्रयोजकं **यद् व्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञान-**

य शो ल ता **जन्यज्ञानत्वरूपहेतुः** = परामर्शजन्यज्ञानत्वरूपहेतुः, 'पर्वतो वह्निव्याप्यधूमवान्' - इत्याकारकपरामर्शे व्याप्तिविशिष्टधूमनिरूपितवैशिष्ट्यस्य पर्वतेऽवगाहनेन परामर्शस्यैव व्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानरूपत्वात्, **तद्घटकव्याप्तिज्ञानस्य** = परामर्शविषयकज्ञाननिष्ठविषयिताव्यापकविषयितानिरूपकव्याप्तिज्ञानस्य, तद्घटकत्वस्य तद्विषयिताव्यापकविषयिताकत्वरूपत्वात्, **विषयीभूता** व्याप्तिः **का** ? इत्यर्थः ।

ननु एतादृशव्याख्यायाम् 'अनुमितिहेतौ व्याप्तिज्ञानम् = अनुमितिहेतुव्याप्तिज्ञानम्' इत्येवं सप्तमीतत्पुरुषसमासः आद्रियते । तत्र च सप्तम्याः घटकत्वमेवाऽर्थः कक्षीकर्तव्यः, अत एषा व्याख्या नादेया, घटकत्वार्थकसप्तमीतत्पुरुषस्य सार्वत्रिकत्वाभावात्, 'त्रिफलाहरितकीमानय' इत्यत्र 'त्रिफलाघटकीभूतहरितकीकर्मकाऽऽनयनक्रियायामहं तेन नियुक्तः' इत्याद्यर्थस्य दुर्ज्ञेयत्वात्।

●

शब्दार्थ :- दीधितिकारे जे '**नन्वित्यादि**' लख्युं छे ते मूળ तत्त्वચિંતામણિનું પ્રતીક છે. ननुशब्द પ્રશ્નઅર્થમાં છે. અનુમિતિ = ઇતરભેદની અનુમિતિ = **अनुमितिः स्वेतरभिन्ना, व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यज्ञानत्वात्** આવી જે અનુમિતિ તેમાં જે વ્યાપ્તિવિશિષ્ટ-વૈશિષ્ટ્યઅવગાહિજ્ઞાન(=પરામર્શ)જન્યજ્ઞાનત્વરૂપ હેતુ, તેમાં ઘટકીભૂત જે વ્યાપ્તિજ્ઞાન તેમાં વિષયીભૂત વ્યાપ્તિ શું છે ? - આવો અર્થ થયો.

वि न भा

(**यद्वा.**) અથવા તો બીજી રીતે પણ 'अनुमितिहेतुव्याप्तिज्ञानविषयीभूत व्याप्ति

१. मुद्रितप्रतौ विषयका - इत्यशुद्धः पाठः ।

न च तादृशसमासस्य सार्वत्रिकत्वाभावेऽपि क्वाचित्कत्वं तु समाम्नातमेव, तथा चाऽत्राऽपि तदनुसरणस्य न दोषावहत्व***मिति वाच्यम्;*** गत्यन्तराभावे एव तस्य स्वीकर्तव्यत्वात् ।

न च काऽत्राऽन्या गतिः ? ***इति वाच्यम्;*** कर्मधारयाऽऽश्रयणस्यैवाऽत्राऽन्यगतित्वसम्भवात् ।

तथाहि - 'अनुमानं प्रमाणं प्रमितिकरणताऽवच्छेदकधर्मवत्त्वाद्' - इत्यनुमितिः अनुमितिपदेन ग्राह्या । तादृशाऽनुमितिहेतुः 'प्रामाण्यव्याप्यप्रमितिकरणतावच्छेदकधर्मविशिष्टम् अनुमानम्' इत्याकारकपरामर्शः, तादृशपरामर्शः एव व्याप्तिज्ञानम्, व्याप्तेः तत्र विषयत्वात्, व्याप्तिविषयकज्ञानस्यैव व्याप्तिज्ञानपदार्थत्वात्, अनुमितिहेतुव्याप्तिज्ञानस्यैव गृहीतत्वेन केवलव्याप्तिविषयकज्ञानस्य तत्त्वेन ग्रहणाऽसम्भवाच्च । एतादृशपरामर्शविषयीभूता व्याप्तिः का ? इत्यर्थः पर्यवस्यति । 'अनुमितिहेतु च तद् व्याप्तिज्ञानञ्च' - इत्येवं कर्मधारयसमास एवाऽत्र आदृतः ।

न च अनुमितिपदेन अनुमितिसामान्यम् अविवक्ष्य किमर्थं प्रामाण्याऽनुमितिरेव गृही***तेति वाच्यम्;***

अनुमानप्रामाण्योपपादकत्वस्य व्याप्तौ सत्त्वे एव अनुमानप्रामाण्यनिरूपणाऽनन्तरं व्याप्तिस्वरूपनिरूपणस्य सङ्गतत्वसम्भवेन सर्वानुमित्युपपादकत्वस्य व्याप्तौ सत्त्वेऽपि विशिष्य अनुमानप्रामाण्यानुमितिग्रहणाद् व्याप्तौ अनुमानप्रामाण्यलक्षणप्रकृतोपपादकत्वप्रतिपत्तिसौकर्यात् ।

अत एव व्याप्तिज्ञानस्य व्याप्तिविषयकज्ञानरूपव्युत्पत्तिमङ्गीकृत्य व्याप्तिज्ञानपदेन परामर्शस्यैव ग्रहणे परामर्शस्यैव किमर्थं साक्षादुपादानं न कृतम् ?, व्याप्तिज्ञानत्वेन तदुपादानस्य व्यर्थायास-

कंई?' - આ પંક્તિનો અર્થ થઈ શકે છે. અનુમિતિનું કારણ જે વ્યાપ્તિજ્ઞાન = પરામર્શ તેમાં વિષયીભૂત વ્યાપ્તિ કઈ ? આ રીતે કર્મધારય સમાસ દ્વારા પણ અર્થ પ્રાપ્ત થાય. તાત્પર્ય એ જ છે કે કોઈ પણ અનુમિતિ પ્રત્યે પરામર્શ કારણમાં છે જ. એટલે અનુમિતિનું કારણ જે વ્યાપ્તિજ્ઞાન = પરામર્શ. તેમાં વિષયીભૂત વ્યાપ્તિ કંઈ ? આ રીતે સીધે સીધો અર્થ પ્રાપ્ત થઈ જાય છે. અહીં ઉપોદ્‌ઘાત સંગતિ દર્શાવવા માટે અનુમિતિપદ દ્વારા અનુમાનપ્રામાણ્યસાધ્યક અનુમિતિ લેવી.

·⁂· વ્યાપ્તિજ્ઞાન = પરામર્શ : કેવી રીતે ? ·⁂·

પ્રશ્ન :- વ્યાપ્તિજ્ઞાન એટલે પરામર્શ કેવી રીતે કહેવાય ?

गू *यद्वा अनुमितिकारणपरामर्शविषयव्याप्तिः केत्यर्थः ।*

●

रूपत्वात् ।

न चैवं सति 'अनुमितिहेतु' इत्यस्य व्यर्थत्वापत्ति***रिति वाच्यम्;*** उपोद्घातसङ्गतिलाभकारकत्वेन तत्सार्थक्य***मिति शङ्काऽपि समाहिता;***

व्याप्तिज्ञानत्वेन परामर्शस्योल्लेखे विषयविधया जनकताऽवच्छेदकत्वस्य व्याप्तौ सुज्ञेयत्वादिति अग्रे स्फुटीभविष्यति ।

तथा च कर्मधारयसमासेन तादृगर्थलाभे सम्भवति सति गुरुतरघटकत्वार्थकसप्तमीतत्पुरुषसमासाश्रयणमयुक्तमिति आशङ्कापनोदायाह -

य शो ल ता **यद्वेति** । **यद्वा** विकल्पार्थः, पूर्वत्राऽस्वरससूचकश्च । अत एव **मथुरानाथतर्कवागीशेनाऽपि व्याप्तिपञ्चकमाथुर्याम्** "केचित्तु अनुमितिपदम् अनुमितिनिष्ठेतरभेदाऽनुमितिपरम्; तथा च अनुमितिनिष्ठेतरभेदाऽनुमितौ यो हेतुः प्रागुक्तव्याप्तिप्रकारकपक्षधर्मताज्ञानजन्यज्ञानत्वरूपः तद्घटकं यद् व्याप्तिज्ञानं तदंशे विशेषणीभूता व्याप्तिः का ? इत्यर्थः, घटत्वार्थकसप्तमीतत्पुरुषसमासात् । तथा च प्रागुक्ताऽनुमितिलक्षणोपाद्घात एव सङ्गतिरनेन सूचितेत्याहुः" - इत्येवम् 'आहु'रुक्त्वा अस्वरसः प्रदर्शितः इत्यवधेयम् ।

अनुमितिकारणपरामर्शविषयव्याप्तिः केति । अत्राऽनुमितिपदेन अनुमानप्रामाण्यानुमितिरेव ग्राह्या । ***न च*** किम्मानम् अत्र, ग्रन्थकृता सामान्येनैव उल्लेखस्य कृतत्वेन तस्य विशेषपरतायां प्रमाणस्य मृग्यत्वा***दिति वाच्यम्;***

●

उत्तर :- व्याप्ति જેમાં વિષય બને તેવું જ્ઞાન = વ્યાપ્તિજ્ઞાન. વહ્નિવ્યાપ્તિવિશિષ્ટધૂમવાન્ પર્વત - આવા પરામર્શમાં વ્યાપ્તિ વિષય બને જ છે. તેથી શા માટે એને વ્યાપ્તિજ્ઞાન ન કહેવાય ?

वि न भा **પ્રશ્ન :-** તો શું ફક્ત વ્યાપ્તિવિષયકજ્ઞાનને પણ પરામર્શ કહી દેશો ? મતલબ કે 'વહ્નિવ્યાપ્તિવિશિષ્ટ ધૂમ છે' - આવું જ્ઞાન હોય. પણ, ધૂમ પર્વત ઉપર રહે છે - એવું જ્ઞાન ન હોય તો પણ તે વ્યાપ્તિજ્ઞાન તો છે જ. અને વ્યાપ્તિજ્ઞાનને પરામર્શ કહેશો તો તેવા પ્રકારના પરામર્શ દ્વારા અનુમિતિ થઈ જવાની આપત્તિ આવે. માટે વ્યાપ્તિજ્ઞાનને (= વ્યાપ્તિવિષયકજ્ઞાનને) પરામર્શ કેવી રીતે કહેવાય ?

"अत्र 'का व्याप्तिः ?' इत्यभिधाने अनुमानप्रामाण्योपपादकत्वलक्षणोपाद्घातसङ्गत्यलाभाद् ज्ञानमित्यन्तम्" - इति वक्ष्यमाणग्रन्थकृदुक्तेः, "अनुमितिहेतु इत्यस्याऽनुमाननिष्ठप्रामाण्याऽनुमिति-हेत्वित्यर्थः । व्याप्तिज्ञाने इत्यत्र च विषयत्वं सप्तम्यर्थः । तथा च अनुमाननिष्ठप्रामाण्याऽनुमितिहेतु-व्याप्तिज्ञानविषयीभूता व्याप्तिः का ? इत्यर्थः । 'अनुमाननिष्ठप्रामाण्याऽनुमितिहेत्वि'त्यनेन व्याप्तेरनुमानप्रामाण्योपपादकत्वकथनाद् अनुमानप्रामाण्यनिरूपणाऽनन्तरं व्याप्तिनिरूपणे उपोद्घात एव सङ्गतिः सूचिता" - इति **मथुरानाथतर्कवागीशोक्तेः**, "अयं भावः - निरुक्तमूलघटकीभूतस्य अनुमितिहेत्वितिशब्दस्य अनुमाननिष्ठं यत्प्रमितिकरणत्वं (= प्रमाणत्वम्) तद्विधेयकाऽनुमितिकारणीभूतं व्याप्तिज्ञानमित्यर्थकरणेन व्याप्तौ अनुमानप्रामाण्यविषयकज्ञानजनकज्ञानविषयत्वस्याऽर्थतो लाभसम्भवात् प्रकृतोपपादकत्वरूपोपोद्घातसङ्गतिर्व्याप्तौ निराबाधा एव" इति **तद्वृत्तौ वामाचरणभट्टाचार्योक्तेश्चाऽत्र** मानत्वात् ।

अयमाशयः - उक्तोक्तितात्पर्यपर्यालोचनेन इदं निश्चीयते यदुत अनुमानप्रामाण्योपपादकत्व-रूपोपोद्घातसङ्गतिरत्राऽभिप्रेता । अनुमितिपदेन 'पर्वतो वह्निमान्' इत्याद्यनुमितिसामान्यग्रहणे अनुमानप्रामाण्यनिरूपणाऽनन्तरं व्याप्तिनिरूपणस्य उपोद्घातसङ्गतत्वं न ज्ञायते, अनुमान-प्रामाण्योपपादकत्वस्य व्याप्तौ अप्रत्ययात् । पूर्वोक्तोक्त्या चोपाद्घात एव सङ्गतिः अत्राभिप्रेता ।

●

उत्तर :- ફક્ત વ્યાપ્તિ જ જે જ્ઞાનનો વિષય બનતી હોય તે વ્યાપ્તિજ્ઞાન હોવા છતાં પરામર્શ નથી. અને એટલે જ તો તેવું વ્યાપ્તિજ્ઞાન અનુમિતિનો હેતુ પણ બની શકતું નથી. પ્રસ્તુતમાં તો અનુમિતિહેતુ એવું જ વ્યાપ્તિજ્ઞાન લેવાનું છે. તે માટે 'અનુમિતિહેતુ' - આવું વિશેષણ પણ મૂક્યું છે. મતલબ કે અનુમિતિ જનક તો પરામર્શ જ છે અને પરામર્શને તો વ્યાપ્તિજ્ઞાન કહેવાય જ. જો અમે વ્યાપ્તિજ્ઞાનને પરામર્શ કહીએ તો 'વહ્નિવ્યાપ્તિવિશિષ્ટ ધૂમ છે' - આ જ્ઞાનને પણ પરામર્શ કહેવું પડે. પણ, અમે તો ઊલટું કહીએ છીએ. મતલબ કે 'પરામર્શ એ વ્યાપ્તિજ્ઞાન પણ છે' - આવું કહેવામાં તો કોઈ વાંધો છે જ નહીં. કારણ કે જ્યાં વ્યાપ્તિ વિષય બને તે જ્ઞાન = વ્યાપ્તિજ્ઞાન - આ વ્યાખ્યા મુજબ પરામર્શમાં વ્યાપ્તિ વિષય બને છે. માટે તેને = પરામર્શને વ્યાપ્તિજ્ઞાન અવશ્ય કહેવાય જ. આ ન્યાયથી પરામર્શને પક્ષધર્મતાજ્ઞાન પણ આપણે કહી શકીએ. આ રીતે અનુમિતિકારણપરામર્શ-વિષયીભૂત વ્યાપ્તિ કઈ છે ? - આવો અર્થ ફલિત થયો. શબ્દાર્થ સુગમ છે.

હવે, દ્વિતીય કલ્પ કેમ દેખાડ્યો ? પહેલા કલ્પમાં શું વાંધો હતો ? તે પ્રશ્નના જવાબમાં પહેલો કલ્પ કેવી રીતે દોષાવહ છે તે **एतेन** કહીને બતાવે છે.

गू

एतेन *घटकत्वार्थकसप्तम्या समासस्य क्वाचित्कत्वेऽपि कर्मधारयेना-*

●

तथा च अभिप्रेताऽसिद्धिः अन्यथाऽनुपपत्तिश्चैवाऽत्र मूलोक्ताऽनुमितिपदस्य अनुमानप्रामाण्य-विधेयकाऽनुमितिविशेषपरतायां प्रमाणमिति ।

अनुमानप्रामाण्यविधेयकाऽनुमितिकारणं यद् व्याप्तिज्ञानं = परामर्शः तद्विषयीभूता व्याप्तिः केत्यर्थः एतावता फलितः । पूर्वोक्तकल्पे अनुमितिहेतुघटकीभूतव्याप्तिज्ञानस्य गृहीतत्वात् तद्व्य-वच्छेदार्थं व्याप्तिज्ञानपदं परामर्शार्थकतया व्याकृतम् इति ध्येयम् ।

य

शो

पूर्वोक्तकल्पपरित्यागबीजं ग्रन्थकृत् स्वयमेवाह - **एतेने**ति । भावार्थः प्राग् विनिरूपितः। **एतेन** = घटकत्वार्थकसप्तमीतत्पुरुषसमासपरित्यागपूर्वकं कर्मधारयसमासाऽऽदरेण **घटकत्वार्थक-सप्तम्या समासस्य** = 'अनुमितिहेतौ व्याप्तिज्ञानम् = अनुमितिहेतुव्याप्तिज्ञानम्, अनुमितिहेतुघटकी-भूतव्याप्तिज्ञानमित्यर्थः' इत्येवं घटकत्वार्थकसप्तमीविभक्तितत्पुरुषसमासस्य **क्वाचित्कत्वेऽपि** = क्वचित् कुत्रचिद् अनन्यगतिकतया एव आश्रयणीयत्वेऽपि, अर्थाद् घटकत्वार्थकसप्तमीसमासो न सर्वत्राद्रियते, दुष्प्रतिपत्तिकत्वादिति नात्र तदाश्रयणं युक्तमिति आशयः ।

ल

ता

●

❀ અસ્વરસનું કારણ ઘટકત્વ ❀

(एतेन.) एतेन = પ્રથમ કલ્પને છોડી દ્વિતીય કલ્પને સ્વીકારવાથી એક શંકાનું નિરાકરણ થઈ જાય છે. જો પ્રથમ કલ્પ સ્વીકારો તો કોઈ કહી શકે કે - ભાઈ ! તમે જે 'અનુમિતિ હેતૌ વ્યાપ્તિજ્ઞાનમ્' - આ રીતે ઘટકત્વઅર્થક સપ્તમીવિભક્તિ તત્પુરુષ સમાસ સ્વીકાર્યો તે સમાસ બહુ જવલ્લે જ કરવામાં આવે છે. કારણ કે '**त्रिफलाहरितकीमानय**' આવા વાક્ય દ્વારા ત્રિફલાઘટકીભૂત હરડે લઈ આવ - આવો અર્થ જણાવો દુર્લભ છે. માટે જો કર્મધારય વગેરે સમાસ દ્વારા જ ઈષ્ટ અર્થ સરી જતો હોય તો ગૌરવગ્રસ્ત ઘટકત્વઅર્થક સપ્તમી તત્પુરુષ વગેરે સમાસનો આશ્રય કરવો દોષાવહ છે, અયોગ્ય છે. પ્રસ્તુતમાં ઘટકત્વની 'તદ્વિષયિતા-વ્યાપકવિષયિતાનિરૂપકત્વ = તદ્ઘટકત્વ' - આવી વ્યાખ્યા પ્રદર્શિત કરવામાં આવે છે. જેમ કે જ્યારે જ્યારે ઘટશબ્દનું જ્ઞાન થાય ત્યારે ત્યારે ઘ-ટ વગેરે ઘટશબ્દઘટકીભૂત અક્ષરોનું પણ જ્ઞાન થઈ જ જાય. મતલબ કે જે જ્ઞાનમાં ઘટ શબ્દની વિષયિતા હોય તે જ્ઞાનમાં ઘ...ટ... વગેરે અક્ષરોની વિષયિતા હોય જ. હા ! ક્યારેક એકલા ઘ કે ટ અક્ષરનું જ્ઞાન થાય ત્યારે ઘટશબ્દનું જ્ઞાન થઈ જ જાય તેવો નિયમ નથી. માટે, ઘટશબ્દની વિષયિતાને વ્યાપક ઘ...ટ...વગેરે અક્ષરોની વિષયિતા કહેવાય. પણ, ઘ...ટ...વગેરે અક્ષરોની

વિ

ન

મ્રા

ऽर्थलाभे गुरुतरसमासान्तराश्रयणस्याऽयुक्तत्वेऽपि च ***न क्षतिः,***

●

ननु तादृशसमासस्य क्वाचित्कत्वेऽपि क्वचित् तस्य आश्रयणे दोषाभावादत्र तदादरे न दोषलेशोऽपि इत्याह - **कर्मधारयेन** = 'अनुमानप्रामाण्यसाध्यकाऽनुमितिहेतु च तद् व्याप्तिज्ञानञ्च = अनुमितिहेतुव्याप्तिज्ञानम्' - इत्येवं कर्मधारयसमासेनैव **अर्थलाभे** = प्रकृतोपपादकत्वरूपोपोद्घातसङ्गत्याद्यभिप्रेतस्याऽर्थस्य लाभसम्भवे **गुरुतरसमासाऽन्तराश्रयणस्य** = कर्मधारयभिन्नघटकत्वार्थकसप्तमीतत्पुरुषादिगुरुतरसमासस्य 'स्वेतरभेदसाध्यकाऽनुमितिहेतौ व्याप्तिज्ञानम् = अनुमितिहेतुव्याप्तिज्ञानम्' - इत्येवंरीत्या यद् आश्रयणं तस्य **अयुक्तत्वेऽपि** = अनुचितत्वेऽपि **च न क्षतिः**

●

विषयिताने व्यापक घटशब्दनी विषयिता न कहेवाय. आ रीते घटशब्दविषयितावाव्यापकविषयिता घ...ट...अक्षरना ज्ञानमां जाय. तादृशविषयितानिरूपकत्व घ...ट..वगेरे अक्षरोमां जाय. कारण के विषयो हंमेशा विषयितानिरूपक होय. माटे, घटशब्दविषयितावाव्यापकविषयिताकत्व घ...ट...वगेरे अक्षरोमां रहेतुं होवाथी घटशब्दना घटक घ...ट... वगेरे अक्षर कहेवाय. ते ज रीते परामर्शनुं ज्ञान थता व्याप्तिनुं ज्ञान थई ज जाय, व्याप्ति परामर्शअंतर्भूत छे. आम, व्याप्ति तथा व्याप्तिज्ञान परामर्शघटक कही शकाय. आवा प्रकारना घटकत्वथी घटित सप्तमी विभक्ति तत्पुरुष समास गौरवग्रस्त थाय ते वात स्पष्ट ज छे. कारण के घटकत्वना लक्षणमां व्यापकत्वनो प्रवेश छे. व्यापकत्व = तद्वन्निष्ठअत्यंताभावअप्रतियोगित्व... ईत्यादि रीते गौरव स्पष्ट छे. आम, जो कर्मधारय वगेरे समास द्वारा ईष्ट अर्थनो लाभ थतो होय तो घटकत्वार्थक सप्तमी तत्पुरुष समासनो आश्रय करवो अयोग्य छे. एटले तमे जे 'अनुमितिहेतौ व्याप्तिज्ञानम्' - आवो घटकत्वअर्थक सप्तमी विभक्ति तत्पुरुष समास कर्यो छे - ते अयोग्य छे.

जो द्वितीय कल्पनो स्वीकार करवामां आवे तो आ आशंका रहेती नथी. कारण के 'अनुमितिकारण जे परामर्श = व्याप्तिज्ञान तद्विषयीभूता व्याप्ति शुं छे ?' - आ अर्थ कर्मधारयसमास द्वारा लभ्य छे. घटकत्वअर्थक सप्तमीविभक्ति तत्पुरुष समास द्वारा नहीं. माटे, सप्तमीविभक्ति तत्पुरुष समास स्वीकारवामां जे गौरवनी आपत्ति आपी हती तेने कोई अवकाश रहेतो नथी. **शब्दार्थ** - पहेलो विकल्प छोडी **यद्वा** कहीने बीजो विकल्प स्वीकारवाथी 'घटकत्वअर्थक सप्तमीविभक्ति तत्पुरुष समासनो आश्रय बहु जवल्ले ज करवामां आवे छे' - आवुं कोई कहे तो पण अने 'कर्मधारय समास द्वारा ज जे अर्थ अभिप्रेत छे तेनो लाभ थई जतो होय तो गौरवग्रस्त सप्तमी विभक्ति तत्पुरुष समासनो

गू *उक्तार्थस्य कर्मधारयलभ्यत्वात् ।*

●

= अनुमितिपदेन स्वेतरभेदसाध्यकाऽनुमितिग्राहकपूर्वोक्तकल्पस्थाऽयोग्यत्वदोषस्य प्रकृतानुमान-प्रामाण्याऽनुमितिग्राहककल्पेऽनवकाश एव, **उक्तार्थस्य** = अनुमितिकारणीभूतपरामर्शविषयेत्याद्यर्थस्य **कर्मधारयलभ्यत्वात्** = पूर्वोक्तकर्मधारयसमासाश्रयणेन बोधसम्भवादित्यर्थः पर्यवस्यति ।

"एतच्चोपलक्षणम् - पूर्वोक्तकल्पे व्याप्तिज्ञानपदवैयर्थ्यदोषोऽपि अत्र वेदितव्यः, पूर्वोक्ताऽनुमिति-हेतुभूतव्याप्तिप्रकारकपक्षधर्मताज्ञानजन्यज्ञानत्वघटकत्वस्य व्याप्तिज्ञाने इव व्याप्तौ अपि सत्त्वात् । अनुमानप्रामाण्याऽनुमितिहेतुविषयीभूतत्वस्य व्याप्तिभिन्नेऽपि सत्त्वात्तत्र व्याप्तौ जनकताऽवच्छेदकत्व-लाभाय आवश्यकं व्याप्तिज्ञानपदम्" ***इति केचित्,*** तदुक्तं व्याप्तिपञ्चकमाथुरी-विवृत्ति-मनोरमाद्यल-ङ्कृतव्याप्तिपञ्चकचिन्तामणिप्रकाशने **प्रस्तावनायां (= भूमिकायां) पञ्चाननभट्टाचार्येण** "एतत्क-ल्पाऽस्वरसस्तु नन्वित्यादिग्रन्थे 'व्याप्तिज्ञाने' इति व्यर्थम्, इतरभेदाऽनुमितिहेतुभूतलक्षणघटकव्याप्ति-जिज्ञासयैव प्रकृताऽर्थसिद्धेः" इति ।

तन्मन्दम्; अनुमानप्रामाण्यसाध्यकाऽनुमितिहेतुत्वस्य जनक-जनकतावच्छेदकसाधारणस्य व्याप्तौ अपि सत्त्वेनैतत्कल्पेऽपि 'व्याप्तिज्ञाने' इत्यस्य वैयर्थ्यापत्तेः दुर्वारत्वात् । हेतुत्वं जनके एव स्वीकृत्य विषयविधया व्याप्तौ स्पष्टतया जनकताऽवच्छेदकत्वलाभाय वा वक्ष्यमाणरीत्या व्याप्तिज्ञानपदसार्थक्ये निरुक्तकल्पेऽपि तत्सम्भवादिति ।

अत एव तेनैव तत्रैव "अन्ये तु घटकत्वार्थकसप्तम्या तत्पुरुषसमासस्याऽव्युत्पन्नत्वमत्राऽ-स्वरसबीजमाहुः" - इत्येवं प्रकृतग्रन्थकृदुक्तौ ***यः*** अस्वरसः ***प्रदर्शितः सोऽपि निर्मूलः एव,*** घटकत्वस्य तद्विषयिताव्यापकविषयिताकत्वरूपत्वेन कर्मधारयाऽपेक्षया घटकत्वार्थकसप्तमी-तत्पुरुषसमासस्य गुरुत्वस्य सर्ववादिसिद्धतया लाघवसहकारेण कर्मधारयस्यैवाऽऽश्रयणीयतया पूर्वोक्तकल्पाऽनादरबीजत्वेन निरुक्तसप्तमीतत्पुरुषघटितत्वप्रदर्शनस्य सर्वथोचितत्वा***दिति दिक्*** ।

●

આશ્રય અયોગ્ય છે' - આવું કોઈ કહે તો પણ અમને કોઈ દોષ નથી. કારણ કે દ્વિતીય કલ્પમાં અમે જે અર્થ બતાવ્યો તે ઘટકત્વઅર્થક સપ્તમીવિભક્તિ તત્પુરુષ સમાસ દ્વારા પ્રાપ્ત નથી થયો. કિંતુ કર્મધારય સમાસ દ્વારા જ પ્રાપ્ત થયેલ છે.

❁ अनुमितिहेतु... ઈત્યાદિ પદોની સાર્થકતા ❁

प्रश्न :- अनुमितिहेतुव्याप्तिज्ञाने का व्याप्तिः ? આનો અર્થ થઈ ગયો. પણ, પ્રશ્ન

अत्र का व्याप्तिरित्यभिधाने अनुमानप्रामाण्योपपादकत्वलक्षणोपोद्घातसङ्गत्यलाभाज्ज्ञान इत्यन्तम् ।

●

अनुमितिहेत्वित्यादिमूलग्रन्थस्य अबाधिताऽर्थकत्वं प्रतिपाद्य सार्थक्यमुपदिदर्शयिषुः आदौ 'अनुमितिहेतुव्याप्तिज्ञाने' इत्यस्य सामग्र्येण सार्थक्यं प्रदर्शयति - **अत्रेति** । **अत्र** = मूलतत्त्वचिन्तामणौ व्याप्तौ अनुमानप्रामाण्यनिरूपितोपोद्घातसङ्गतिप्रदर्शनावसरे **'का व्याप्तिः ?' इत्येतावदे**वाभिधाने 'अनुमितिहेतुव्याप्तिज्ञाने' - इत्यस्याऽनभिधाने **अनुमानप्रामाण्योपपादकत्वलक्षणोपोद्घातसङ्गत्यलाभाद्** = व्याप्तेः अनुमानप्रामाण्यसाध्यकाऽनुमितिहेतुव्याप्तिज्ञाननिष्ठजनकताऽवच्छेदकत्वसिद्धौ एव अनुमानप्रामाण्यनिष्ठोपपाद्यत्वनिरूपितोपपादकत्वस्य व्याप्तौ सम्भवेन तादृशाऽर्थबोधकवाक्यस्य असत्त्वे तादृशोपोद्घातसङ्गत्यज्ञानात् तज्ज्ञानाऽर्थमेव **'ज्ञाने' इत्यन्तम्**

●

એ છે કે તત્ત્વચિંતામણિકારે આટલું લાંબું કહેવાની જરૂરત જ શી છે ? ફક્ત 'વ્યાપ્તિ શું છે ?'- આટલું પણ કહી શકે છે ને. એના દ્વારા જ કોઈ તકલીફ વિના અર્થલાભ થઈ જતો હોય તો આટલું લાંબું લખવું વ્યર્થ છે.

❋ ઉપોદ્ઘાતસંગતિનો લાભ ❋

ઉત્તર :- (**अत्र.**) તમારી શંકાને નોંધીને જ હવે ગ્રંથકારશ્રી દરેક પદનું પ્રયોજન બતાવે છે. પ્રસ્તુત વાક્યમાં અથવા તો પ્રસ્તુત પ્રકરણમાં ફક્ત 'વ્યાપ્તિ શું છે ?' આટલું જ કહેવામાં આવે તો ઉપોદ્ઘાત સંગતિ પ્રાપ્ત ન થાય. તત્ત્વચિંતામણિકારને ઉપોદ્ઘાત સંગતિ દર્શાવવી છે. તેનું સંક્ષિપ્ત લક્ષણ છે - **प्रकृतोपपादकत्वम् उपोद्घातसङ्गतिः**। પ્રસ્તુતમાં જે વાત ચાલતી હોય તેને ઉપપાદક અન્ય વાત કહેવામાં આવે ત્યારે ઉપોદ્ઘાતસંગતિ લબ્ધ થાય છે. પ્રસ્તુતમાં અનુમાનપ્રામાણ્યની વાત ચાલતી હતી. જો તેનું ઉપપાદકત્વ વ્યાપ્તિસ્વરૂપનિરૂપણમાં રહેતું હોય તો વ્યાપ્તિસ્વરૂપનિરૂપણ ઉપોદ્ઘાત સંગતિથી સંગત કહેવાય = ઉપોદ્ઘાતસંગતિથી વિશિષ્ટ કહેવાય. વ્યાપ્તિસ્વરૂપનિરૂપણ અનુમાનપ્રામાણ્યનું ઉપપાદક છે - તેવું જણાવવા માટે તો અનુમિતિહેતુવ્યાપ્તિજ્ઞાને... ઇત્યાદિ જણાવવામાં આવેલ છે. એટલે કે અનુમાનનિષ્ઠપ્રામાણ્યસાધક જે અનુમિતિ તેનો હેતુ જે પરામર્શ તેમાં વિષયીભૂત વ્યાપ્તિ શું છે ? - આવું કહેવા દ્વારા અનુમાનપ્રામાણ્યઉપપાદકત્વ વ્યાપ્તિમાં છે - તેવું જણાઈ જાય છે. આમ, ઉપોદ્ઘાત સંગતિના લાભ માટે જ તત્ત્વચિંતામણિકારે આટલું લાંબું લખેલ છે. **શબ્દાર્થ** - પ્રસ્તુત પ્રકરણમાં 'વ્યાપ્તિ કઈ છે ?' - આ પ્રમાણે જ કહેવામાં આવે

= 'अनुमितिहेतुव्याप्तिज्ञाने' इत्येवं निवेशितम् इत्यर्थः ।

नन्वेवमपि 'अनुमित्युपपादिका व्याप्तिः का ?' - इत्येव उच्यताम्, तावताऽपि अनुमान-प्रामाण्योपपादकत्वस्य व्याप्तौ ज्ञानसम्भवात्, अनुमितिपदेन अनुमानप्रामाण्यविधेयकाऽनुमितेरेव ग्रहण***मिति चेद् ?***

न; तथा सति 'कथम् अनुमित्युपपादकत्वं व्याप्तौ ?' - इत्याकाङ्क्षानिवृत्त्यर्थम् 'अनुमित्यु-पपादकत्वञ्च व्याप्तेः अनुमितिहेतुव्याप्तिज्ञानविषयत्वाद् बोध्यम्' - इत्यादिवक्तव्यत्वापत्तेः, अन्यथा उक्ताकाङ्क्षाऽनिवृत्तेः । एवञ्च 'अनुमित्युपपादिका व्याप्तिः का ? अनुमित्युपपादकत्वञ्च व्याप्तेः अनुमितिहेतुव्याप्तिज्ञानविषयत्वाद् बोध्यम्' - इत्याद्यपेक्षया 'अनुमितिहेतुव्याप्तिज्ञाने का व्याप्तिः ?' इत्यस्यैव साधीयस्त्वात् तदुक्तिः सर्वथैवोचिता इत्याशयेनाह -

●

તો અનુમાનપ્રામાણ્યઉપપાદકત્વરૂપ ઉપોદ્‌ઘાતસંગતિનો લાભ ન થવાને કારણે 'જ્ઞાને' - એટલે સુધીનું લખ્યું = 'અનુમતિહેતુવ્યાપ્તિજ્ઞાને' - આ પ્રમાણે કહ્યું.

પ્રશ્ન :- જો તમારે ઉપોદ્‌ઘાત સંગતિ જ દેખાડવી હોય તો આટલું લાંબું કહેવાની કોઈ જરૂરત છે જ નહીં. ફક્ત 'અનુમિતિઉપપાદિકા વ્યાપ્તિ શું છે ?' - આટલું જ કહો. આના દ્વારા પ્રકૃતઉપપાદકત્વરૂપ ઉપોદ્‌ઘાત સંગતિનો લાભ તો થઈ જ જાય છે. તો પછી અનુમિતિહેતુવ્યાપ્તિજ્ઞાને... આટલું લાંબું કહેવાની શી આવશ્યકતા પડી ?

❖ મોટા ગૌરવથી બચવા લઘુ ગૌરવનો સ્વીકાર ❖

ઉત્તર :- (અનુ.) 'અનુમિત્યુપપાદિકા વ્યાપ્તિ શું છે ?' ફક્ત આટલું જ કહેવામાં આવે તો 'ઉપપાદિકા કેવી રીતે છે ?' આવી જિજ્ઞાસા તો ઊભી જ રહે છે. અનુમાનનિષ્ઠપ્રામાણ્ય-સાધકઅનુમિતિનું ઉપપાદન વ્યાપ્તિ શી રીતે કરી શકે ? - આવું જણાવવા માટે બીજી પંક્તિ ઉમેરવી પડે. એટલે કે તમારે આ રીતે ગ્રંથ બનાવવો પડે - '**अनुमित्युपपादिका व्याप्तिः का ? अनुमित्युपपादकत्वञ्च व्याप्तेः अनुमितिहेतुव्याप्तिज्ञानविषयत्वाद् बोध्यम्**' આ પ્રમાણે લખો તો જ 'અનુમિતિનું ઉપપાદન વ્યાપ્તિ કેવી રીતે કરી શકે ?' - આ પ્રમાણેની શ્રોતાની જિજ્ઞાસા શાંત થાય. આટલું બધું કહેવામાં તો ગૌરવ સ્પષ્ટ છે. એના કરતા **अनुमितिहेतुव्याप्तिज्ञाने का व्याप्तिः** ? આટલું કહેવામાં લાઘવ છે. માટે જ તત્ત્વચિંતામણિકારે આટલું લાંબું લખ્યું છે કે જેના દ્વારા ઉપોદ્‌ઘાતસંગતિ પણ લબ્ધ થાય છે અને ઉપોદ્‌ઘાતસંગતિ કેવી રીતે લબ્ધ થાય છે ? તેનું કારણ પણ જણાઈ આવે છે. **શબ્દાર્થ** - 'અનુમિતિનું ઉપપાદન કરનારી

अनुमित्युपपादिका व्याप्तिः का ? इत्यभिधाने कथमनुमित्युपपादिका ? इत्याकाङ्क्षानिवर्तकस्य वक्तव्यतापत्त्या ***अनुमितिहेतुव्याप्तिज्ञाने*** *इति ।*

●

'अनुमित्युपपादिका व्याप्तिः का ?' इत्येवाभिधाने 'अनुमितिहेतुव्याप्तिज्ञाने का व्याप्तिः ?' इत्याद्यनभिधाने 'व्याप्तिः **कथम् अनुमित्युपपादिका ?', इत्या**कारका**काङ्क्षानिवर्तकस्य** 'अनुमित्युपपादकत्वञ्च व्याप्तेः अनुमितिहेतुव्याप्तिज्ञानविषयत्वाद् बोध्यम्' - इत्यादेः **वक्तव्यतापत्त्या 'अनुमितिहेतुव्याप्तिज्ञाने' - इत्ये**वम् उक्तम्, तथा सति व्याप्तौ अनुमितिहेतुव्याप्तिज्ञानविषयत्वरूपाऽनुमित्युपपादकत्वप्रयोजकस्य ज्ञानसम्भवादुक्ताकाङ्क्षाया अनुत्थानान्न प्रागुक्तदोषावकाशः इति 'अनुमितिहेतुव्याप्तिज्ञाने व्याप्तिः का ?' - इत्येव साधु इति फलितम् ।

ननु 'अनुमितिहेतुव्याप्तिज्ञाने का व्याप्तिः ?' इत्येवम् असकृद् व्याप्तिपदोपादानं पुनरुक्तिदोषग्रस्तम्, 'अनुमितिहेतुज्ञाने का व्याप्तिः ?' - इत्येतावताऽपि तादृगर्थलाभसम्भवात्, प्रागुक्तदोषाणामनवकाशा***च्चेति चेद् ?***

मैवम्; अभिप्रेतार्थाऽसिद्धेः । तथा हि - अनुमितिहेतुव्याप्तिज्ञानविषयत्वाद् व्याप्तेः अनुमित्युपपादकत्वम् अभिमतम् । तथा च अनुमित्युपपादकत्वम्प्रति व्याप्तिनिष्ठतादृशविषयत्वं प्रयोजकम् । अत एव यत्र यत्राऽनुमितिहेतुव्याप्तिज्ञानविषयत्वं तत्र तत्र अनुमित्युपपादकत्वमिति

●

વ્યાપ્તિ શું છે?'- આટલું જ કહેવામાં આવે તો 'વ્યાપ્તિ કેવી રીતે અનુમિતિનું ઉપપાદન કરનારી છે ?' - આવા પ્રકારની આકાંક્ષા દૂર કરનાર કંઈક કહેવાની આપત્તિ આવવાને કારણે 'અનુમિતિહેતુવ્યાપ્તિજ્ઞાનમાં...' આ પ્રમાણે ગંગેશ ઉપાધ્યાયે જણાવેલ છે.

હવે 'અનુમિતિહેતુવ્યાપ્તિજ્ઞાન'માં રહેલ વ્યાપ્તિપદની સાર્થકતા બતાવે છે.

❋ બે વાર 'વ્યાપ્તિ' પદનું ગ્રહણ શા માટે ? ❋

પ્રશ્ન :- (न चै.) અરે ભાઈ ! માની લીધું કે 'ઉપોદ્ઘાતસંગતિ કેવી રીતે લબ્ધ થઈ ?' તે જણાવવા માટે અનુમિતિહેતુ... ઈત્યાદિ કહેવાનું જરૂરી છે. પણ, વચ્ચે વ્યાપ્તિપદ મૂકવાની જરૂરત શી છે ? 'અનુમિતિનો હેતુ બને તેવા જ્ઞાનમાં વિષયીભૂત વ્યાપ્તિ કઈ છે ?' - આટલું જ કહો. કારણ કે જે જ્ઞાનમાં વિષય વ્યાપ્તિ બને તે વ્યાપ્તિજ્ઞાન કહેવાય. એટલે 'જ્ઞાનમાં વિષયીભૂત વ્યાપ્તિ કઈ ?'- આટલું જ કહેવું પર્યાપ્ત બની જાય. તથા અનુમિતિહેતુજ્ઞાન તરીકે પરામર્શ જ આવશે. પછી તો શું વાંધો આવવાનો ?

गू ढा ***न चैवम् अनुमितिहेतुज्ञाने - इत्येव वक्तव्यम्, अनर्था पुनरुक्तिरिति वाच्यम्,***

●

व्याप्तिसिद्ध्या व्याप्तेः अनुमित्युपपादकत्वं सिद्ध्यति । यदा 'अनुमितिहेतुज्ञाने' इत्येवोच्यते तदा यत्र यत्र अनुमितिहेतुज्ञानविषयत्वं तत्र तत्र अनुमित्युपपादकत्वमिति व्याप्तिः पर्यवस्यति। सा च न सम्भवति, यतः 'प्रामाण्यव्याप्यप्रमितिकरणतावच्छेदकधर्मवद् अनुमानम्, घटश्च' - इत्याकारकसमूहालम्बनज्ञानं यत्र जातं तत्र एतादृशज्ञानेन 'अनुमानं प्रमाणम्' - इत्याकारकाऽनुमित्युदयादेतस्य ज्ञानस्य अनुमितिहेतुत्वम् अनाविलम्, तादृशज्ञानीयविषयत्वं घटे वर्तते, किन्तु तादृशोदासीनघटादौ अनुमित्युपपादकत्वं नास्ति ।

य शो ल ता तथा च अनुमितिहेतुज्ञानविषयत्वं यत्र यत्र अस्ति तत्र तत्र अनुमित्युपपादकत्वमपि अस्ति इति व्याप्त्यभावाद् व्याप्तौ अनुमितिहेतुज्ञानविषयत्वस्य सत्त्वेऽपि न तस्य अनुमित्युपपादकत्वं सिध्येत्, अनुमित्युपपादकत्वाऽनुमितिहेतुज्ञानविषयत्वयोः उक्ताऽन्वयव्यभिचारेण प्रयोज्य-प्रयोजकभावविरहादित्याशयेनादौ आशङ्कामुपस्थापयन्नाह - **न चेति** । **वाच्यमिति** परेणाऽन्वयः । **एवम्** = 'अनुमितिहेतु' - इत्यादेः सार्थक्यसम्भवेऽपि '**अनुमितिहेतुज्ञाने' - इत्येव वक्तव्यम्,** न तु अनुमितिहेतुव्याप्तिज्ञाने.... इत्येवं व्याप्तिपदमुपादाय वक्तव्यम्, यतः पुनः व्याप्तिपदोपादाने **अनर्था पुनरुक्तिः** = निरर्थकपुनरुक्त्यापत्तिः, उत्तरत्र व्याप्तिपदस्य आवश्यकत्वेऽपि पूर्वत्र तदुपादानस्य निष्प्रयोजनत्वात् । उपदेशादौ पुनरुक्तेः सार्थक्यसम्भवात्तादृशपुनरुक्तेरत्र व्यवच्छेदाय पुनरुक्तिविशेषणविधया अनर्थत्वोपादानम् । व्यर्थत्वदोषतोऽपि पुनरुक्तिदोषस्य बलीयस्त्वेन, पुनरुक्तिसत्त्वे व्यर्थत्वस्याऽवश्यम्भावेन, व्यर्थत्वसत्त्वे पुनरुक्तेः (कदाचित् स्यात्, कदाचिन्नेत्येवंरीत्या) भाज्यत्वेन च पुनरुक्तिरुक्तेत्यवधेयम्।

●

'घटज्ञानविषयीभूत घट शुं छे ?' आवुं कहेवानी जरूरत नथी. फक्त 'ज्ञानविषयीभूत घट शुं छे ?' - आटलुं ज कहेवुं पर्याप्त छे. ते रीते तमे पण प्रस्तुतमां व्याप्ति शब्द बे वार लखी निरर्थक पुनरुक्ति करी छे.

वि न भ्रा

❀ बे वार व्याप्तिपदप्रवेशनुं प्रयोजन ❀

उत्तर :- (अनु.) जुओ भाग्यशाळी ! फक्त ज्ञान ज कहेवामां आवे तो उपोद्घात संगति ज प्राप्त नहीं थाय. व्याप्ति ए अनुमानप्रामाण्यउपपादक छे. कारण के व्याप्तिनुं

अनुमित्यनुपपादकस्याप्यनुमितिहेतुसमूहालम्बनज्ञानविषयत्वसम्भवेनाऽनुमित्युपपादकत्वाऽप्राप्तेः।

●

एतच्छङ्कां निराचिकीर्षुः प्राह - अनुमित्यनुपपादकस्य घटादेः **अपि अनुमितिहेतुसमूहालम्बनज्ञानविषयत्वसम्भवेन** = 'प्रामाण्यव्याप्यप्रमितिकरणतावच्छेदकधर्मवत्त्वविशिष्टम् अनुमानं घटश्च' - इत्यादिनानामुख्यविशेष्यताशालिसमूहालम्बनज्ञाननिरूपितविषयत्वस्य सम्भवेन व्याप्तौ 'अनुमितिहेतुज्ञाने' इत्याद्युक्त्या अनुमितिहेतुज्ञानविषयत्वसिद्धौ अपि व्याप्तेः **अनुमित्युपपादकत्वाऽप्राप्तेः**, अनुमितिहेतुज्ञानविषयत्वस्य घटादौ सत्त्वेऽपि तत्र अनुमित्युपपादकत्वविरहेण अन्वयव्यभिचारादनुमित्युपपादकत्वानुमितिहेतुज्ञानविषयत्वयोः प्रयोज्य-प्रयोजकभावविरहात् ।

●

ज्ञान અનુમાનપ્રામાણ્યસાધ્યકઅનુમિતિનું કારણ છે - આવું જણાવવું છે. વ્યાપ્તિ અનુમિતિની ઉપપાદક કેવી રીતે બની શકે ? તે જણાવવા માટે જણાવ્યું કે તે અનુમિતિહેતુવ્યાપ્તિજ્ઞાનનો વિષય બને છે. હવે જો વ્યાપ્તિ ન લખો તો ફલિત એ થાય કે વ્યાપ્તિ એ અનુમિતિઉપપાદક છે, કારણ કે તે અનુમિતિહેતુજ્ઞાનનો વિષય છે. આમ, જે જે અનુમિતિહેતુજ્ઞાનના વિષય બનતા હોય તે તે અનુમિતિના ઉપપાદક બને - આવી વ્યાપ્તિ ફલિત થાય. પણ, આવી વ્યાપ્તિ નક્કી થતા તો ઘટ વગેરેને પણ અનુમિતિના ઉપપાદક માનવાની આપત્તિ આવે. કારણ કે કોઈકને એવું જ્ઞાન થયું કે '**पर्वतः वह्निव्याप्यधूमवान् घटश्च**' આ જ્ઞાન **पर्वतो वह्निमान्** આ અનુમિતિ પ્રત્યે કારણ તો છે જ. આ જ્ઞાનને સમૂહઆલંબનસ્વરૂપ જ્ઞાન કહેવાય. નાનામુખ્યવિશેષ્યતાશાલી જ્ઞાન = સમૂહાલંબનસ્વરૂપજ્ઞાન. પ્રસ્તુતમાં ઘટ અને પર્વત બન્ને મુખ્ય વિશેષ્ય છે. માટે ઉક્ત જ્ઞાન સમૂહઆલંબનસ્વરૂપ કહેવાય છે. આ જ્ઞાનમાં અનુમિતિની હેતુતા રહેલી જ છે. અનુમિતિહેતુભૂત ઉક્તજ્ઞાનની વિષયતા તો ઘટમાં પણ છે. આ રીતે જે પૂર્વે વ્યાપ્તિ બતાવી હતી તે મુજબ, અનુમિતિઅનુપપાદક એવો ઘટ પણ અનુમિતિહેતુજ્ઞાનનો વિષય બની શકતો હોવાને કારણે, અનુમિતિઉપપાદક બનવાની આપત્તિ આવે. માટે, વ્યાપ્તિપદ ન લખો તે તો ન જ ચાલે. **શબ્દાર્થ** - જો વ્યાપ્તિ પદ ન લખવામાં આવે તો અનુમિતિઅનુપપાદક એવા ઘટ વગેરે પણ અનુમિતિનું કારણ એવા '**पर्वतो वह्निव्याप्यधूमवान् घटश्च**' આવા પ્રકારના સમૂહાલંબનાત્મક જ્ઞાનના વિષય બની શકતા હોવાથી અનુમિતિઉપપાદક બનવાની આપત્તિ આવે. આના કારણે 'જ્યાં જ્યાં અનુમિતિહેતુજ્ઞાનવિષયતા ત્યાં ત્યાં અનુમિત્યુપપાદકતા' - આ વ્યાપ્તિ જ ન રહેતા ફક્ત અનુમિતિહેતુજ્ઞાનનો વિષય હોવા માત્રથી વ્યાપ્તિ પણ અનુમિતિની ઉપપાદિકા નહીં બની

ननु व्याप्तिपदोपादानेऽपि एतदापत्तितादवस्थ्यमेव, उक्तसमूहालम्बनज्ञानस्याऽपि व्याप्तिविषयकत्वेन व्याप्तिज्ञानत्वाऽनपायात् । तथा च अनुमितिहेतुव्याप्तिज्ञानविषयत्वस्य उक्तसमूहालम्बनज्ञानविषयीभूतघटादौ अपि सत्त्वेन तत्र अनुमित्युपपादकत्वविरहेण अन्वयव्यभिचारात् 'यत्र यत्र अनुमितिहेतुव्याप्तिज्ञानविषयत्वं तत्र तत्र अनुमित्युपपादकत्वमि'ति व्याप्तिविरहान्न अनुमित्युपपादकत्वाऽनुमितिहेतुव्याप्तिज्ञानविषयत्वयोः प्रयोज्य-प्रयोजकभावः सम्भवति, येन अनुमितिहेतुव्याप्तिज्ञाने.... इत्याद्युक्त्या अनुमितिहेतुव्याप्तिज्ञानविषयत्वस्य व्याप्तौ ज्ञानसम्भवे अनुमित्युपपादकत्वलाभोऽपि स्यादिति वक्तुं पार्येत । अतो व्याप्तिपदोपादानेऽपि न अनुमित्युपपादकत्वलाभसम्भव ***इति चेद्*** ?

न; व्याप्तेः ज्ञाने विशेषणत्वमुपगम्य 'यत्र यत्र यद्रूपावच्छिन्नविषयकत्वम् अनुमितिहेतुत्वाऽनतिरिक्तवृत्ति तद्रूपवत्त्वं तत्र तत्र अनुमित्युपपादकत्वम्' - इतिव्याप्तिस्वीकारे दोषाभावात् ।

●

शके. माटे, ઉક્ત વાક્ય દ્વારા 'व्याप्ति એ अनुमितिઉપપાદક છે' - તેવું લબ્ધ ન થવાથી પુનઃ ઉપોદ્‌ઘાતસંગતિની વાત તો ઊભી જ રહેશે.

✵ 'व्याप्ति' પદ લખવા છતાં આપત્તિ તદવસ્થ ✵

प्रश्न :- અરે ભાઈ ! આ આપત્તિ તો 'व्याप्ति' પદ લખ્યા પછી પણ ઊભી જ છે ! કારણ કે જ્યાં જ્યાં अनुमितिहेतुव्याप्तिज्ञानविषयता હોય ત્યાં ત્યાં अनुमित्युपपादकता હોય - આ વ્યાપ્તિના આધારે જ તો તમે વ્યાપ્તિમાં अनुमित्युपपादकता લાવો છો. હવે તમે જે સમૂહઆલંબન જ્ઞાન બતાવ્યું કે '**पर्वतो वह्निव्याप्यधूमवान् घटश्च**' આ જ્ઞાનમાં વ્યાપ્તિ વિષય બને જ છે. માટે, આ જ્ઞાનને વ્યાપ્તિજ્ઞાન કહેવાય જ. 'જેમાં ફક્ત વ્યાપ્તિ જ વિષય બને તેને વ્યાપ્તિજ્ઞાન કહેવાનું'- આવું પણ નહીં કહી શકાય. કારણ કે તો તો પછી પરામર્શને પણ વ્યાપ્તિજ્ઞાન ન કહી શકાય. કારણ કે પરામર્શમાં ફક્ત વ્યાપ્તિ જ નહીં, કિંતુ પક્ષધર્મતા પણ જણાય જ છે. એટલે ઉક્ત સમૂહાલંબનજ્ઞાન પણ વ્યાપ્તિજ્ઞાન સ્વરૂપ બનવાથી તાદશ જ્ઞાનનો વિષય બનનાર ઘટને अनुमित्युपपादक માનવાની આપત્તિને કારણે ઉક્ત વ્યાપ્તિ સિદ્ધ નહીં થાય. એટલે જ વ્યાપ્તિ अनुमित्युप-पादक સિદ્ધ નહીં થઈ શકે. આમ, તમારા મતમાં પણ અમને આપેલી આપત્તિ ઊભી જ છે !

अयमाशयः - 'प्रामाण्यव्याप्यप्रमितिकरणतावच्छेदकधर्मवत्त्वविशिष्टम् अनुमानं घटश्च' - इत्यादि-समूहालम्बनज्ञाने 'अनुमानं प्रमाणम्' - इतिप्रकृताऽनुमितिहेतुत्वं व्याप्तित्वावच्छिन्नविषयकत्वं घटत्वावच्छिन्नविषयकत्वञ्च सन्ति । तत्र घटत्वावच्छिन्नविषयकत्वं 'अयं घटः' इत्यादिज्ञानेषु अपि वर्तते न तत्राऽनुमितिहेतुत्वम् इति न घटत्वावच्छिन्नविषयकत्वेऽनुमितिहेतुत्वाऽनतिरिक्तवृत्तित्वम्, व्याप्तित्वावच्छिन्नविषयकत्वे अनुमितिहेतुत्वाऽनतिरिक्तवृत्तित्वं सम्भवत्येव, यत्र यत्र व्याप्तित्वाऽवच्छिन्नविषयकत्वं तत्र तत्र अनुमितिहेतुत्वस्य सत्त्वादिति यद्रूपपदेन व्याप्तित्वस्यैव ग्रहणं सम्भवति । तथा च यत्र यत्र व्याप्तित्ववत्त्वं तत्र तत्र अनुमित्युपपादकत्वमिति व्याप्तिसिद्ध्या व्याप्तौ अनुमित्युपपादकत्वसिद्धिरिति न कश्चिद् दोषः । यद्रूपावच्छिन्नत्वनिवेशात् प्रमेयत्वेन व्याप्तेः अतथात्वेऽपि न क्षतिः, अन्यथा 'प्रामाण्यनिरूपितप्रमेयविशिष्टप्रमितिकरणतावच्छेदकधर्मविशिष्टम् अनुमानम्' इत्यादौ प्रमेयत्वेन व्याप्त्यवगाहिज्ञाने प्रकृताऽनुमितिहेतुत्वविरहेण व्याप्तिविषयकत्वे अनुमितिहेतुत्वाऽनतिरिक्तवृत्तित्वविरहादुक्तव्याप्तेरसम्भव एव स्यात् । सामानाधिकरण्यं विहाय अनतिरिक्तवृत्तित्वनिवेशान्न पुनः घटादौ अतिप्रसङ्गः ***इति दिक्*** ।

न च शब्दात्कथमेतदर्थलाभः ? ***इति वाच्यम्;*** व्याप्तेः ज्ञाने विशेषणत्वोपगमेनैव एतदर्थलाभ-

●

❋ विशेषणप्रयोजकता विशेष्यतावच्छेदकमां ❋

उत्तर :- (तदु.) तमारी शंकाना समाधान माटे ज ग्रंथकार **तदुक्तौ** कहीने जणावे छे के जो 'व्याप्ति' शब्द लखवामां आवे तो उक्त आपत्तिने कोई अवकाश नथी. ते आ रीते - व्याप्तिज्ञान એ अनुमितिनुं कारण छे - એवुं कहेवामां आवता विषयिता संबंधथी जे व्याप्तिविशिष्ट ज्ञान तेमां अनुमितिजनकतानो अन्वय थाय. प्रस्तुतमां એક नियम द्वारा व्याप्तिमां अनुमितिजनकता फलित थशे. नियम छे के - विशेषणनी प्रयोजकतानो अन्वय जो कोई बाधक न होय तो विशेष्यताअवच्छेदकमां थाय छे. जेम के **'धनवान् सुखी'** आ प्रमाणे कहेवामां आवे त्यारे धनवानने उद्देशीने सुखनुं विधान करवामां आवे छे. ∴ प्रस्तुतमां धनवान = उद्देश्य, सुख = विधेय. जे विशेष्य होय ते उद्देश्य होय. ते ज रीते विधेय सामान्यतया विशेषण होय. जेम के **पर्वतो वह्निमान्** कहेवामां आवे त्यारे पर्वत उद्देश्य छे, वह्नि विधेय छे. એटले ज पर्वत विशेष्य छे अने वह्नि विशेषण छे. धनवान सुखीमां पण आ ज रीते धनवान विशेष्य अने सुख विशेषण. प्रस्तुतमां सुखनी = विशेषणनी प्रयोजकता धनवान એवा विशेष्यमां नथी जती. पण, विशेष्यताअवच्छेदक

सम्भवात् । तथा हि - व्याप्तिज्ञाने = व्याप्तिविशिष्टज्ञाने इत्यर्थः । अनुमितिहेतु च तद् व्याप्तिविशिष्टज्ञानञ्चेति कर्मधारयाश्रयणाद् अनुमितिहेतुत्वस्य व्याप्तिविशिष्टज्ञानेऽन्वयः । विशिष्टे जनकत्वाऽन्वये असति बाधके तादृशविशेषणप्रयोजकत्वं विशेष्यतावच्छेदके पर्यवस्यति, असति बाधके विशेष्यतावच्छेदके विशेषणप्रयोजकत्वनियमात् । यथा 'धनवान् सुखी' इत्यत्र धनविशिष्टजने सुखविशेषणम्, तत्र सुखप्रयोजकत्वं विशेष्यतावच्छेदकधने ज्ञायते, तथा च धनप्रयोज्यसुखवान् इत्यर्थबोधः सम्भवति । प्रकृतेऽपि व्याप्तिविशिष्टज्ञाने अनुमितेः परम्परया विशेषणत्वात् तादृशाऽनुमितिप्रयोजकत्वं व्याप्तौ विशेष्यताऽवच्छेदके अनाविलम् । तादृशप्रयोजकत्वं जनकतावच्छेदकरूपम्, प्रयोजकत्वस्य जनक-जनकतावच्छेदकसाधारणत्वात् । तादृशप्रयोजकत्वसत्त्वे व्याप्तौ उपपादकत्वमप्यनाविलम्, तादृशप्रयोजकत्वव्याप्तत्वादुपपादकत्वस्य, यत्र यत्र अनुमिति-प्रयोजकत्वं तत्र तत्र अनुमित्युपपादकत्वमिति व्याप्तेः सर्वजनसिद्धत्वात् ।

य शो ल ता

तदुक्तं **धर्मदत्तज्ञाकृतविवृत्या**दिकं मनसिकृत्य **माथुरीपञ्चलक्षणीं** विवृण्वता **गङ्गा**टीकायां **शिवदत्तमिश्रेण** "अनुमितिजनकस्य तादात्म्येन व्याप्तिज्ञानेऽन्वयः । 'धनवान् सुखी'तिवद् असति बाधके विशेष्यताऽवच्छेदके विशेषणप्रयोजकत्वभाननियमाद् व्याप्तिविषयतायामनुमितिप्रयोजकत्वं लभ्यते । तच्चाऽवच्छेदकरूपम्" (व्या.गङ्गावृत्तिः पृ. ४) इति ।

●

એવા ધનમાં જાય છે. આમ, જો કોઈ બાધક ન હોય તો વિશેષણની પ્રયોજકતા વિશેષ્યતાઅવચ્છેદકમાં રહે - આ નિયમ ફલિત થયો. **'देवदत्तः सुखी'** ઈત્યાદિમાં દેવદત્તત્વમાં સુખની પ્રયોજકતા માનવામાં નથી આવી. માટે, 'असति बाधके' આ પ્રમાણે કહેવામાં આવ્યું છે. આ જ રીતે પર્વતો વહ્નિમાનમાં પણ 'असति बाधके' ન કહેતા તકલીફ પડે.

વિ ન મ્રા

પ્રસ્તુતમાં પણ 'અનુમિતિહેતુવ્યાપ્તિજ્ઞાનમાં વ્યાપ્તિ શું છે ?' - આ વાક્યમાં પૂર્વ-પૂર્વનું ઉત્તર-ઉત્તરમાં વિશેષણ બને એ ન્યાયથી અનુમિતિ વ્યાપ્તિવિશિષ્ટજ્ઞાનમાં વિશેષણીભૂત છે, વિશેષ્ય થશે વ્યાપ્તિવિશિષ્ટજ્ઞાન, વિશેષ્યતાઅવચ્છેદક વ્યાપ્તિ. ઉક્ત નિયમ મુજબ આપણે જોઈ ગયા કે વિશેષ્યતાઅવચ્છેદક પ્રયોજક બને. એટલે કે असति બાધકે વિશેષ્યતાઅવચ્છેદકતા અને પ્રયોજકતા સમનિયત બને. માટે, વિશેષ્યતાઅવચ્છેદકતા (= ઉક્ત અવચ્છેદકતા)આત્મક પ્રયોજકતા નક્કી થાય. પ્રસ્તુતમાં વિશેષ્યતાઅવચ્છેદકતા વ્યાપ્તિમાં છે. માટે, અનુમિતિની પ્રયોજકતા વ્યાપ્તિમાં જાય - તે વ્યાજબી જ છે. વસ્તુતઃ વ્યાપ્તિજ્ઞાન જનક છે. વ્યાપ્તિમાં જનકતાઅવચ્છેદકતા છે. માટે, જનકતાઅવચ્છેદક એવી વ્યાપ્તિમાં પણ અનુમિતિપ્રયોજકતાનો લાભ થઈ શકે છે.

वस्तुतः अनुमितिजनकत्वस्य विशेषणविधया व्याप्तिविशिष्टज्ञानेऽन्वये उक्तनियमेन तादृश-जनकत्वप्रयोजकत्वं व्याप्तौ सिध्येत्, न तु अनुमितिप्रयोजकत्वम् । अनुमितेः परम्परया विशेषण-त्वमभ्युपगम्य उक्तनियमेन व्याप्तौ अनुमितिप्रयोजकत्वोपपादनेऽपि 'व्याप्तिविशिष्टज्ञानेऽ-नुमितिजनकत्वाऽन्वये' इत्युक्तेरसङ्गतिः, अनुमितेरेवाऽन्वये उक्तनियमेन उक्तार्थलाभसम्भवात् ।

तथा चैवमर्थः अत्र बोद्धव्यः यदुत अनुमितिजनकत्वस्य व्याप्तिविशिष्टज्ञानेऽन्वयाद् यथा व्याप्तिविशिष्टज्ञानस्य अनुमितिजनकत्वं सिध्यति तथैव व्याप्तेः अनुमितिजनकताऽवच्छेदकत्वमपि सिध्यति । व्याप्तेः अनुमितिजनकताऽवच्छेदकत्वसिद्धौ अनुमितिप्रयोजकत्वमपि सिध्यति, प्रयोजकत्वस्य जनक-जनकताऽवच्छेदकसाधारणत्वात् ।

ननु प्रयोजकत्वस्य जनकताऽवच्छेदके अभ्युपगमे अवच्छेदकताऽऽत्मकं प्रयोजकत्वं स्यात्, न च अवच्छेदकताऽऽत्मकं प्रयोजकत्वं कुत्राऽपि दृष्टम् ***इति चेद् ? न;*** असति बाधके विशेषणप्रयोजकत्वस्य विशेष्यताऽवच्छेदकेऽङ्गीकारेण विशेष्यताऽवच्छेदकत्वाऽऽत्मकप्रयोज-कत्वस्याऽवश्यमभ्युपगन्तव्यत्वात् ।

एवञ्चोद्देश्यताऽवच्छेदकत्वात्मकमपि प्रयोजकत्वमभ्युपगमनीयम् । तदुक्तं **न्यायकोशे भीमाचार्येण** "व्युत्पत्तिवैचित्र्येण उद्देश्यताऽवच्छेदक-विधेययोः धर्मिपारतन्त्र्येण परस्परं प्रयोज्य-प्रयोजकभावेनाऽन्वयः । यथा 'धनवान् सुखी' - इत्यत्र धनप्रयोज्यत्वस्य सुखेऽन्वयः । 'सुरापः

●

❋ व्याप्ति विशेष्यतावच्छेदक, माटे प्रयोजक ❋

अथवा उक्तअवच्छेदकत्वनो अर्थ जनकताअवच्छेदकता पण करी शकीओ. कारण के, कारणमां कार्य विशेषण बने. तेथी जनकताअवच्छेदक ओ ज विशेष्यताअवच्छेदक बने. आ रीते जनकताअवच्छेदकता स्वरूप पण प्रयोजकता बने. टूंकमां, उक्त नियमथी व्याप्तिमां अनुमितिनी प्रयोजकता प्राप्त थशे. जो व्याप्तिपद न लखवामा आवे तो व्याप्तिविशिष्टज्ञान कहेवाय नहीं. माटे, व्याप्ति विशेष्यताअवच्छेदक बने नहीं. ज्यां ज्यां अनुमितिहेतुज्ञानीय विषयता होय त्यां त्यां अनुमितिप्रयोजकता (= उपपादकता) होय - ओ व्याप्ति समूहालंबन ज्ञानने कारणे व्यभिचारग्रस्त बने छे. एटले व्याप्तिपद न लखवामां आवे तो कोई पण रीते 'अनुमितिप्रयोजकता व्याप्तिमां छे' - तेवो बोध न थई शके. अने एटले ज उपोद्घातसंगतिनो पण लाभ न थाय. व्याप्तिपद लखवामां आवे तो व्याप्ति विशेष्यताअवच्छेदक बनवाने कारणे व्याप्तिमां अनुमितिनी प्रयोजकता सरळताथी सिद्ध

य शो ल ता

वि न भा

गूढार्थ

तदुक्तौ च व्याप्तिविशिष्टज्ञानेऽनुमितिजनकत्वान्वये विशेष्यतावच्छेदकेऽसति बाधके विशेषणप्रयोजकत्वनियमेन उक्तावच्छेदकत्वात्मकप्रयोजकत्वस्य लाभेन जनकतावच्छेदके तत्र सर्वजनसिद्धप्रयोजकत्वस्य

●

पतति' - इत्यत्र च सुरापानस्य पतने प्रयोज्यत्वेनाऽन्वयः इति" (न्या.को. पृ.७८१) इति **गादाधरीसव्यभिचारप्रकरणा**ऽनुसारेण इति ।

एवञ्च तादृशनियमेन विशेष्यताद्यवच्छेदकत्वाऽऽत्मकप्रयोजकत्वसिद्ध्या जनकताऽवच्छेदकत्वात्मकप्रयोजकत्वस्य लाभेन व्याप्तौ जनकताऽवच्छेदके प्रयोजकत्वं सिध्यति । न चैतत् प्रयोजकत्वं सर्वजनसिद्धप्रयोजकत्वाद् भिन्नं किन्तु तदेवेति व्याप्तिः अनुमितिप्रयोजिका भविष्यति। यत् यत् प्रयोजकं तत्तदुपपादकमपि इति अनुमित्युपपादकत्वमपि व्याप्तौ सिध्यतीति ।

यशोलता

शब्दार्थश्चैवम् - **तदुक्तौ** = व्याप्तिपदोपादाने = अनुमितिहेतुव्याप्तिज्ञाने इत्युक्तौ **च** विषयितासम्बन्धेन **व्याप्तिविशिष्टज्ञाने अनुमितिजनकत्वाऽन्वये 'विशेष्यतावच्छेदके असति** तात्पर्यबाधादिरूप**बाधके विशेषणप्रयोजकत्व'नियमेन उक्तावच्छेदकत्वात्मकप्रयोजकत्वस्य** = विशेष्यतावच्छेदकताऽऽत्मकं जनकतावच्छेदकत्वात्मकं वा यत् प्रयोजकत्वं तस्य **लाभेन जनकताऽवच्छेदके तत्र** = व्याप्तौ **सर्वजनसिद्धप्रयोजकत्वस्य** = सर्वजनसिद्धोपपादकत्वस्य, तेन प्रयोजकत्वलाभप्रयुक्तत्वस्य प्रयोजकत्वलाभेऽसम्भवेऽपि न क्षतिः, यत्र यत्र यत्प्रयोजकत्वं तत्र तत्र तदुपपादकत्वमितिव्याप्तेः सर्ववादिसिद्धतया प्रयोजकत्वलाभप्रयुक्तत्वस्योपपादकत्वलाभे निराबाधाद् यद्वा यथाश्रुतार्थाग्रहे 'जनकताऽवच्छेदकताऽऽत्मकप्रयोजकत्वसिद्ध्या जनकताऽ-

●

થઈ જાય. આ રીતે વ્યાપ્તિપદ લખવું અનિવાર્ય છે - તેમ સાબિત થાય છે. આમ 'અનુમિતિહેતુવ્યાપ્તિજ્ઞાને' - આમાં રહેલા દરેક પદની સાર્થકતા ગ્રંથકારે દર્શિત કરી.

વિમર્શ

શબ્દાર્થ જોઈ લઈએ - તદુક્તૌ = વ્યાપ્તિપદ લખવામાં આવે, એટલે કે 'અનુમિતિહેતુજ્ઞાનમાં' - આટલું જ ન કહેતા 'અનુમિતિહેતુવ્યાપ્તિજ્ઞાનમાં' - આવું કહેવામાં આવે તો અનુમિતિજનકતાનો અન્વય વ્યાપ્તિવિશિષ્ટજ્ઞાનમાં થાય. (પ્રસ્તુતમાં અનુમિતિજનકતાનો અન્વય થાય - આવું કહેવા દ્વારા અનુમિતિજનકતાને અને પરંપરાએ અનુમિતિને પણ વિશેષણ તરીકે દર્શાવી. તથા વ્યાપ્તિવિશિષ્ટજ્ઞાન કહેવા દ્વારા જ્ઞાનને વિશેષ્ય અને વિશેષ્યતાઅવચ્છેદક તરીકે વ્યાપ્તિને દર્શાવી. પ્રસ્તુતમાં વ્યાપ્તિવૈશિષ્ટ્ય જ્ઞાનમાં વિષયિતાસંબંધથી સમજવું.) 'જો કોઈ બાધક ન હોય તો વિશેષ્યતાઅવચ્છેદકમાં

लाभसम्भवादिति ।

●

वच्छेदके प्रयोजकत्वसिद्धिः, जनकताऽवच्छेदके जनकताऽवच्छेदकतायाः सत्त्वात्, प्रयोजकत्वस्य जनकताऽवच्छेदकताऽऽत्मकत्वाच्च' इत्यर्थः बोद्धव्यः । **लाभसम्भवाद्** इति भावः ।

वक्ष्यमाणजिज्ञासाऽर्थककिम्पदार्थस्य व्याप्तिपदार्थघटितत्वेन किम्पदमुपेक्ष्यादौ व्याप्तिपदं विवरिषुराह - **व्याप्ती**ति ।

ननु 'का व्याप्तिः ?' - इत्यत्र व्याप्तिपदस्य कोऽर्थः ? अनुमितिजनकताऽवच्छेदकश्चेद् ? व्यर्थमेव तदा अनुमितिहेतुव्याप्तिज्ञाने इति । 'व्याप्तिः का ?' इत्येतावदेव सम्यक्, व्याप्तेरनुमितिजनकताऽवच्छेदकरूपत्वेन तस्य 'अनुमितिजनकताऽवच्छेदकं किम् ?' - इत्यर्थकत्वप्राप्त्या उपोद्घातसङ्गत्यादिलाभसम्भवात् । अनुमितिपदेन अनुमानप्रामाण्यसाधका-

●

વિશેષણની પ્રયોજકતાનો અન્વય થાય' - આવો નિયમ હોવાથી વિશેષ્યતાઅવચ્છેદકતા સ્વરૂપ (અથવા જનકતાઅવચ્છેદકતા સ્વરૂપ) પ્રયોજકતાનો લાભ થવાથી જનકતાઅવચ્છેદક એવી વ્યાપ્તિમાં સર્વજનસિદ્ધ જે પ્રયોજકતા તેનો લાભ સંભવી શકશે. તેનો બોધ પણ ઉક્ત વાક્યમાં વ્યાપ્તિપદના માધ્યમે થશે. જો વ્યાપ્તિપદ ન લખવામાં આવે તો આ વસ્તુ શક્ય ન બને. તે દર્શાવ્યું જ છે.

❁ વ્યાપ્તિ એટલે શું ? ❁

હવે '**अनुमितिहेतुव्याप्तिज्ञाने व्याप्तिः का ?**' આ રીતે અન્વિત વાક્ય થતું હોવાથી સૌ પ્રથમ વ્યાપ્તિપદનો અર્થ જણાવે છે. ત્યાર બાદ **ज्ञाने** પદની સાથેનો વ્યાપ્તિનો સંબંધ દર્શાવવા સપ્તમી વિભક્તિનો અર્થ જણાવશે અને ત્યાર બાદ **किम्** પદનો અર્થ જણાવવામાં આવશે.

❁ 'अनुमिति'.... ઈત્યાદિ કહેવું નિષ્ફળ : આક્ષેપ ❁

પ્રશ્ન :- અનુમિતિહેતુવ્યાપ્તિજ્ઞાનમાં વ્યાપ્તિ શું છે ? - આ પ્રશ્નમાં સહુ પ્રથમ વ્યાપ્તિપદ લખવું જરૂરી છે તે તમે જણાવ્યું. કારણ કે તો જ ઉપોદ્ઘાત સંગતિ લબ્ધ થાય છે. પણ, વાસ્તવમાં ઉપોદ્ઘાત સંગતિ મેળવવા માટે આટલું લાંબું લખવાની આવશ્યકતા જ નથી. ફક્ત '**का व्याप्तिः ?**' આટલું કહેવાથી જ ઉપોદ્ઘાત સંગતિ પ્રાપ્ત થઈ જશે. કારણ કે વ્યાપ્તિ એ અનુમિતિજનકતાઅવચ્છેદક છે. અર્થાત્ વ્યાપ્તિ અનુમિતિજનકતાઅવચ્છેદક સ્વરૂપ છે. માટે, '**का व्याप्तिः ?**' - આવું કહેતા '**अनुमितिजनकतावच्छेदकरूपव्याप्तिः का ?**'

ऽनुमितिरेव ग्राह्या, तत्र व्याप्तौ तादृशजनकताऽवच्छेदकत्वरूपोपपादकत्वम् अपि सुज्ञेयम्, एवम् उपोद्घातसङ्गतिः सुसम्भवा, 'कथमनुमित्युपपादकत्वं व्याप्तौ ?' इत्याशङ्कानिवृत्तिश्च। तथा च 'अनुमितिजनकतावच्छेदकरूपव्याप्तिः का ?' - इत्यर्थकं 'व्याप्तिः का ?' इत्येतावदेव वक्तव्यम्, 'अनुमितिहेतुव्याप्तिज्ञाने' - इति व्यर्थम् ***इति चेद्*** ?

य

नः व्याप्तिपदस्य व्याप्तिपदार्थार्थकत्वात् । तथा चाऽत्र व्याप्तिपदार्थत्वेनैव (= व्याप्तित्वेनैव)

शो व्याप्तेः बोधः, न तु अनुमितिजनकताऽवच्छेदकत्वेन, एवञ्च व्याप्तिनिरूपणस्य कथं

ल सङ्गतिमत्त्वमिति ज्ञानाय ज्ञानान्तकथनस्यावश्यकत्वम् ।

ता ***न च*** व्याप्तिपदस्य अनुमितिजनकताऽवच्छेदकत्वेनैव बोधकत्वमस्तु ***इति वाच्यम्;***

अनुमितिजनकतावच्छेदकरूपत्वेऽपि व्याप्तेः, अनुमितिजनकताऽवच्छेदकत्वस्याऽतिरिक्तवृत्तित्वेन तद्रूपेण व्याप्तिबोधकत्वस्य व्याप्तिपदस्याऽव्युत्पन्नत्वात्, द्रव्यत्वेन घटबोधकत्वं घटपदस्य यथाऽव्युत्पन्नं तथाऽत्राऽपि ।

तथा च 'व्याप्तिः का ?' इत्यभिधाने उपोद्घातसङ्गत्यलाभाद् 'अनुमितिहेतुव्याप्तिज्ञाने

●

- આવો જ અર્થ ફલિત થાય. જ્યારે તમામે તમામ અનુમિતિની જનકતાઅવચ્છેદકતા વ્યાપ્તિમાં રહેલી છે ત્યારે '**अनुमानं प्रमाणं प्रमितिकरणतावच्छेदकधर्मवत्त्वात्**' - આવા પ્રકારની અનુમિતિની જનકતાઅવચ્છેદકતા તો વ્યાપ્તિમાં રહેવાની જ ને ? આમ, અનુમાનનિષ્ઠ-પ્રામાણ્યસાધકઅનુમિતિજનકતાઅવચ્છેદકતા વ્યાપ્તિમાં વ્યાપ્તિપદ દ્વારા જ ભાસિત થઈ શકે છે. જ્યાં જનકતાઅવચ્છેદકતા રહે ત્યાં પ્રયોજકતા જ હોય - આ નિયમ તો પૂર્વે બતાવી જ દીધો છે. માટે, વ્યાપ્તિમાં અનુમાનનિષ્ઠપ્રામાણ્યસાધકઅનુમિતિપ્રયોજકતા

वि (= ઉપપાદકતા) વ્યાપ્તિપદ દ્વારા જ બોધિત થવાને કારણે ઉપોદ્ઘાત સંગતિ પણ વ્યાપ્તિપદ

न દ્વારા જ લબ્ધ થઈ જશે. 'અનુમિતિહેતુવ્યાપ્તિજ્ઞાનમાં'- આટલું કહેવાની લેશ પણ આવશ્યકતા નથી. જો કે જે કહ્યું છે તેનો અર્થ બાધિત નથી. કિંતુ અધિક કથનનું વ્યર્થ ગૌરવ શા માટે ?

मा માત્રાલાઘવ પણ લાઘવપ્રિય નૈયાયિકો માટે ઉત્સવ સમાન હોવું જોઈએ.

⌘ વિવરણવાક્ય હોવાથી સફળ : પરિહાર ⌘

(व्याप्ति.) ભાગ્યશાળી ! થોડા ધીરા પડો. અમે જે કહ્યું છે તે સમજી વિચારીને જ કહ્યું છે. અહીં વ્યાપ્તિ એટલે વ્યાપ્તિપદાર્થ સમજવાનો છે. જો કે વ્યાપ્તિ એ અનુમિતિજનકતા-અવચ્છેદક સ્વરૂપ છે તો પણ પ્રસ્તુતમાં વ્યાપ્તિનો અર્થ વ્યાપ્તિપદાર્થ કરવાથી વાંધો નહીં આવે. જેમ કે હંસ એટલે જ દૂધ અને પાણીનો વિવેક = ભેદ કરનાર. કહેવાય છે કે હંસની

व्याप्तिः *= व्याप्तिपदार्थः । तेन व्याप्तेरनुमितिजनकतावच्छेदकरूप-त्वेऽपि ज्ञाने इत्यन्तस्य न वैयर्थ्यम्।*

●

का व्याप्तिः ?' इति कथनमेवोचितमित्याशयेन व्याचष्टे - **व्याप्तिः = व्याप्तिपदार्थः, तेन =** व्याप्तिपदस्य व्याप्तिपदार्थबोधकत्वेन **व्याप्तेः अनुमितिजनकताऽवच्छेदकरूपत्वेऽपि** = 'व्याप्तिः का ?' इत्येतावदुक्तौ एव उपोद्घातसङ्गतिलाभसम्भवेऽपि **'ज्ञाने' इत्यन्तस्य** = 'अनुमितिहेतु-व्याप्तिज्ञाने' इत्यस्य **न वैयर्थ्यम्** इति केचित् ।

वस्तुतः ***"ननु*** व्याप्तेरनुमितिजनकतावच्छेदकरूपत्वेन 'व्याप्तिः का ?' इत्येतावदुक्तौ अपि उपोद्घातसङ्गतिलाभसम्भवाद् व्यर्थम् 'अनुमितिहेतुव्याप्तिज्ञाने' इतीदम् ***इति चेद्*** ?

नः विवरणवाक्यत्वेन सार्थक्यसम्भवात् । यथा हंसस्य पयोऽम्बुभेदिरूपत्वेऽपि 'पयोऽम्बुभेदी हंसः स्याद्' इति वाक्ये न 'पयोऽम्बुभेदी'त्यस्य वैयर्थ्यम्, हंसपदस्य हंसपदार्थार्थकत्वेन तद्विवरणपरत्वात् । 'पयोम्बुभेदी'त्यस्य, "मारुतपूर्णरन्ध्रैः कीचकैः" (र.वं.) इत्यादौ अपि इयमेव गतिः । एवं प्रकृतेऽपि व्याप्तिपदस्य व्याप्तिपदार्थार्थकत्वेन 'अनुमितिहेतुव्याप्तिज्ञाने' इत्यस्य

●

જીભમાં એવો અમ્લ પદાર્થ છે જેના દ્વારા, દૂધ અને પાણી મિશ્રિત હોય તો પણ હંસ દૂધ અને પાણી વચ્ચે ભેદ પાડી દે છે. માટે હંસની વ્યાખ્યા જ પયોऽમ્બુભેદી છે. હંસ એટલે જ દૂધ-પાણીનો ભેદ કરનાર. છતાં જ્યારે **'पयोऽम्बुभेदी हंसः स्यात्'** - આવું કહેવામાં આવે ત્યારે હંસનો અર્થ પયોऽમ્બુભેદી ન કરતા હંસપદાર્થ કરવામાં આવે છે. એટલે કે 'હંસપદનો અર્થ પયોऽમ્બુભેદી છે' - આવો શાબ્દબોધ ઉક્ત વાક્યથી થાય. એમાં કોઈ બાધક નથી. આ જ રીતે અનુમિતિહેતુવ્યાપ્તિજ્ઞાને જો કહેવામાં ન આવે, માત્ર **व्याप्तिः का** ? આટલું જ કહેવામાં આવે તો જો કે વ્યાપ્તિ અનુમિતિજનકતાઅવચ્છેદકરૂપ છે. માટે કોઈ અર્થ બાધિત નથી, ઉપોદ્ઘાત સંગતિ પણ પ્રાપ્ત થઈ જાય, છતાં પણ શિષ્યબુદ્ધિવૈશદ્યાર્થં વિવરણ કરવું આવશ્યક છે. 'પયોऽમ્બુભેદી હંસ છે' - આવા વાક્યની જેમ 'અનુમિતિહેતુ-વ્યાપ્તિજ્ઞાનવિષયીભૂત વ્યાપ્તિ શું છે ?' - આ વાક્ય પણ વિવરણ વાક્ય હોવાથી વ્યાપ્તિનો અર્થ વ્યાપ્તિપદાર્થ કરવો. પછી પુનરુક્તિનો કે ગૌરવનો કે અધિક કથનનો કોઈ પ્રશ્ન નથી.

शब्दार्थ :- વ્યાપ્તિ એટલે કે વ્યાપ્તિપદાર્થ સમજવો. તેનાથી વ્યાપ્તિ એ અનુમિતિજનકતાઅવચ્છેદક રૂપ જ હોવા છતાં પણ 'અનુમિતિહેતુવ્યાપ્તિજ્ઞાને' - આટલા પદો નિરર્થક થવાની આપત્તિ નહીં આવે.

सप्तम्या विषयत्वमर्थः, किमो जिज्ञासा, सा च 'व्याप्तिपदार्थता-वच्छेदकावच्छिन्नज्ञानं जायताम्' - इत्याकारिका ।

●

तद्विवरणपरत्वेन च न कस्याऽपि वैयर्थ्यम्, शिष्यबुद्धिवैशद्यार्थं विवरणवाक्यस्याऽपि कर्तव्यत्वात् ।

विवरणवाक्यत्वञ्च तत्समानार्थबोधकपदाऽन्तरेण तदर्थकथनपरकवाक्यत्वम् । अत्राऽपि अनुमितिहेतुताऽवच्छेदकरूपत्वेऽपि व्याप्तेः तत्समानाऽर्थकाऽनुमितिहेत्वित्यादिपदैः तदर्थकथनम् एवाऽस्ति । तथा च 'अनुमितिहेतुव्याप्तिज्ञाने' इत्यस्य विवरणरूपत्वेन न वैयर्थ्यमित्याशयेन व्याप्तिपदं व्याप्तिपदार्थार्थकतया व्याचष्टे - **व्याप्तिः = व्याप्तिपदार्थः** । शेषं पूर्ववद्"- इत्येवं व्याख्यानं सुसङ्गच्छतेतराम् ।

आधारं व्याख्याय आधेयं व्याचिख्यासुराह - **सप्तम्याः** = 'अनुमितिहेतुव्याप्तिज्ञाने' इत्यत्र ज्ञानपदोत्तरसप्तमीविभक्तेः **विषयत्वम् अर्थः**, यथा 'सज्जनस्य अकार्ये द्वेषः' - इत्यत्र यथा अकार्यविषयकद्वेषः इत्यर्थः प्रतीयते । अत्र व्याप्तिज्ञानविषयत्वस्य आधेयतया व्याप्तेश्चाधारतया आदौ आधारः व्याख्यातः, तदनु सप्तम्यर्थतया विषयत्वस्योपन्यासः कृतः इत्यवधेयम् ।

'अनुमितिहेतुव्याप्तिज्ञाने का व्याप्तिः ?' - इतिमूलवाक्यस्थकिम्पदार्थमुपदर्शयन्नाह - **किमः** इति । **'किमः'** इतीदं पदं षष्ठीविभक्त्यन्तम् । **किमः** = किम्पदस्य **जिज्ञासा** = ज्ञानविषयकेच्छा **'अर्थः'** इति पूर्वोक्तमनुषज्यते । जिज्ञासायाः आकारं दर्शयति - **सा** = जिज्ञासा **च 'व्याप्तिपदार्थताऽवच्छेदकाऽवच्छिन्नविषयकज्ञानं मे जायताम्' - इत्याकारिका** । व्याप्तिपदार्थता-

●

⁂ सप्तमीविभक्तिनो अर्थ विषयता ⁂

(सप्त.) अनुमितिहेतुव्याप्तिज्ञानपदोत्तर सप्तमी विभक्तिनो अर्थ विषयता छे. तेथी 'अनुमितिहेतुव्याप्तिज्ञानविषयीभूत व्याप्ति शुं छे ?' - એ પ્રમાણે તાત્પર્ય સમજવું. **'का'** શબ્દમાં રહેલ મૂળ **'किम्'** શબ્દ જિજ્ઞાસાસૂચક છે. પ્રસ્તુતમાં 'व्याप्तिपदनो अर्थ शुं छे ?' तेवा प्रकारनी जिज्ञासा छे. એટલે કે व्याप्तिपदार्थताअवच्छेदकअवच्छिन्न तमाम व्याप्तिनुं ज्ञान मने थाओ - आवा प्रकारनी जिज्ञासा छे. आना द्वारा पूर्वपक्षीय ग्रंथोनी व्याप्ति जाणवानी ईच्छा अने फक्त अनुमाननिष्ठप्रामाण्यसाधकअनुमितिनी ज नही, किंतु तमामे तमाम अनुमितिनी उपपादिका व्याप्ति जाणवानी ईच्छा सूचित करાઈ. मतलब के तमाम व्याप्तिपदार्थनुं मने ज्ञान थाओ - आवी ईच्छा એ જ પ્રસ્તુતમાં જિજ્ઞાસા તરીકે અભિપ્રેત છે.

न तावदव्यभिचरितत्वमिति । व्याप्तिरिति अनुषञ्जनीयम् ।

ऽवच्छेदकाऽवच्छिन्नत्वकथनात् प्रमेयत्वादिना व्याप्तिपदार्थस्य जिज्ञासितत्वाभावः द्योतितः । एवञ्च 'अनुमितिहेतुव्याप्तिज्ञाने का व्याप्तिः ?' इतिमूलवाक्याद् 'अनुमानप्रामाण्यसाध्यकाऽनुमितिजनकव्याप्तिज्ञाननिरूपिताऽनुमितिजनकताऽवच्छेदकतारूपविषयताश्रयः = व्याप्तिपदार्थताऽवच्छेदकाऽवच्छिन्नविषयकज्ञानविषयकेच्छाविषयज्ञानविषयाभिन्नः व्याप्तिपदार्थः' इति बोधः सम्पद्यते इति एतावता फलितम् ।

एवम् 'अनुमितिहेतुव्याप्तिज्ञाने का व्याप्तिः ?' - इत्येतन्मूलवाक्यं सोपपत्तिकं व्याख्याय 'न तावदि'त्यादिमूलवाक्यं व्याख्यातुम् उपक्रमते - **न तावद् अव्यभिचरितत्वम्** इति । यथाश्रुतोक्तवाक्यस्याऽपूर्णार्थकत्वेन व्याप्तिपदं पूरयति - **व्याप्तिरिति** 'अनुमितिहेतुव्याप्तिज्ञाने का व्याप्तिः ?' - इतिपूर्ववर्तिमूलवाक्यस्थव्याप्तिपदम् **अनुषञ्जनीयम्**, अनुषङ्गः नेदीयःस्थानान्तरस्थितस्य पुनरनुसन्धानम् । पदाऽनुसन्धानं चतुर्धा भवति, अनुषङ्गानुवृत्त्यावृत्त्यध्याहारभेदात् । तत्र अनुषङ्गानुवृत्त्याऽऽवृत्तिसाधारणलक्षणं श्रुतपदस्याऽनुसन्धानम्, अध्याहारः अश्रुतपदाऽनुसन्धानलक्षणः । अनुवृत्तिः दवीयःस्थानान्तरस्थितस्य पदस्य पुनरनुसन्धानम्, सा च मण्डुकप्लुति-सिंहावलोकित-नदीस्रोतोवत्त्रिधा । आवृत्तिः स्वस्थानस्थितस्य पुनरनुसन्धानम् । आवृत्तौ पुनः पुनः पदानुसन्धानम्, अनुवृत्त्यादौ तु न तथेति विशेषः । तथा च प्रकृते पूर्ववाक्यस्थव्याप्तिपदानुसन्धानेन नेदीयःस्थानान्तरस्थितस्य पदस्याऽनुसन्धानादनुषङ्गः इति ।

अनुषङ्गादिकं विवृण्वता **महादेवेन दिनकर्यामुक्तम्** - "स्वस्थानस्थितस्य पुनरनुसन्धानमावृत्तिः, नेदीयःस्थानान्तरस्थितस्य अनुसन्धानमनुषङ्गः, दवीयःस्थानान्तरस्थितस्य अनुसन्धानमनुवृत्तिः" (न्या.सि.मु. दिनकरीवृत्तिः श्लो.८४) इति । एतच्च **भाट्टचिन्तामण्यनुसारेण** । तदुक्तं **भाट्टचिन्तामणौ** "अनुवृत्तिः दवीयःस्थानान्तरस्थस्याऽनुसन्धानम् । सा च सिंहावलोकित-मण्डूक.प्लुति-गङ्गास्रोतोवदिति

❁ न तावद्... ईत्यादि पंक्तिनो रहस्यार्थ ❁

(न.) આ રીતે 'अनुमितिहेतुव्याप्तिज्ञानविषयीभूत व्याप्ति शुं छे ?' - આ प्रथम પંક્તિનો અર્થ બતાવી દીધો. હવે, '**न तावद् अव्यभिचरितत्वम्**' એ પંક્તિનો અર्थ બતાવે છે. પ્રસ્તુતમાં 'अव्यभिचरितत्व એ किंस्वरूप નથી ?' - એ જણાવ્યું નથી. માટે, વાક્યનો બોધ પૂર્ણ નથી થતો. એટલે જણાવે છે કે '**व्याप्तिरिति अनुषञ्जनीयम्**' પૂર્વે જે વ્યાપ્તિ પદ જણાવ્યું

गू *अनुमितिजनकतावच्छेदकमिति तदर्थः ।*

●

त्रिधा । आवृत्त्यनुषङ्गानुवृत्तिसाधारणं लक्षणं श्रुतपदानुसन्धानम् ।" (भा.चि.पृ.७१) इत्यादि ।

अत्र विवरणरूपत्वाभावाद् व्याप्तिपदं व्याप्तिपदार्थविधयाऽव्याख्याय अनुमितिजनकताऽवच्छेदकतया व्याचष्टे - **अनुमितीति** । तथा च न तावद् अव्यभिचरितत्वम् अनुमितिजनकताऽवच्छेदकमित्यर्थः । **तदर्थः** = अनुषक्तव्याप्तिपदार्थः इति ।

अनुषक्तव्याप्तिपदं व्याख्याय न तावदित्यादिमूलवाक्यं व्याकुर्वन्नाह - **अव्यभिचरितत्वमि**त्यादि । नञोऽत्र भेदार्थकत्वम्, तावत्पदस्य अवधारणमर्थः । यथा ओदन-सूपाद्याहारपरिवेषणसमये कश्चिद् भोक्ता ब्रूयात् - 'न तावद् ओदनं भुनज्मि' । अत्र च 'नैवाहमोदनं भुनज्मि' - इति अर्थः, तथाऽत्रापि तावत्पदमवधारणार्थमिति केचित् प्राहुः, अपरे वाक्यालङ्कारे तावत्पदमित्याहुरित्यवधेयम् । नेति पदं तावदिति च पदं सुज्ञेयमिति कृत्वा ते अव्याख्यायैव अव्यभिचरितत्वपदं व्याकृतमित्यवधेयम् ।

●

હતું તેની અનુવૃત્તિ કરી દેવી. અહીં પ્રશ્ન થાય કે - "પ્રસ્તુતમાં જે વ્યાપ્તિ પદની અનુવૃત્તિ (= અનુષઙ્ગ) કરી છે તે વ્યાપ્તિ પદનો અર્થ શું છે ? વ્યાપ્તિપદાર્થ કે અનુમિતિજનકતાઅવચ્છેદક ? વ્યાપ્તિપદાર્થ અર્થ કરવાનો કોઈ મતલબ નથી. કારણ કે પ્રસ્તુત વાક્ય વિવરણવાક્ય છે નહીં. અને વ્યાપ્તિનો અર્થ અનુમિતિજનકતાઅવચ્છેદક કરવામાં આવે તો પણ પુનરુક્તિ તો થવાની જ નથી. તો પછી વ્યાપ્તિનો અર્થ વ્યાપ્તિપદાર્થ કરવાની જરૂરત શી ?" પણ, આ પ્રશ્ન પ્રસ્તુતમાં અસ્થાને છે. કારણ કે અમે વ્યાપ્તિનો અર્થ વ્યાપ્તિપદાર્થ કરતા જ નથી. કિંતુ અનુમિતિજનકતાઅવચ્છેદક જ કરીએ છીએ. તેથી 'અવ્યભિચરિતત્વ અનુમિતિજનકતાઅવચ્છેદક નથી' - આવો અર્થ ફલિત થાય. તાત્પર્ય એ છે કે - 'વહ્નિવ્યાપ્યધૂમવાન પર્વત' - આ પરામર્શને સ્પષ્ટતા સાથે વિસ્તારથી કહો તો 'વહ્નિવ્યાપ્તિવિશિષ્ટધૂમવાન પર્વત એટલે કે ધૂમસમાનાધિકરણઅત્યંતાભાવઅપ્રતિયોગિવહ્નિસમાનાધિકરણધૂમવાન પર્વત' - આ રીતે પરામર્શનો આકાર થાય. પણ, વહ્નિઅભાવવદ્વૃત્તિ વગેરે સ્વરૂપ જે અવ્યભિચરિતત્વ તેનાથી ઘટિત વહ્નિઅવ્યભિચરિત-ધૂમવાન પર્વત - આવા પ્રકારનો પરામર્શ ન થાય. એટલે અનુમિતિજનક એવો જે પરામર્શ તેની વિષયતા અવ્યભિચરિતત્વમાં નથી. કિંતુ સિદ્ધાંતવ્યાપ્તિમાં જ છે. માટે અનુમિતિજનકતા કે જે પરામર્શનિષ્ઠ છે તેનો વિષયવિધયા અવચ્છેદક અવ્યભિચરિતત્વ ન બને. આમ,

अथ 'न तावद् अव्यभिचरितत्वं व्याप्तिः' इत्यनेन अव्यभिचरितत्वं न अनुमितिजनकताऽवच्छेदकमित्यनुमानं फलितम्, अत्र अव्यभिचरितत्वं पक्षः अनुमितिजनकताऽवच्छेदकभेदः साध्यः, हेतुश्च वक्ष्यमाणः । अत्र अव्यभिचरितत्वस्य पक्षत्वे पक्षताऽवच्छेदकाऽनुगमः न भवति, अव्यभिचरितत्वस्य साध्याभाववदवृत्तित्वादिरूपत्वेन अव्यभिचरितत्वत्वस्य साध्याभाववदवृत्तित्वत्वादिरूपत्वप्राप्त्या नाऽनुगतः धर्मः अव्यभिचरितत्वत्वम् । एवम् अव्यभिचरितत्वत्वस्य अननुगतत्वेन न तस्य पक्षताऽवच्छेदकत्वं सम्भवति ।

न चाऽस्तु अननुगतोऽपि धर्मः पक्षताऽवच्छेदकः ? को दोषः ? अव्यभिचरितत्वत्वस्य पक्षताऽवच्छेदकत्वे किं कोऽपि दोषोऽस्ति ? येन तस्य तथात्वं निराक्रियते ? ***इति वाच्यम्;*** तथा सति एकधर्मावच्छिन्नस्य व्याप्तित्वनिराकरणेऽपि अन्यधर्मावच्छिन्नस्य व्याप्तित्वशङ्कानिरासाऽयोगात् ।

अयमाशयः - अव्यभिचरितत्वं न व्याप्तिः = अनुमितिजनकताऽवच्छेदकमित्याद्यनुमानेन अव्यभिचरितत्वे व्याप्तित्वाऽभावः साधयितुमिष्टः, अत्र [१]साध्याभाववदवृत्तित्व-[२]साध्यवद्भिन्नसाध्याभाववदवृत्तित्व-[३]साध्यवत्प्रतियोगिकाऽन्योन्याभावाऽसामानाधिकरण्य-[४]सकलसाध्याभाव-

●

'અવ્યભિચરિતત્વ એ અનુમિતિજનકતાઅવચ્છેદક નથી' - એ પ્રમાણે 'ન તાવદ્...' ઇત્યાદિનો અર્થ ફલિત થયો.

❁ तत्त्वचिंतामणिकारनुं कथन न्यूनताग्रस्त : पूर्वपक्ष ❁

प्रश्न :- અવ્યભિચરિતત્વ એ અનુમિતિજનકતાઅવચ્છેદક નથી - આ વાક્યમાં અવ્યભિચરિતત્વથી કોઈ એક જ વ્યાપ્તિ પકડી શકાશે. પાંચે પાંચ નહીં. કારણ કે અવ્યભિચરિતત્વ = અવ્યભિચરિતત્વત્વથી અવરિછન્ન. અવ્યભિચરિતત્વત્વ તો પાંચેય વ્યાપ્તિમાં અનુગત છે જ નહીં. જેમ કે **'घटमानय'** આવું કહેવામાં આવે ત્યારે ઘટત્વ જેટલા પણ ઘડામાં છે તે તમામ ઘડામાંથી કોઈને પણ લાવી શકાય. કોઈ પણ ઘડો આનયનક્રિયાવિશિષ્ટ હોઈ શકે. કિંતુ જ્યારે **तद्घटमानय** કહેવામાં આવે ત્યારે તદ્ઘટત્વ જાતિ ન હોવાથી કોઈ એકાદ ઘડાને જ લાવવાની અનુજ્ઞા છે. પ્રસ્તુતમાં પણ તે જ રીતે અવ્યભિચરિતત્વ જે સાધ્યાભાવવદ્અવૃત્તિત્વ સ્વરૂપ છે તે સાધ્યવદ્ભિન્નસાધ્યાભાવવદ્અવૃત્તિત્વસ્વરૂપ નથી. કહેવાનો આશય એ છે કે - આગળ બતાવવામાં આવશે તે મુજબ અવ્યભિચરિતત્વ એ સાધ્યાભાવવદ્અવૃત્તિત્વસ્વરૂપ છે - એમ કેટલાંક વિદ્વાનો જણાવે છે.

वन्निष्ठाऽभावप्रतियोगित्व-[५]साध्यवदन्याऽवृत्तित्वरूपलक्षणपञ्चकम् अव्यभिचरितत्वम् । एतेषु पञ्चस्वपि लक्षणेषु व्याप्तित्वाभावः साधनीयः । अव्यभिचरितत्वस्य अव्यभिचरितत्वत्वेन पक्षत्वे नैतच्छक्यम्, यतः 'सकृदुच्चरितः शब्दः सकृदेवाऽर्थं गमयती'ति न्यायेन अव्यभिचरितत्वपदेन कस्यचिद् एकस्यैव लक्षणस्य बोधः, अव्यभिचरितत्वत्वेन एकस्यैवोपस्थितेः सम्भवात् ।

अव्यभिचरितत्वत्वं यदि साध्याभाववदवृत्तित्वत्वरूपं विवक्ष्यते तदा साध्याभाववदवृत्तित्वत्वेन साध्याभाववदवृत्तित्वस्यैव अव्यभिचरितत्वपदेनोपस्थितिः, तथा च उक्ताऽनुमानेन साध्याभाववद-वृत्तित्वत्वाऽवच्छिन्ने एव व्याप्तित्वाभावः साधयितुं शक्यः, 'साध्यवद्भिन्नसाध्याभाववदवृत्तित्वं व्याप्तिः न वा ?' इत्यादिशङ्का नोक्तानुमानेन अपनेतुं शक्या ।

न च व्याप्तिपञ्चकम् अव्यभिचरितत्वपदेनो***पस्थाप्यते***, 'सैन्धवमानय' इत्यादौ यथा 'सकृदुच्चरितः शब्दः सकृदेवाऽर्थं गमयति' इतिन्यायवशेन सैन्धवपदेन अश्वस्यैव लवणस्यैव वा बोधः तथाऽत्राऽपि अव्यभिचरितत्वत्वेन अव्यभिचरितत्वस्य एकस्यैवोपस्थितिः सम्भवेत् । तथा च साध्याभाववदवृत्तित्वत्वाद्यन्यतररूपेण अव्यभिचरितत्वस्य ज्ञानमेकदा भवति । अतः अव्यभिचरितत्वत्वेन अव्यभिचरितत्वस्य पक्षत्वे साध्याभाववदवृत्तित्वत्वावच्छिन्ने व्याप्तित्वा-भावनिश्चयो भवति तदा साध्यवद्भिन्नसाध्याभाववदवृत्तित्वत्वाऽवच्छिन्ने व्याप्तित्वशङ्कानिरासः न भवति ।

यदि अव्यभिचरितत्वत्वं यत् साध्याभाववदवृत्तित्वे वर्तते तदेव अन्येषु अपि लक्षणेषु स्यात्, तथा च अव्यभिचरितत्वत्वम् एकरूपं स्यान्न तु साध्याभाववदवृतित्वत्वादिरूपम्, तदा

●

કેટલાંક વિદ્વાનો साध्यवद्भिन्नसाध्याभाववद्अवृत्तित्वस्वરૂપ અવ્યભિચરિતત્વને સ્વીકારે છે. આવા પાંચ મતો છે. જ્યારે અવ્યભિચરિતત્વ એ અનુમિતિજનકતાઅવચ્છેદક નથી' - આવું કહેવામાં આવે ત્યારે 'साध्याभाववद्अवृत्तित्त्वस्वરૂપ અવ્યભિચરિતત્વ જ અનુમિતિ-જનકતાઅવચ્છેદક નથી, साध्यवद्भिन्नसाध्याभाववद्अवृत्तित्व એ અનુમિતિજનકતા-અવચ્છેદક છે' - આવું કોઈ કહે તો તેને રોકી ન શકાય. આમ કોઈ એકાદ અવ્યભિચરિતત્વમાં જ (= साध्याभाववद्अवृत्तित्व વગેરે એકાદમાં જ) તમે અનુમિતિજનકતાઅવચ્છેદકનો ભેદ સાબિત કરી શકશો. માટે તત્ત્વચિંતામણિકારનું વાક્ય ન્યૂનતાગ્રસ્ત બનશે. એટલે કે અભિમતની સિદ્ધિ નહીં થઈ શકે. કારણકે પાંચેય પૂર્વપક્ષીયવ્યાપ્તિમાં અનુમિતિજનકતા-અવચ્છેદકભેદ સાબિત નથી થતો.

*अव्यभिचरितत्वम् = अव्यभिचरितत्वपदार्थः । **तेन** साध्याभाववद-*

अव्यभिचरितत्वत्वेन पञ्चानामपि लक्षणानामुपस्थितिः स्यात्, यथा घटत्वेन सर्वेषां घटानामुपस्थितिः भवति । किन्तु अव्यभिचरितत्वत्वस्य साध्याभाववदवृत्तित्वत्वादिरूपत्वेन अननुगतत्वादुक्तापत्तिः भविष्यत्येव इति ।

न च अव्यभिचरितत्वपदमावृत्त्य व्याप्तिपञ्चकबोधकम् अङ्गीकर्तव्यम् ***इति वाच्यम्,*** एवं सति 'अव्यभिचरितत्वं न व्याप्तिः, अव्यभिचरितत्वं न व्याप्तिरि'त्येवं वाक्यभेदाऽऽपत्तेः । न हि एकस्मिन्नेव वाक्ये आवृत्तिः भवति ।

तथा च अव्यभिचरितत्वत्वेन पक्षत्वमव्यभिचरितत्वस्य न युक्तम् ***इति चेद्*** ?

मैवम्; अव्यभिचरितत्वपदार्थत्वेन अव्यभिचरितत्वस्य पक्षत्वे उक्तदोषाभावात् । साध्याभाववदवृत्तित्वादिकानि लक्षणानि अव्यभिचरितत्वपदार्थतया सन्ति । तेषु सर्वेषु अव्यभिचरितत्वपदार्थत्वं समस्ति । तच्चैकमनुगतञ्च । तथा च अव्यभिचरितत्वपदार्थत्वेन सर्वेषु लक्षणेषु पक्षत्वप्राप्त्या सर्वेषु तेषु व्याप्तित्वाभावः उक्ताऽनुमानेन सेत्स्यतीति सर्वं चतुरस्रम् । अतः अव्यभिचरितत्वम् = अव्यभिचरितत्वपदार्थः इत्यर्थः बोद्धव्यः ।

एतदेवाह - **अव्यभिचरितत्वम् = अव्यभिचरितत्वपदार्थः । तेन** = 'अव्यभिचरितत्वस्य

⁂ અવ્યભિચરિતત્વપદથી ન્યૂનતા નિવારણ : ઉત્તરપક્ષ ⁂

ઉત્તર :- અવ્યભિચરિતત્વનો અર્થ અવ્યભિચરિતત્વપદાર્થ છે. અવ્યભિચરિતત્વ ભલે પાંચ હોય અને તેમાં રહેનાર અવ્યભિચરિતત્વત્વ પણ ભલે પાંચ હોય છતાં પણ અવ્યભિચરિતત્વપદવાચ્યત્વ પાંચે પાંચ અવ્યભિચરિતત્વમાં અનુગત મળી શકશે. એટલે અવ્યભિચરિતત્વપદવાચ્યત્વાવચ્છિન્નમાં અનુમિતિજનકતાઅવચ્છેદકનો ભેદ સાધનાર ઉક્ત વાક્ય અભિમતની સિદ્ધિ કરનારું જ થશે. કારણ કે એકાદ પણ અવ્યભિચરિતત્વપદવાચ્યત્વવિશિષ્ટમાં અનુમિતિજનકતાઅવચ્છેદકનો ભેદ ન રહેતો હોય તો 'અવ્યભિચરિતત્વપદવાચ્યત્વઅવચ્છિન્ન અનુમિતિજનકતાઅવચ્છેદકથી ભિન્ન છે' - આવું કહી ન શકાય. પ્રસ્તુતમાં અવ્યભિચરિતત્વપદવાચ્યત્વઅવચ્છિન્નમાં અનુમિતિજનકતાઅવચ્છેદકનો ભેદ જણાવ્યો છે. તેથી પાંચેય પૂર્વપક્ષીયલક્ષણોમાં અનુમિતિજનકતાઅવચ્છેદકનો ભેદ સિદ્ધ

गू *वृत्तित्वादिसाधारणस्याऽव्यभिचरितत्वत्वस्यैकस्याभावेऽपि* ***न क्षतिः*** ।

यथाश्रुतार्थकरणे अव्यभिचरितत्वत्वेन अव्यभिचरितत्वस्य पक्षत्वप्राप्त्या वक्ष्यमाणाऽऽपत्तिसम्भवेऽपि अव्यभिचरितत्वपदस्य अव्यभिचरितत्वपदार्थपरकत्वाङ्गीकारेण अव्यभिचरितत्वपदार्थत्वेन तस्य पक्षत्वे वक्ष्यमाणाऽऽपत्त्यसम्भवः एव' इत्यादिमनसिकृत्य अव्यभिचरितत्वपदस्य अव्यभिचरितत्वपदार्थपरकत्वाऽभ्युपगमेन, अस्य **'न क्षतिः'** इत्यनेनाऽन्वयः । **साध्याभाववदवृत्तित्वादिसाधारणस्य** = यद् अव्यभिचरितत्वत्वं साध्याभाववदवृत्तित्वे तदेव साध्यवद्भिन्नसाध्याभाववदवृत्तित्वे तदेव च साध्यवत्प्रतियोगिकाऽन्योन्याभावाऽसामानाधिकरण्ये इत्येवं लक्षणपञ्चके अनुगतस्य **अव्यभिचरितत्वत्वस्य अभावेऽपि** = तादृशाऽव्यभिचरितत्वत्वस्य अभावेन तादृशाऽननुगताऽव्यभिचरितत्वत्वेन च अव्यभिचरितत्वस्य पक्षत्वे साध्याभाववदवृत्तित्वत्वत्वरूपाऽव्यभिचरितत्वत्वावच्छिन्ने व्याप्तित्वाऽभावसिद्धौ अपि साध्यवद्भिन्नसाध्याभाववदवृत्तित्वत्वादिरूपाऽव्यभिचरितत्वत्वाऽवच्छिन्ने व्याप्तित्वशङ्काऽनिरासाद् अव्यभिचरितत्वत्वरूपाऽननुगतधर्मस्य पक्षताऽवच्छेदकत्वाऽसम्भवेऽपि इति यावत् । **न क्षतिः** = न एकधर्माऽवच्छिन्ने व्याप्तित्वाऽभावनिश्चयेऽपि अन्यधर्माऽवच्छिन्ने व्याप्तित्वशङ्काऽनिरासलक्षणा क्षतिः, अव्यभिचरितत्वत्वेन पक्षत्वाऽनङ्गीकारात्, अव्यभिचरितत्वपदस्य अव्यभिचरितत्वपदार्थपरकत्वमङ्गीकृत्य अव्यभिचरितत्वपदार्थत्वेन पक्षत्वाङ्गीकारे उक्तदोषाभावादित्युक्तप्रायम् ।

य शो ल ता

एवं मूलवाक्यार्थमुपदर्श्य तत्तात्पर्यार्थमुपदर्शयितुं पूर्वपक्षमुत्थापयति - **अथेत्यादिना** ।

થાય છે. પ્રસ્તુતમાં **तेन** કહીને જે પંક્તિ આવતી હતી તેનો અર્થ પ્રશ્નમાં જ બતાવી દીધો છે. તેનું ધ્યાન રાખવું.

વિ ન ભા

शब्दार्थ :- 'અવ્યભિચરિતત્વ નથી' - અહીં (= આ તત્ત્વચિંતામણિવાક્યમાં)વ્યાપ્તિ એવું પદ જોડી દેવું. મતલબ કે 'વ્યાપ્તિ એ અવ્યભિચરિતત્વ નથી' - આ પ્રમાણે સમજવું. પ્રસ્તુતમાં વ્યાપ્તિનો અર્થ અનુમિતિજનકતાઅવચ્છેદક કરવો. તથા અવ્યભિચરિતત્વ = અવ્યભિચરિતત્વ પદાર્થ - આ પ્રમાણે અર્થ કરવાને કારણે સાધ્યાભાવવદ્વૃઅવૃત્તિત્વાદિ તમામમાં અનુગત એવું એક અવ્યભિચરિતત્વત્વ ન હોવા છતાં પણ અભિમતની અસિદ્ધિ નામનો દોષ નહીં આવે. કારણ કે અવ્યભિચરિતત્વનો અર્થ અવ્યભિચરિતત્વપદાર્થ કરવાથી પાંચે ય વ્યાપ્તિમાં અનુગત અવ્યભિચરિતત્વપદવાચ્યત્વ લબ્ધ થઈ જાય છે.

पूर्वपक्षस्याऽयमाशयः - यत् प्रश्नवाक्ये उद्देश्यं तद् उत्तरवाक्ये विधेयम्, तथा च यदुद्दिश्य प्रश्नः तस्य विधानं भवति इति नियमः । यथा 'घटः कः' इति प्रश्नः घटमुद्दिश्य प्रवृत्तः । तथा च 'कम्बुग्रीवादिमान् घटः' इति उत्तरवाक्ये घटः तादात्म्येन विधेयः, कम्बुग्रीवादिमल्लक्षणोद्देश्ये तादात्म्येन घटविधानात् । एवं 'पटः न घटः' इत्याद्युत्तरवाक्येऽपि घटभेदः एव विधेयः ।

प्रकृते 'व्याप्तिः का ?' इत्यादिरीत्या व्याप्तिमुद्दिश्य प्रश्नः प्रवृत्तः । 'न तावद् अव्यभिचरितत्वं व्याप्तिः' इत्याद्युत्तरवाक्ये उक्तनियमवशेन व्याप्तिभेदः व्याप्तित्वाभावो वा विधेयतया अवगन्तव्यः। तथा च प्रकृते व्याप्तित्वाऽभावं साध्यतया स्वीकृत्य अव्यभिचरितत्वपदार्थस्य पक्षत्वमङ्गीकरणीयम्, विधेयस्य साध्यत्वात्, नञ्समभिव्याहारेण व्याप्तित्वाभावस्यैवाऽत्र साध्यत्वसम्भवात् । तद्धि न साध्याभाववदवृत्तित्वम्... इत्यादिसन्दर्भेण साध्याभाववदवृत्तित्वादिभेदवत्त्वं हेतुतया लभ्यते । तथा च 'अव्यभिचरितत्वपदार्थः नाऽनुमितिजनकताऽवच्छेदकः, साध्याभाववदवृत्तित्वादिभेदवत्त्वाद्' - इत्यनुमानं तत्त्वचिन्तामणिसन्दर्भेण फलितम् ।

य शो ल ता

⁂ पंक्तिथी लब्ध अनुमान असंभवित ⁂

पूर्वपक्ष :- (अथ.) उक्त बे वाक्य द्वारा तमे जे सिद्ध करवा मांगो छो तेनो प्रयोग (अनुमान प्रयोग) तमारे बनाववो रह्यो. एक नियम छे के 'जे प्रश्न वाक्यमां उद्देश्य होय ते उत्तर वाक्यमां विधेय बने.' दा.त. घडो कोने कहेवाय ? आमां घटने उद्देशीने प्रश्न करवामां आवे छे. अहीं जवाब अपाय के 'कंबुग्रीवादिमान घडो कहेवाय' - आ वाक्यमां कंबुग्रीवादिमान पदार्थने उद्देशीने घडानुं (तादात्म्यथी) विधान करवामां आवे छे. आथी ज 'कपडांने घडो न कहेवाय' - आ वाक्यमां पण कपडांने उद्देशीने घटभेदनुं विधान फलित थाय छे. प्रस्तुतमां 'व्याप्ति शुं छे ?' आ रीते व्याप्तिने उद्देशीने प्रश्न छे. माटे 'सिद्धांतलक्षण ए व्याप्ति छे' - आ वाक्यमां सिद्धांतलक्षणने उद्देशीने व्याप्तिनुं विधान अने 'व्याप्ति अव्यभिचरितत्व नथी' - आ वाक्यमां अव्यभिचरितत्वने उद्देशीने व्याप्तिभेदनुं विधान थाय. जे उद्देश्य ते पक्ष, जे विधेय ते साध्य. जेम के पर्वतने उद्देशीने वह्नित्वनुं विधान थाय छे. माटे, पर्वत पक्ष, वह्नि साध्य. आम, प्रस्तुतमां अव्यभिचरितत्व पक्ष बनशे अने साध्य बनशे अनुमितिजनकताअवच्छेदकभेद. **'तद्धि न साध्याभाववदवृत्तित्वम्'** आ पंक्ति द्वारा हेतु सूचित थयो. मतलब के अनुमानप्रयोग आवो बनशे के...

वि न भा

अव्यभिचरितत्व पदार्थ ए अनुमितिजनकताअवच्छेदक नथी. कारण के साध्याभाववद्-

अत्र 'व्याप्तिः (= अनुमितिजनकताऽवच्छेदकं) न अव्यभिचरितत्वम्, साध्याभाववदवृत्तित्वादिभेदवत्त्वाद्' - इत्यनुमानं क्रियते तदोक्तनियमः भज्यते, व्याप्तिमुद्दिश्य कृतस्य प्रश्नस्योत्तरे व्याप्तेरेव उद्देश्यत्वात् । अतः एव व्याप्तित्वस्य तादात्म्येन व्याप्तेः वा नञर्थाभावेऽन्वयेन व्याप्तित्वाभावस्य व्याप्तिभेदस्य वा साध्यत्वमङ्गीकरणीयम् ।

न च साध्याभाववदवृत्तित्वादिभेदवत्त्वस्य हेतुसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिसाध्यसामानाधिकरण्यलक्षणसिद्धान्तव्याप्तौ अपि सत्त्वेन तत्र च अनुमितिजनकताऽवच्छेदकत्वाऽभावस्य असत्त्वाद् व्यभिचारः ***इति वाच्यम्;*** 'अव्यभिचरितत्वपदवाच्यत्वे सति' इत्यस्य हेतौ प्रवेशात् । तथा च अव्यभिचरितत्वपदार्थः नाऽनुमितिजनकताऽवच्छेदकम्, अव्यभिचरितत्वपदवाच्यत्वे सति साध्याभाववदवृत्तित्वादिभेदवत्त्वाद् इत्यनुमानं फलितम्, सिद्धान्तव्याप्तौ अव्यभिचरितत्वपदवाच्यत्वस्य असत्त्वान्न व्यभिचारः ।

●

અવૃત્તિત્વ વગેરેનો ભેદ અવ્યભિચરિતત્વમાં રહેલો છે. તાત્પર્યાર્થ એ થયો કે - અવ્યભિચરિતત્વ સાધ્યાભાવવદ્અવૃત્તિત્વ વગેરે સ્વરૂપ નથી. માટે તે અનુમિતિજનકતા-અવચ્છેદક સ્વરૂપ પણ નથી. જ્યાં જ્યાં સાધ્યાભાવવદ્અવૃત્તિત્વ વગેરેનો ભેદ રહે ત્યાં ત્યાં અનુમિતિજનકતાઅવચ્છેદકનો ભેદ રહે. આ રીતે અવ્યભિચરિતત્વપક્ષક અનુમાનપ્રયોગ તત્ત્વચિંતામણિની પંક્તિ ઉપરથી ફલિત થશે.

❖ અનુમાનપ્રયોગમાં અનૈકાંતિક દોષ ❖

પ્રશ્ન :- આ અનુમાનપ્રયોગ તો વ્યભિચારગ્રસ્ત છે. કારણ કે સાધ્યાભાવવદ્અવૃત્તિત્વ વગેરેનો ભેદ તો સિદ્ધાંતવ્યાપ્તિમાં પણ છે જ. કારણ કે સિદ્ધાંતવ્યાપ્તિ સાધ્યાભાવવદ્અવૃત્તિત્વ વગેરે સ્વરૂપ નથી. આમ, સિદ્ધાંતવ્યાપ્તિમાં હેતુ રહે છે. કિંતુ અનુમિતિજનકતાઅવચ્છેદકનો ભેદ નથી રહેતો. કારણ કે સિદ્ધાંતવ્યાપ્તિ તો અનુમિતિજનકતાઅવચ્છેદક સ્વરૂપ છે. તેથી હેતુ હોવા છતાં પણ સાધ્ય ન હોવાને કારણે હેતુ સાધ્યાભાવવાનમાં વૃત્તિ બન્યો. એટલે વ્યભિચાર દોષ સ્પષ્ટ છે.

❖ પરિષ્કાર દ્વારા દોષનું નિરાકરણ ❖

ઉત્તર :- અરે ભાઈ ! હેતુમાં 'અવ્યભિચરિતત્વપદવાચ્યત્વે સતિ' - આટલું ઉમેરી દો. મતલબ કે જ્યાં અવ્યભિચરિતત્વપદવાચ્યત્વ રહેતું હોય અને સાધ્યાભાવવદ્અવૃત્તિત્વ વગેરેનો ભેદ પણ રહેતો હોય ત્યાં અનુમિતિજનકતાઅવચ્છેદકનો ભેદ રહે. સિદ્ધાંતવ્યાપ્તિ

तत्त्वचिन्तामणिसन्दर्भानुसार्युक्ताऽनुमानं सर्वथा न सम्भवति । तथाहि - उक्ताऽनुमाने (१) पञ्चानामपि लक्षणानां प्रत्येकस्य भेदस्य हेतुत्वम् ? यद्वा (२) पञ्चानां मिलितानां भेदस्य हेतुत्वम् ? अयमाशयः - किं भवताम् 'अव्यभिचरितत्वं न अनुमितिजनकताऽवच्छेदकम्, साध्याभाववदवृत्तित्वभेदवत्त्वात्, साध्यवद्भिन्नसाध्याभाववदवृत्तित्वभेदवत्त्वादि'त्येवं प्रत्येकलक्षण-प्रतियोगिकभेदस्य हेतुत्वमभिप्रेतम् ? यद्वा 'अव्यभिचरितत्वं नाऽनुमितिजनकताऽवच्छेदकम्, साध्याभाववदवृत्तित्वादिलक्षणपञ्चकभेदवत्त्वाद्' इत्येवं मिलितानां पञ्चानां लक्षणानां भेदस्य हेतुत्वमभिप्रेतम् ?

●

અવ્યભિચરિતત્વપદપ્રતિપાદ્ય નથી. માટે, તેમાં સાધ્યાભાવવદ્અવૃત્તિત્વ વગેરેનો ભેદ રહેવા છતાં પણ હેતુ રહેશે નહીં. તથા અવ્યભિચરિતત્વપદાર્થ એ અવ્યભિચરિતત્વપદવાચ્ય પણ છે તથા સાધ્યાભાવવદ્અવૃત્તિત્વ વગેરેથી ભિન્ન પણ છે. માટે, અવ્યભિચરિતત્વપદાર્થ અનુમિતિજનકતાઅવચ્છેદક બની નહીં શકે. આમ, અનુમાનપ્રયોગ આ રીતે ફલિત થયો કે અવ્યભિચરિતત્વપદાર્થ અનુમિતિજનકતાઅવચ્છેદક નથી, કારણ કે અવ્યભિચરિતત્વપદાર્થ અવ્યભિચરિતત્વપદવાચ્ય હોવા ઉપરાંતમાં સાધ્યાભાવવદ્અવૃત્તિત્વ વગેરેથી ભિન્ન છે. (પ્રસ્તુતમાં મૂળ ગ્રંથમાં અવ્યભિચરિતત્વપદવાચ્યત્વનો હેતુકોટિમાં પ્રવેશ ન કરેલો હોવા છતાં પણ વ્યભિચાર દોષનું વારણ કરવા માટે તેનો પ્રવેશ કરવો અનિવાર્ય છે. જો કે આ અનુમાનપ્રયોગ સાચો નથી, દોષગ્રસ્ત જ છે. છતાં પણ વ્યભિચાર દોષ ન આપતા અસિદ્ધિ દોષ જ ઉક્ત અનુમાનપ્રયોગમાં ગ્રથકારે દર્શાવેલો હોવાને કારણે વ્યભિચારદોષ-નિવારક ઉક્ત વિશેષણ સાર્થક બનશે.)

⁎ અનુમાનપ્રયોગમાં દોષ પ્રદર્શન ⁎

તત્ત્વચિંતામણિગ્રંથની પંક્તિઓ ઉપરથી જે ઉક્ત અનુમાનપ્રયોગ ફલિત થાય છે તે સંભવતો નથી. (આ વાત પૂર્વપક્ષ જ જણાવે છે. યાદ રહે ! પ્રશ્નનો ઉત્તર આપનાર પૂર્વપક્ષ જ છે. પૂર્વપક્ષ જણાવે છે કે તત્ત્વચિંતામણિ ગ્રંથની પંક્તિ દ્વારા જે અનુમાનપ્રયોગ ફલિત થાય છે તે વ્યાજબી નથી) તમે જે અનુમાનપ્રયોગ કર્યો છે (= તત્ત્વચિંતામણિની પંક્તિઓ દ્વારા જે આ અનુમાન ફલિત થાય છે) તેમાં અમારો પ્રશ્ન છે કે તમે જે 'સાધ્યાભાવવદ્અવૃત્તિત્વ વગેરેનો ભેદ'- આ હેતુ મૂક્યો છે તેમાં પાંચે પાંચ લક્ષણનો જુદો-જુદો ભેદ હેતુ છે ? કે પાંચેયનો સંયુક્ત ભેદ હેતુ છે ? મતલબ કે જ્યાં સાધ્યાભાવવદ્અવૃત્તિત્વ વગેરે પાંચેય લક્ષણોમાંથી કોઈ એકનો પણ ભેદ રહેતો હોય ત્યાં અનુમિતિજનકતા-

(१) नाद्यः, विकल्पाऽनुपपत्तेः । प्रत्येकभेदस्य हेतुत्वे किं (क) पक्षताऽवच्छेदकाऽवच्छेदेना-
ऽनुमितिरिष्टा (ख) पक्षतावच्छेदकसामानाधिकरण्येन वा ? उभयथाऽपि व्यथा, भागाऽसिद्धि
-साधनीयाऽसिद्ध्योः प्रसङ्गात् ।

इदमत्राकूतम् - अनुमितिः द्विधा भवति - (१) पक्षताऽवच्छेदकाऽवच्छेदेन (२) पक्षताऽ-
वच्छेदकसामानाधिकरण्येन, यथा कुत्रचित् पर्वते धूमदर्शनात् 'पर्वतो वह्निमान्' इत्यनुमितिः
पर्वतत्वसामानाधिकरण्येन भवति, सकलपर्वते वह्नेरननुमानात् । 'पृथ्वी स्वेतरभिन्ना' इत्याद्यनु-

●

અવચ્છેદકનો ભેદ રહે - આવી વ્યાપ્તિ તમને માન્ય છે કે 'જ્યાં સાધ્યાભાવવદ્અવૃત્તિત્વ વગેરે પાંચેય લક્ષણોનો ભેદ રહેતો હોય ત્યાં અનુમિતિજનકતાઅવચ્છેદકનો ભેદ રહે' - આવી વ્યાપ્તિ તમને માન્ય છે ? પ્રથમ વિકલ્પ મુજબ "(૧) અવ્યભિચરિતત્વપદાર્થ અનુમિતિજનકતાઅવચ્છેદક નથી. કારણ કે તે સાધ્યાભાવવદ્અવૃત્તિત્વથી ભિન્ન છે. (૨) અવ્યભિચરિતત્વપદાર્થ અનુમિતિજનકતાઅવચ્છેદક નથી. કારણ કે તે સાધ્યવદ્ભિન્ન-સાધ્યાભાવવદ્અવૃત્તિત્વથી ભિન્ન છે" - આ રીતે પ્રત્યેક લક્ષણના ભેદને જુદા - જુદા હેતુ બનાવી પાંચ અનુમાન પ્રયોગ થઈ શકે. બીજા વિકલ્પ મુજબ 'અવ્યભિચરિતત્વપદાર્થ અનુમિતિજનકતાઅવચ્છેદક નથી. કારણ કે તે સાધ્યાભાવવદ્અવૃત્તિત્વ વગેરે પાંચ લક્ષણોથી ભિન્ન છે' - આ રીતે એક જ અનુમાનપ્રયોગ ફલિત થાય. આ બંને વિકલ્પોમાંથી તમને કયો વિકલ્પ માન્ય છે ?

❋ વિકલ્પોની અનુપપત્તિથી અનુમાનની અનુપપત્તિ ❋

જો પ્રથમ વિકલ્પ સ્વીકારશો એટલે કે પ્રત્યેક ભેદને = પાંચ લક્ષણના પાંચ ભેદમાંથી દરેક ભેદને હેતુ માનશો તો પાછો અમારો પ્રશ્ન છે કે - શું તમે પક્ષતાઅવચ્છેદકઅવચ્છેદેન સાધ્યની સિદ્ધિ કરવા માંગો છો ? કે પક્ષતાઅવચ્છેદકસામાનાધિકરણ્યેન ? તાત્પર્ય એ છે કે અનુમિતિ બે પ્રકારની હોય - (૧) પક્ષતાઅવચ્છેદકઅવચ્છેદેન અને (૨) પક્ષતાઅવચ્છેદક-સામાનાધિકરણ્યેન. **पृथ्वी गन्धवती, पृथ्वीत्वात्** - આ અનુમાનપ્રયોગમાં પૃથ્વીત્વાવચ્છેદેન = તમામ પૃથ્વીમાં ગન્ધની અનુમિતિ કરવી છે. માટે, આ અનુમિતિ પક્ષતાઅવચ્છેદક-અવચ્છેદેન કહેવાય. **पर्वतो वह्निमान्, धूमात्** - આ અનુમાનપ્રયોગમાં પર્વતત્વઅવચ્છેદેન = તમામ પર્વતોમાં વહ્નિની સિદ્ધિ કરવી નથી, કારણ કે તમામ પર્વત ઉપર ધૂમ નથી અને વહ્નિ પણ નથી. પરંતુ જે પર્વત ઉપર ધૂમ રહેલ છે તે પર્વત ઉપર જ વહ્નિની અનુમિતિ

मितिस्तु पृथिवीत्वाऽवच्छेदेन भवति, सर्वासु तासु स्वेतरभेदस्य अनुमानात् । यदि पक्षताऽवच्छेदक-सामानाधिकरण्येन अनुमितिः भवति तदा पक्षताऽवच्छेदकाधिकरणेषु साध्याभावोऽपि भवति इति बोध्यम् ।

(क) यदि अत्र भवता पक्षताऽवच्छेदकाऽवच्छेदेनाऽनुमितिः अङ्गीक्रियते तदा भागासिद्धिः स्यात् । तथाहि - पक्षताऽवच्छेदकाऽवच्छेदेन अनुमित्यङ्गीकारे प्रत्येकभेदस्य च हेतुत्वे 'सर्वे अव्यभिचरितत्वपदार्थाः नाऽनुमितिजनकताऽवच्छेदकाः, साध्याभाववदवृत्तित्वभेदवत्त्वात्, एवं सर्वे अव्यभिचारपदार्थाः, नाऽनुमितिजनकताऽवच्छेदकाः, साध्यवद्भिन्नसाध्याभाववदवृत्तित्वभेद-वत्त्वाद्' - इत्येवं पञ्चाऽनुमानप्रयोगाः फलिताः भवन्ति । तत्र सर्वत्र भागाऽसिद्धिः । भागासिद्धिः नाम पक्षताऽवच्छेदकसामानाधिकरण्येन हेत्वभावः, यस्मिन् कस्मिंश्चित् पक्षैकदेशे हेत्वभावः

य शो ल ता

●

કરવી છે. આ પર્વતત્વસામાનાધિકરણ્યેન અનુમિતિ થઈ. કારણ કે પર્વતત્વઅધિકરણ એકાદ પર્વતમાં વહ્નિની અનુમિતિ કરવામાં આવે છે. પ્રસ્તુતમાં અમારો પ્રશ્ન પણ આ જ છે કે તમારે અવ્યભિચરિતત્વ જેટલા પણ પદાર્થ છે તેમાં મતલબ કે પાંચેય લક્ષણમાં (પક્ષતાઅવચ્છેદકઅવચ્છેદેન) અનુમિતિજનકતાઅવચ્છેદકભેદ સિદ્ધ કરવો છે કે કોઈક એકાદ અધિકરણમાં (પક્ષતાઅવચ્છેદકસામાનાધિકરણ્યેન) ? જો પહેલો વિકલ્પ સ્વીકારશો તો ભાગઅસિદ્ધિ દોષ લાગુ પડશે. તાત્પર્ય એ છે કે જો 'પાંચેય લક્ષણ અનુમિતિજનકતા-અવચ્છેદક નથી. કારણ કે તે સાધ્યાભાવવદ્અવૃતિત્વથી ભિન્ન છે' - આવા પ્રકારનું અનુમાન માનો તો હેતુ પક્ષૈકદેશમાં વૃત્તિ નહીં થાય. તે આ રીતે - સાધ્યાભાવવદ્અવૃત્તિત્વથી ભિન્ન તરીકે સાધ્યાભાવવદ્અવૃત્તિત્વ લક્ષણ તો ન જ મળે, બીજા ચાર લક્ષણો જ મળે. ખુદ પોતાનામાં તો પોતાનો ભેદ ન જ રહે ને !

વિ ન ભા

આશય એ છે કે પક્ષ તરીકે પાંચ વ્યાપ્તિ છે. (૧) સાધ્યાભાવવદ્અવૃત્તિત્વ, (૨) સાધ્યવદ્ભિન્નસાધ્યાભાવવદ્અવૃત્તિત્વ, (૩) સાધ્યવત્પ્રતિયોગિકાઽન્યોન્યાભાવઅસામાના-ધિકરણ્યમ્, (૪) સકલસાધ્યાભાવવન્નિષ્ઠઅત્યંતાભાવપ્રતિયોગિત્વમ્, (૫) સાધ્યવદ્અન્ય-અવૃત્તિત્વમ્. હેતુ છે - સાધ્યાભાવવદ્અવૃત્તિત્વભેદ. પક્ષ પાંચ છે. તેમાંથી પહેલા લક્ષણને છોડી બાકીના ચાર લક્ષણમાં સાધ્યાભાવવદ્અવૃત્તિત્વભેદ રહે. કિંતુ પ્રથમ લક્ષણમાં = સાધ્યાભાવવદ્અવૃત્તિત્વમાં તો સાધ્યાભાવવદ્અવૃત્તિત્વભેદ ન જ રહે. આમ, પક્ષ - ૫ છે, તેના એક દેશમાં = પ્રથમ લક્ષણમાં હેતુ = સાધ્યાભાવવદ્અવૃત્તિત્વભેદ અવૃત્તિ છે. તેથી

इत्यर्थः । सर्वेषु पक्षेषु हेत्वभावसत्त्वे स्वरूपासिद्धिरेवेति ज्ञेयम् । यदि हेतुः पक्षताऽवच्छेदकाश्रयीभूते पक्षैकदेशे नास्ति तदा भागे = पक्षैकदेशे हेतोरसिद्ध्या भागासिद्धिः भवति । यथा 'पृथिवी गन्धवती, घटत्वाद्' इत्यत्र घटत्वहेतुः पक्षैकदेशभूतपटादौ नास्ति, अतः अत्र भागासिद्धिः भवति ।

य शो ल ता

एवमत्राऽपि अव्यभिचरितत्वपदार्थाः पञ्च, ते सर्वेऽपि पक्षीभूताः, तत्र प्रथमानुमानप्रयोगे साध्याभाववदवृत्तित्वभेदस्य चतुर्षु पक्षदेशेषु सत्त्वेऽपि साध्याभाववदवृत्तित्वरूपपक्षैकदेशे असत्त्वम्, स्वस्मिन् स्वभेदाऽयोगात् । तथा च हेतोः पक्षभागे असिद्ध्या भागासिद्धिः । एवं द्वितीयाऽनुमानप्रयोगेऽपि साध्यवद्भिन्नसाध्याभाववदवृत्तित्वरूपहेतोः चतुर्षु पक्षदेशेषु सत्त्वेऽपि साध्यवद्भिन्नसाध्याभाववदवृत्तित्वरूपपक्षैकदेशेऽसत्त्वेन भागासिद्धिः दुर्वारा । तथा च उक्तेषु सर्वेषु अनुमानप्रयोगेषु हेतुर्भागासिद्धो भवति । ततश्च नैतादृशाऽनुमानप्रयोगाः सङ्गतिमङ्गन्ति ।

(ख) ***ननु*** न वयं पक्षताऽवच्छेदकाऽवच्छेदेनाऽनुमितिमङ्गीकुर्मः, किन्तु पक्षताऽवच्छेदकसामानाधिकरण्येन, तथा च न भागाऽसिद्धिः । यथा 'पर्वतो वह्निमान्, धूमाद्' इत्यनुमानप्रयोगे धूमहेतोः पक्षैकदेशभूते कस्मिंश्चित् पर्वते अवृत्तित्वेऽपि न भागासिद्धिः भवति, यतः नैषा

●

પક્ષૈકદેશઅવૃત્તિત્વસ્વરૂપ ભાગાસિદ્ધિ દોષ હેતુને લાગશે. આ જ રીતે જ્યારે 'પાંચેય લક્ષણ અનુમિતિજનકતાઅવચ્છેદક નથી. કારણ કે તે સાધ્યવદ્ભિન્નસાધ્યાભાવવદ્અવૃત્તિત્વથી ભિન્ન છે' - આ રીતે બીજી વ્યાપ્તિના ભેદને હેતુ બનાવશો ત્યારે આ હેતુ ૧,૩,૪,૫ લક્ષણમાં રહેશે. કિંતુ બીજા લક્ષણમાં નહીં રહે. આ રીતે પાંચે પાંચ હેતુઓ ભાગાસિદ્ધિદોષગ્રસ્ત બનવાને કારણે એક પણ હેતુ દ્વારા અવ્યભિચરિતત્વપદાર્થમાં અનુમિતિજનકતાવિ અવચ્છેદકનો ભેદ સિદ્ધ નહીં થાય.

न

❀ सामानाधिकरण्येन अनुमिति निर्दोष : कथन ❀

भा

प्रश्न :- આ ભાગાસિદ્ધિ દોષ જો પક્ષતાઅવચ્છેદકઅવચ્છેદેન અનુમિતિ માનો તો આવશે. અમે પક્ષતાઅવચ્છેદકસામાનાધિકરણ્યેન જ અનુમિતિ માનીએ છીએ. એમાં તો કોઈ તકલીફ છે જ નહીં. કારણ કે અવ્યભિચરિતત્વપદાર્થત્વ જ્યાં જ્યાં રહેતું હોય ત્યાં બધે સાધ્યસિદ્ધિ નથી કરવી. પણ, અવ્યભિચરિતત્વપદાર્થત્વઅધિકરણમાં જેટલા અધિકરણમાં હેતુ રહેતો હોય ત્યાં જ સાધ્યસિદ્ધિ અભિપ્રેત છે. જેમ કે **'पर्वतो वह्निमान्, धूमात्'** આ અનુમાનપ્રયોગમાં ભાગઅસિદ્ધિ દોષ ન આપી શકાય. જો પર્વતત્વઅવચ્છેદેન અનુમિતિ

अनुमितिः पक्षताऽवच्छेदकाऽवच्छेदेन । यदि पक्षतावच्छेदकाऽवच्छेदेनाऽनुमितिरिष्टा तदैव सर्वेषु पक्षेषु साध्यस्य साधनीयत्वेन सर्वत्र हेतुसत्त्वमनिवार्यम्, पक्षताऽवच्छेदकसामानाधिकरण्येनाऽनुमित्यङ्गीकारे न सर्वेषु पक्षेषु साध्यसत्त्वमिष्टम्, येन सर्वेषु पक्षेषु हेतुसत्त्वमावश्यकं भवेत् ।

तथा च प्रकृते हेतोः साध्याभाववदवृत्तित्वभेदादिरूपस्य पक्षैकदेशे असत्त्वेऽपि न कश्चिद् दोषः ***इति चेद् ?***

नः एवं सति अभिलषिताऽसिद्धेः । साध्याभाववदवृत्तित्वादिपञ्चसु अपि लक्षणेषु व्याप्तित्वाभावः साधनीयः, पक्षताऽवच्छेदकसामानाधिकरण्येन अनुमित्यङ्गीकारे, यथा 'पर्वतो वह्निमान्' - इत्यत्र पक्षताऽवच्छेदकसामानाधिकरण्येनाऽनुमितेः न सर्वेषु पर्वतेषु वह्निः सिध्यति तथा, सर्वेषु लक्षणेषु व्याप्तित्वाभावः न सेत्स्यति ।

●

માનો તો ધૂમ બધાં પર્વતો ઉપર ન રહેતો હોવાથી, કિંતુ અમુક પર્વતોમાં જ વૃત્તિ હોવાથી પક્ષૈકદેશઅવૃત્તિ એવા ધૂમને પણ ભાગાસિદ્ધિદોષગ્રસ્ત માનવાની આપત્તિ આવે. પણ, જ્યારે પર્વતત્વસામાનાધિકરણ્યેન જ અનુમિતિ સ્વીકારવી હોય ત્યારે ભાગાસિદ્ધિ દોષને અવકાશ નથી. કારણ કે પર્વતત્વઅધિકરણીભૂત એકાદ પર્વતમાં તો ધૂમ વૃત્તિ જ છે ને ! અને ત્યાં વહ્નિ પણ વિદ્યમાન જ છે. પ્રસ્તુતમાં પણ તે જ રીતે અવ્યભિચરિતત્વપદાર્થત્વસામાનાધિકરણ્યેન અનુમિતિ સ્વીકારવામાં આવે તો કોઈ વાંધો છે જ નહીં. અવ્યભિચરિતત્વપદાર્થત્વ પાંચ લક્ષણમાં રહે છે. તેમાંના ચાર લક્ષણમાં તો હેતુ રહેવાનો જ છે. એટલે અવ્યભિચરિતત્વપદાર્થત્વસામાનાધિકરણ્યેન અનુમિતિ કરવામાં હેતુ અવ્યભિચરિતત્વપદાર્થત્વાધિકરણીભૂત ચાર વ્યાપ્તિમાં તો વૃત્તિ હોવાથી ભાગાસિદ્ધિ દોષને અવકાશ નથી. (આ પ્રશ્ન ઉત્તરપક્ષતરફી વચેટિયાનો છે.)

❀ अभिमतअसिद्धि : परिहार ❀

उत्तर :- (सामा.) (પૂર્વપક્ષ જ આ ઉત્તર આપે છે.) પક્ષતાઅવચ્છેદકસામાનાધિકરણ્યેન સાધ્ય માનશો તો તમને જે અભિમત છે તેની સિદ્ધિ નહીં થાય. મતલબ કે અવ્યભિચરિતત્વ તમામ પદાર્થમાં અનુમિતિજનકતાઅવચ્છેદકનો ભેદ તમારે સિદ્ધ કરવો છે. એટલે કે અવ્યભિચરિતત્વના જે પાંચ અર્થ = પાંચ લક્ષણ તેમાંથી એક પણ વ્યાપ્તિ નથી - આ પ્રમાણે તમારે સિદ્ધ કરવું છે. અને તમે અનુમિતિ સામાનાધિકરણ્યેન કરો છો. એટલે કે 'અમુક અવ્યભિચરિતત્વપદાર્થો અનુમિતિજનકતાઅવચ્છેદકસ્વરૂપ નથી' - આ પ્રમાણે તમે અનુમિતિ કરો છો. આ રીતે અવ્યભિચરિતત્વપદાર્થ માત્રમાં તમને જે અભિમત

किञ्च, 'अव्यभिचारपदार्थः नानुमितिजनकताऽवच्छेदकः, साध्याभाववदवृत्तित्वभेदवत्त्वाद्' - इत्यनुमाने साध्याभाववदवृत्तित्वभेदः पक्षीभूतलक्षणपञ्चकान्तर्गतलक्षणचतुष्टये वर्तते । अनुमितेश्च पक्षताऽवच्छेदकसामानाधिकरण्येन अङ्गीकारात् पक्षे साध्याभावोऽपि इष्टः, यथा पर्वतत्वसामानाधिकरण्येन वह्नेरनुमितिसद्भावे न सर्वेषु पर्वतेषु वह्निः इष्टः, किन्तु कुत्रचित् पर्वते एव । केषुचित् पर्वतेषु वह्न्यभावोऽपीष्टः । तथाऽत्रापि अव्यभिचारपदार्थत्वसामानाधिकरण्येन अनुमित्यङ्गीकारे केषुचिद् अव्यभिचरितत्वपदार्थेषु साध्याभावोऽपि इष्टः स्यादेव । तथा च साध्यवद्भिन्नसाध्याभाववदवृत्तित्वे साध्यं = अनुमितिजनकतावच्छेदकभेदः स्यान्न वा ? इति शङ्का स्यादेव, पक्षताऽवच्छेदकसामानाधिकरण्येनाऽनुमित्या पक्षे साध्यविरहशङ्कायाः अनिवर्त्यत्वात् ।

ततः साध्यवद्भिन्नसाध्याभाववदवृत्तित्वे साध्याभाववदवृत्तित्वभेदरूपहेतोः निश्चयात्, साध्यसंशयाच्च हेतुसत्त्वेऽपि साध्यसंशयप्रयुक्ता 'किमयं हेतुः व्यभिचारग्रस्तो न वा' इत्याकारिका व्यभिचारशङ्का भविष्यति एव । एतादृशसंशयनिवारणं कथं स्यात् ?

यदि अव्यभिचारपदार्थत्वावच्छेदेनाऽनुमितिरङ्गीक्रियते तदा अव्यभिचारपदार्थेषु न साध्याभावः इष्टः, यथा 'पृथिवी गन्धवती' इत्यादिस्थले पृथिवीषु न गन्धाभावः इष्टः । पक्षताऽवच्छेदक-

●

व्याप्तित्वाभाव छे तेनी सिद्धि नहीं थाय.

❁ व्यभिचारनी शंकानुं अनिवारण, बीजो दोष ❁

बीजी पण एक तकलीफ सामानाधिकरण्येन अनुमिति करवामां आवशे. सामानाधिकरण्येन अनुमिति एटले के 'साध्यवद्भिन्नसाध्याभाववद्अवृत्तित्व वगेरे १-२-३ लक्षण अनुमितिजनकताअवच्छेदक नथी. कारण के तेमां साध्याभाववद्अवृत्तित्वनो भेद रहेलो छे' - आवा प्रकारनी अनुमिति थाय. आमां, कोईने शंका थाय के जे पांचमुं लक्षण छे - साध्यवद्भिन्नअवृत्तित्व तेमां साध्याभाववद्अवृत्तित्वनो भेद रहो. पण, अनुमितिजनकताअवच्छेदकनो भेद न रहो - तो शुं वांधो ? तमे अनुमिति बधां लक्षणमां तो करवा मांगता नथी. माटे चोथा लक्षणमां के पांचमां लक्षणमां कोईने शंका पडी के '**अस्तु हेतुः मास्तु साध्यम् तर्हि को दोषः ?**' तो आवा प्रकारनी व्यभिचारनी शंका तमारी अनुमिति/व्याप्तिग्रह द्वारा निवर्त्य नहीं बने. मतलब के सामानाधिकरण्येन अनुमिति करवामां अन्यपक्षमां साध्याभावनी शंकानुं निवर्तन थई शकतुं नथी. एटले सामानाधिकरण्येन अनुमिति शक्य नथी. **पर्वतो वह्निमान् धूमात्** मां सामानाधिकरण्येन अनुमिति होवा छतां कार्य

सामानाधिकरण्येन अनुमित्यङ्गीकारे एव कुत्रचित् पक्षे साध्यविरहः इष्टः । तथा च अव्यभिचारपदार्थमात्रे साध्याभावस्य अनिष्टत्वान्नोक्ताऽऽपत्तिः ।

ननु केनचिद् अनुमात्रा पञ्च पर्वताः धूमशालिनः दृष्टाः, तदा तेन एकपर्वतमुद्दिश्य 'पर्वतो वह्निमान्, धूमाद्' इत्यनुमितिः कृता । इयमनुमितिरपि पर्वतत्वसामानाधिकरण्येनाऽस्ति । ततः कुत्रचित् पक्षैकदेशे साध्याभावोऽपि इष्टः । अत्र पञ्चसु पर्वतेषु धूमः अस्ति इति अयं प्रमाता जानात्येव, किन्तु तत्र साध्यविरहशङ्का तस्य स्यादेव, भवदुक्तरीत्या पर्वतत्वसामानाधिकरण्येनाऽनुमितौ कुत्रचित् पक्षैकदेशे साध्याभावशङ्कायाः सत्त्वात् । तथा चैतादृशाऽनुमानेऽपि व्यभिचारशङ्का स्यादेव, न चैतदिष्टम् । ततः प्रकृतेऽपि न तादृशाऽऽपत्तिः क्षतिमावहति ***इति चेद् ?***

नः धूम-वह्न्योः कार्य-कारणभावज्ञानेन तादृशशङ्कानिवर्तनसम्भवात्, प्रकृतस्थले तादृशतर्काभावेन तादृशव्यभिचारशङ्कायाः अनिवर्तनात् । तथा च अनुमितिः पक्षतावच्छेदकसामानाधिकरण्येन तु नाभ्युपेयैव ।

एवञ्च साध्याभाववदवृत्तित्वादिलक्षणानां प्रत्येकस्य भेदस्य हेतुत्वे पक्षताऽवच्छेदकसामानाधिक-

●

-કારણભાવભંગરૂપ અનુકૂલતર્ક દ્વારા વ્યભિચારની શંકાનું નિવર્તન થઈ શકે છે. પ્રસ્તુતમાં તેવો કોઈ અનુકૂલ તર્ક છે નહીં. જો પક્ષતાઅવચ્છેદકઅવચ્છેદેન અનુમિતિ માનો તો અનુમિતિજનકતાઅવચ્છેદકનો ભેદ પાંચેય લક્ષણમાં સાધ્ય બનશે અને ત્યાં હેતુ તો છે જ. એટલે હેતુ હોય તો સાધ્ય રહી જ જશે. સાધ્યાભાવની શંકા નહીં રહે. તાત્પર્ય એ છે કે તમામે તમામ પક્ષમાં સાધ્યની સિદ્ધિ કરવાની હોય ત્યારે પક્ષએકદેશમાં વ્યભિચારની શંકા ન થાય, કદાચિત થાય તો તે અનુકૂલતર્ક દ્વારા નિવર્ત્ય બને. જ્યારે પક્ષતાઅવચ્છેદકસામાનાધિકરણ્યેન અનુમિતિ હોય ત્યારે પક્ષૈકદેશમાં વ્યભિચારની શંકાનું નિવર્તન દુઃશક્ય બની જાય. (આ વાત પ્રસ્તુત અનુમિતિને ઉદ્દેશીને છે.)

આમ, ઉક્ત અનુમાનપ્રયોગમાં અમે તમને બે વિકલ્પ આપેલા કે (૧) તમારો હેતુ પ્રત્યેક વ્યાપ્તિનો ભેદ છે ? કે (૨) પાંચે વ્યાપ્તિનો મિલિતભેદ છે ? આમાં પ્રથમ વિકલ્પમાં બે વિકલ્પ આપેલા કે તમારે (૧) પક્ષતાઅવચ્છેદકઅવચ્છેદેન સાધ્યની સિદ્ધિ કરવી છે કે (૨) પક્ષતાઅવચ્છેદકસામાનાધિકરણ્યેન ? પ્રથમ વિકલ્પમાં રહેલા આ બંને વિકલ્પોનું ખંડન ભાગાસિદ્ધિ, અભિમતઅસિદ્ધિ, વ્યભિચારશંકાઅનિવૃત્તિ વગેરે દોષોને કારણે થઈ ગયું.

रण्येनाऽपि अनुमितिः न सम्भवति, पक्षताऽवच्छेदकाऽवच्छेदेनाऽपि न सम्भवति ।

(२) अथ द्वितीयविकल्पोऽङ्गीक्रियते यदुत साध्याभाववदवृत्तित्वादिलक्षणपञ्चकभेदवत्त्वम् उक्ताऽनुमाने हेतुरिति तदा पक्षताऽवच्छेदकाऽवच्छेदेन अनुमितिरस्तु पक्षताऽवच्छेदकसामानाधिकरण्येन वा उभयथाऽपि स्वरूपाऽसिद्धिः ।

तद्यथा - द्वितीयविकल्पाङ्गीकारे 'अव्यभिचरितत्वपदार्थः नाऽनुमितिजनकताऽवच्छेदकः, साध्याभाववदवृत्तित्वादिलक्षणपञ्चकभेदवत्त्वाद्' इत्येवमेक एवाऽनुमानप्रयोगः भवति । अत्र अव्यभिचरितत्वपदार्थे साध्याभाववदवृत्तित्वादिलक्षणपञ्चकभेदः नैव सम्भवति, अव्यभिचारपदार्थस्य लक्षणपञ्चकरूपत्वात्, यस्य कस्यचिद् अव्यभिचारपदार्थस्याऽपि लक्षणपञ्चकाऽन्तर्गतत्वाच्च । तथा च हेतोरेव पक्षेऽविद्यमानत्वात् स्वरूपासिद्धिः दुर्वारा ।

अत्र कोऽपि एकः अव्यभिचारपदार्थः पक्षः स्यात् सर्वे वा तथापि हेतुः तत्र नैव स्यात्, कस्मिंश्चिदपि अव्यभिचारपदार्थे लक्षणपञ्चकभेदस्याऽसत्त्वात्, स्वस्य लक्षणपञ्चकाऽन्तर्गतत्वात् । अव्यभिचारपदार्थपञ्चकस्य पक्षत्वेऽपि (= पक्षतावच्छेदकावच्छेदेनाऽनुमित्यङ्गीकारेऽपि) न

●

तेनुं खंऽन थता प्रथम विऽल्प स्वीऽार्य २हेतो नथी.

❀ मिलितभेद पण हेतु तरीके असंभवित ❀

(मिलि.) हवे जो मिलितभेदनो बीजो विऽल्प स्वीऽारो तो अनुमानप्रयोग आ रीते थाय के 'अव्यभिचरितत्वपदार्थ अनुमितिजनकताअवच्छेदक नथी. ऽारण के तेमां साध्याभाववद्अवृत्तित्व वगेरे पांचेय लक्षणनो भेद २हेलो छे.' 'ज्यां ज्यां साध्याभाववद्अवृत्तित्व वगेरे पांचेय लक्षणनो भेद २हे त्यां त्यां अनुमितिजनकताअवच्छेदकनो भेद २हे' - आ रीते व्याप्ति बनशे. पण, आवो अनुमानप्रयोग मानवा जता पक्षताअवच्छेदकअवच्छेदेन के पक्षताअवच्छेदकसामानाधिकरण्येन कोई पण प्रऽारे अनुमिति स्वीऽारता स्वरूपासिद्धि दोष दुर्वार बनशे. ऽारण के हेतु अव्यभिचरितत्वपदना એક પણ અર્થમાં = એક પણ લક્ષણમાં २ही शऽे तेम नथी. जेम के घटमां घट-पट-लकुट-पथ्थर-घर आ पांच वस्तुनो भेद न ज २ही शऽे. ऽारण के भेदप्रतियोगी पांच वस्तुमां पोते पण समाविष्ट छे. पोतानामां स्वप्रतियोगिकभेद केवी रीते २ही शऽे ? ते ज रीते अव्यभिचरितत्वपदार्थ तरीके साध्याभाववद्अवृत्तित्व लो तो तेमां साध्याभाववद्अवृत्तित्व वगेरे पांचेय व्याप्तिनो भेद केवी रीते २ही शऽे ? ऽारण के पांच व्याप्तिमां पोते पण समाविष्ट छे. आ रीते बीजी

अथ *अत्र अव्यभिचारपदार्थो नानुमितिजनकतावच्छेदकः, साध्याभाववदवृत्तित्वादिभेदवत्त्वाद् इति प्रयोगः । तन्न सम्भवति, प्रत्येकभेदस्य हेतुत्वेऽवच्छेदकावच्छेदेन साध्यत्वे भागासिद्धिः।*

●

कुत्रचिद् हेतुः वृत्तिः स्यादिति सर्वेषु पक्षेषु हेतोरवृत्तित्वात् स्वरूपासिद्धिः, न भागासिद्धिः । पक्षमात्रे हेतोरवृत्तित्वे स्वरूपासिद्धिः, पक्षैकदेशाऽवृत्तित्वे भागाऽसिद्धिः इति विशेषः ।

ततश्च द्वितीयविकल्पोऽपि न घटामञ्चति इति उक्ताऽनुमानमेव न सम्भवति । तथा च तत्त्वचिन्तामणौ तादृशवाक्यगणोपन्यासोऽपि व्यर्थः अनर्थकारी च इति ।

एतत्सर्वं मनसिकृत्याह - **अथ** = पूर्वपक्षोपन्यासे **अत्र** = प्रकृते 'यः प्रश्नवाक्ये उद्देश्यः सः तादात्म्येन उत्तरवाक्ये विधेयः' इति नियमवशेन उक्ततत्त्वचिन्तामणिसन्दर्भानुसारेण **'अव्यभिचारपदार्थः नाऽनुमितिजनकताऽवच्छेदकः, साध्याभाववदवृत्तित्वादिभेदवत्त्वाद्' इति** अनुमान**प्रयोगः** भवति, किन्तु **तद्** = अनुमानं ***यद्यपि*** तत्पदस्य पूर्वपरामर्शकत्वेन पूर्वोक्त-प्रयोगपदानुसारिपुंल्लिङ्गत्वं स्यात् ***तथापि*** अनुमानशब्दं मनसिकृत्याऽत्र नपुंसकत्वमिति भावनीयम्, अन्यथा वा सङ्गतिः कार्या । **न सम्भवति, प्रत्येकभेदस्य हेतुत्वे** = 'अव्यभिचारपदार्थः नाऽनुमितिजनकताऽवच्छेदकः, साध्याभाववदवृत्तित्वभेदवत्त्वात्, अव्यभिचारपदार्थः नाऽनुमितिजनकताऽवच्छेदकः, साध्यवद्भिन्नसाध्याभाववदवृत्तित्वभेदवत्त्वाद्' इत्येवं साध्याभाववदवृत्तित्वादिप्रत्येकस्य भेदस्य हेतुत्वमङ्गीकृत्य अनुमानपञ्चकाङ्गीकारे 'अनुमितिः किमत्र पक्षताऽवच्छेदकाऽवच्छेदेन अभिप्रेता पक्षताऽवच्छेदकसामानाधिकरण्येन वा ?' इति विकल्पद्वयोपस्थापने **अवच्छेदकाऽवच्छेदेन**

●

व्याप्तिमां (= अव्यभिचरितत्वपदना बीजा अर्थमां) पण पांचेयनो भेद नहीं रहे. एटले पक्षमां हेतु अवृत्ति बनवाने कारणे स्वरूपअसिद्धि दोष दुर्वार बनशे. आ रीते बीजो विकल्प पण स्वीकार्य नहीं बने. एटले ज तमे बतावेल अनुमान के जे तत्त्वचिंतामणिनी पंक्ति द्वारा दर्शित करवामां आवेल छे ते संभवित नथी. आ रीते तत्त्वचिंतामणिनी पंक्तिनो अर्थ पण घटी शकतो नथी. अने पांचेय लक्षणमां अभिमतव्याप्तित्वाभावनी सिद्धि पण थती नथी.

संपूर्ण पूर्वपक्षनो **शब्दार्थ** जोई लईए - प्रस्तुतमां 'अव्यभिचरितत्वपदार्थ अनुमितिजनकताअवच्छेदक नथी. कारण के साध्याभाववद्अवृत्तित्व वगेरेथी भिन्न छे' - आवा प्रकारनो अनुमानप्रयोग फलित थाय छे, पण ते संभवतो नथी. कारण के आ अनुमानप्रयोगमां जो पांचे लक्षणना जुदा जुदा जे भेदो छे ते प्रत्येक भेदने हेतु मानो

सामानाधिकरण्येन साध्यत्वे अव्यभिचरितत्वपदार्थमात्रेऽभिमतस्य व्याप्तित्वाभावस्याऽसिद्धेः,

साध्यवद्भिन्नाऽवृत्तित्वाद्यंशे जायमानव्यभिचारशङ्कायाः अनिवृत्तेश्च ।

मिलितस्य हेतुत्वे स्वरूपासिद्धेरिति चेत् ?

●

साध्यत्वे = अव्यभिचारपदार्थत्वाऽवच्छेदेन अनुमितिजनकताऽवच्छेदकभेदस्य साध्यत्वाङ्गीकारेण प्रथमविकल्पाङ्गीकारे **भागासिद्धिः**, प्रथमाऽनुमानप्रयोगे साध्याभाववदवृत्तित्वभेदस्य पक्षैकदेशसाध्याभाववदवृत्तित्वरूपाऽव्यभिचारपदार्थे असत्त्वात् । एवं द्वितीयाद्यनुमानप्रयोगेषु अपि भाव्यम् । **सामानाधिकरण्येन साध्यत्वे** = अव्यभिचारपदार्थत्वसामानाधिकरण्येन अनुमितिजनकतावच्छेदकभेदस्य साध्यत्वाङ्गीकारेण द्वितीयविकल्पस्वीकारे **अव्यभिचरितत्वपदार्थमात्रे** = लक्षणपञ्चकेषु **अभिमतस्य व्याप्तित्वाभावस्य** = अनुमितिजनकताऽवच्छेदकभेदस्य यद्वा अनुमितिजनकताऽवच्छेदकत्वाभावस्य **असिद्धेः**, यथा 'पर्वतो वह्निमान्' इत्यत्र पर्वतत्वसामानाधिकरण्येन वह्नेः साध्यत्वे सकलपर्वतेषु वह्नेरसिद्धिः, **साध्यवद्भिन्नावृत्तित्वाद्यंशे जायमानव्यभिचारशङ्कायाः** = साध्यवद्भिन्नावृत्तित्वं साध्यभाववदवृत्तित्वभिन्नमस्ति साध्याभावविशिष्टं च सम्भवति ततः साध्यवद्भिन्नावृत्तित्वे हेतुः अस्ति साध्यमस्ति न वा ? इत्येवं व्यभिचारशङ्काया अनुकूलतर्काऽभावेन **अनिवृत्तेश्च** । अवच्छेदकाऽवच्छेदेनाऽनुमित्यङ्गीकारे उक्तरीत्या व्यभिचारशङ्कैव न भवतीति ध्येयम् ।

मिलितस्य, 'भेदस्ये'त्यस्याऽनुवृत्तिः कार्या, तथा च मिलितलक्षणपञ्चकभेदस्य **हेतुत्वे स्वरूपासिद्धेः**, पञ्चम्यर्थः हेतुत्वम्, तस्य च **'न सम्भवति'** इत्यत्राऽन्वयः । लक्षणपञ्चकभेदस्य कुत्रचिदपि अव्यभिचारपदार्थे असत्त्वादुक्तरीत्या स्वरूपासिद्धिः स्पष्टैव । अत्र हेतुकोटौ "अव्य-

●

અને પક્ષતાઅવચ્છેદકઅવચ્છેદેન અનુમિતિજનકતાઅવચ્છેદકભેદને સાધ્ય માનો તો ભાગાસિદ્ધિ દોષ આવશે. જો પક્ષતાઅવચ્છેદકસામાનાધિકરણ્યેન અનુમિતિજનકતાઅવચ્છેદકભેદને સાધ્ય માનો (તથા પ્રત્યેક ભેદને હેતુ માનો) તો અવ્યભિચરિતત્વપદાર્થમાત્રમાં જે ઈષ્ટ વ્યાપ્તિત્વાભાવ તેની સિદ્ધિ નહીં થઈ શકે. તથા સાધ્યવદ્ભિન્નઅવૃત્તિત્વ વગેરે અંશમાં ઉત્પન્ન થતી વ્યભિચારની શંકા પાછી નહીં ફરી શકે. તથા પાંચેય અવ્યભિચરિતત્વપદાર્થના ભેદોને મિલિત રીતે હેતુ માનો તો સ્વરૂપઅસિદ્ધિ દોષ આવશે.

भिचरितत्वपदवाच्यत्वे सति" इति पूरणीयम्, तेन व्यभिचारमनुपदर्श्य असिद्धिप्रदर्शनं न क्षतिमावहेदिति फक्किकार्थः ।

खण्डयति - **इति चेद् ? नेत्यादिना** । उत्तरपक्षस्याऽयमाशयः - भवतोपवर्णितमनुमानं दोषग्रस्तमिति तु सत्यम्, किन्तु तदेव न स्वीकुर्मः वयम् इति अनुपगतोपालम्भ एव भवता दत्तः । वयमेवमनुमानमङ्गीकुर्मः - 'अव्यभिचरितत्वपदार्थः नाऽनुमितिजनकताऽवच्छेदकः' इत्येवमुच्यताम्, 'अनुमितिजनकता न अव्यभिचरितत्वपदार्थावच्छिन्ना' इत्येवं वा, उभयमपि समानार्थकम् । तथा च अनुमितिजनकतां पक्षीकृत्य अत्र अनुमानमुपदर्शयामः । 'पर्वतो वह्निमान्' इत्यनुमितेः जनकता परामर्शज्ञाने, तच्च 'वह्निव्याप्यधूमवान् पर्वतः' इत्याकारकम् । वह्निव्याप्यधूमः = वह्निव्याप्तिविशिष्टधूमः । अत्र व्याप्तिविधया सिद्धान्तव्याप्तिरेवाऽवभासते, न तु साध्याभाववदवृत्तित्वादिकम्, केवलान्वयिनि अव्याप्तेः । तथा च 'धूमसमानाधिकरणात्यन्ताभावाऽप्रतियोगिवह्निसमानाधिकरणधूमवान् पर्वतः' इत्याकारकं परामर्शज्ञानमेव अनुमितिजनकम्, न तु 'वह्न्यभाववदवृत्तिधूमवान् पर्वतः', 'वह्निमद्भिन्नवह्न्यभाववदवृत्तिधूमवान् पर्वतः' इत्यादिज्ञानम्, अत एव 'वह्न्यव्यभिचरितधूमवान् पर्वतः' इत्याकारकज्ञानमपि न अनुमितिजनकम् । ततश्च धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्यरूपसिद्धान्तव्याप्तिरेव तादृश-

य शो ल ता

●

❀ निर्दोष अनुमानप्रयोग : उत्तरपक्ष ❀

उत्तरपक्ष :- (न.) અરે ભાગ્યશાળી ! તમારી વાત વ્યાજબી નથી. તમારા જેવો અનુમાનપ્રયોગ અમે નથી સ્વીકારતા. અમારો અનુમાનપ્રયોગ આ પ્રમાણે છે - અનુમિતિજનકતા અવ્યભિચારપદાર્થવિષયકત્વથી અનવચ્છિન્ન છે. કારણ કે તે સાધ્યાભાવવદ્અવૃત્તિત્વ વગેરે વિષયતાથી (અથવા તો વિષયકત્વથી) અનવચ્છિન્ન છે. તાત્પર્યાર્થ એ છે કે પરામર્શ અનુમિતિજનક છે. એમાં જે અનુમિતિજનકતા આવે છે તેનો અવચ્છેદક અવ્યભિચારપદાર્થવિષયકત્વ ન બને. મતલબ કે પરામર્શ જો આવો થતો હોત કે 'વહ્નિઅવ્યભિચરિતધૂમવાન્ પર્વત' તો પરામર્શ અવ્યભિચરિતત્વવિષયક કહેવાત. તો પરામર્શમાં અવ્યભિચરિતત્વપદાર્થવિષયકત્વ રહેત અને તો પરામર્શનિષ્ઠઅનુમિતિજનકતાઅવચ્છેદક અવ્યભિચરિતત્વપદાર્થવિષયકત્વ થાત. પણ, પરામર્શ ઉક્તઆકારનો નથી થતો. માટે, અનુમિતિજનકતા અવ્યભિચરિતત્વપદાર્થવિષયકત્વથી અનવચ્છિન્ન કહેવાય. પ્રશ્ન એ થાય કે 'વહ્નિઅવ્યભિચરિતધૂમવાન્ પર્વત'- આવા પ્રકારનો પરામર્શ કેમ નથી થતો ? આનો જવાબ એ છે કે અવ્યભિચરિતત્વપદાર્થ સાધ્યાભાવવદ્અવૃત્તિત્વ વગેરે છે. જો

वि न भा

ज्ञाननिष्ठाऽनुमितिजनकतायाः विषयविधयाऽवच्छेदिका, न तु साध्याभाववदवृत्तित्वादिकम् । व्याप्तिज्ञाने या अनुमितिजनकता अस्ति, तस्या धर्मविधया अवच्छेदकं व्याप्तिविषयकत्वम्, व्याप्तिविषयता च एतद्द्वितयमपि भवति, व्याप्तिविषयकत्वम् = व्याप्तिविषयतानिरूपकत्वम्, तच्च व्याप्तिज्ञाने (परामर्शरूपे) अस्ति इत्यतः तादृशधर्मस्तु अवच्छेदकः स्यादेव, व्याप्तिविषयत्वमपि स्वनिरूपकत्वसम्बन्धेन तादृशज्ञानवृत्ति, अतः तदपि अनुमितिजनकताऽवच्छेदकं भवति । अत एव च विषयविधया व्याप्तिरपि अनुमितिजनकताऽवच्छेदिका भवति इति ध्येयम् ।

य शो ल ता

प्रकृते उक्तपरामर्शज्ञाने अव्यभिचारपदार्थः विषयः नास्ति, अतः अव्यभिचारपदार्थनिष्ठविषयता स्वनिरूपकत्वसम्बन्धेन उक्तपरामर्शज्ञाने न स्यात्, न स्याच्च तादृशपरामर्शनिष्ठानुमितिजनकता अव्यभिचारपदार्थनिष्ठविषयताऽवच्छिन्ना । यदि साध्याभाववदवृत्तित्वादिलक्षणपञ्चकाऽन्यतमलक्षणम् उक्तपरामर्शे विषयं स्यात् तदा स्यादेव अव्यभिचारपदार्थनिष्ठविषयताऽवच्छिन्नत्वं तादृशपरामर्श-निष्ठानुमितिजनकतायाम्, किन्तु उक्तपरामर्शे साध्याभाववदवृत्तित्वादिलक्षणपञ्चकाऽन्यतमलक्षणं नास्ति विषयम्, अतः साध्याभाववदवृत्तित्वादिलक्षणपञ्चकनिष्ठविषयताऽवच्छिन्नत्वाभावकूटः एव उक्तपरामर्शनिष्ठाऽनुमितिजनकतायाम् । उक्तपरामर्शनिष्ठाऽनुमितिजनकतायां साध्याभाव-वदवृत्तित्वादिलक्षणपञ्चकाऽन्यतमलक्षणनिष्ठविषयताऽवच्छिन्नत्वस्याऽपि अभावेन

●

વહ્નિઅભાવવદ્‌અવૃત્તિધૂમવાન્ પર્વત, વહ્નિમદ્‌ભિન્નવહ્નિઅભાવવદ્‌અવૃત્તિધૂમવાન્ પર્વત, વહ્નિમત્પ્રતિયોગિકઅન્યોન્યાભાવઅસમાનાધિકરણધૂમવાન્ પર્વત, સકલવહ્નિઅભાવવન્નિષ્ઠ-અત્યંતાભાવપ્રતિયોગિધૂમવાન્ પર્વત કે વહ્નિમદ્‌ભિન્નઅવૃત્તિધૂમવાન્ પર્વત - આ પાંચમાંથી કોઈ એક પ્રકારનો પણ પરામર્શ થતો હોત તો 'વહ્નિઅવ્યભિચરિતધૂમવાન્ પર્વત' - આવા પ્રકારનો પરામર્શ થઈ શકત. આમ, સાધ્યાભાવવદ્‌અવૃત્તિત્વ વગેરે કોઈ પણ પરામર્શના વિષય નથી બનતા. જો તેઓ વિષય બનતા હોત તો પરામર્શનિષ્ઠ અનુમિતિજનકતા વિષયવિધયા સાધ્યાભાવવદ્‌અવૃત્તિત્વ વગેરેથી અવચ્છિન્ન હોત અને સાથે સાથે સાધ્યાભાવ-વદ્‌અવૃત્તિત્વનિષ્ઠવિષયતાથી પણ અવચ્છિન્ન હોત. કિંતુ તેવું છે નહીં. એટલે કહી શકાય કે પરામર્શનિષ્ઠ અનુમિતિજનકતા સાધ્યાભાવવદ્‌અવૃત્તિત્વ વગેરેમાં રહેલ વિષયતાથી અનવચ્છિન્ન હોવાને કારણે અવ્યભિચરિતત્વપદાર્થવિષયકત્વથી (= અવ્યભિચારપદાર્થનિષ્ઠ-વિષયકતાનિરૂપકત્વથી) અનવચ્છિન્ન છે. આમ, અવ્યભિચરિતત્વપદાર્થ અનુમિતિજનકતા-અવચ્છેદક ન બનવાને કારણે વ્યાપ્તિસ્વરૂપ પણ નહીં બની શકે. આ અનુમાનપ્રયોગમાં કોઈ દોષ નહીં આવે.

વિ ના મા

(१) साध्याभाववदवृत्तित्वनिष्ठविषयताऽवच्छिन्नत्वाभावः,

(२) साध्यवद्भिन्नसाध्याभाववदवृत्तित्वनिष्ठविषयताऽवच्छिन्नत्वाभावः,

(३) साध्यवत्प्रतियोगिकाऽन्योन्याभावाऽसामानाधिकरण्यनिष्ठविषयताऽवच्छिन्नत्वाभावः,

(४) सकलसाध्याभाववन्निष्ठाऽत्यन्ताभावप्रतियोगित्वनिष्ठविषयताऽवच्छिन्नत्वाऽभावः,

(५) साध्यवद्भिन्नाऽवृत्तित्वनिष्ठविषयताऽवच्छिन्नत्वाभावश्च इत्येवं पञ्च अभावाः तादृशाऽनुमितिजनकतायां स्युः ।

अतः एव उक्तपरामर्शनिष्ठाऽनुमितिजनकतायां साध्याभाववदवृत्तित्वादिनिष्ठविषयताऽवच्छिन्नत्वाभावकूटः (= समूहः) वर्तते । एतादृशकूटः तत्रैव स्यात् यत्रोक्ताभावपञ्चकं स्यात् । यत्र चैतादृशाभावकूटः स्यात् तत्र अव्यभिचारपदार्थनिष्ठविषयतानिरूपकत्वाऽवच्छिन्नत्वाभावः अपि स्यादेव, यतः साध्याभाववदवृत्तित्वादिकः एवाऽव्यभिचारपदार्थः । यदि परामर्शनिष्ठाऽनुमितिजनकतायां तादृशाऽभावकूटः स्यात् तर्हि इदं सुज्ञेयं यदुत तादृशपरामर्शे नैव लक्षणपञ्चकादेकमपि लक्षणं विषयम्, अन्यथा एकस्याऽपि लक्षणस्य तत्र विषयत्वे तन्निष्ठविषयताऽवच्छिन्नत्वस्य तादृशजनकतायां सत्त्वेन तादृशाऽभावकूटः एव न स्यात् । यदि एकमपि लक्षणं उक्तपरामर्शे न विषयः तदाऽव्यभिचारपदार्थोऽपि तत्र न विषयः इति अङ्गीकार्यम् एव,

य शो ल ता

●

❀ विषयकत्व अने विषयत्व वच्चेनी विशेषता ❀

એક વસ્તુ ધ્યાનમાં રહે કે વિષયતા વિષયમાં રહે અને વિષયકત્વ = વિષયતાનિરૂપકત્વ જ્ઞાનમાં રહે. પરામર્શ જ્ઞાનરૂપ છે. માટે તેનામાં વિષયકત્વ આવે. એટલે પરામર્શનિષ્ઠ-અનુમિતિજનકતાનો અવચ્છેદક બને તો સાધ્યાભાવવદ્અવૃત્તિત્વ વગેરે નિરૂપિત વિષયકત્વ બને. તદુપરાંત વિષયતાથી પણ અવચ્છિન્ન કહી શકાય છે. પૂર્વે જણાવેલ કે અનુમિતિજનકતા પરામર્શમાં છે તેની વિષયવિધયા અવચ્છેદક વ્યાપ્તિ બને. જેમ વિષય જ્ઞાનગત ધર્મનો અવચ્છેદક બની શકે. તે જ રીતે વિષયતા પણ જ્ઞાનગત ધર્મની અવચ્છેદક બને. માટે, પરામર્શનિષ્ઠ અનુમિતિજનકતા, જો બને તો, સાધ્યાભાવવદ્અવૃત્તિત્વનિષ્ઠવિષયતાથી પણ અવચ્છિન્ન બની શકે. આમ, ક્યાંક વિષયતાથી અવચ્છિન્ન લખેલ હોય કે ક્યાંક વિષયકત્વથી અવચ્છિન્ન લખેલ હોય - તો ઉભય પ્રયોગ વ્યાજબી છે. તેમાં મૂંઝાવું નહીં, વિષયતા વિષયગત ધર્મ છે. વિષયકત્વ વિષયી એવા જ્ઞાનમાં રહેલ ધર્મ છે. એટલે વિષયતા અને વિષયકત્વ બંને એક નથી. બંને વચ્ચેની ભેદરેખા સ્પષ્ટ રાખવી.

वि न भा

अव्यभिचारपदार्थस्य लक्षणपञ्चकातिरिक्तत्वाभावात् । तथा च यत्परामर्शनिष्ठाऽनुमितिजनकतायां तादृशाभावकूटः तस्मिन् परामर्शे लक्षणपञ्चकम्, अत एव अव्यभिचारपदार्थश्च न विषयः इति निश्चीयते । अव्यभिचारपदार्थस्याऽविषयत्वे अव्यभिचारपदार्थनिष्ठविषयतानिरूपकत्वं तादृशज्ञाने न स्यात्, न स्याच्च अव्यभिचारपदार्थनिष्ठविषयतानिरूपकत्वं तादृशपरामर्शनिष्ठाऽनुमितिजनकताऽवच्छेदकम् । ततश्चेदं फलितं यदुत - यत्र यत्र साध्याभाववदवृत्तित्वादिनिष्ठविषयताऽवच्छिन्नत्वाभावकूटः तत्र तत्र अव्यभिचारपदार्थनिष्ठविषयतानिरूपकत्वाऽवच्छिन्नत्वाभावः, यथा दण्डनिष्ठकारणतायां साध्याभाववदवृत्तित्वादिनिष्ठविषयताऽवच्छिन्नत्वाभावकूटः अस्ति, तर्हि तत्र तादृशाऽव्यभिचारपदार्थनिष्ठविषयतानिरूपकत्वाऽवच्छिन्नत्वाभावोऽपि अस्ति एव । ततश्च उक्तपरामर्शनिष्ठाऽनुमितिजनकतायां साध्याभाववदवृत्तित्वादिनिष्ठविषयताऽवच्छिन्नत्वाभावकूटः अस्ति, अतः अव्यभिचारपदार्थनिष्ठविषयतानिरूपकत्वाऽवच्छिन्नत्वाऽभावोऽपि स्यादेव ।

तथा चेदमनुमानम् - अनुमितिजनकता अव्यभिचारपदार्थनिष्ठविषयतानिरूपकत्वाऽनवच्छिन्ना, साध्याभाववदवृत्तित्वादिनिष्ठविषयताऽवच्छिन्नत्वाऽभावकूटवत्त्वात् । अत्र साध्ये विषयकत्वं हेतौ च विषयत्वम् अनुमितिजनकताऽवच्छेदकं नास्ति इत्युक्तौ ग्रन्थकृदिच्छैव निमित्तत्वं भजते इति ।

साध्याभाववदवृत्तित्वादिलक्षणपञ्चकमपि केवलाऽन्वयिस्थले न सङ्गतिमङ्गति अतः अव्याप्तिग्रस्तम् । ततश्च न तद् व्याप्तिविधया परामर्शे प्रतिभासते । सिद्धान्तव्याप्तिश्च केवलाऽन्वयिन्यपि सङ्गता, अत एव अव्याप्त्यतिव्याप्त्याद्यभावात् सा परामर्शे व्याप्तिविधया भासते । तथा च परामर्शनिष्ठाऽनुमितिजनकता सिद्धान्तव्याप्तिनिष्ठविषयताऽवच्छिन्ना सिद्धान्तव्याप्तिनिष्ठविषयतानिरूपकत्वाऽवच्छिन्ना वा भवति, किन्तु साध्याभाववदवृत्तित्वादिनिष्ठविषयताऽवच्छिन्ना, अत एव अव्यभिचारपदार्थनिष्ठविषयतानिरूपकत्वाऽवच्छिन्ना न भवति ।

'धूमः वह्न्यव्यभिचारी, धूमः वह्न्यभाववदवृत्तिः, धूमः वह्निमद्भिन्नवह्न्यभाववदवृत्तिः' - इत्यादिज्ञानाऽनन्तरम् 'वह्न्यव्यभिचारिधूममहं जानामि, वह्न्यभाववदवृत्तिधूममहं जानामि' इत्याद्यनुव्यवसायात्मकं ज्ञानं भवति, एतादृशाऽनुव्यवसायजनकत्वं 'धूमः वह्न्यभाववदवृत्तिः' इत्यादिव्यवसायात्मकज्ञाने, तादृशजनकत्वस्याऽवच्छेदकं विषयविधया वह्न्यभाववदवृत्तित्वम्, वह्न्यभाववदवृत्तित्वनिष्ठविषयत्वम्, वह्न्यभाववदवृत्तित्वनिष्ठविषयतानिरूपकत्वं वा भवितुम् अर्हति । ततश्च तादृशाऽनुव्यवसायजनकतायाम् अव्यभिचारपदार्थनिष्ठविषयतानिरूपकत्वाऽ-

य शो ल ता

न, अनुमितिजनकत्वं पक्षीकृत्य साध्याभाववदवृत्तित्वादिविषयत्वावच्छिन्नत्वाभावकूटहेतुनाऽव्यभिचारपदार्थविषयकत्वानवच्छिन्नत्वस्यैव साध्यत्वात् ।

●

वच्छिन्नत्वम्, साध्याभाववदवृत्तित्वादिनिष्ठविषयताऽवच्छिन्नत्वं च स्तः । एतादृशाऽवच्छिन्नत्वम् अनुमितिजनकतायां नास्ति इत्येवमन्यत्र प्रसिद्धस्य निषेधान्न किमपि अनुपपन्नमिति विभावनीयम् । एतादृशाऽनुमाने न पूर्वोक्तभागासिद्ध्यादिप्रसङ्गः इति तु स्पष्टमेव ।

एतत्सर्वं मनसिकृत्याह - **अनुमितिजनकत्वं पक्षीकृत्य, साध्याभाववदवृत्तित्वादिविषयत्वाऽवच्छिन्नत्वाभावकूटहेतुना** = साध्याभाववदवृत्तित्वादिनिष्ठविषयताऽवच्छिन्नत्वाभावकूटहेतुना, **अव्यभिचारपदार्थविषयकत्वाऽनवच्छिन्नत्वस्यैव** = अव्यभिचारपदार्थनिष्ठविषयतानिरूपकत्वाऽनवच्छिन्नत्वस्यैव, प्रागुक्ताऽनुमितिजनकत्वावच्छेदकत्वाभावस्य साध्यत्वव्यवच्छेदः एवकारेण, **साध्यत्वादि**ति । तथा च 'अनुमितिजनकत्वम् अव्यभिचारपदार्थनिष्ठविषयतानिरूपकत्वाऽनवच्छिन्नम्, साध्याभाववदवृत्तित्वादिनिष्ठविषयताऽवच्छिन्नत्वाभावकूटाद्' - इत्येवम् अनुमानं फलितम् । विषयकत्वं = विषयतानिरूपकत्वम्, तच्च ज्ञानगतो धर्मः, विषयत्वं च विषयनिष्ठधर्मः । विषयविधया यथा व्याप्त्यादिविषयः ज्ञानगतजनकत्वादेरवच्छेदकः भवति तथा विषयनिष्ठविषयत्वमपि अवच्छेदकं भवति, विषयतानिरूपकत्वञ्च ज्ञाननिष्ठः एव धर्मः, ततः तदपि अवच्छेदकं भवति । ततश्च विषयः, विषयता, विषयकत्वं चैतत्त्रितयमपि ज्ञाननिष्ठजनकतादेरवच्छेदकं भवतीति बोध्यम् ।

●

शब्दार्थ :- જો આવી શંકા કરતા હો તો તે વ્યાજબી નથી. કારણ કે અમારા મત મુજબ અનુમિતિજનકતાને પક્ષ બનાવી સાધ્યાભાવવદ્અવૃત્તિત્વ વગેરે પાંચેય લક્ષણનિષ્ઠ-વિષયતાથી અનવચ્છિન્નત્વહેતુ દ્વારા અવ્યભિચરિતત્વપદાર્થવિષયકત્વથી અનવચ્છિન્નત્વ જ સાધ્ય છે. આમ, અનુમાનપ્રયોગ આ રીતે થયો -

અનુમિતિજનકતા અવ્યભિચરિતત્વપદાર્થવિષયકત્વથી અનવચ્છિન્ન છે. કારણ કે સાધ્યાભાવવદ્અવૃત્તિત્વાદિનિષ્ઠવિષયતાથી અનવચ્છિન્ન છે. પ્રસ્તુતમાં ગ્રંથકારે હેતુ તરીકે અવચ્છિન્નત્વાભાવકૂટ લીધો છે. કારણકે ફક્ત સાધ્યાભાવવદ્અવૃત્તિત્વનિષ્ઠવિષયતા-અવચ્છિન્નત્વનો જ અભાવ નથી લેવો. કિંતુ પાંચેય લક્ષણમાં રહેલ વિષયતાથી અવચ્છિન્નત્વનો અભાવ = પાંચ અભાવ = અભાવકૂટ લેવો છે. આ અંગેની વિશેષ

अथतद् अनुमानमपि न घटामञ्चति । अत्र किं (१) पक्षताऽवच्छेदकाऽवच्छेदेन साध्यता अभिप्रेता, (२) पक्षताऽवच्छेदकसामानाधिकरण्येन वा ? = अनुमितिजनकतात्वाऽवच्छेदेन अव्यभिचारपदार्थविषयकत्वाऽनवच्छिन्नत्वस्य साध्यता, अनुमितिजनकतात्वसामानाधिकरण्येन वा? = सर्वासु अनुमितिजनकतासु अव्यभिचारपदार्थविषयकत्वाऽनवच्छिन्नत्वं साध्यम्, यद्वा कासुचिद् अनुमितिजनकतासु एव तत्साध्यम् ? इत्यर्थः ।

य शो ल ता

(१) नाद्यः हृद्यः, बाध-भागाऽसिद्ध्योः प्रसङ्गात् । तथाहि - सर्वासु अनुमितिजनकतासु अव्यभिचारपदार्थनिष्ठविषयतानिरूपकत्वाऽनवच्छिन्नत्वस्य साध्यत्वे यदि कस्याञ्चिदपि अनुमिति-जनकतायां साध्यं न स्यात्तदा बाधः, हेतोरसत्त्वे च भागासिद्धिः स्यातामेव । 'पर्वतो वह्निमान्' इत्याद्यनुमितिजनकतायां साध्यमपि वर्तते हेतुश्च, किन्तु 'पर्वतो वह्निमान् वह्न्यभाववदवृत्तिधूमाद्' इत्यादिस्थले अनुमितिजनकतायां साध्यमपि नास्ति, हेतुरपि नास्ति । उक्तस्थले परामर्शः एवं भवति - 'वह्निव्याप्यवह्न्यभाववदवृत्तिधूमवान् पर्वतः' इति । अत्र व्याप्तिविधया सिद्धान्तव्याप्ति-रेव भासते, तथापि हेतुकोटौ वह्न्यभाववदवृत्तित्वप्रवेशस्तु अत्राऽभवदेव । तथा च 'वह्न्यभाववद-वृत्तिधूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसमानाधिकरणवह्न्यभाववदवृत्तिधूमवान् पर्वतः' - इत्याकारकः परामर्शः । अत्र व्याप्तिविधया साध्याभाववदवृत्तित्वलक्षणस्य अभानेऽपि

●

स्पष्टता माटे **'यशोलता'** (पेज नं. ९३ आदि) अवगाहवा भलामण.

❁ नूतनअनुमान पण दोषग्रस्त : पूर्वपक्ष ❁

प्रश्न :- (न च.) आ रीते गोळ गोळ फेरवी देवाथी कंई तमे दोषथी बची नहीं जाओ. तमारा मते पण भागअसिद्धि वगेरे दोष आवशे ज. अमारो प्रश्न छे के - शुं तमे अनुमितिजनकतात्वअवच्छेदेन अनुमिति करवा मांगो छो के सामानाधिकरण्येन ? मतलब के तमाम परामर्शमां रहेली तमाम अनुमितिजनकतामां अव्यभिचरितत्वपदार्थ-विषयकत्वानवच्छिन्नत्व सिद्ध करवा मांगो छो के कोई अमुक परामर्शमां रहेली अमुक ज अनुमितिजनकतामां अव्यभिचरितत्वपदार्थविषयकत्वअनवच्छिन्नत्व सिद्ध करवा मांगो छो ? जो तमाम अनुमितिजनकतामां अव्यभिचरितत्वपदार्थविषयकत्वअनवच्छिन्नत्व सिद्ध करवा मांगता हो तो बाध अने भागअसिद्धि दोष दुर्वार बनशे. ते आ रीते - स्थळ छे - **'पर्वतो वह्निमान् वह्न्यभाववदवृत्तिधूमात्'** आ स्थळमां अनुमितिजनक परामर्श एटले 'वह्न्यभाववद्अवृत्तिधूमसमानाधिकरणअत्यंताभावअप्रतियोगिवह्निसमानाधिकरण-वह्नि-

वि न भा

हेतुविशेषणविधया तद्भानमस्ति एव । तथा च उक्तपरामर्शे साध्याभाववदवृत्तित्वस्य विषयतया तादृशपरामर्शनिष्ठाऽनुमितिजनकता साध्याभाववदवृत्तित्वनिष्ठविषयताऽवच्छिन्ना एव स्यात्, अत एव अव्यभिचारपदार्थनिष्ठविषयतानिरूपकत्वेनाऽपि अवच्छिन्ना एव स्यान्न तु अनवच्छिन्ना अवच्छिन्नत्वाऽभावविशिष्टा वा ।

एवं 'पर्वतो वह्निमान्, वह्न्यभाववदवृत्तिधूमाद्' इति स्थले या 'वह्न्यभाववदवृत्तिधूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसमानाधिकरणवह्न्यभाववदवृत्तिधूमवान् पर्वतः' इत्याकारकपरा-

अभाववद्अवृत्तिधूमवान् पर्वत' આવા પ્રકારનો પરામર્શ. આ પરામર્શ અનુમિતિજનક છે. આ પરામર્શમાં જે અનુમિતિજનકતા છે તેમાં અવ્યભિચરિતત્વપદાર્થવિષયકત્વઅનવચ્છિન્નત્વ અને સાધ્યાભાવવદ્અવૃત્તિત્વ વગેરેમાં રહેલ વિષયતાથી અનવચ્છિન્નત્વ - ઉભય રહેવું જોઈએ. જ્યારે પ્રસ્તુતમાં બંનેનો અભાવ રહે છે. એટલે કે સાધ્યાભાવવદ્અવૃત્તિત્વનિષ્ઠ-વિષયત્વાવચ્છિન્નત્વ અને અવ્યભિચરિતત્વપદાર્થવિષયકત્વાવચ્છિન્નત્વ રહે છે. કારણ કે સાધ્યાભાવવદ્અવૃત્તિત્વ એ ઉક્ત પરામર્શમાં વિષય બને છે. પરામર્શમાં જે વિષય બને તન્નિષ્ઠવિષયતા તાદૃશપરામર્શનિષ્ઠઅનુમિતિજનકતાની અવચ્છેદક બને. સાધ્યાભાવવદ્-અવૃત્તિત્વનિષ્ઠવિષયતા તાદૃશપરામર્શનિષ્ઠઅનુમિતિજનકતાની અવચ્છેદક બને એટલે અવ્યભિચરિતત્વપદાર્થનિષ્ઠવિષયતા પણ તાદૃશપરામર્શનિષ્ઠઅનુમિતિજનકતાઅવચ્છેદક બને જ. કારણ કે સાધ્યાભાવવદ્અવૃત્તિત્વ જે જ્ઞાનમાં વિષય બને તે જ્ઞાનમાં અવ્યભિચરિતત્વપદાર્થ પણ વિષય બને જ. આમ, ઉક્તપરામર્શનિષ્ઠઅનુમિતિજનકતામાં ન તો સાધ્ય રહ્યું, ન તો હેતુ રહ્યો. માટે, સાધ્યાભાવવિશિષ્ટપક્ષરૂપ બાધ દોષ અને પક્ષએકદેશઅવૃત્તિહેતુસ્વરૂપ ભાગઅસિદ્ધિ દોષ દુર્વાર બનશે.

❁ બાધ અને ભાગાસિદ્ધિ : બે દોષ ❁

પ્રસ્તુતમાં એક વાત ધ્યાનમાં રાખવી કે સાધ્યવ્યાપ્યહેતુવિશિષ્ટ પક્ષ - આવા પ્રકારના પરામર્શમાં વ્યાપ્તિ તરીકે સિદ્ધાંતવ્યાપ્તિ જ ભાસે. એટલે પરામર્શનો આકાર આવો થાય કે 'હેતુસમાનાધિકરણઅત્યંતાભાવઅપ્રતિયોગિસાધ્યસમાનાધિકરણહેતુવિશિષ્ટ પક્ષ'. આમ, પરામર્શમાં સાધ્યાભાવવદ્અવૃત્તિત્વનું ભાન થાય જ નહીં. માટે જ વિષયવિધયા ન તો સાધ્યાભાવવદ્અવૃત્તિત્વ પરામર્શનિષ્ઠઅનુમિતિજનકતાઅવચ્છેદક બને કે ન તો તન્નિષ્ઠ વિષયતા. પણ, જ્યારે હેતુમાં જ સાધ્યાભાવવદ્અવૃત્તિત્વ ઘૂસી ચૂક્યું હોય ત્યારે એટલે કે **'पर्वतो वह्निमान् वह्न्यभाववद्अवृत्तिधूमात्'** આવા પ્રકારનો અનુમાનપ્રયોગ હોય ત્યારે

मर्शनिष्ठाऽनुमितिजनकता तस्याम् अव्यभिचारपदार्थनिष्ठविषयतानिरूपकत्वावच्छिन्नत्वमेवाऽस्ति, न तु अनवच्छिन्नत्वमिति साध्याभावाद् बाधः, पक्षे साध्याभावस्यैव बाधरूपत्वात् । एवञ्च तादृशजनकतायां साध्याभाववदवृत्तित्वनिष्ठविषयतावच्छिन्नत्वस्य सत्त्वेन साध्याभाववदवृत्तित्वादिनिष्ठविषयताऽवच्छिन्नत्वाभावकूटोऽपि न स्यात्, साध्याभाववदवृत्तित्वनिष्ठविषयताऽवच्छिन्नत्वाभावस्याऽपि तादृशकूटाऽन्तर्गतत्वेन तदभावे तादृशकूटस्याऽपि तत्राऽसम्भवादित्येवं पक्षैकदेशे हेतोरसत्त्वेन भागासिद्धिरपि दुर्वारा ।

यदि पक्षसामान्ये हेतुः न स्यात्तदा स्वरूपासिद्धिः भवति, यदि पक्षैकदेशे हेतुः न वर्तते तदा भागासिद्धिः भवति, इयं च पक्षताऽवच्छेदकाऽवच्छेदेन साध्यतायामेव भवति, न तु पक्षताऽवच्छेदकसामानाधिकरण्येन साध्यतायामपि इति विस्मरणशीलानामनुग्रहाय पुनः पुनः स्मार्यते । प्रकृते सर्वासु अनुमितिजनकतासु अव्यभिचारपदार्थविषयकत्वाऽनवच्छिन्नत्वस्य साधनीयत्वेन पक्षताऽवच्छेदकाऽवच्छेदेनैव साध्यताऽभिप्रेता । अत्र च 'पर्वतो वह्निमान्' इत्याद्यनुमितेः या 'धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसमानाधिरणधूमवान् पर्वतः' - इत्याकारकपरामर्शनिष्ठाऽनुमितिजनकता तस्यां साध्याभाववदवृत्तित्वादिनिष्ठविषयत्वाऽवच्छिन्नत्वाऽभावकूटस्य सत्त्वाद् हेतुः न पक्षसामान्येऽवृत्तिः येन स्वरूपासिद्धिः भवेत् । किन्तु पक्षैकदेशभूता या 'पर्वतो वह्निमान् वह्न्यभाववदवृत्तिधूमाद्' इत्यादिस्थलीयः यः 'वह्न्यभाववदवृत्तिधूमसमाना-

●

'हेतुसमानाधिकरणअत्यंताभावअप्रतियोगिसाध्यसमानाधिकरण-वह्निअभाववद्अवृत्ति-धूमवान् पर्वत' - આ પ્રમાણે પરામર્શ થાય. વ્યાપ્તિકોટિમાં ભલે સાધ્યાભાવવદ્અવૃત્તિત્વનું જ્ઞાન ન થાય, કિંતુ હેતુકોટિમાં તો તેનું જ્ઞાન થઈ જ શકશે. આમ, પરામર્શજ્ઞાનનિષ્ઠ-વિષયિતાનિરૂપિતવિષયતા સાધ્યાભાવવદ્અવૃત્તિત્વમાં જશે અને એટલે જ અવ્યભિચરિતત્વ-પદાર્થમાં પણ જશે. માટે, તે તે વિષયતાથી અવચ્છિન્ન પરામર્શનિષ્ઠ અનુમિતિજનકતા બનશે. વસ્તુતઃ અનુમિતિજનકત્વમાં સાધ્યભાવવદ્અવૃત્તિત્વનિષ્ઠ અને અવ્યભિચરિતત્વનિષ્ઠ વિષયતાથી અનવચ્છિન્નત્વ રહેવું જોઈએ. માટે, સાધ્ય તથા હેતુ બંને ન રહેતા હોવાને કારણે બાધ તથા ભાગઅસિદ્ધિ બંને દોષ આવશે.

❀ સ્વરૂપસિદ્ધિ નહીં, પણ ભાગાસિદ્ધિ ❀

પ્રસ્તુતમાં હેતુ જો એક પણ પક્ષમાં ન રહેતો હોત તો સ્વરૂપઅસિદ્ધિ દોષ આવત. કિંતુ **पर्वतो वह्निमान् धूमात्** આવા પ્રકારની અનુમિતિની જનકતા જે પરામર્શમાં રહે છે તે પરામર્શમાં

धिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसमानाधिकरणवह्न्यभाववदवृत्तिधूमवान् पर्वतः' इत्याकारकः परामर्शः तन्निष्ठाऽनुमितिजनकता तस्यामेव साध्याभाववदवृत्तित्वनिष्ठविषयताऽवच्छिन्नत्वस्य सत्त्वेन साध्याभाववदवृत्तित्वादिनिष्ठविषयताऽवच्छिन्नत्वाभावकूटाऽसत्त्वाद् भागासिद्धिः, पक्षैकदेशे एव हेतोरसत्त्वादित्येवं अनुमितिजनकतात्वाऽवच्छेदेन अव्यभिचारपदार्थनिष्ठविषयतानिरूपकत्वाऽनवच्छिन्नत्वस्य साध्यत्वे बाध-भागासिद्धिप्रसङ्गः ।

न च अस्माभिः न अनुमितिजनकतात्वाऽवच्छेदेन अव्यभिचरितत्वपदार्थनिष्ठविषयताकत्वाऽनवच्छिन्नत्वस्य साध्यत्वमङ्गीक्रियते, किन्तु अनुमितिजनकतात्वसामानाधिकरण्येनैव । तथा च कासुचिद् अनुमितिजनकतासु एव साध्य-हेत्वोः सत्त्वमावश्यकम् । यासु अनुमितिजनकतासु हेतुः स्यात् तत्र साध्यसिद्धिरनाविला । तथा च 'पर्वतो वह्निमान्, वह्न्यभाववदवृत्तिधूमाद्' इत्यादिस्थलीयाऽनुमितिजनकतायां हेतोरसत्त्वे साध्यस्य चाऽसत्त्वेऽपि न क्षतिः ***इति वाच्यम्,***

(२) विवक्षितार्थाऽसिद्धेः । अयमाशयः - साध्याभाववदवृत्तित्वादिलक्षणपञ्चके व्याप्तित्वाभावः साधयितुमिष्टः । यदि साध्याभाववदवृत्तित्वादिनिष्ठविषयताऽवच्छिन्नत्वाभावकूटः सर्वासु अनुमितिजनकतासु स्यात् तदैव सर्वासु अनुमितिजनकतासु अव्यभिचारपदार्थनिष्ठविषयतानिरूपक-

●

साध्याभाववद्अवृत्तित्व विषय नथी बनतो. माटे, तादृशपरामर्शनिष्ठअनुमितिजनकतारूप पक्षमां साध्याभाववद्अवृत्तित्वनिष्ठविषयताथी अनवच्छिन्नत्व ज रहेशे. आम, एकाद पक्षमां तो हेतु वृत्ति छे. माटे, स्वरूपअसिद्धि दोष न आपी शकाय. किंतु **'पर्वतो वह्निमान्, वह्न्यभाववद्-अवृत्तिधूमात्'** - आवा प्रकारनी अनुमितिनी जनकता जे परामर्शमां रहे छे ते परामर्शमां हेतुकोटिमां साध्याभाववद्अवृत्तित्व विषय बनतुं होवाने कारणे तादृश परामर्शनिष्ठअनुमितिजनकतास्वरूप पक्षएकदेशमां साध्याभाववद्अवृत्तित्वनिष्ठविषयत्वअनवच्छिन्नत्व रूप हेतु अवृत्ति बनशे. एटले प्रस्तुतमां भागअसिद्धि दोषनुं प्रतिपादन कर्युं.

⁂ सामानाधिकरण्येन अनुमिति निरर्थक ⁂

आ रीते जे बे विकल्प आप्या हता के (१) प्रस्तुत अनुमिति शुं अनुमितिजनकतात्वअवच्छेदेन एटले के तमाम अनुमितिजनकतामां करवी छे के (२) अनुमितिजनकतात्वसामानाधिकरण्येन एटले के कोई एकाद अनुमितिजनकतामां ? आमांथी जो प्रथम विकल्प स्वीकारवामां आवे तो बाध अने भागअसिद्धि दोष आवता होवाथी ते विकल्प ग्राह्य बनी शके तेम नथी. जो बीजो विकल्प स्वीकारो एटले के 'अमुक अनुमितिजनकतामां

गू ढा य शो ल ता वि ना भा

न चाऽनुमितिजनकतात्वावच्छेदेन साध्यता सामानाधिकरण्येन वा ?

●

त्वाऽनवच्छिन्नत्वं स्यात् तदैव च लक्षणपञ्चके व्याप्तित्वाऽभावः सिध्येत् । ततश्च भवता सर्वासु अनुमितिजनकतासु तादृशसाध्यं साधनीयम् । एवञ्च द्वितीयविकल्पाङ्गीकारे विवक्षिताऽर्थासिद्धिः, प्रथमविकल्पाङ्गीकारे बाध-भागासिद्धीति उभयतः पाशारज्जुः, इतो व्याघ्रः इतस्तटीत्यादिन्यायापातः ।

तथा च नोक्ताऽनुमानमपि सम्माननीयमिति आशयेन पूर्वपक्षमुत्थापयन्नाह - **न चेति**। **वाच्यमिति** परेणाऽन्वयः । **अनुमितिजनकतात्वाऽवच्छेदेन** = पक्षताऽवच्छेदकाऽवच्छेदेन अव्यभिचारपदार्थनिष्ठविषयताकत्वाऽनवच्छिन्नत्वस्य **साध्यता सामानाधिकरण्येन वा** = अनुमितिजनकतात्व-

●

અવ્યભિચરિતત્વપદાર્થવિષયત્વઅનવચ્છિન્નત્વ સિદ્ધ કરવું છે' - આવું માનો તો વિવક્ષિત અર્થની સિદ્ધિ તમારા મતે થઈ નહીં શકે. તાત્પર્ય એ છે કે 'પાંચેય લક્ષણ દ્વારા જે પરામર્શ થાય તે અનુમિતિજનક ન બની શકે. મતલબ કે પાંચમાંથી કોઈ પણ લક્ષણ દુનિયાની કોઈ પણ અનુમિતિનું પ્રયોજક (= જનકતાઅવચ્છેદક) ન બની શકે - તેવું તમારે સિદ્ધ કરવું છે. જો અમુક અનુમિતિના જનક બને, અમુકના ન બને - આવું સ્વીકારો તો અનુમિતિજનકતાઅવચ્છેદકત્વ = વ્યાપ્તિત્વ પાંચે'ય લક્ષણમાં માનવું જ પડે. જે તમને ઈષ્ટ નથી. તમારે તો 'તમામે તમામ અનુમિતિની જનકતા જેટલા પણ પરામર્શમાં રહે છે તે તમામે તમામ પરામર્શમાં સાધ્યાભાવવદ્અવૃત્તિત્વ વિષય ન બને. માટે, તાદૃશઅનુમિતિજનકતાઅવચ્છેદક સાધ્યાભાવવદ્અવૃત્તિત્વનિષ્ઠવિષયતા ન બને' - આવું સિદ્ધ કરવાનું છે. હવે જો તમે અનુમિતિજનકતાત્વસામાનાધિકરણ્યેન સાધ્ય માનશો તો તમારા આ અભિપ્રેતની સિદ્ધિ નહીં થઈ શકે. માટે, બીજો વિકલ્પ તો તમે સ્વીકારી જ ન શકો. અને પહેલો વિકલ્પ સ્વીકારવા જતા બાધ અને ભાગઅસિદ્ધિ દુર્વાર બને. આમ, તમે બતાવેલ અનુમાન પણ કંઈ સો ટચનું સોનું નથી.

शब्दार्थ :- ભાગ્યશાળી ! શું આપ અનુમિતિજનકતાત્વઅવચ્છેદેન અવ્યભિચરિતત્વપદાર્થનિષ્ઠવિષયત્વઅનવચ્છિન્નત્વને સાધ્ય માનો છો કે અનુમિતિજનકતાત્વસામાનાધિકરણ્યેન ? (એટલે કે તમામ અનુમિતિજનકતામાં તમારે સાધ્યની સિદ્ધિ કરવી છે કે અમુક અનુમિતિજનકતામાં ?) આમાં પહેલો વિકલ્પ સ્વીકારી શકાય તેમ નથી. કારણ કે જે સ્થલમાં (= અનુમાનપ્રયોગમાં) વહ્ન્યભાવવદ્અવૃત્તિધૂમ હેતુ હશે તે સ્થલમાં જે પરામર્શ

नाद्यः, वह्न्यभाववदवृत्तिधूमादिहेतुकस्थले परामर्शनिष्ठहेतुत्वस्य साध्याभाववदवृत्तित्वविषयत्वावच्छिन्नत्वेन बाध-भागासिद्ध्योः प्रसङ्गात् ।

*न द्वितीयः, विवक्षितार्थासिद्धेः, सर्वतज्जनकतास्वेव तस्य साधनीयत्वा**दिति वाच्यम्,***

●

रूपपक्षतावच्छेदकसामानाधिकरण्येन वेत्यर्थः । तथा च किं सर्वासु अनुमितिजनकतासु अव्यभिचारपदार्थनिष्ठविषयताकत्वं साधनीयम्, कासुचिद्वा अनुमितिजनकतासु तत्साधनीयमिति सरलार्थः ।

प्रथमविकल्पं दूषयति - **नाद्यः** हृद्यः, **वह्न्यभाववदवृत्तिधूमादिहेतुकस्थले** = 'पर्वतो वह्निमान्, वह्न्यभाववदवृत्तिधूमाद्' - इत्यादिस्थले **परामर्शनिष्ठहेतुत्वस्य** = 'वह्न्यभाववदवृत्तिधूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसमानाधिकरणवह्न्यभाववदवृत्तिधूमवान् पर्वतः' - इत्याकारकपरामर्शनिष्ठप्रागुक्ताऽनुमितिजनकत्वस्य, उक्तपरामर्शे साध्याभाववदवृत्तित्वस्य विषयत्वेन, **साध्याभाववदवृत्तित्वविषयत्वावच्छिन्नत्वेन** साध्याभाववदवृत्तित्वादिनिष्ठविषयतावच्छिन्नत्वाभावकूटलक्षणहेतोः अव्यभिचारपदार्थनिष्ठविषयताकत्वाऽनवच्छिन्नत्वलक्षणसाध्यस्य चाऽभावेन **बाध-भागासिद्ध्योः प्रसङ्गात्** ।

द्वितीयविकल्पं दूषयति - **न द्वितीयः** पटीयान्, कासुचिदेव अनुमितिजनकतासु अव्यभिचारपदार्थनिष्ठविषयताकत्वाऽनवच्छिन्नत्वस्य साध्यत्वे **विवक्षितार्थाऽसिद्धेः** = विवक्षितः यः अर्थः = सर्वेषु लक्षणेषु अव्यभिचरितत्वपदवाच्येषु इष्टः व्याप्तित्वाभावः तस्य असिद्धेः, **सर्वतज्जनकतासु** = सर्वासु अनुमितिजनकतासु **एव**, न कासुचित् **तस्य** = अव्यभिचारपदार्थनिष्ठविषयताकत्वाऽनवच्छिन्नत्वस्य **साधनीयत्वादिति** । ततश्च नोक्ताऽनुमानं घटामञ्चति ***इति चेद् ?***

●

तन्निष्ठअनुमितिजनकता (= हेतुता) साध्याभाववद्वृत्तित्वनिष्ठविषयतायी अवच्छिन्न होवाने कारणे बाध तथा भागअसिद्धि बंने दोष आवी पडशे. बीजो विकल्प पण स्वीकारी नहीं शकाय. कारण के अमुक अनुमितिजनकतामां ज अव्यभिचरितत्वपदार्थविषयकत्वअनवच्छिन्नत्वने साध्य मानो तो तमने विवक्षितअर्थनी सिद्धि नहीं थई शके. कारण के तमामे तमाम अनुमितिनी जनकतामां ज अव्यभिचरितत्वपदार्थविषयकत्वअनवच्छिन्नत्व तमारे साधवा योग्य छे.

मैवम्; अनुमितिजनकता प्रकृतपक्षताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताक-विशेष्यतानिरूपितविषयत्वाभिन्नप्रकृतहेतुतावच्छेदकपर्याप्तावच्छेदकताकविशेष्यतानिरूपिताऽ-व्यभिचारपदार्थताऽवच्छेदकतासमानाधिकरणावच्छेदकताकविषयत्वाऽनवच्छिन्ना, प्रकृतपक्षताऽ-वच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितविषयत्वाभिन्नप्रकृतहेतुताऽ-वच्छेदकपर्याप्तावच्छेदकताकविशेष्यतानिरूपितसाध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नविषयत्वाऽ-वच्छिन्नत्वाऽभावकूटादित्यनुमानस्वीकारे दोषाभावादिति ।

अयमत्र सरलार्थः - परामर्शे पक्षकोटौ हेतुकोटौ वा साध्याभाववदवृत्तित्वादि भासते चेद् ? न दोषः, किन्तु व्याप्तिविधया तन्नैव भासते इत्येवाऽस्माभिः साधनीयम् । तथा पक्षताऽवच्छेदकविधया हेतुताऽवच्छेदकविधया ये ये धर्माः तदतिरिक्ततया यदि अव्यभिचारपदार्थः भासेत तदैव तन्निष्ठविषयताऽवच्छिन्नत्वमनुमितिजनकतानिष्ठमस्माकं बाधकं स्यादिति । एतन्मूलं प्रकृतपरिष्कारस्य, एतदाधारेणैव प्रकृतपरिष्कारप्रकारः परिसृतः । एतत्सर्वं 'पर्वतो वह्निमान्, धूमाद्' - इत्येतत्स्थले योज्यम् । तथाहि – 'पर्वतो वह्निमान्' इत्यनुमितेः जनकता 'वह्नि-निरूपितव्याप्तिविशिष्टधूमवान् पर्वतः' इत्याकारकपरामर्शे । एतत्परामर्शे पर्वतः, पर्वतत्वम्, धूमः, धूमत्वम्, व्याप्तिरित्यादयो विषयाः, अत्र पक्षः, पक्षताऽवच्छेदकधर्मः, हेतुः, हेतुताऽ-

●

⁂ દોષનિવારણાર્થ વિશાળ પરિષ્કાર ⁂

ઉત્તર :- (પ્રકૃ.) આ પ્રમાણેની આપની શંકા વ્યાજબી નથી. કારણ કે આ અનુમાનમાં તમે બતાવેલા દોષો લોગુ નહીં પડી શકે. થોડો પરિષ્કાર કરવો પડશે. જુઓ - અમારે ફક્ત એટલું જ સાબિત કરવું છે કે પરામર્શમાં વ્યાપ્તિકોટિમાં = વ્યાપ્તિ તરીકે સાધ્યાભાવવદ્-અવૃત્તિત્વનું જ્ઞાન ન થાય. હેતુકોટિમાં હેતુતાઅવચ્છેદક તરીકે થાય તો અમને શું વાંધો છે ? મતલબ કે હેતુતાઅવચ્છેદક જેટલા પણ હોય તે તમામમાં રહેનારી જે હેતુતાઅવચ્છેદકતા તન્નિરૂપક જે (હેતુમાં રહેનારી) વિશેષ્યતા તેનાથી નિરૂપિત પ્રકારતા જેવી રીતે સિદ્ધાંત વ્યાપ્તિમાં રહે છે તેવી રીતે અવ્યભિચરિતત્વપદાર્થમાં ન રહે. એટલે જ સાધ્ય-હેતુ સહિત અનુમાનપ્રયોગ પ્રસ્તુતમાં આ પ્રમાણે સમજવો -

અનુમિતિજનકતા પ્રકૃતપક્ષતાઅવચ્છેદકતાપર્યાપ્તિઅધિકરણધર્મપર્યાપ્તઅવચ્છેદકતા-નિરૂપકવિશેષ્યત્વથી નિરૂપિત વિષયતાથી અભિન્ન એવી પ્રકૃતહેતુતાઅવચ્છેદકપર્યાપ્તા-વચ્છેદકતાક જે વિશેષ્યતા તેનાથી નિરૂપિત અવ્યભિચારપદાર્થતાઅવચ્છેદકતાસમાનાધિકરણ-

वच्छेदकधर्मः - एतदतिरिक्ततया व्याप्तिरेव भासते, सा च सिद्धान्तव्याप्तिरेव स्यान्न तु अव्यभिचारपदार्थः, अव्यभिचारपदार्थः उक्तपरामर्शे पक्षतया, पक्षताऽवच्छेदकतया, हेतुतया हेतुतावच्छेदकतया वा भासताम्, न कोऽपि दोषः, किन्तु एतदतिरिक्ततया (= व्याप्तिविधया) सः नैव भासते इति ।

अत्र परामर्शे पक्षे पक्षताऽवच्छेदकः हेतुश्च - एतद् द्वितयं विशेषणम्, हेतौ च हेतुताऽवच्छेदकधर्मः व्याप्तिश्चैतद् द्वितयम्, तथा च पक्षताऽवच्छेदकनिष्ठप्रकारतानिरूपितविशेष्यताविशिष्टपक्षनिष्ठविशेष्यतानिरूपितप्रकारता हेतुताऽवच्छेदकनिष्ठप्रकारतानिरूपितविशेष्यता च हेतौ स्याताम् । एकपदार्थनिष्ठविशेष्यतादिविषयत्वानामैक्यमिति (= समानाधिकरणविषयत्वानामैक्यमित्यर्थः) ***जगदीशभट्टाचार्यमतम् ।*** प्रकृते जागदीश्याः एव व्याख्या इति तन्मताऽनुसारेण व्याख्येयम् । तथा च तादृशप्रकारता-विशेष्यत्वयोरैक्यम् । हेतुनिष्ठविशेष्यतानिरूपितप्रकारता व्याप्तौ अस्ति । ततश्च पक्षताऽवच्छेदकनिष्ठप्रकारतानिरूपितविशेष्यताविशिष्टपक्षनिष्ठविशेष्यतानिरूपितप्रकारताऽभिन्नहेतुताऽवच्छेदकनिष्ठप्रकारतानिरूपितविशेष्यताविशिष्टहेतुनिष्ठविशेष्यतानिरूपितप्रकारता व्याप्तौ अस्ति इति स्थितम् । अत्र यथा पक्षताऽवच्छेदकनिष्ठप्रकारतानिरूपिता विशेष्यता भवति तथा तादृशप्रकारतानिरूपिका अपि विशेष्यता भवति । किञ्च यथा पक्षताऽवच्छेदकनिष्ठप्रकारतानिरूपकत्वं विशेष्यतायां तथा पक्षताऽवच्छेदकनिष्ठपक्षताऽवच्छे-

अवच्छेदकताकविषयताथी अनवच्छिन्न छे. કારણ કે તે પ્રકૃતપક્ષતાઅવચ્છેદકતાપર્યાપ્તિ-અધિકરણધર્મપર્યાપ્તઅવચ્છેદકતાનિરૂપકવિશેષ્યત્વનિરૂપિતવિષયતાઅભિન્નપ્રકૃતહેતુતાવચ્છેદકપર્યાપ્તઅવચ્છેદકતાનિરૂપકવિશેષ્યતાનિરૂપિત(સાધ્યાભાવવદ્અવૃત્તિત્વાદિનિષ્ઠ)-સાધ્યાભાવવદ્અવૃત્તિત્વત્વાદિઅવચ્છિન્નવિષયતાઅવચ્છિન્નત્વાભાવકૂટવિશિષ્ટ છે. (તાદૃશ-હેતુવિષયત્વ વગેરે શબ્દ દ્વારા આટલો હેતુ લબ્ધ થાય.)

✳ પરિષ્કારની સરળ સમજણ ✳

આ અનુમાનપ્રયોગમાં દરેક શબ્દ શા માટે લખ્યા તે વિચારતા પહેલા સૌ પ્રથમ આનો અર્થ વિચારી લઈએ. સ્થલ લઈએ **'पर्वतो वह्निमान् धूमात्'** આવી અનુમિતિનો જનક પરામર્શ. અહીં કહેવું એમ છે કે - વહ્નિવ્યાપ્યધૂમવાન્ પર્વત - આ પરામર્શમાં વ્યાપ્તિ તરીકે અવ્યભિચરિતત્વપદાર્થ ન ભાસે. એટલે કે વહ્નિઅવ્યભિચરિતધૂમવાન્ પર્વત - આવા પ્રકારનો પરામર્શ ન થાય. કિંતુ ધૂમસમાનાધિકરણઅત્યંતાભાવઅપ્રતિયોગિવહ્નિસમાના-

दकतानिरूपकत्वमपि स्यात् । पक्षनिष्ठं यद् हेतुनिष्ठप्रकारतानिरूपिता विशेष्यता पक्षताऽवच्छेदक-निष्ठप्रकारतानिरूपिता विशेष्यता चेति विशेष्यताद्वितयं तदभिन्नमेव । ततः पक्षताऽवच्छेदकनिष्ठ-पक्षताऽवच्छेदकतानिरूपकविशेष्यतानिरूपिता प्रकारता हेतौ स्यात्, तादृशविशेष्यता च पक्षे इति । एवं हेतुकोटावपि भावनीयम् (स्पष्टतार्थिभिः गुर्जरविवेचनं विलोकनीयम्) । तथा च पक्षताऽवच्छेदकनिष्ठपक्षताऽवच्छेदकतानिरूपकविशेष्यतानिरूपितप्रकारताऽभिन्न-हेतुताऽवच्छे-दकनिष्ठहेतुताऽवच्छेदकतानिरूपकविशेष्यतानिरूपितप्रकारता व्याप्तौ स्यात् । अत्र प्रथमप्रकारता-तोऽभिन्ना हेतुतावच्छेदकताकविशेष्यता हेतुनिष्ठा बोध्या । तन्निरूपितप्रकारता व्याप्तौ सिद्धान्त-व्याप्तिरूपायाम् एव, न तु अव्यभिचारपदार्थे । यदि परामर्शे अव्यभिचारपदार्थस्य व्याप्तिविधया भानं स्यात् तदा तादृशप्रकारता अव्यभिचारपदार्थे स्यादेव, किन्तु तादृशाऽव्यभिचारपदार्थस्याऽ-व्याप्तिग्रस्ततया व्याप्तित्वमसम्भवितमतः एव अव्यभिचारपदार्थः न परामर्शे व्याप्तिविधया भासते।

य शो ल ता

●

धिकरणधूमवान् पर्वत - आवा प्रकारनो परामर्श थाय. એટલે કે ધૂમસમાનાધિકરણ-અત્યંતાભાવઅપ્રતિયોગિવહ્નિસામાનાધિકરણ્યનું વૈશિષ્ટ્ય ધૂમમાં ભાસે. અને ધૂમનું વૈશિષ્ટ્ય પર્વતમાં ભાસે. કિંતુ અવ્યભિચારપદાર્થનું = સાધ્યાભાવવદ્અવૃત્તિત્વવગેરેનું વૈશિષ્ટ્ય ધૂમમાં અને તાદૃશધૂમનું વૈશિષ્ટ્ય પર્વતમાં ન ભાસે. માટે, કહી શકાય કે પર્વતનિષ્ઠવિશેષ્યતા-નિરૂપિતપ્રકારતાઅભિન્નધૂમનિષ્ઠવિશેષ્યતાનિરૂપિત અવ્યભિચારપદાર્થનિષ્ઠપ્રકારતા-(= વિષયતા)નિરૂપકત્વ પરામર્શમાં ક્યારેય ન હોય. માટે પરામર્શનિષ્ઠઅનુમિતિજનકતા તાદૃશવિષયતાથી અનવચ્છિન્ન હોય. કારણ કે પહેલા જણાવ્યું તે મુજબ તે પર્વતનિષ્ઠ-વિશેષ્યતાનિરૂપિતપ્રકારતાઅભિન્નધૂમનિષ્ઠવિશેષ્યતાનિરૂપિતસાધ્યાભાવવદ્અવૃત્તિત્વાદિનિષ્ઠ-પ્રકારતાથી અનવચ્છિન્ન છે. પ્રસ્તુતમાં ધૂમમાં પર્વતની અપેક્ષાએ પ્રકારતા છે અને વ્યાપ્તિની અપેક્ષાએ વિશેષ્યતા છે. માટે ઉભય અભિન્ન થાય. (વિષયતારૂપ) સમાનાધિકરણ-ધર્મો વચ્ચે અભેદ ન્યાયસંપ્રદાયમાં પ્રસિદ્ધ છે. જો આટલું જ કહેવામાં આવે તો આપણી તકલીફ દૂર થઈ શકે તેમ નથી. મતલબ કે **पर्वतो वह्निमान् वह्न्यभाववदवृत्तिधूमात्** - આ સ્થલમાં તાદૃશધૂમસમાનાધિકરણઅત્યંતાભાવઅપ્રતિયોગિવહ્નિસમાનાધિકરણ-વહ્નિઅભાववદ્-અવૃત્તિધૂમવાન્ પર્વત - આવા પ્રકારનો જે પરામર્શ થાય છે તેમાં જે રીતે સાધ્યસામાના-ધિકરણ્યસ્વરૂપ સિદ્ધાંતવ્યાપ્તિ હેતુમાં વિશેષણ તરીકે ભાસે છે તે જ રીતે સાધ્યાભાવવદ્-અવૃત્તિત્વ પણ હેતુમાં વિશેષણ તરીકે ભાસે છે. માટે, પર્વતનિષ્ઠવિશેષ્યતાનિરૂપિતધૂમનિષ્ઠ-પ્રકારતાઅભિન્નવિશેષ્યતાનિરૂપિતસાધ્યાભાવવદ્અવૃત્તિત્વનિષ્ઠપ્રકારતાથી અવચ્છિન્ન

વિ ન ભ્રા

ततश्च तादृशविशेष्यतानिरूपिताऽव्यभिचारपदार्थनिष्ठप्रकारताऽनवच्छिन्ना परामर्शनिष्ठाऽनुमितिजनकता। अव्यभिचारपदार्थतया पञ्च लक्षणानि ग्रहीतुं शक्यानि, किन्तु तेषु एकमपि लक्षणं न व्याप्तिविधया परामर्शे भासते, अव्याप्तिग्रस्तत्वात्। तथा च साध्याभाववदवृत्तित्वादौ 'पर्वतो वह्निमान्' इत्यादिस्थले प्रकृतपक्षताऽवच्छेदकपर्वतत्वनिष्ठप्रकृतपक्षताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुताऽवच्छेदकधूमत्वनिष्ठप्रकृतहेतुतावच्छेदकताकविशेष्यतानिरूपितप्रकारता न भवति। अत एव अव्यभिचारपदार्थेऽपि तादृशप्रकारता न भवति।

ततः एवमनुमानं स्यात् - अनुमितिजनकत्वं प्रकृतपक्षताऽवच्छेदकनिष्ठप्रकृतपक्षताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुतावच्छेदकनिष्ठप्रकृतहेतुताऽवच्छेदकताकविशेष्यतानिरूपिताऽव्यभिचारपदार्थनिष्ठप्रकारताऽनवच्छिन्नम्, प्रकृतपक्षताऽवच्छेदकनिष्ठप्रकृतपक्षताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुताऽवच्छेदकनिष्ठप्रकृतहेतुताऽवच्छेदकताकविशेष्यतानिरूपितसाध्याभाववदवृत्तित्वादिनिष्ठप्रकारताऽवच्छिन्नत्वाभावकूटात्।

एतादृशाऽनुमानाङ्गीकारे 'पर्वतो वह्निमान् वह्न्यभाववदवृत्तिधूमाद्' इत्यादिस्थलेऽपि लक्षणसमन्वयः सम्भवति। तथाहि - उक्ताऽनुमाने परामर्शाकारः एवम् - 'वह्न्यभाववदवृत्तिधूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसमानाधिकरणवह्न्यभाववदवृत्तिधूमवान् पर्वतः' इति। अत्र वह्न्यभाववदवृत्तिधूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्यं वह्न्यभाव-

●

તાદૃશપરામર્શનિષ્ઠઅનુમિતિજનકતા બનશે. તેના કારણે પર્વતનિષ્ઠવિશેષ્યતાનિરૂપિતપ્રકારતા-અભિન્નધૂમનિષ્ઠવિશેષ્યતાનિરૂપિતઅવ્યભિચારપદાર્થનિષ્ઠપ્રકારતાથી પણ અવચ્છિન્ન જ તાદૃશપરામર્શનિષ્ઠઅનુમિતિજનકતા બનશે. માટે, બાધ અને ભાગઅસિદ્ધિ દોષ દુર્વાર બને. આથી આપણે હજુ પરિષ્કાર કરીએ - જે સ્થલ બતાવ્યું તેમાં નોંધવાલાયક વિગત એ છે કે સાધ્યાભાવવદ્અવૃત્તિત્વ હેતુતાઅવચ્છેદક તરીકે જણાય છે. વ્યાપ્તિરૂપે હેતુમાં વિશેષણતયા નહીં. હેતુતાઅવચ્છેદકમાં હેતુતાઅવચ્છેદકતા આવે. પ્રસ્તુતમાં હેતુતાઅવચ્છેદકતા બેમાં રહે - (૧) સાધ્યાભાવવદ્અવૃત્તિત્વમાં અને (૨) ધૂમત્વમાં. હેતુતાઅવચ્છેદકમાં પર્યાપ્ત અવચ્છેદકતા = બંને હેતુતાઅવચ્છેદકમાં રહેલી હેતુતાઅવચ્છેદકતા. આ હેતુતાઅવચ્છેદકતાનું નિરૂપક વિશેષ્યત્વ થાય. મતલબ કે વ્યાપ્તિની અપેક્ષાએ હેતુમાં જે વિશેષ્યતા આવે છે તે વિશેષ્યતાનિરૂપિત હેતુતાઅવચ્છેદકતા કહી શકાય. જેવી રીતે ઘટ-

वदवृत्तिधूमत्वं चैतदुभयं वह्न्यभाववदवृत्तिधूमे विशेषणम्, तत्र तादृशसामानाधिकरण्यं व्याप्तिरूपम्, तादृशधूमत्वं च हेतुताऽवच्छेदकरूपम् । एवं पक्षेऽपि वह्न्यभाववदवृत्तिधूमः पर्वतत्वं चैतदुभयमपि विशेषणम्, तत्र तादृशधूमः हेतुः, पर्वतत्वं च पक्षताऽवच्छेदकम् । तथा चैतादृशपरामर्शनिष्ठाऽनुमितिजनकता पर्वतत्वनिष्ठप्रकृतपक्षताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-वह्न्यभाव-

●

નિષ્ઠપ્રકારતાનિરૂપિત ઘટત્વનિષ્ઠપ્રકારતાઅવચ્છેદકતા કહેવાય તે રીતે હેતુનિષ્ઠવિશેષ્યતાનિરૂપિત હેતુતાઅવચ્છેદકનિષ્ઠહેતુતાઅવચ્છેદકતા કહેવાય. આમ, તમામ હેતુતાઅવચ્છેદકતાનિરૂપક જે વિશેષ્યતા હેતુમાં રહે તે વિશેષ્યતાનિરૂપિત પ્રકારતાખ્યવિષયતા અવ્યભિચારપદાર્થમાં જો રહે તો તમે કહેલી આપત્તિ આવે. એટલે કે જો હેતુતાઅવચ્છેદકમાં પર્યાપ્તઅવચ્છેદકતાનિરૂપકવિશેષ્યતાનિરૂપિતવિષયતાવિશિષ્ટ અવ્યભિચારપદાર્થ પરામર્શમાં ભાસમાન હોય તો તાદૃશ વિષયતાથી અવચ્છિન્ન પરામર્શનિષ્ઠઅનુમિતિજનકતા કહેવાય. પ્રસ્તુતમાં અવ્યભિચારપદાર્થ - ૫. પદાર્થતાઅવચ્છેદક પણ સાધ્યાભાવવદ્અવૃત્તિત્વત્વ વગેરે - ૫, આ બધામાં પદાર્થતાઅવચ્છેદકતા રહે. તેને સમાનાધિકરણ પ્રકારતાસ્વરૂપવિષયતાઅવચ્છેદકતા. કારણ કે હેતુનિષ્ઠવિશેષ્યતાનિરૂપિતપ્રકારતા અવ્યભિચારપદાર્થમાં જાય. માટે, અવ્યભિચારપદાર્થમાં રહેલ ધર્મ એ પ્રકારતાસ્વરૂપવિષયતાનું પણ અવચ્છેદક બને. આમ, પદાર્થતાઅવચ્છેદકતાને સમાનાધિકરણ વિષયતાઅવચ્છેદકતા થઈ. આ અવચ્છેદકતાનિરૂપક જે વિષયતા તેનાથી અનવચ્છિન્ન તાદૃશપરામર્શનિષ્ઠઅનુમિતિજનકતા હોવી જોઈએ. આ જ વસ્તુ ફરીથી અખંડ રીતે જોઈ લઈએ -

प्रकृतहेतुताअवच्छेदकपर्याप्तअवच्छेदकतानिरूपकविशेष्यतानिरूपित-

↓ ↓

(પ્રસ્તુતમાં બંને હેતુતાઅવચ્છેદકમાં રહેલી અવચ્છેદકતા) (હેતુમાં જે વ્યાપ્તિની અપેક્ષાએ આવે તે)

अव्यभिचारपदार्थताअवच्छेदकतासमानाधिकरणअवच्छेदकतानिरूपक-

↓ ↓

(સાધ્યાભાવવદ્અવૃત્તિત્વત્વાદિનિષ્ઠ) (હેતુની અપેક્ષાએ જે પ્રકારતા અવ્યભિચારપદાર્થમાં આવે તે પ્રકારતાઅવચ્છેદકતા)

વિષયતાથી અનવચ્છિન્ન તાદૃશપરામર્શનિષ્ઠઅનુમિતિજનકતા હોવી જોઈએ.

↓

(અવ્યભિચારપદાર્થનિષ્ઠપ્રકારતાઆખ્યવિષયતા)

वदवृत्तिधूमत्वनिष्ठप्रकृतहेतुताऽवच्छेदकताकविशेष्यतानिरूपिततादृशवह्निसामानाधिकरण्यनिष्ठ-
प्रकारताऽवच्छिन्ना भवति । अत्र वह्न्यभाववदवृत्तित्वे तादृशप्रकारता न भवति, तस्य हेतुताऽ-
वच्छेदकान्तर्गतत्वात् । तथा च न पूर्वोक्तबाध-भागासिद्ध्योः प्रसङ्गः ।

●

⁂ प्रस्तुतमां परिष्कारनी योजना ⁂

आपणे जे स्थळनी विचारणा करीએ छीએ ते स्थलीय जे परामर्श छे तन्निष्ठअनुमितिजनकता पण तादृशविषयत्वथी अनवच्छिन्न ज छे. ते आ रीते - हेतुताअवच्छेदकता साध्याभाववद्अवृत्तित्व अने धूमत्व बेमां ज पर्याप्त छे. कोઈ એકમां नहीं. माटे, तादृशअवच्छेदकतानिरूपक जे विशेष्यता हेतुमां आवे छे तन्निरूपितप्रकारता अव्यभिचारपदार्थमां नहीं जाय. कारण के हेतुताअवच्छेदक तरीके ज साध्याभाववद्-अवृत्तित्वनुं એटले के अव्यभिचारपदार्थनुं ज्ञान थाय छे, नहीं के व्याप्ति तरीके. माटे, हेतुताअवच्छेदकतानिरूपकविशेष्यतानिरूपितप्रकारताआख्यविषयता अव्यभिचारपदार्थमां नहीं, किंतु हेतुसमानाधिकरणअत्यंताभावअप्रतियोगिसाध्यसामानाधिकरण्यस्वरूप व्याप्तिमां ज जशे. हा ! हेतुमां अव्यभिचारपदार्थ विशेषण होवाने कारणे हेतुनिष्ठविशेष्यतानिरूपित-प्रकारता अव्यभिचारपदार्थमां जाय ज. किंतु तादृशप्रकारतानो संग्रह हेतुताअवच्छेदकता-सामानाधिकरण्येन थઈ गयो. मतलब के हेतुताअवच्छेदक हेतुमां प्रकार होय ज. माटे, हेतुताअवच्छेदकतासमानाधिकरणप्रकारता थाय. हेतुताअवच्छेदकतारूपे साध्याभाववद्-अवृत्तित्वमां जे हेतुनिष्ठविशेष्यतानिरूपितप्रकारता रहे छे तेनो संग्रह थઈ गयो. प्रस्तुतमां हेतुताअवच्छेदकता(એटले के प्रकारता)निरूपक जे विशेष्यता जणावी छे ते हेतुताअवच्छेदकनी अपेक्षाએ हेतुमां जे विशेष्यता आवे छे ते नथी. किंतु व्याप्तिनी अपेक्षाએ जे विशेष्यता हेतुमां आवे छे ते ज विशेष्यता छे. प्रस्तुतमां बंने प्रकारनी विशेष्यता हेतुमां रहेती होवाने कारणे हेतुताअवच्छेदकतानिरूपक तरीके तादृशविशेष्यता बतावी छे. आम, हेतुता-अवच्छेदकताक जे विशेष्यता तेनाथी निरूपित प्रकारता हवे पुनः हेतुताअवच्छेदकनिष्ठ गृहीत नहीं थाय. किंतु व्याप्तिनिष्ठ गृहीत थशे. એटले के हेतुसमानाधिकरणअत्यंताभाव-अप्रतियोगिसाध्यसामानाधिकरण्यमां रहेली गृहीत थशे.

आम, परामर्शनिष्ठअनुमितिजनकता हेतुताअवच्छेदकपर्याप्तहेतुताअवच्छेदकताक-विशेष्यतानिरूपकअव्यभिचारपदार्थताअवच्छेदकतासमानाधिकरणअवच्छेदकतानिरूपक-विषयताथी अनवच्छिन्न ज बनशे. मूळ वात એटली ज छे के हेतुताअवच्छेदकपर्याप्त-

य शो ल ता वि ना भा

नन्वेवमस्माकं चक्षुषि धूलिप्रक्षेपं मा करोतु । बाधो भागासिद्धिश्च भविष्यतः एव । तथा हि - प्रकृते वह्न्यभाववदवृत्तिधूमत्वमेकं यथा हेतुताऽवच्छेदकं भवति तथा वह्न्यभाववदवृत्तित्वं धूमत्वञ्चैतद् द्वितयमपि हेतुताऽवच्छेदकं भवति । यथा महानसीयवह्न्यभावीयप्रतियोगिताऽवच्छेदकं महानसीयवह्नित्वमपि भवति, महानसीयत्वं वह्नित्वमैतद्द्वितयमपि भवति, द्वयोरपि महानसीयवह्नौ विशेषणत्वात् । तथा च हेतुताऽवच्छेदकीभूतधूमत्वनिष्ठहेतुताऽवच्छेदकताकविशेष्यता वह्न्यभाववद-वृत्तित्वनिष्ठप्रकारतानिरूपितविशेष्यता चैतद्द्वितयमपि हेतौ स्यात्, एतद्द्वितयस्याऽपि एकहेतुनिष्ठ-

अवच्छेदकतामां જ અવ્યભિચારપદાર્થનિષ્ઠપ્રકારતા સમાઈ જાય છે. તન્નિરૂપકવિશેષ્યતા-નિરૂપિત અન્ય કોઈ પ્રકારતા અવ્યભિચારપદાર્થમાં જતી નથી. જો પરામર્શ આ રીતે થતો હોત કે - સાધ્યાભાવવદ્અવૃત્તિવહ્નિઅભાવવદ્અવૃત્તિધૂમવાન્ પર્વત તો હેતુતાઅવચ્છેદકતાક-વિશેષ્યતાનિરૂપિતવિષયતા અવ્યભિચારપદાર્થમાં જાત અને પરામર્શનિષ્ઠ અનુમિતિજનકતા તેનાથી અવચ્છિન્ન પણ થાત, કિંતુ તેવો પરામર્શ થતો નથી. પરામર્શ તો આવા પ્રકારનો થાય છે - વહ્નિઅભાવવદ્અવૃત્તિધૂમ(=હેતુ)સમાનાધિકરણઅત્યંતાભાવઅપ્રતિયોગિવહ્નિ-સમાનાધિકરણવહ્નિઅભાવવદ્અવૃત્તિધૂમવાન્ પર્વત - આ પરામર્શમાં હેતુતાઅવચ્છેદક બે છે - ધૂમત્વ અને વહ્નિઅભાવવદ્અવૃત્તિત્વ. આ બંનેમાં પર્યાપ્ત જે અવચ્છેદકતા તન્નિરૂપકધૂમ-નિષ્ઠવિશેષ્યતાનિરૂપિતપ્રકારતાઆખ્યવિષયતા અવ્યભિચારપદાર્થમાં નથી જતી. કિંતુ હેતુ-સમાનાધિકરણઅત્યંતાભાવઅપ્રતિયોગિસાધ્યસામાનાધિકરણ્યમાં જાય છે. માટે, હેતુતા-અવચ્છેદકપર્યાપ્તહેતુતાઅવચ્છેદકતાકવિશેષ્યતાનિરૂપિત-અવ્યભિચારપદાર્થતાઅવચ્છેદકતા-સમાનાધિકરણઅવચ્છેદકતાકવિષયતાથી અનવચ્છિન્ન તાદૃશપરામર્શનિષ્ઠ અનુમિતિજનકતા થાય.

❖ સાધ્યમાં સામાનાધિકરણ્યપ્રવેશનું પ્રયોજન ❖

પ્રસ્તુતમાં, પદાર્થતાઅવચ્છેદકતાસમાનાધિકરણ અવચ્છેદકતા કહેલ છે. સીધું અવ્યભિચારપદાર્થનિષ્ઠપ્રકારતાઆખ્યવિષયતા નથી જણાવેલ. તેની પાછળનું કારણ એ કે અવ્યભિચારપદાર્થ એટલે પાંચ લક્ષણ = વ્યાપ્તિ છે. તેમાંથી કોઈક પહેલી વ્યાપ્તિને માને, કોઈક બીજીને માને. જો 'તાદૃશઅવ્યભિચારપદાર્થનિષ્ઠવિષયતાથી અનવચ્છિન્ન અનુમિતિજનકતા હોવી જોઈએ' - ફક્ત આટલું જ કહેવામાં આવે તો સિદ્ધસાધન દોષ આવે. મતલબ કે જે વ્યક્તિ બીજી વ્યાપ્તિને સ્વીકારતો હોય તેની માન્યતા મુજબ જે પ્રથમ અવ્યભિચારપદાર્થ છે તેમાં રહેલી વિષયતાથી અનુમિતિજનકતા અનવચ્છિન્ન જ હોય. તે તો તેને માન્ય જ છે. હા, દ્વિતીયવ્યાપ્તિનિષ્ઠવિષયતાથી અનવચ્છિન્નત્વ તેના માટે સાધ્ય

त्वेनैक्यात्, प्रकृतहेतुताऽवच्छेदकीभूतधूमत्वनिष्ठप्रकृतहेतुताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारता वह्न्यभाववदवृत्तित्वे स्यात् । ततश्च उक्तपरामर्शीयतादृशप्रकारतायाः वह्न्यभाववदवृत्तित्वे सत्त्वात् तादृशपरामर्शनिष्ठाऽनुमितिजनकता प्रकृतपक्षताऽवच्छेदकीभूतपर्वतत्वनिष्ठपक्षताऽवच्छेदकता-निरूपकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुताऽवच्छेदकीभूतधूमत्वनिष्ठहेतुताऽवच्छेदकता-निरूपकविशेष्यतानिरूपितसाध्याभाववदवृत्तित्वनिष्ठप्रकारताऽवच्छिन्ना एव स्यात्, अत एव

●

બની શકે. કેમ કે તે અનુમિતિજનકતામાં દ્વિતીયવ્યાપ્તિનિષ્ઠવિષયતાથી અનવચ્છિન્નત્વ માનતા નથી, પણ તેનાથી અવચ્છિન્નત્વ માને છે. પ્રથમ વ્યાપ્તિમાં તો પરામર્શ-નિરૂપિતવિષયતા તે પણ નથી જ માનતા. માટે, અવ્યભિચારપદાર્થ તરીકે પ્રથમ વ્યાપ્તિ જ લઈ કોઈ સિદ્ધસાધન દોષ ન આપી બેસે તે માટે અવ્યભિચારપદાર્થતાઅવચ્છેદકતા-સમાનાધિકરણઅવચ્છેદકતાકવિષયતા કહેવું જરૂરી છે. આવું કહેવાથી સિદ્ધસાધન દોષ ન આવે. દ્વિતીય વ્યાપ્તિ જે સાધ્યવદ્ભિન્નસાધ્યાભાવવદ્અવૃત્તિત્વ છે તેમાં જે અવ્યભિચાર-પદાર્થતા તેના અવચ્છેદક તરીકે સાધ્યવદ્ભિન્નસાધ્યાભાવવદ્અવૃત્તિત્વત્વ મળે. અવ્યભિચાર-પદાર્થતાઅવચ્છેદકતા આ રીતે પાંચે લક્ષણમાં રહેલ ધર્મમાં જાય. આથી દ્વિતીય વ્યાપ્તિ સ્વીકારનારના મતે અવ્યભિચારપદાર્થતાવચ્છેદકતાસમાનાધિકરણઅવચ્છેદકતાકવિષયતાથી અવચ્છિન્ન અનુમિતિજનકતા હોય. કારણ કે તેના મતે પરામર્શમાં વ્યાપ્તિ તરીકે દ્વિતીય લક્ષણ ભાસે છે. દ્વિતીય લક્ષણ અવ્યભિચાર પદાર્થ જ છે. આથી તાદૃશદ્વિતીયલક્ષણનિષ્ઠ વિષયતા અવ્યભિચારપદાર્થતાઅવચ્છેદકતાસમાનાધિકરણઅવચ્છેદકતાક જ કહેવાય. ફલતઃ પ્રથમ લક્ષણ તેના મતે પરામર્શમાં વ્યાપ્તિવિધયા ભાસતું ન હોવા છતાં તાદૃશવિષયતા-અનવચ્છિન્નત્વ તેના મતે 'સાધ્ય' જ બનશે, 'સિદ્ધ' નહીં. તાત્પર્ય એટલું જ છે કે - પદાર્થતાઅવચ્છેદકતાસમાનાધિકરણ કહેવા દ્વારા ફક્ત પહેલી વગેરે એકાદ વ્યાપ્તિ જ નહીં પકડાય. કિંતુ કોઈ પણ વ્યાપ્તિ પકડી શકાય છે. કારણ કે પૂર્વે જણાવ્યું તે મુજબ અવ્યભિચારપદાર્થત્વ પાંચેય વ્યાપ્તિમાં એક જ છે. માટે તાદૃશપદાર્થતાઅવચ્છેદકતા પાંચેય વ્યાપ્તિમાં રહેલા ધર્મમાં જાય. તેને સમાનાધિકરણવિષયતાઅવચ્છેદકતા (= પ્રકારતા-અવચ્છેદકતા) એટલે પાંચે ય પદાર્થતાઅવચ્છેદકમાંથી કોઈ પણમાં રહેલ ધર્મ. આમ, અવ્યભિચારપદાર્થ દ્વારા કોઈ એકાદ વ્યાપ્તિને લઈ સિદ્ધસાધન દોષ ન આપી શકાય. તથા પાંચેય વ્યાપ્તિનું એકી સાથે પરામર્શમાં ભાન નથી થતું. માટે અવ્યભિચારપદાર્થતા-અવચ્છેદકતાસમાનાધિકરણ જણાવ્યું. સમનિયત નૂ કહ્યું. જો પાંચેય વ્યાપ્તિ જણાતી હોત તો જયાં જયાં અવ્યભિચારપદાર્થતાઅવચ્છેદકતા રહે ત્યાં ત્યાં પ્રકારતાઅવચ્છેદકતા પણ રહે

तादृशानुमितिजनकता प्रकृतपक्षतावच्छेदकीभूतपर्वतत्वनिष्ठपक्षतावच्छेदकतानिरूपकविशेष्यता-निरूपितप्रकारताऽभिन्न-प्रकृतहेतुतावच्छेदकीभूतधूमत्वनिष्ठप्रकृतहेतुतावच्छेदकतानिरूपक-विशेष्यतानिरूपिताऽव्यभिचारपदार्थनिष्ठप्रकारताऽवच्छिन्ना एव स्यादित्येवं प्रकृतपरामर्शनिष्ठाऽ-नुमितिजनकतायां हेतु-साध्ययोरसत्त्वाद् बाध-भागासिद्धिताદवस्थ्यम् । ततः एतादृशपरिष्कार-प्रयासः फल्गुः ***एवेति चेद्*** ?

●

જ. માટે, સમનિયતત્વ ઘટી જાય. કિંતુ વસ્તુતઃ તેવું નથી. જ્યાં અવ્યભિચારપદાર્થતા-અવચ્છેદકતા રહે ત્યાં પ્રકારતાઅવચ્છેદકતા રહે જ તેવું જરૂરી નથી. જેમ કે 'साध्यभાવવદ્-અવૃત્તિધૂમવાન્ પર્વત' - આવો પરામર્શ થતો હોય તો પ્રકારતાઅવચ્છેદકતા साध्याभાવવદ્-અવૃત્તિત્વત્વમાં રહે. જ્યારે અવ્યભિચારપદાર્થતાઅવચ્છેદકતા તો साध्यવદ્ભિન્ન-साध्याभાવવદ્અવૃત્તિત્વત્વ વગેરેમાં પણ રહે છે. આમ, જે સમાનાધિકરણ જણાવેલ છે તે પણ વ્યાજબી છે. આના સિવાય બીજી રીતે પણ બહુશ્રુતો અર્થ જણાવી શકે છે.

❄ હેતુતાવચ્છેદકપર્યાપ્તિપ્રવેશપ્રયોજન ❄

હવે હેતુતાઅવચ્છેદકપર્યાપ્તહેતુતાઅવચ્છેદકતા શા માટે જણાવી ? તેનું કારણ જોઈએ. જો ફક્ત હેતુતાઅવચ્છેદકનિષ્ઠહેતુતાઅવચ્છેદકતાનિરૂપકવિશેષ્યતાનિરૂપિતઅવ્ય-ભિચારપદાર્થતાઅવચ્છેદકતાસમાનાધિકરણઅવચ્છેદકતાકવિષયતાઅનવચ્છિન્નત્વ જ લખવામાં આવે તો પુનઃ બાધ અને ભાગઅસિદ્ધિ દોષ દુર્વાર બને. કારણ કે હેતુતાઅવચ્છેદક તરીકે ફક્ત ધૂમત્વ જ લઈએ, साध्याभાવવદ્અવૃત્તિત્વ ન લઈએ તો હેતુતાઅવચ્છેદકધૂમત્વ-નિષ્ઠહેતુતાઅવચ્છેદકતાનિરૂપકવિશેષ્યતાનિરૂપિતપ્રકારતા साध्याभાવવદ્અવૃત્તિત્વમાં જશે જ. કારણ કે હેતુનિષ્ઠવિશેષ્યતાનિરૂપિતसाध्याभાવવદ્અવૃત્તિત્વનિષ્ઠપ્રકારતા કે જે હેતુતા-અવચ્છેદકતા સ્વરૂપ છે તેનો સંગ્રહ નથી થયો. કિંતુ ધૂમત્વનિષ્ઠપ્રકારતાનો જ સંગ્રહ થયો છે. આમ, साध्याभાવવદ્અવૃત્તિત્વમાં હેતુતાઅવચ્છેદકનિષ્ઠહેતુતાઅવચ્છેદકતાનિરૂપક-વિશેષ્યતાનિરૂપિતપ્રકારતા મળશે. માટે, તાદૃશપ્રકારતાઆખ્યવિષયતાથી અવચ્છિન્ન જ પરામર્શનિષ્ઠઅનુમિતિજનકતા બનશે. અનવચ્છિન્ન નહીં. તથા साध्याभાવવદ્અવૃત્તિત્વનિષ્ઠ-વિષયતાથી અવચ્છિન્ન અનુમિતિજનકતા બની. માટે અવ્યભિચારપદાર્થનિષ્ઠવિષયતાથી પણ તાદૃશપરામર્શનિષ્ઠઅનુમિતિજનકતા અવચ્છિન્ન થઈ જશે.વસ્તુતઃ સાધ્ય અને હેતુ તાદૃશવિષયતાઅનવચ્છિન્નત્વ રૂપ હોવાને કારણે તાદૃશવિષયતાથી અનવચ્છિન્નત્વ જ જવું જોઈએ. કિંતુ પ્રસ્તુતમાં તો તેનો અભાવ = અવચ્છિન્નત્વ ગયું. માટે, બાધ અને ભાગઅસિદ્ધિ દુર્વાર બનશે. જો 'પર્યાપ્ત' ઉમેરવામાં આવે એટલે કે હેતુતાઅવચ્છેદકપર્યાપ્તહેતુતા-

न; पर्याप्तिनिवेशेन उक्ताऽऽपत्तेः निवारणसम्भवात् । तथा हि - भवता बाध-भागासिद्धिदानावसरे हेतुताऽवच्छेदकविधया केवलं धूमत्वमेव गृहीतम्, वस्तुतः हेतुताऽवच्छेदकतया वह्न्यभाववदवृत्तिधूमत्वं यद्वा वह्न्यभाववदवृत्तित्वं धूमत्वं चैतद् द्वितयम् - एतदन्यतरद् ग्राह्यम् । यदा वह्न्यभाववदवृत्तित्वं धूमत्वं चैतद्द्वितयं हेतुताऽवच्छेदकतया विवक्ष्यते तदा हेतुताऽवच्छेदकता पर्याप्तिसम्बन्धेन वह्न्यभाववदवृत्तित्वे धूमत्वे च स्यात्, न तु केवलं वह्न्यभाववदवृत्तित्वे धूमत्वे वा । स्वरूपसम्बन्धेन तु हेतुताऽवच्छेदकता एकस्मिन् धूमत्वेऽपि स्यात्, वह्न्यभाववदवृत्तित्वेऽपि स्यात् । यथा द्वित्वं पर्याप्तिसम्बन्धेन उभयपदार्थे एव स्यात्, न तु एकस्मिन् पदार्थे, या नैकस्मिन् पर्याप्ता, किन्तु अनेकत्रैव सा पर्याप्तिरिति व्युत्पत्तेः । समवायेन तु एकस्मिन्नपि पदार्थे स्यात् ।

ततश्च प्रकृते हेतुताऽवच्छेदकतायाः पर्याप्तिसम्बन्धेनाधिकरणं वह्न्यभाववदवृत्तित्वं धूमत्वं चैतद् द्वितयमेव स्यात्, तत्र पर्याप्ता या अवच्छेदकता सा हेतुतावच्छेदकता एव, तादृशहेतुताऽ-

●

અવચ્છેદકતાનિરૂપકવિશેષ્યતાનિરૂપિતઅવ્યભિચારપદાર્થતાઅવચ્છેદકતાસમાનાધિકરણઅવચ્છેદકતાનિરૂપકવિષયતાઅનવચ્છિન્નત્વને સાધ્ય બનાવો અને તે જ રીતે હેતુ બનાવો તો ફક્ત ધૂમત્વનિષ્ઠ હેતુતાઅવચ્છેદકતા ગ્રહણ ન કરી શકાય. કારણ કે હેતુતાઅવચ્છેદકતા ફક્ત ધૂમત્વમાં જ પર્યાપ્ત નથી. કિંતુ ધૂમત્વ અને સાધ્યાભાવવદ્અવૃત્તિત્વ ઉભયમાં પર્યાપ્ત છે. આ ઉભયમાં રહેલ હેતુતાઅવચ્છેદકતાનિરૂપકવિશેષ્યતાનિરૂપિતપ્રકારતા પૂર્વે જણાવેલ કારણસર અવ્યભિચારપદાર્થમાં ન જ જાય. કારણ કે પર્યાપ્તહેતુતાઅવચ્છેદકતા લેવા દ્વારા અવ્યભિચારપદાર્થનિષ્ઠપ્રકારતાનું ગ્રહણ થઈ જ ગયું. હવે તદતિરિક્ત વ્યાપ્તિ તરીકેની કોઈ પ્રકારતા અવ્યભિચારપદાર્થમાં નથી જ. કારણ કે તેવી પ્રકારતા તો હેતુસમાનાધિકરણઅત્યંતાભાવઅપ્રતિયોગિસાધ્યસામાનાધિકરણ્યસ્વરૂપ સિદ્ધાંતવ્યાપ્તિમાં છે. આમ, તાદૃશવિષયતાથી અનવચ્છિન્ન જ પરામર્શનિષ્ઠઅનુમિતિજનકતા બનવાને કારણે બાધ અને ભાગઅસિદ્ધિ દોષને કોઈ અવકાશ નથી. આ રીતે આપણે 'પ્રકૃતહેતુતાઅવચ્છેદકપર્યાપ્તઅવચ્છેદકતાકવિશેષ્યતાનિરૂપિતઅવ્યભિચારપદાર્થતાઅવચ્છેદકતાસમાનાધિકરણઅવચ્છેદકતાકવિષયતાઅનવચ્છિન્નત્વ'- આટલું સાધ્ય વ્યવસ્થિત જોઈ લીધું. હવે પ્રકૃતપક્ષતાઅવચ્છેદકતાપર્યાપ્તિઅધિકરણધર્મપર્યાપ્તઅવચ્છેદકતાકવિશેષ્યતાનિરૂપિતવિષયતાઅભિન્ન - આટલું જે પ્રકૃતહેતુતાઅવચ્છેદકતાકપર્યાપ્તઅવચ્છેદકતાકવિશેષ્યતાનું વિશેષણ છે તેનો અર્થ જોઈએ -

વહ્નિઅભાવવદ્અવૃત્તિધૂમસમાનાધિકરણઅત્યંતાભાવઅપ્રતિયોગિવહ્નિસમાનાધિકરણ-

वच्छेदकतानिरूपकविशेष्यता हेतौ, तादृशविशेष्यतानिरूपितप्रकारता तादृशवह्निसामानाधिकरण्ये एव, न तु वह्न्यभाववदवृत्तित्वे, हेतुताऽवच्छेदकतायाः पर्याप्तिसम्बन्धेन अधिकरणविधया तस्य ग्रहणात्, तदतिरिक्तप्रकारतायाः तत्राऽसत्त्वात् । यदि व्याप्तिविधया वह्न्यभाववदवृत्तित्वं स्यात् तदा तत्र हेतुताऽवच्छेदकताकविशेष्यतानिरूपिता प्रकारता स्यादेव, किन्तु पूर्वोक्तयुक्त्या व्याप्तिविधया वह्न्यभाववदवृत्तित्वस्य भानं न भवति किन्तु तादृशवह्निसामानाधिकरण्यस्यैव भानं भवति । ततश्च प्रकृतहेतुतावच्छेदकतायाः यत् पर्याप्त्या अधिकरणं तत्र पर्याप्ता याऽवच्छेदकता तन्निरूपिका या विशेष्यता तन्निरूपिता प्रकारता साध्याभाववदवृत्तित्वे नास्ति, अतः तादृशविशेष्यता-निरूपितसाध्याभाववदवृत्तित्वनिष्ठप्रकारताऽनवच्छिन्ना एव तादृशपरामर्शनिष्ठाऽनुमितिजनकता ।

य
शो
ल
ता

तथा च प्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणपर्याप्तहेतुताऽवच्छेदकताकविशेष्यतानिरूपिताऽ-व्यभिचारपदार्थनिष्ठप्रकारताऽनवच्छिन्नत्वरूपसाध्यस्य तथा प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरण-पर्याप्तहेतुताऽवच्छेदकतानिरूपकविशेष्यतानिरूपितसाध्याभाववदवृत्तित्वादिनिष्ठप्रकारताऽवच्छिन्न-त्वाऽभावकूटरूपहेतोश्च उक्तपरामर्शनिष्ठाऽनुमितिजनकतारूपपक्षैकदेशेऽपि सत्त्वान्न बाध-भागासिद्धी ।

●

વહ્નિઅભાવવદ્અવૃત્તિધૂમવાન્ પર્વત - આ પરામર્શમાં જે રીતે હેતુની (હેતુનિરૂપિત) પ્રકારતા હેતુસમાનાધિકરણઅત્યંતાભાવઅપ્રતિયોગિસાધ્યસામાનાધિકરણ્યમાં રહે છે તે રીતે પક્ષની (પક્ષનિરૂપિત) પ્રકારતા વહ્નિઅભાવવદ્અવૃત્તિધૂમમાં રહે છે. માટે કહી શકાય કે પક્ષનિષ્ઠવિશેષ્યતાનિરૂપિતહેતુનિષ્ઠપ્રકારતાઆખ્યવિષયતાઅભિન્નવિશેષ્યતાનિરૂપિત-અવ્યભિચારપદાર્થનિષ્ઠપ્રકારતાથી અનવચ્છિન્ન તાદૃશપરામર્શનિષ્ઠઅનુમિતિજનકતા છે. તે આ રીતે - પ્રસ્તુતમાં પક્ષ પર્વત છે. તેમાં પક્ષતા રહે. પક્ષતાઅવચ્છેદક પર્વતત્વ બને. પક્ષતાવચ્છેદકતા પ્રસ્તુતમાં એકમાત્ર પર્વતત્વમાં જ પર્યાપ્ત છે. માટે પ્રકૃતપક્ષતાઅવચ્છેદકતા-પર્યાપ્તિઅધિકરણીભૂતધર્મ = પર્વતત્વ. તેમાં પર્યાપ્ત એવી જે પક્ષતાઅવચ્છેદકતા તાદૃશપક્ષતા-અવચ્છેદકતાનિરૂપક પર્વતનિષ્ઠવિશેષ્યતા છે. પૂર્વે જણાવેલ હતું તે મુજબ પ્રકારતા-અવચ્છેદકતાનિરૂપક પ્રકારનિષ્ઠધર્મ બને. તે રીતે પક્ષતાઅવચ્છેદકતાનિરૂપક પક્ષનિષ્ઠધર્મ બને. પ્રસ્તુતમાં હેતુની અપેક્ષાએ પક્ષમાં વિશેષ્યતા નામનો ધર્મ આવે છે. માટે ઉક્તપક્ષતા-અવચ્છેદકતાનિરૂપક પક્ષનિષ્ઠવિશેષ્યતા બને. એતાદૃશવિશેષ્યતાનિરૂપિતપ્રકારતા હેતુમાં રહે તથા વ્યાપ્તિની અપેક્ષાએ હેતુમાં વિશેષ્યતા પણ છે. સમાનાધિકરણધર્મનું ઐક્ય નૈયાયિકોમાં પ્રસિદ્ધ જ છે. માટે તાદૃશપક્ષતાઅવચ્છેદકતાનિરૂપકપક્ષનિષ્ઠવિશેષ્યતાનિરૂપિત-હેતુનિષ્ઠપ્રકારતાઆખ્યવિષયતાઅભિન્નહેતુતાઅવચ્છેદકતાકહેતુનિષ્ઠવિશેષ્યતા - આ પ્રમાણે

વિ
ન
ભા

अत्राऽनुमानमेवम् - अनुमितिजनकता प्रकृतपक्षताऽवच्छेदकनिष्ठप्रकृतपक्षताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपिताऽव्यभिचारपदार्थनिष्ठप्रकारताऽनवच्छिन्ना, प्रकृतपक्षताऽवच्छेदकनिष्ठप्रकृतपक्षताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितसाध्याभाववदवृत्तित्वादिनिष्ठप्रकारताऽवच्छिन्नत्वाभावकूटात् ।

अत्र प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकतारूपेण हेतुताऽवच्छेदकता एव प्राप्यते इति तत्र 'हेतुता'इतिपदं न निवेशितम् । ग्रन्थकृता 'प्रकृतहेतुताऽवच्छेदकपर्याप्ताऽवच्छेदकताकविशेष्यता' इत्येवं यल्लिखितं तस्याऽपि अर्थः 'प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यता' इत्येवमेव बोध्यः, पक्षताऽवच्छेदकतापर्याप्तिनिवेशस्य ग्रन्थकृता तथैव दर्शितत्वात्, सर्वपदसार्थक्यसम्भवाच्च । तथा हि - अत्र 'प्रकृतहेतुताऽवच्छेदकपर्याप्ताऽवच्छेदकता' इत्येवमेव निवेशे पुनः बाध-भागासिद्धिप्रसङ्गः । प्रकृतहेतुताऽवच्छेदकविधया केवलं धूमत्वमेव ग्राह्यम्, तत्र पर्याप्ता या काऽपि अवच्छेदकता तन्निरूपकविशेष्यतानिरूपितप्रकारता वह्न्यभाववदवृत्तित्वे भविष्यत्येव, धूमत्वपर्याप्तावच्छेदकतारूपेण वह्न्यभाववदवृत्तित्वनिष्ठावच्छेदकताया असङ्ग्रहेण धूमत्वापेक्षया यद् विशेष्यत्वं हेतौ प्राप्यते तन्निरूपितप्रकारतायाः हेतुतावच्छेदकतारूपायाः साध्याभाववदवृत्तित्वे प्राप्यत्वात् । तथा च पूर्वोक्तरीत्यैव उक्ताऽऽपत्तिद्वितयम् । यदा 'प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकता' इत्येवं निवेश्यते

●

ફલિત થયું. પક્ષતાઅવચ્છેદકતાપર્યાપ્તિના નિવેશનું ફળ હમણાં જ બતાવવામાં આવશે. સૌ પ્રથમ આખું સાધ્ય ખૂટતો મસાલો પૂરીને ફરીથી જોઈ લઈએ. કૌંસમાં બતાવેલ શબ્દ દ્વારા પક્ષતાઅવચ્છેદક વગેરેની જગ્યાએ **'पर्वतो वह्निमान् वह्न्यभाववदवृत्तिधूमात्'** આ સ્થળમાં જે જે આવતું હશે, તે જણાવવામાં આવશે.

प्रकृतपक्षताअवच्छेदकतापर्याप्तिअधिकरणीभूतधर्म(=पर्वतत्व)पर्याप्तपक्षताअवच्छेदकतानिरूपकपक्ष(=पर्वत)निष्ठविशेष्यतानिरूपितहेतु(वह्निअभाववद्अवृत्तिधूम)निष्ठप्रकारताआख्यविषयताअभिन्नप्रकृतहेतुताअवच्छेदक(=वह्निअभाववद्अवृत्तित्व + धूमत्व) पर्याप्तहेतुताअवच्छेदकतानिरूपकहेतुनिष्ठविशेष्यतानिरूपितअव्यभिचारपदार्थताअवच्छेदकतासमानाधिकरणप्रकारताअवच्छेदकतानिरूपकप्रकारताआख्यविषयताअनवच्छिन्नत्व = साध्य.

तदा प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरणधर्मविधया वह्न्यभाववदवृत्तित्वं धूमत्वं चैतद्द्वितयमेव गृह्यते । एतादृशधर्मद्वयपर्याप्ताऽवच्छेदकता हेतुताऽवच्छेदकता एव । केवलधूमत्वपर्याप्ता अवच्छेदकता अन्याऽपि सम्भवति, किन्तु वह्न्यभाववदवृत्तित्व-धूमत्वोभयपर्याप्ता अवच्छेदकता प्रकृते हेतुताऽवच्छेदकता एव भवति । प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरणीभूतधर्मद्वयनिष्ठा अवच्छेदकताऽपि अन्या भवति, किन्तु तादृशधर्मद्वयपर्याप्ताऽवच्छेदकता (= तादृशधर्मद्वये वर्तमाना, इतरस्मिन्नवर्तमाना) तु हेतुताऽवच्छेदकतैव भवति इत्यतः उभयत्र पर्याप्तिनिवेशः । तादृशधर्मद्वयपर्याप्तावच्छेदकताविधया अन्यस्या प्रकारताद्यवच्छेदकतायाः (परामर्शे तादृशधर्मद्वयस्य प्रकारतावच्छेदकत्वात्) प्राप्तौ अपि हेतुतावच्छेदकतायाः उभयधर्मनिष्ठायाः तादृशपर्याप्तावच्छेदकताविधया सङ्ग्रहात् तादृशावच्छेदकताकविशेष्यतानिरूपिता तदतिरिक्ता न काऽपि प्रकारता अव्यभिचारपदार्थे लभ्यते इति न दोषः ।

यदि 'प्रकृतहेतुताऽवच्छेदकपर्याप्ताऽवच्छेदकताकविशेष्यता' इत्येवमेव निवेश्यते, ततः एव सर्वसामञ्जस्यं स्वीक्रियते, प्रकृतहेतुताऽवच्छेदकपर्याप्ताऽवच्छेदकताविधया उभयधर्मनिष्ठावच्छेदकतायाः एव ग्रहणसम्भवात्, ***तर्हि*** 'प्रकृतपक्षताऽवच्छेदकपर्याप्ताऽवच्छेदकताकविशेष्यता' इत्येवमेव निवेशनीयमिति बोध्यम् । पक्षताऽवच्छेदकतापर्याप्तिरनुपदमेव निवेशयिष्यते इति ध्येयम् ।

नन्वेवमपि सिद्धसाधनदोषः दुर्निवारः । तथा हि - यः विद्वान् द्वितीयलक्षणमङ्गीकरोति तस्य मते साध्याभाववदवृत्तित्वं नैव परामर्शे भासते, किन्तु साध्यवद्भिन्नसाध्याभाववदवृत्तित्वमेव । ततश्च साध्याभाववदवृत्तित्वे तादृशप्रकारता न भवति इति द्वितीयलक्षणाङ्गीकर्तॄणां मते सिद्धमेव । तथा च प्रकृतपक्षताऽवच्छेदकनिष्ठप्रकृतपक्षताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-

●

❁ હેતુનું વિવરણ ❁

આ જ રીતે તાદૃશહેતુવિષયતા દ્વારા હેતુનિષ્ઠવિશેષ્યતા સુધીનું આખું લઈ સાધ્યાભાવવદ્અવૃત્તિત્વત્વથી અવચ્છિન્ન વિષયતાથી અનવચ્છિન્નત્વને = અવચ્છિન્નત્વાભાવકૂટને હેતુ બનાવવો. એટલે કે પ્રકૃતપક્ષતાઅવચ્છેદકતાપર્યાપ્તિઅધિકરણીભૂતધર્મપર્યાપ્તપક્ષતાઅવચ્છેદકતાનિરૂપકપક્ષનિષ્ઠવિશેષ્યતાનિરૂપિતહેતુનિષ્ઠપ્રકારતાઆખ્યવિષયતાઅભિન્નપ્રકૃતહેતુતાઅવચ્છેદકપર્યાપ્તહેતુતાઅવચ્છેદકતાનિરૂપકહેતુનિષ્ઠવિશેષ્યતાનિરૂપિતસાધ્યાભાવવદ્અવૃત્તિત્વત્વઆદિઅવચ્છિન્નવિષયતાવચ્છિન્નત્વઅભાવકૂટવત્ત્વ એ હેતુ બનશે.

प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपिताऽव्यभिचार-पदार्थनिष्ठप्रकारताऽनवच्छिन्नत्वमनुमितिजनकतायां तन्मते सिद्धमेव स्यात्, अव्यभिचारपदार्थविधया प्रथमलक्षणस्यैव गृहीतत्वात्, साध्याभाववदवृत्तित्वे तादृशप्रकारतायाः तेनाऽनङ्गीकारात् । तथा च सिद्धसाधन***मिति चेद्*** ?

न; अव्यभिचारपदार्थत्वसमानाधिकरणतादृशप्रकारताऽनवच्छिन्नत्वस्य साध्यत्वाङ्गीकारे उक्तदोषाभावात् । तथा हि - द्वितीयलक्षणाङ्गीकर्ता विद्वान् साध्यवद्भिन्नसाध्याभाववदवृत्तित्वे तादृशप्रकारतां स्वीकुर्यादेव । सा च अव्यभिचारपदार्थत्वसमानाधिकरणैव । तथा च तन्मते अव्यभिचारपदार्थत्वसमानाधिकरणप्रकारताऽवच्छिन्ना एव अनुमितिजनकता स्यात्, एतदनुमानेन अव्यभिचारपदार्थत्वसमानाधिकरणप्रकारताऽनवच्छिन्नत्वमनुमितिजनकतायां साध्यते, तच्च तन्मतेऽसिद्धम् ततः न सिद्धसाधनमित्येवं केचन प्रश्नोत्तरपूर्वकं अव्यभिचारपदार्थत्वसामानाधिकरण्य-प्रवेशं सार्थकयन्ति । वस्तुतः वक्ष्यमाणाऽऽपत्तिवशेन एतस्मादपि अधिकपरिष्कारस्य कर्तव्यत्वमिति ध्येयम् ।

तथा चैतन्मतानुसारेणैवमनुमानं फलितम् - अनुमितिजनकता प्रकृतपक्षताऽवच्छेदकनिष्ठप्रकृत-पक्षतावच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरणधर्म-पर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपिताऽव्यभिचारपदार्थत्वसमानाधिकरणप्रकारताऽनवच्छिन्ना, प्रकृतपक्षताऽवच्छेदकनिष्ठप्रकृतपक्षताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुता-वच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितसाध्याभाववदवृत्तित्वनिष्ठ-प्रकारताऽवच्छिन्नत्वाऽभावकूटात् ।

नन्वेवमपि बाध-भागासिद्धी स्यातामेव । तथा हि - धूमः वह्न्यव्यभिचारी, वह्न्यभाववद-वृत्तित्वाद् - इत्येवमनुमानम् । अव्यभिचरितत्वपदार्थः = साध्याभाववदवृत्तित्वमेतत् सर्वेषां सम्मतम्, किन्तु तद् व्याप्तितया भवितुं नार्हति इत्येवाऽत्र साध्यते इति बोध्यम् । तथा च यः यः वह्न्यभाववदवृत्तित्वविशिष्टः सः सः वह्न्यव्यभिचारी, यत्र यत्र च वह्न्यभाववदवृत्तित्वं तत्र तत्र वह्न्यव्यभिचारित्वम् - इत्येवं व्याप्तिः फलिता । एतादृशानुमितिजनकता 'वह्न्यव्य-भिचारित्वनिरूपितव्याप्तिविशिष्टवह्न्यभाववदवृत्तित्वविशिष्टः धूमः' - इत्याकारकपरामर्शे । अत्र वह्न्यभाववदवृत्तित्वमेव हेतुः । एतदनुसारेण यत्र वह्न्यभाववदवृत्तित्वं हेतुताऽवच्छेदकं तादृशं स्थलं परामर्शनीयम् । तच्च यथा - धूमविशिष्टः पर्वतः, वह्न्यव्यभिचारिविशिष्टः,

वह्न्यभाववदवृत्तित्वविशिष्टवत्त्वात् । अत्र वह्न्यभाववदवृत्तित्वविशिष्टः हेतुः, वह्न्यभाववदवृत्तित्वं हेतुताऽवच्छेदकम् । अत्राऽपि पूर्ववदेव व्याप्तिः भवति यदुत - यत्र यत्र वह्न्यभाववदवृत्तित्वविशिष्टः पदार्थः भवति तत्र तत्र वह्न्यव्यभिचारिपदार्थः अपि भवत्येव । तथा चैतत् सत्स्थलम् । एतादृशाऽनुमितिजनकता 'वह्न्यव्यभिचारिनिरूपितव्याप्तिविशिष्टवह्न्यभाववदवृत्तित्वविशिष्टवान् पर्वतः' इत्याकारकपरामर्शे भवति ।

अत्रेदं ध्येयम् - व्याप्तिः हेतुताऽवच्छेदकरूपा सिद्धान्ते अङ्गीकृता । यथा तादृशवह्निसामानाधिकरण्यरूपां व्याप्तिं धूमे अनङ्गीकृत्य तादृशवह्निसमानाधिकरणधूमनिष्ठधूमत्वरूपा एव व्याप्तिः अङ्गीकृता । तथा च 'पर्वतो वह्निमान् धूमाद्' इत्यादिस्थले 'धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसमानाधिकरणनिष्ठधूमत्वविशिष्टधूमवान् पर्वतः' इत्येवं परामर्शः अङ्गीक्रियते । एवमेव प्रकृतस्थलेऽपि व्याप्तेः हेतुतावच्छेदकरूपत्वेन 'वह्न्यभाववदवृत्तित्वविशिष्टसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्न्यव्यभिचारिसमानाधिकरणनिष्ठवह्न्यभाववदवृत्तित्वविशिष्टवह्न्यभाववदवृत्तिपदार्थवान् पर्वतः' इत्येवमेव परामर्शः भवति । अत्र वह्न्यभाववदवृत्तित्वविशिष्टः पदार्थः = वह्न्यभाववदवृत्तिपदार्थः हेतुः तत्र व्याप्तिविधया वह्न्यभाववदवृत्तित्वस्यैव भानमभवत्, व्याप्तेः हेतुताऽवच्छेदकरूपत्वेन उक्तरीत्या वह्न्यभाववदवृत्तित्वरूपत्वात् ।

यद्यपि न केवलं वह्न्यभाववदवृत्तित्वमेव व्याप्तिविधया भासते, किन्तु वह्न्यभाववदवृत्तित्वविशिष्ट(= हेतु)समानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्न्यव्यभिचारि(= साध्य)समानाधिकरण(हेतु)वृत्तिवह्न्यभाववदवृत्तित्वम् (= हेतुताऽवच्छेदकम्, तदेव व्याप्तिः) एव भासते ***तथापि*** व्याप्तौ या हेतुनिरूपिता प्रकारता भवति सा वह्न्यभाववदवृत्तित्वेऽपि भवेदेव । तथा चाऽत्र प्रकृतपक्षताऽवच्छेदकीभूतपर्वतत्वनिष्ठप्रकृतपक्षताऽवच्छेदकतानिरूपकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणीभूतवह्न्यभाववदवृत्तित्वपर्याप्तप्रकृतहेतुताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारता हेतुसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिसाध्यसमानाधिकरणनिष्ठवह्न्यभाववदवृत्तित्वे भवेदेव, उक्तपरामर्शे वह्न्यभाववदवृत्तित्वस्य हेतुताऽवच्छेदकवद् व्याप्तिविधयाऽपि विषयत्वात् । यदि वह्न्यभाववदवृत्तित्वं केवलहेतुताऽवच्छेदकरूपेणैव उक्तपरामर्शे विषयं स्यात् तदा तादृशप्रकारता तस्मिन् न स्यात्, किन्तु उक्तयुक्त्या हेतुताऽवच्छेदकस्य व्याप्तिरूपत्वेन व्याप्तिविधयाऽपि वह्न्यभाववदवृत्तित्वं उक्तपरामर्शे विषयं भवति, ततः उक्तप्रकारता तादृशवह्न्यभाववदवृत्तित्वे स्यादेव । तथा च अव्यभिचारपदार्थे साध्याभाववदवृत्तित्वरूपे तादृश-

य शो ल ता

प्रकारतायाः सत्त्वेन उक्तपरामर्शनिष्ठाऽनुमितिजनकतायां प्रकृतपक्षताऽवच्छेदकनिष्ठप्रकृतपक्षताऽवच्छेदकतानिरूपकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकतानिरूपकविशेष्यतानिरूपिताऽव्यभिचारपदार्थत्वसमानाधिकरणप्रकारताऽवच्छिन्नत्वं प्रकृतपक्षताऽवच्छेदकनिष्ठप्रकृतपक्षताऽवच्छेदकतानिरूपकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकतानिरूपकविशेष्यतानिरूपितसाध्याभाववदवृत्तित्वनिष्ठप्रकारताऽवच्छिन्नत्वं चैव स्याताम् ।

ततः प्रकृतपक्षताऽवच्छेदकनिष्ठप्रकृतपक्षताऽवच्छेदकतानिरूपकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपिताऽव्यभिचारपदार्थत्वसमानाधिकरणप्रकारताऽनवच्छिन्नत्वरूपसाध्यं प्रकृतपक्षताऽवच्छेदकनिष्ठप्रकृतपक्षताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितसाध्याभाववदवृत्तित्वादिनिष्ठप्रकारताऽवच्छिन्नत्वाभावकूटरूपहेतुश्च तादृशाऽनुमितिजनकतायां न स्यातामिति बाध-भागासिद्ध्योर्दुर्वारत्वमिति ।

न च पर्वतः वह्न्यव्यभिचारिविशिष्टः... इत्याद्यप्रसिद्धाऽनुमितिपर्यन्तं किमर्थमनुधावनम् ? पर्वतो वह्निमान्, वह्न्यभाववदवृत्तिधूमाद्' इत्यत्रैवोक्ताऽऽपत्तिः प्रदर्शनीया, उक्तस्थलवद् अत्राऽपि वह्न्यभाववदवृत्तित्वस्य हेतुताऽवच्छेदकत्वात्, व्याप्तेः हेतुताऽवच्छेदकरूपत्वेन उक्तस्थले इव अत्राऽपि उक्ताऽऽपत्तिसम्भवा***दिति वाच्यम्;***

'पर्वतो वह्निमान् वह्न्यभाववदवृत्तिधूमाद्' - इत्यादौ वह्न्यभाववदवृत्तिधूमत्वस्य वह्न्यभाववदवृत्तित्व-धूमत्वोभयस्य वा हेतुताऽवच्छेदकत्वेन व्याप्तेरपि तद्रूपतासिद्ध्या उक्ताऽऽपत्त्यसम्भवात् । यदि केवलं वह्न्यभाववदवृत्तित्वमेव हेतुताऽवच्छेदकं स्यात्तदैव उक्ताऽऽपत्तिः सम्भवति, प्रदर्शितस्थले केवलवह्न्यभाववदवृत्तित्वमेव हेतुताऽवच्छेदकमस्ति, अस्तु वा वह्न्यभाववदवृत्तिधूमहेतुकस्थलेऽपि आपत्तिः, न नः क्षतिः इति सूक्ष्ममीक्षणीयम् । तथा च अव्यभिचारपदार्थत्वसामानाधिकरण्यं प्रवेशयतु मा वा उक्ताऽऽपत्तिरपरिहार्या ***इति चेद्*** ?

नः तादृशाऽव्यभिचारपदार्थताऽवच्छेदकतासमानाधिकरणाऽवच्छेदकताकप्रकारताऽनवच्छिन्नत्वस्य साध्यत्वाङ्गीकारे तादृशसाध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नप्रकारतावच्छिन्नत्वाभावकूटस्य च हेतुत्वाङ्गीकारे उक्तदोषाभावात् । तथा हि - उक्तस्थले वह्न्यभाववदवृत्तित्वे तादृशप्रकारता अस्ति इति स्वीकृतम्, किन्तु तादृशप्रकारताऽवच्छेदकं किम् ? हेतुसमानाधिकरणाऽत्यन्ताभावाऽ-

प्रतियोगिसाध्यसमानाधिकरणवृत्तिवह्न्यभाववदवृत्तित्वत्वम् एव, अव्यभिचारपदार्थताऽवच्छेदकता च केवलवह्न्यभाववदवृत्तित्वत्वे, 'विशिष्टं शुद्धान्नातिरिच्यते' इतिन्यायेन तादृशविशिष्टवह्न्यभाववदवृत्तित्वस्य शुद्धवह्न्यभाववदवृत्तित्वतोऽनतिरेकेऽपि विशिष्टवह्न्यभाववदवृत्तित्वत्वस्य शुद्धतत्त्वतोऽवश्यमतिरेकाद् इति अव्यभिचारपदार्थताऽवच्छेदकता तादृशप्रकारताऽवच्छेदकता च द्वयोः सामानाधिकरण्यं नाऽभवत्, तथा च तादृशप्रकारता यदवच्छेदकतानिरूपिका सा अव्यभिचारपदार्थताऽवच्छेदकताऽसमानाधिकरणा, अव्यभिचारपदार्थताऽवच्छेदकतासमानाधिकरणाऽवच्छेदकतानिरूपकतादृशप्रकारता उक्तपरामर्शीया वह्न्यभाववदवृत्तित्वे नैव वर्तते । यदि तादृशप्रकारताऽवच्छेदकता अव्यभिचारपदार्थताऽवच्छेदकतासमानाधिकरणा स्यात् तदा अव्यभिचारपदार्थताऽवच्छेदकतासमानाधिकरणावच्छेदकतानिरूपकप्रकारता भवेत्, किन्तु तादृशप्रकारताऽवच्छेदकता अव्यभिचारपदार्थताऽवच्छेदकतासमानाधिकरणा नास्ति, ततः अव्यभिचारपदार्थे तादृशप्रकारतायाः सत्त्वेऽपि तस्याः अव्यभिचारपदार्थताऽवच्छेदकतासमानाधिकरणाऽवच्छेदकतानिरूपकत्वाऽभावाद् उक्तपरामर्शनिष्ठाऽनुमितिजनकतायां प्रकृतपक्षताऽवच्छेदकनिष्ठप्रकृतपक्षताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपिताऽव्यभिचारपदार्थताऽवच्छेदकतासमानाधिकरणाऽवच्छेदकताकप्रकारताऽनवच्छिन्नत्वमेव स्यादिति न बाधः ।

एवञ्च उक्तपरामर्शनिष्ठाऽनुमितिजनकतायां साध्याभाववदवृत्तित्वनिष्ठतादृशप्रकारताऽवच्छिन्नत्वस्य सत्त्वेऽपि साध्याभाववदवृत्तित्वत्वाऽवच्छिन्नतादृशप्रकारताऽवच्छिन्नत्वं नास्त्येव । तादृशाऽनुमितिजनकताऽवच्छेदिका प्रकारता हेतुसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिसाध्यसमानाधिकरणनिष्ठवह्न्यभाववदवृत्तित्वत्वाऽवच्छिन्ना, न तु शुद्धवह्न्यभाववदवृत्तित्वत्वाऽवच्छिन्ना, ततश्च उक्तपरामर्शनिष्ठाऽनुमितिजनकतायां वह्न्यभाववदवृत्तित्वत्वावच्छिन्नप्रकारताऽवच्छिन्नत्वाभावस्यैव सत्त्वात् प्रकृतपक्षताऽवच्छेदकनिष्ठप्रकृतपक्षताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितसाध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नप्रकारतावच्छिन्नत्वाभावकूटः एव स्यादिति न भागासिद्धिः ।

ततश्चैवमनुमानम् - अनुमितिजनकता प्रकृतपक्षताऽवच्छेदकनिष्ठप्रकृतपक्षताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपिताऽव्यभिचारपदार्थताऽवच्छेदकतासमानाधिकरणाऽवच्छेदकताकप्रकारताऽ-

नवच्छिन्ना, प्रकृतपक्षताऽवच्छेदकनिष्ठप्रकृतपक्षताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितसाध्याभाववद-वृत्तित्वत्वाद्यवच्छिन्नप्रकारताऽवच्छिन्नत्वाभावकूटात् ।

नन्वेवमपि न निस्तारः, बाध-भागासिद्धी स्यातामेव । तथा हि - यथा महानसीयवह्निनिष्ठ-साध्यताया अवच्छेदकता महानसीयवह्नित्वे महानसीयत्व-वह्नित्वोभयस्मिन् वा भवति तथैव प्रकृते 'हेतुसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिसाध्यसमानाधिकरणनिष्ठवह्न्यभाववदवृत्तित्व-विशिष्टवह्न्यभाववदवृत्तिपदार्थविशिष्टः पर्वतः' इत्याकारकपरामर्शीयतादृशप्रकारतायाः अव-च्छेदकता यथा हेतुसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिसाध्यसमानाधिकरणनिष्ठवह्न्यभाव-वदवृत्तित्वत्वे भवति तथैव हेतुसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिसाध्यसामानाधिकरण्य -वह्न्यभाववदवृत्तित्वत्वोभयस्मिन् अपि स्यात्, तादृशवह्न्यभाववदवृत्तित्वे तादृशसामानाधिकरण्यस्य परम्परया, वह्न्यभाववदवृत्तित्वत्वस्य च साक्षात्प्रकारत्वात् । ततश्च तादृशप्रकारताऽवच्छेदकता स्वरूपसम्बन्धेन वह्न्यभाववदवृत्तित्वत्वे स्यादेव । पर्याप्त्या (= पर्याप्तिसम्बन्धेन) तादृशाऽवच्छेदकता उभयस्मिन् एव स्यात्, किन्तु स्वरूपसम्बन्धेन तु केवलवह्न्यभाववदवृत्तित्वत्वेऽपि स्यादेवेति अव्यभिचारपदार्थताऽवच्छेदकतासमानाधिकरणा तादृशप्रकारताऽवच्छेदकता अभवत् । ततश्च उक्तपरामर्शनिष्ठानुमितिजनकता अव्यभिचारपदार्थताऽवच्छेदकतासमानाधिकरणाऽवच्छेदकताक-प्रकारताऽवच्छिन्ना एव स्यात्, साध्याभाववदवृत्तित्वत्वाऽवच्छिन्नप्रकारताऽवच्छिन्ना च ।

य शो ल ता

ततश्च तादृशाऽनुमितिजनकतायां प्रकृतपक्षताऽवच्छेदकनिष्ठप्रकृतपक्षताऽवच्छेदकताक-विशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताक-विशेष्यतानिरूपिताऽव्यभिचारपदार्थताऽवच्छेदकतासमानाधिकरणाऽवच्छेदकताकप्रकारताऽवच्छिन्नत्व-स्यैव सत्त्वेन तादृशप्रकारताऽनवच्छिन्नत्वरूपसाध्यस्याऽसत्त्वात् प्रकृतपक्षताऽवच्छेदकनिष्ठ-प्रकृतपक्षताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरण-धर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितसाध्याभाववदवृत्तित्वत्वाऽवच्छिन्नप्रकारताऽवच्छिन्नत्वस्यैव सत्त्वेन तादृशविशेष्यतानिरूपितसाध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नप्रकारताऽवच्छिन्नत्वाभावकूटस्य असत्त्वाद् बाध-भागासिद्ध्योः प्रसङ्गो दुर्वारः ***इति चेद् ?***

नः पर्याप्तिनिवेशेन तद्वारणसम्भवात् । तथा हि - 'हेतुसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगि-साध्यसमानाधिकरणनिष्ठवह्न्यभाववदवृत्तित्वविशिष्टवह्न्यभाववदवृत्तिपदार्थविशिष्टः पर्वतः' -

इत्याकारकोक्तपरामर्शीयतादृशप्रकारताऽवच्छेदकतायाः पर्याप्तिसम्बन्धेन केवलवह्न्यभाववदवृत्तित्वत्वे असत्त्वमेव । स्वरूपसम्बन्धेनैव तादृशप्रकारताऽवच्छेदकता केवलवह्न्यभाववदवृत्तित्वत्वे वर्तते, पर्याप्तिसम्बन्धेन तु हेतुसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिसाध्यसामानाधिकरण्य-वह्न्यभाववद-वृत्तित्वत्वोभयस्मिन् एव स्यात् । तथा च तादृशपरामर्शनिष्ठाऽनुमितिजनकतायाः अव्यभिचार-पदार्थताऽवच्छेदकनिष्ठाऽवच्छेदकतानिरूपकप्रकारताऽवच्छिन्नत्वेऽपि अव्यभिचारपदार्थताऽ-वच्छेदकपर्याप्ताऽवच्छेदकतानिरूपकप्रकारताऽनवच्छिन्नत्वमेव । यदि पर्याप्तिसम्बन्धेन तादृश-प्रकारताऽवच्छेदकता केवलवह्न्यभाववदवृत्तित्वत्वे स्यात् तदैव अव्यभिचारपदार्थताऽवच्छेदक-पर्याप्ताऽवच्छेदकताकप्रकारताऽवच्छिन्नत्वं तादृशपरामर्शनिष्ठानुमितिजनकतायां स्यात्, किन्तु तन्न सम्भवति, वह्न्यभाववदवृत्तित्वस्य व्याप्तित्वसम्भवे एव तस्य सम्भवात्, तस्यैव च अशक्यत्वात्, केवलान्वयिन्यव्याप्तेरिति यावत् ।

एवं साध्याभाववदवृत्तित्वत्वावच्छिन्नतादृशप्रकारताऽवच्छिन्नत्वस्य तादृशाऽनुमितिजनकतायां सत्त्वेऽपि साध्याभाववदवृत्तित्वत्वपर्याप्ताऽवच्छेदकताकप्रकारताऽवच्छिन्नत्वाभावः एवेति न कोऽपि दोषः इति सूक्ष्मधिया पर्यालोचनीयम् ।

ततश्चैवमनुमानम् - अनुमितिजनकता प्रकृतपक्षताऽवच्छेदकनिष्ठप्रकृतपक्षताऽवच्छेदकताक-विशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकता-कविशेष्यतानिरूपिताऽव्यभिचारपदार्थताऽवच्छेदकपर्याप्ताऽवच्छेदकताकप्रकारताऽनवच्छिन्ना, प्रकृत-पक्षताऽवच्छेदकनिष्ठप्रकृतपक्षताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुताऽ-वच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितसाध्याभाववदवृत्तित्वत्वादि-पर्याप्ताऽवच्छेदकताकप्रकारताऽवच्छिन्नत्वाभावकूटात् ।

न च अत्र हेतुताऽवच्छेदकतापर्याप्तिनिवेशवत् किमर्थं निवेशः न कृतः ? यथा 'प्रकृतहेतुताऽ-वच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यता' इत्येवं हेतुताऽवच्छेदकतापर्याप्तिः निवेशिता तथा 'अव्यभिचारपदार्थताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकप्रकारता' इत्येवं किमर्थं लक्षणे न निविष्टम्, 'अव्यभिचारपदार्थताऽवच्छेदकपर्याप्तावच्छेदकताकप्रकारता' इत्येवमेव किमर्थं निवेशः कृतः ? ***इति शङ्कनीयम्;***

अव्यभिचारपदार्थताऽवच्छेदकतायाः साध्याभाववदवृत्तित्वत्वादिषु पञ्चसु पर्याप्तत्वेन तादृश-पञ्चधर्मेषु पर्याप्ताऽवच्छेदकताकप्रकारताऽवच्छिन्नत्वाभावस्य अनुमितिजनकतायां प्रत्येकलक्षणा-

ङ्गीकर्तृमते सिद्धत्वेन सिद्धसाधनप्रसङ्गात् । इदमत्र हृदयम् - यो विद्वान् साध्याभाववदवृत्तित्व-रूपप्रथमलक्षणमङ्गीकरोति तन्मते अव्यभिचारपदार्थताऽवच्छेदकपर्याप्ताऽवच्छेदकताकप्रकारताऽ-नवच्छिन्नत्वमसिद्धम्, साध्याभाववदवृत्तित्वत्वपर्याप्ताऽवच्छेदकताकप्रकारताऽवच्छिन्नत्वस्य तेन स्वीकारात्, तन्मते साध्याभाववदवृत्तित्वस्य व्याप्तित्वात्, किन्तु अव्यभिचारपदार्थताऽवच्छेदकता-पर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकप्रकारताऽनवच्छिन्नत्वं तु तन्मतेऽपि प्रसिद्धमेव, अव्यभिचार-पदार्थताऽवच्छेदकतापर्याप्त्यधिकरणविधया साध्याभाववदवृत्तित्वत्ववत् साध्यवद्भिन्नसाध्याभाव-वदवृत्तित्वत्वादेरपि ग्रहणेन तादृशधर्मपञ्चकपर्याप्तावच्छेदकताकप्रकारताऽवच्छिन्नत्वस्य तेन अनङ्गीकारात् । न हि कस्मिंश्चिदपि परामर्शे कस्याऽपि मतेन नियमेन लक्षणपञ्चकस्य व्याप्तिविधया भानं भवति ।

किञ्च, साध्याभाववदवृत्तित्वं केवलमपि व्याप्तिविधया न भासते इत्येवमत्र साधनीयम्, उक्तरीत्या पर्याप्तेरुभयत्र निवेशे साध्याभाववदवृत्तित्वादिलक्षणपञ्चकं युगपत् कस्मिंश्चिदपि परामर्शे न भासते - इति एव सिध्येत् । तथा च नाऽभिप्रेतार्थसिद्धिः इति एकत्रैव पर्याप्तिनिवेशः उचितः । प्रकृतहेतुताऽवच्छेदकतायाः यावन्ति अधिकरणानि तेषां सर्वेषामपि ग्रहणस्याऽभिप्रेतत्वेन तत्र तन्निवेशः औचित्यमावहति, अत्र अव्यभिचारपदार्थताऽवच्छेदकतायाः सर्वेषाम् अधिकरणानां ग्रहणमनभिप्रेतम् इति उक्तमेव युक्तम् इति सूक्ष्ममीक्षणीयम् ।

प्रथमलक्षणाङ्गीकर्तृमतेऽपि अव्यभिचारपदार्थताऽवच्छेदकपर्याप्ताऽवच्छेदकताकप्रकारताऽ-वच्छिन्नत्वाभावस्याऽसिद्धत्वेन अव्यभिचारपदार्थताऽवच्छेदकविधया साध्यवद्भिन्नसाध्याभाववद-वृत्तित्वत्वमादाय न सिद्धसाधनम्, साध्यवद्भिन्नसाध्याभाववदवृत्तित्वत्वपर्याप्ताऽवच्छेदकताक-प्रकारताऽनवच्छिन्नत्वस्य सिद्धत्वेऽपि साध्याभाववदवृत्तित्वत्वपर्याप्ताऽवच्छेदकताकप्रकारताऽ-नवच्छिन्नत्वस्य असिद्धत्वेन अव्यभिचारपदार्थताऽवच्छेदकपर्याप्ताऽवच्छेदकताकप्रकारताऽनवच्छिन्न-त्वस्याऽसिद्धत्वात् ।

ततश्चैवम् अनुमानम् - अनुमितिजनकता प्रकृतपक्षताऽवच्छेदकनिष्ठप्रकृतपक्षताऽवच्छेदकता-कविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकता-कविशेष्यतानिरूपिताऽव्यभिचारपदार्थताऽवच्छेदकपर्याप्ताऽवच्छेदकताकप्रकारताऽनवच्छिन्ना, प्रकृत-पक्षताऽवच्छेदकनिष्ठप्रकृतपक्षताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुताऽ-वच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितसाध्याभाववदवृत्तित्वत्वादि-

य शो ल ता

पर्याप्ताऽवच्छेदकताकप्रकारताऽवच्छिन्नत्वाभावकूटात् ।

अत्रेदं ध्येयम् - उक्तरीत्या अव्यभिचारपदार्थताऽवच्छेदकपर्याप्ताऽवच्छेदकता... इत्यादि-प्रवेशस्याऽऽवश्यकत्वेऽपि अत्र मूलकृता **धर्मदत्तेन** तदनुपादानाद् एवमेवाऽनुमानं बोध्यम् - अनुमितिजनकता प्रकृतपक्षताऽवच्छेदकनिष्ठप्रकृतपक्षताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपिताऽव्यभिचार-पदार्थताऽवच्छेदकत्वसमानाधिकरणाऽवच्छेदकताकप्रकारताऽनवच्छिन्ना, प्रकृतपक्षताऽवच्छेदकनिष्ठ-प्रकृतपक्षताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरण-धर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितसाध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नप्रकारताऽवच्छिन्नत्वा-भावकूटात् । एतदनुमानाऽनुसारेणैव अग्रेतनपदार्थस्पष्टता करिष्यते इत्यवधेयम् ।

ननु उक्ताऽनुमाने अव्यभिचारपदार्थताऽवच्छेदकाऽवच्छिन्नप्रकारताऽनवच्छिन्नत्वस्यैव साध्यत्व-मङ्गीक्रियताम्, किमर्थम् अव्यभिचारपदार्थताऽवच्छेदकतासमानाधिकरणाऽवच्छेदकताकप्रकारता-ऽनवच्छिन्नत्वस्य साध्यत्वमङ्गीकृत्य गुरुपथाश्रयणं क्रियते ? यथा साध्याभाववदवृत्तित्वत्वाद्यव-च्छिन्नप्रकारताऽवच्छिन्नत्वाभावकूटस्यैव हेतुत्वमङ्गीक्रियते, न तु साध्याभाववदवृत्तित्वत्वादि-समानाधिकरणाऽवच्छेदकताकप्रकारताऽवच्छिन्नत्वाभावकूटस्य । तथा च साध्यकोटौ अपि अव्यभिचारपदार्थताऽवच्छेदकाऽवच्छिन्नप्रकारताऽनवच्छिन्नत्वस्यैव प्रवेशः कार्य ***इति चेद्*** ?

न; उक्तरीत्या कस्मिंश्चिदपि परामर्शे नियमेन लक्षणपञ्चकभानाऽभावेन तादृशप्रकारता-यामव्यभिचारपदार्थताऽवच्छेदकाऽवच्छिन्नत्वस्याऽसम्भवात् । अयमाशयः - अव्यभिचारपदार्थताऽ-वच्छेदकधर्माः पञ्च, तत्र सर्वत्र न तादृशप्रकारता भवति, किन्तु कस्मिंश्चिदपि एकस्मिन्नेव लक्षणे (तत्तल्लक्षणाङ्गीकर्तृमते), तथा च अव्यभिचारपदार्थताऽवच्छेदकस्याऽतिरिक्तवृत्तित्वेन तत्रानतिरिक्तवृत्तित्वरूपाऽवच्छेदकता न सम्भवति । अतः एव अव्यभिचारपदार्थताऽवच्छेदका-वच्छिन्न... इत्यादि अनुक्त्वा अव्यभिचारपदार्थताऽवच्छेदकतासमानाधिकरणाऽवच्छेदकताक-प्रकारताऽनवच्छिन्नत्वं साध्यविधया उक्तम् । अव्यभिचारपदार्थताऽवच्छेदकता पञ्चसु, तत्र एकस्मिन् प्रकारताऽवच्छेदकता सम्भवति, अतः एव तादृशप्रकारताऽवच्छेदकता अव्यभिचार-पदार्थताऽवच्छेदकतासमानाधिकरणा कथ्यते । तादृशाऽव्यभिचारपदार्थताऽवच्छेदकता-समानाधिकरणाऽवच्छेदकताकप्रकारताऽनवच्छिन्नत्वस्याऽत एव साध्यत्वमुक्तमिति ।

न चाऽव्यभिचारपदार्थताऽवच्छेदकविधया पञ्चानां धर्माणां ग्रहणे अस्तु उक्ताऽऽपत्तिः,

किन्तु यत्किञ्चिद्ग्रहणे तु न दोषः । तथा च यत्किञ्चिदव्यभिचारपदार्थताऽवच्छेदकावच्छिन्न-प्रकारताऽनवच्छिन्नत्वस्य साध्यत्वमुच्यताम् ***इति वाच्यम्;*** तस्योक्तसन्दर्भसमानार्थकत्वात्, उक्तसन्दर्भेण स्पष्टतयाऽर्थप्रतिपत्तेः तदुपादानस्योचितत्वाच्च इति तावद् अस्माकं मतिः । अन्ये अन्यथाऽपि वदन्ति इति विभावनीयम् ।

अत एव पर्याप्तिनिवेशेऽपि यत्किञ्चिदव्यभिचारपदार्थताऽवच्छेदकपर्याप्त... इत्यादिरीत्यैव निवेशनीयम् । 'कस्मिंश्चिदपि अव्यभिचारपदार्थताऽवच्छेदके पर्याप्ताऽवच्छेदकताकप्रकारताऽ-नवच्छिन्नत्वमेवानुमितिजनकतायां वर्तते' - इत्याद्यर्थकत्वेन उक्तसन्दर्भस्य न 'यत्किञ्चिदुक्त्या यत्किञ्चिदव्यभिचारपदार्थस्यैव व्याप्तित्वाऽभावः = अनुमितिजनकताऽवच्छेदकत्वाभावः सिध्यति, न तु सर्वेषाम्' इति कथङ्कथिकताऽवकाशः इत्यपि प्राहुः केचन विदग्धाः इति ।

साध्याभाववदवृत्तित्वत्वादेः उक्तप्रकारतातः अनतिरिक्तवृत्तित्वेन तादृशप्रकारताऽवच्छेदकतायाः तत्र सम्भवेन हेतुकोटौ साध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नप्रकारताऽवच्छिन्नत्वाभावकूटत्वादेः प्रवेशे न दोषः ।

अत्र साध्याभाववदवृत्तित्वत्व-साध्यवद्भिन्नसाध्याभाववदवृत्तित्वत्व-साध्यवत्प्रतियोगिकाऽ-न्योन्याभावाऽसामानाधिकरण्यत्व-सकलसाध्याभाववन्निष्ठाऽत्यन्ताभावाऽप्रतियोगित्वत्व-साध्य-वद्भिन्नाऽवृत्तित्वत्वैतद्धर्मपञ्चकाऽवच्छिन्नप्रकारताऽवच्छिन्नत्वाभावस्यैकस्य व्यवच्छेदाय कूटशब्दः हेतुकोटौ निवेशितः, तथा च साध्याभाववदवृत्तित्वत्वावच्छिन्नप्रकारतावच्छिन्नत्वाभावः, साध्य-वद्भिन्नसाध्याभाववदवृत्तित्वत्वावच्छिन्नप्रकारताऽवच्छिन्नत्वाभावः, साध्यवत्प्रतियोगिकान्योन्याभावा-सामानाधिकरण्यत्वावच्छिन्नप्रकारताऽवच्छिन्नत्वाभावः, सकलसाध्याभाववन्निष्ठाऽत्यन्ताभावाऽ-प्रतियोगित्वत्वावच्छिन्नप्रकारताऽवच्छिन्नत्वाभावः, साध्यवद्भिन्नाऽवृत्तित्वत्वावच्छिन्नप्रकारताऽवच्छिन्न-त्वाभावः - एतदभावपञ्चकलक्षणाऽभावकूटः यत्र स्यात् तत्र अव्यभिचारपदार्थताऽवच्छेदकता-समानाधिकरणाऽवच्छेदकताकप्रकारताऽवच्छिन्नत्वाभावः स्यादेवेति न कश्चिद् दोषः इति पूर्वोक्तं विशदीकर्तव्यमत्र ।

नन्वेवमपि न बाध-भागासिद्धिनिवारणं सुसम्भवम्, उक्ताऽनुमानाङ्गीकारेऽपि 'वह्न्यभाववद-वृत्तिधूमवत्पर्वतो वह्निमान् धूमाद्' इत्यादिस्थलीयपरामर्शनिष्ठाऽनुमितिजनकतामादाय बाध -भागासिद्धिप्रसङ्गात् । तथा हि - अत्र 'धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्नि-समानाधिकरणधूमनिष्ठधूमत्वविशिष्टधूमविशिष्टः वह्न्यभाववदवृत्तिधूमवत्पर्वतः' इत्याकारकपरामर्शे

प्रकृतपक्षताऽवच्छेदकपर्वतत्वनिष्ठप्रकृतपक्षताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृत-हेतुताऽवच्छेदकतापर्याप्त्यधिकरणधर्मधूमत्वपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितसाध्याभाववद-वृत्तित्वत्वनिष्ठाऽव्यभिचारपदार्थताऽवच्छेदकतासमानाधिकरणाऽवच्छेदकताकप्रकारता वह्न्यभाववद-वृत्तित्वे भासते । अत्र साक्षात् पक्षताऽवच्छेदकौ पर्वतत्वं वह्न्यभाववदवृत्तिधूमश्चैतौ द्वौ धर्मौ। परम्परया वह्न्यभाववदवृत्तित्वे धूमत्वे चाऽपि पक्षताऽवच्छेदकता वर्तते इति ध्येयम् ।

पक्षताऽवच्छेदकता पर्याप्तिसम्बन्धेन एतेषु सर्वेषु वर्तते । किन्तु स्वरूपसम्बन्धेन केवलपर्वत-त्वेऽपि । तथा च प्रकृतपक्षताऽवच्छेदकविधया केवलपर्वतत्वमेव गृहीतम् । किञ्चाऽत्र पक्षकोटौ धूमे वह्न्यभाववदवृत्तित्वं विशेषणविधया भासते । धूमश्च प्रकृते हेतुः । अतो हेतुनिष्ठ-विशेष्यतानिरूपितप्रकारता वह्न्यभाववदवृत्तित्वे स्यादेव । अत्र वह्न्यभाववदवृत्तित्वं न हेतुताऽ-वच्छेदकविधया भासते किन्तु पक्षताऽवच्छेदकविधया इति हेतुताऽवच्छेदकतापर्याप्तिनिवेशेऽपि वह्न्यभाववदवृत्तित्वनिष्ठप्रकारता तदतिरिक्ता लभ्यते एव ।

य शो ल ता

न चाऽत्र 'वह्न्यभाववदवृत्तिपर्वतो वह्निमान्, धूमाद्' इत्येतादृशस्थले किमर्थं बाध-भागासिद्धि-प्रसङ्गः न दर्श्यते ? वह्न्यभाववदवृत्तित्वविशिष्टधूमवत्पर्वतपक्षकाऽनुमितिपर्यन्तानुधावनं किमर्थ-माद्रियते ? अत्र वह्न्यभाववदवृत्तित्वस्य साक्षात्पक्षताऽवच्छेदकतया प्रतिपत्तिसौकर्यमपि सम्भव***तीति वाच्यम्;***

पर्वतस्य वह्न्यभाववद्भूतलवृत्तित्वेन उक्तानुमितेः अप्रमात्वात्, हेतुनिष्ठप्रकारताऽभिन्न-विशेष्यतानिरूपितप्रकारतायाः वह्न्यभाववदवृत्तित्वे तत्राऽभानाच्च, वह्न्यभाववदवृत्तित्वस्य पर्वते एव प्रकारत्वादिति **शिवदत्तमिश्रा**नुसृतः पन्थाः न श्रेयान् इति अवधेयम् ।

तथा च उक्तपरामर्शनिष्ठाऽनुमितिजनकतायां प्रकृतपक्षताऽवच्छेदकीभूतपर्वतत्वनिष्ठप्रकृत-पक्षताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरणधर्म-

●

❋ पक्षतावच्छेदकपर्याप्तिनिवेशप्रयोजन ❋

वि न भा

હવે સાધ્ય અને હેતુ બન્નેમાં પક્ષતાઅવચ્છેદકતાપર્યાપ્તિનો નિવેશ કેમ કર્યો ? તે જોઈ લઈએ. જો પક્ષનો ઉલ્લેખ જ ન કરવામાં આવે એટલે કે પ્રકૃતહેતુતા..... વગેરેને જ સાધ્ય માનવામાં આવે અથવા તો ફક્ત આટલું જ કહેવામાં આવે કે - પ્રકૃતપક્ષતા-અવચ્છેદકનિષ્ઠપક્ષતાઅવચ્છેદકતાનિરૂપકપક્ષનિષ્ઠવિશેષ્યતાનિરૂપિતપ્રકારતાઆખ્યવિષયતા-અભિન્નપ્રકૃતહેતુતા.... ઇત્યાદિ, તો પુનઃ બાધ અને ભાગઅસિદ્ધિ દોષ દુર્વાર બને.

धूमत्वपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपिताऽव्यभिचारपदार्थताऽवच्छेदकतासमानाधिकरणाऽवच्छेदकताकप्रकारताऽवच्छिन्नत्वस्यैव सत्त्वेन तादृशप्रकारताऽनवच्छिन्नत्वरूपसाध्यस्याऽसत्त्वात् प्रकृतपक्षताऽवच्छेदकीभूतपर्वतत्वनिष्ठप्रकृतपक्षताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरणधर्मधूमत्वपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितसाध्याभाववदवृत्तित्वत्वावच्छिन्नप्रकारताऽवच्छिन्नत्वस्यैव सत्त्वेन तादृशविशेष्यतानिरूपितसाध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नप्रकारताऽवच्छिन्नत्वाऽभावकूटस्याऽसत्त्वाच्च बाध-भागासिद्धिप्रसङ्गः दुर्निवारः ***इति चेद् ?***

न; पक्षताऽवच्छेदकतापर्याप्तिनिवेशेनोक्ताऽऽपत्तिवारणसम्भवात् । तथा हि - उक्तस्थले पक्षताऽवच्छेदकता स्वरूपसम्बन्धेन केवलपर्वतत्वेऽपि भवति, किन्तु पर्याप्तिसम्बन्धेन तु पर्वतत्वम्, धूमः, धूमत्वम्, वह्न्यभाववदवृत्तित्वम् - एतेषु सर्वेषु स्यात् । एतेषु सर्वेषु पर्याप्ता या पक्षताऽवच्छेदकता तन्निरूपकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपिताऽव्यभिचारपदार्थताऽवच्छेदकतासमानाधिकरणाऽवच्छेदकताकप्रकारता वह्न्यभाववदवृत्तित्वे नास्ति एव, वह्न्यभाववदवृत्तित्वनिष्ठप्रकारतायाः पक्षताऽवच्छेदकतातोऽनतिरिक्तत्वेन पक्षताऽवच्छेदकतयैव वह्न्यभाववदवृत्तित्वस्य ग्रहणात् ।

●

स्थल लईशुं **पर्वतो वह्निमान्**.... ફક્ત આટલું જ નહીં. કિંતુ વહ્નિઅભાવવદ્અવૃત્તિધૂમવત્-પર્વતને પક્ષ બનાવશું. એટલે કે **वह्न्यभाववदवृत्तिधूमवत्पर्वतः वह्निमान् धूमात्** - આ સ્થલ. આ સ્થલમાં પરામર્શ થાય - ધૂમસમાનાધિકરણઅત્યંતાભાવઅપ્રતિયોગિવહ્નિસમાનાધિકરણ-ધૂમવાન્ વહ્નિઅભાવવદ્અવૃત્તિધૂમવત્પર્વત. હવે જો પક્ષતાઅવચ્છેદકતાપર્યાપ્તિનો નિવેશ ન કર્યો હોય તો પ્રકૃતપક્ષતાઅવચ્છેદક તરીકે આવશે પર્વતત્વ. એમાં રહેલ જે પક્ષતા-અવચ્છેદકતા તન્નિરૂપક પર્વતનિષ્ઠવિશેષ્યતા. આનાથી નિરૂપિત પ્રકારતાઆખ્યવિષયતા કે જે હેતુમાં રહેલી છે. આ વિષયતાથી અભિન્ન વિશેષ્યતાઆખ્યવિષયતા છે કે જે વિશેષ્યતા વ્યાપ્તિની અપેક્ષાએ આવે છે. તથા હેતુતાઅવચ્છેદક ધૂમત્વ જ છે. તે સિવાય કોઈ નથી. માટે, હેતુતાઅવચ્છેદકતા માત્ર ધૂમત્વમાં જ પર્યાપ્ત છે. આ ધૂમત્વનિષ્ઠહેતુતા-અવચ્છેદકતાનિરૂપકહેતુનિષ્ઠવિશેષ્યતા છે કે જે હેતુમાં જ પક્ષની અપેક્ષાએ આવનાર પ્રકારતાઆખ્યવિષયતાથી અભિન્ન છે. આટલા સુધીમાં (૧) પક્ષતાઅવચ્છેદકપર્વતત્વનિષ્ઠ-વિષયતા, (૨) પક્ષનિષ્ઠવિષયતા, (૩) હેતુતાઅવચ્છેદકનિષ્ઠવિષયતા, (૪) હેતુનિષ્ઠ-વિષયતા આટલી વિષયતાનું ગ્રહણ થયું. આ સિવાય હવે ફક્ત વ્યાપ્તિનિષ્ઠવિષયતા

पक्षताऽवच्छेदकतातोऽतिरिक्ता न काऽपि तादृशप्रकारता वह्न्यभाववदवृत्तित्वे समस्ति इति तु स्पष्टमेव ।

यदि परामर्शे व्याप्तिविधया वह्न्यभाववदवृत्तित्वस्य भानं स्यात् तर्हि पक्षताऽवच्छेदकतातः अतिरिक्ता प्रकारता वह्न्यभाववदवृत्तित्वे स्यात् । उक्तपरामर्शे च पक्षताऽवच्छेदकतयैव वह्न्यभाववदवृत्तित्वं भासते न तु व्याप्तिविधया । अतः वह्न्यभाववदवृत्तित्वे या प्रकारता सा पक्षताऽवच्छेदकतारूपैव, वह्न्यभाववदवृत्तित्वस्य पक्षताऽवच्छेदकत्वेनैव विषयत्वादिति न बाधः न वा भागासिद्धिः । तथा चात्र साध्यकोटौ हेतुकोटौ च प्रकृतपक्षताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न.... इत्यादिरीत्या पर्याप्तिनिवेशः कार्यः, न तु प्रकृतपक्षताऽवच्छेदकपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न... इत्यादिरीत्या, प्रकृतपक्षताऽवच्छेदकविधया केवलपर्वतत्वस्याऽपि ग्रहणसम्भवात्, प्रकृतपक्षताऽवच्छेदकतापर्याप्त्यधिकरणविधया केवलपर्वतत्वस्य ग्रहणाऽसम्भवादिति ध्येयम् ।

यदि चाऽत्र प्रकृतपक्षताऽवच्छेदकतापर्याप्त्यधिकरणधर्म... इत्यादिरीत्या पर्याप्तिनिवेशः आदृतः तर्हि हेतुताऽवच्छेदकतापर्याप्तिनिवेशोऽपि तथैव कर्तव्यः इति सिद्धम्, हेतुताऽवच्छेदकता-

●

બચવી જોઈએ. તો જ હેતુનિષ્ઠવિષયતાનિરૂપિતવિષયતા અવ્યભિચારપદાર્થમાં ન જાય. જ્યારે પ્રસ્તુતમાં એવું નથી થતું. હજુ એક વિષયતા, કે જે અવ્યભિચારપદાર્થમાં રહેલી છે, તે બાકી રહે છે. સાધ્યાભાવવદ્અવૃત્તિત્વ ધૂમમાં વિશેષણ છે. ધૂમ પક્ષમાં વિશેષણ છે. આ બધાં પક્ષકોટિમાં પ્રવિષ્ટ છે. એકજ્ઞાનીય તમામ વિષયતા પરસ્પર નિરૂપિત હોય. માટે, ધૂમનિષ્ઠવિશેષ્યતાનિરૂપિતપ્રકારતા અવ્યભિચારપદાર્થમાં જશે. આ ધૂમ એ હેતુથી અભિન્ન જ છે. આમ, પ્રસ્તુતમાં હેતુનિષ્ઠવિશેષ્યતાનિરૂપિત અવ્યભિચારપદાર્થનિષ્ઠ પ્રકારતા મળી જશે. પરામર્શનિષ્ઠઅનુમિતિજનકતા તાદૃશવિષયતાથી અવચ્છિન્ન જ થશે.

❀ ભાગાસિદ્ધિ દોષ બતાવવાનું પ્રયોજન ❀

પ્રસ્તુતમાં ધૂમનિષ્ઠવિશેષ્યતાનિરૂપિતપ્રકારતા સાધ્યાભાવવદ્અવૃત્તિત્વમાં જાય છે. સાધ્યાભાવવદ્અવૃત્તિત્વનિષ્ઠવિષયતા પ્રકારતાસ્વરૂપ છે અને સાધ્યાભાવવદ્અવૃત્તિત્વત્વથી અવચ્છિન્ન છે. આવી વિષયતાથી અવચ્છિન્ન જે જે ધર્મો હોય તેમાં જે વિષયતાઅવચ્છિન્નત્વ જાય તેનો અભાવ અનુમિતિજનકતામાં જવો જોઈએ. તે ન જવાને કારણે પ્રસ્તુતમાં ભાગઅસિદ્ધિ દોષ આવે. **पर्वतो वह्निमान् धूमात्** ઈત્યાદિ અનુમિતિની જનકતા જે પરામર્શમાં

पर्याप्तिनिवेशस्य प्रकृतहेतुताऽवच्छेदकपर्याप्तावच्छेदकताक.... इत्यादिरीत्याङ्गीकारे पक्षताऽवच्छेदकतापर्याप्तेरपि तथैव निवेशः अङ्गीकार्यः, न्यायस्योभयत्र समानत्वात् । ततश्च ग्रन्थकृतोक्तस्य 'प्रकृतहेतुताऽवच्छेदकपर्याप्ताऽवच्छेदकताकविशेष्यता' इत्यस्य 'प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यता' इत्येवमर्थः ज्ञेयः । केचन उभयथाऽपि पर्याप्तिनिवेशस्य समानार्थकत्वमङ्गीकृत्य उभयथाऽपि सङ्गतत्वं स्वीकुर्वन्ति ।

ततश्चाऽत्र पञ्च अनुमानप्रकाराः । तथा हि - (१) अनुमितिजनकता प्रकृतपक्षताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुताऽवच्छेदकपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपिताऽव्यभिचारपदार्थताऽवच्छेदकतासमानाधिकरणाऽवच्छेदकताकप्रकारताऽनवच्छिन्ना, प्रकृतपक्षताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुताऽवच्छेदकपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितसाध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नप्रकारताऽवच्छिन्नत्वाभावकूटाद् इत्येवं मूलाऽनुसार्यनुमानम् ।

(२) अनुमितिजनकता प्रकृतपक्षताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपिताऽव्यभिचारपदार्थताऽवच्छेदकतासमानाधिकरणाऽवच्छेदकताकप्रकारताऽ-

●

જાય છે તે પરામર્શમાં સાધ્યાભાવવદ્અવૃત્તિત્વ વગેરે વિષય ન બનતા હોવાથી સાધ્યાભાવવદ્અવૃત્તિત્વત્વઅવચ્છિન્નત્વનો અભાવ જ તાદૃશપરામર્શનિષ્ઠઅનુમિતિજનકતામાં જશે. માટે, **पर्वतो वह्निमान् धूमात्** આ સ્થલે અનુમિતિજનકતાસ્વરૂપ પક્ષમાં તો હેતુ વૃત્તિ જ છે. કિંતુ વહ્નિઅભાવવદ્અવૃત્તિધૂમવત્પર્વતપક્ષકઅનુમિતિજનકતા લેવામાં આવે ત્યારે પક્ષમાં હેતુ વૃત્તિ નથી. માટે ભાગઅસિદ્ધિ દોષ બતાવ્યો.

તથા જ્યારે અનુમિતિજનકતા સાધ્યાભાવવદ્અવૃત્તિત્વનિષ્ઠવિષયતાથી અવચ્છિન્ન બને ત્યારે અવ્યભિચારપદાર્થનિષ્ઠવિષયતાથી પણ અવચ્છિન્ન જ બને. માટે, અવ્યભિચારપદાર્થનિષ્ઠવિષયતાઅનવચ્છિન્નત્વરૂપ સાધ્ય પણ પક્ષમાં અવૃત્તિ બને. માટે બાધ દોષ પણ દુર્વાર બને. તેથી જ પ્રસ્તુતમાં અમે બાધ દોષ દર્શિત કરેલ છે અને તેના નિવારણ માટે પક્ષતાઅવચ્છેદકતાપર્યાપ્તિનો નિવેશ આવશ્યક છે.

ટૂંકમાં, પક્ષકોટિપ્રવિષ્ટઅવ્યભિચારપદાર્થનિષ્ઠવિષયતાનો પક્ષતાઅવચ્છેદકનિષ્ઠવિષયતા રૂપે સંગ્રહ ન થવાને કારણે, ફક્ત પર્વતત્વનિષ્ઠવિષયતાને જ ગ્રહણ કરવાને કારણે તાદૃશવિષયતાનિરૂપિતહેતુનિષ્ઠવિષયતાનિરૂપિતઅવ્યભિચારપદાર્થનિષ્ઠવિષયતા મળી ગઈ.

य नवच्छिन्ना, प्रकृतपक्षताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपित-
शो प्रकारताऽभिन्न-प्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपित-
ल साध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नप्रकारताऽवच्छिन्नत्वाभावकूटाद् - इत्येवं मूलोक्तानुमानाऽनुसारि
ता तदर्थविधया प्रदर्शितम् अनुमानम् उभयत्र समानरीत्या पर्याप्तिनिवेशकारि ।

●

જો પક્ષતાઅવચ્છેદક તરીકે સાધ્યાભાવવદ્અવૃત્તિત્વ લઈએ તો સાધ્યાભાવવદ્અવૃત્તિત્વનિષ્ઠ-પક્ષતાઅવચ્છેદકતાનિરૂપકપક્ષનિષ્ઠવિશેષ્યતાનિરૂપિતહેતુનિષ્ઠવિષયતાનિરૂપિત અન્ય કોઈ વિષયતા અવ્યભિચારપદાર્થમાં જતી નથી. માટે બાધ કે ભાગઅસિદ્ધિ દોષ ન આવે. કિંતુ પક્ષતાઅવચ્છેદક ફક્ત સાધ્યાભાવવદ્અવૃત્તિત્વ જ નથી. પર્વતત્વ પણ છે. કોઈ પર્વતત્વ લે તો તેને અટકાવી શકાય તેવું તો છે નહીં. માટે, પર્વતત્વનિષ્ઠપક્ષતાઅવચ્છેદકતા-નિરૂપકપક્ષનિષ્ઠવિશેષ્યતાનિરૂપિતહેતુનિષ્ઠવિષયતાનિરૂપિતઅવ્યભિચારપદાર્થનિષ્ઠવિષયતા પ્રાપ્ત થઈ જશે. એટલે બાધ અને ભાગઅસિદ્ધિ દુર્વાર બનશે. જો એવો કોઈ ખુલાસો કરવામાં આવે કે જેના દ્વારા પર્વતત્વ, સાધ્યાભાવવદ્અવૃત્તિત્વ વગેરે તમામમાં રહેલી પક્ષતાઅવચ્છેદકતા ગૃહીત થઈ જાય અને કોઈ એકાદને જ લેવાની છૂટ ન મળે - તો આ તકલીફ ન આવે. એ સ્પષ્ટ રીતે આપણે જોઈ શકીએ છીએ. આ રીતનો જ ખુલાસો આપણે કરવાનો છે, પણ તે પહેલા એક સ્પષ્ટતા કરી લઈએ.

વિ અહીં પ્રશ્ન થાય કે "હેતુનિષ્ઠવિશેષ્યતાનિરૂપિતઅવ્યભિચારપદાર્થનિષ્ઠપ્રકારતા
ન મળવી જોઈએ - આ રીતે જો વિષયતા જેવા સાધારણ શબ્દો નહીં, સામાન્યદર્શી શબ્દો
भ्रा નહીં, કિંતુ પ્રકારતા જેવા વિશેષતાદર્શક શબ્દો વાપરો તો બાધ અને ભાગાસિદ્ધિની તકલીફ નહીં આવે. હા, હેતુતાઅવચ્છેદકતાપર્યાપ્તિનો તો પ્રવેશ કરવો જ પડશે. કિંતુ પક્ષતા-અવચ્છેદકતાપર્યાપ્તિના પ્રવેશની આવશ્યકતા નહીં રહે. જુઓ -

સાધ્યાભાવવદ્અવૃત્તિધૂમવત્પર્વતપક્ષક જે અનુમિતિ દર્શાવી તેમાં જે સાધ્યાભાવવદ્-અવૃત્તિત્વ છે તેમાં પર્વતનિષ્ઠવિશેષ્યતાનિરૂપિતપ્રકારતા રહે. કારણ કે સાધ્યાભાવવદ્અવૃત્તિત્વ પક્ષતાઅવચ્છેદક છે. પક્ષતાઅવચ્છેદક પક્ષમાં વિશેષણ હોય તે વાત તો સ્પષ્ટ જ છે. હા ! પ્રસ્તુતમાં સાધ્યાભાવવદ્અવૃત્તિત્વ સાક્ષાત્ પક્ષતાઅવચ્છેદક નથી. કારણ કે સાધ્યભાવવદ્-અવૃત્તિત્વ ધૂમમાં રહે, ધૂમ પક્ષમાં રહે. છતાં પરંપરાએ સાધ્યાભાવવદ્અવૃત્તિત્વ પણ પક્ષતાઅવચ્છેદક બની શકે. પ્રસ્તુતમાં પરંપરાસંબંધ તરીકે સ્વાશ્રયાશ્રયત્વ સંબંધ લઈ શકાય. કારણ કે સાધ્યાભાવવદ્અવૃત્તિત્વઆશ્રય જે ધૂમ તેની આશ્રયતા પર્વતમાં છે. માટે સ્વાશ્રયા-શ્રયત્વસંબંધથી સાધ્યાભાવવદ્અવૃત્તિત્વ પર્વતસ્વરૂપ પક્ષમાં રહી શકે છે. ટૂંકમાં, ઉક્ત

(३) अनुमितिजनकता प्रकृतपक्षताऽवच्छेदकपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपित-प्रकारताऽभिन्न-प्रकृतहेतुतावच्छेदकपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपिताऽव्यभिचारपदार्थताऽ-वच्छेदकतासमानाधिकरणाऽवच्छेदकताकप्रकारताऽनवच्छिन्ना, प्रकृतपक्षताऽवच्छेदकपर्याप्ताऽ-वच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुतावच्छेदकपर्याप्तावच्छेदकताकविशेष्यता-निरूपितसाध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नप्रकारताऽवच्छिन्नत्वाभावकूटाद् इत्येवम् उभयरीत्या पर्याप्तिनिवेशस्य समानार्थकत्वाङ्गीकर्तृणां केषाञ्चन विदुषां मतानुसारि अनुमानम् ।

य
शो
ल
ता

●

અનુમાનમાં પર્વતનિષ્ઠવિશેષ્યતાનિરૂપિતપ્રકારતા સાધ્યાભાવવદ્અવૃત્તિત્વમાં જશે. કિંતુ હેતુનિષ્ઠવિશેષ્યતાનિરૂપિતપ્રકારતા કેવી રીતે સાધ્યભાવવદ્અવૃત્તિત્વમાં રહે ? જો સાધ્યાભાવ-વદ્અવૃત્તિધૂમાત્... આવા પ્રકારનો હેતુ હોય તો હેતુનિષ્ઠવિશેષ્યતાનિરૂપિતપ્રકારતા સાધ્યાભાવવદ્અવૃત્તિત્વમાં જાય. કિંતુ તેવું તો છે નહીં. અને આવો હેતુ લો તો પણ તાદૃશ પ્રકારતાની બાદબાકી હેતુતાઅવચ્છેદકતાપર્યાપ્તિના નિવેશથી જ થઈ જવાની છે. આમ, પક્ષતાઅવચ્છેદકતાપર્યાપ્તિનો નિવેશ ન કરો તો પણ કોઈ આપત્તિ છે જ નહીં.''

પણ, આવો પ્રશ્ન વ્યાજબી નથી. આના ઉત્તર બે રીતે આપણે જોઈ શકીશું -

(૧) સાધ્યાભાવવદ્અવૃત્તિધૂમવત્પર્વતને જ્યારે પક્ષ બનાવવામાં આવે ત્યારે જે રીતે પરંપરાએ પર્વતમાં સાધ્યાભાવવદ્અવૃત્તિત્વ વિશેષણ બને છે તે રીતે સાક્ષાત્ ધૂમમાં પણ વિશેષણ બને જ છે. કારણ કે સાધ્યાભાવવદ્અવૃત્તિ ધૂમ છે. અને તાદૃશધૂમવિશિષ્ટ પર્વત છે. તથા પ્રસ્તુતમાં હેતુ પણ ધૂમ જ છે. ધૂમનિષ્ઠવિશેષ્યતાનિરૂપિતપ્રકારતા અવ્યભિચાર-પદાર્થમાં જાય છે. માટે, હેતુનિષ્ઠવિશેષ્યતાનિરૂપિતપ્રકારતા, જે હેતુતાઅવચ્છેદકનિષ્ઠ-પ્રકારતાથી ભિન્ન છે (કારણ કે પ્રસ્તુતમાં હેતુતાવચ્છેદક ફક્ત ધૂમત્વ છે. સાધ્યાભાવવદ્-અવૃત્તિત્વ હેતુતાઅવચ્છેદક નથી. હેતુમાં વિશેષણ જરૂર છે.) તે, અવ્યભિચારપદાર્થમાં જતી રહેશે. માટે, તાદૃશવિષયતાથી અવચ્છિન્ન જ તાદૃશપરામર્શનિષ્ઠઅનુમિતિજનકતા બનશે. આ રીતે પુનઃ બાધ અને ભાગઅસિદ્ધિ દુર્વાર બનશે. જો પક્ષતાઅવચ્છેદકપર્યાપ્તપક્ષતા-અવચ્છેદકતાનો નિવેશ કરવામાં આવે તો હમણાં બતાવશું તે મુજબ આપત્તિનું નિવારણ થઈ જ જશે. તકલીફ એ જ પડી કે પક્ષતાઅવચ્છેદકતાપર્યાપ્તિનો નિવેશ ન કરતા અવ્યભિચારપદાર્થનિષ્ઠપ્રકારતા કે જે પક્ષનિષ્ઠવિશેષ્યતા અને હેતુનિષ્ઠવિશેષ્યતા ઉભયથી નિરૂપિત બને છે તેનો સંગ્રહ ન થયો. માટે, વ્યાપ્તિવિષયતા તરીકે ગૃહીત થઈ જાય. જો પક્ષતાઅવચ્છેદકતા તરીકે જ તેનું ગ્રહણ થઈ જાય તો પક્ષતાઅવચ્છેદકતાનિરૂપકવિશેષ્યતા-નિરૂપિત અતિરિક્ત કોઈ વિષયતા અવ્યભિચારપદાર્થમાં ન મળવાને કારણે તેનાથી

વિ
ના
મ્રા

(૪) अनुमितिजनकता प्रकृतपक्षताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकता-कविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकता-कविशेष्यतानिरूपिताऽव्यभिचारपदार्थताऽवच्छेदकपर्याप्ताऽवच्छेदकताकप्रकारताऽनवच्छिन्ना, प्रकृतपक्षतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितसाध्याभाव-वदवृत्तित्वत्वादिपर्याप्ताऽवच्छेदकताकप्रकारताऽवच्छिन्नत्वाभावकूटाद् इत्येवमुक्तरीत्या अव्यभि-चारपदार्थताऽवच्छेदकपर्याप्ताऽवच्छेदकतेत्यादिरीत्या प्रवेशे अनुमानम् । अत्रैव यत्किञ्चिदव्यभि-चारपदार्थताऽवच्छेदकपर्याप्तेत्यादिरीत्या प्रवेशः अन्येषां मतेन कर्तव्यः इति।

●

અવચ્છિન્ન અનુમિતિજનકતા ન બને. માટે, આપણને જે ઈષ્ટ છે કે 'પક્ષકોટિ-હેતુકોટિ સિવાય વ્યાપ્તિકોટિમાં અવ્યભિચારપદાર્થ ન આવે' - આ વાતની સિદ્ધિ થઈ ગઈ.

(૨) આ ઉપરાંત બીજી એક રીતે પણ હેતુનિષ્ઠવિશેષ્યતાનિરૂપિતપ્રકારતા અવ્યભિચારપદાર્થમાં આવી જાય. એકજ્ઞાનીયવિષયતા પરસ્પર નિરૂપિત હોય. માટે, હેતુનિષ્ઠવિશેષ્યતા કે જે વ્યાપ્તિની અપેક્ષાએ હેતુમાં આવે છે તથા અવ્યભિચારપદાર્થ-નિષ્ઠપ્રકારતા કે જે પક્ષની અપેક્ષાએ અવ્યભિચારપદાર્થમાં આવે છે તે બંને એક જ જ્ઞાનીય હોવાથી પરસ્પર નિરૂપિત બનશે. એટલે હેતુનિષ્ઠવિશેષ્યતાનિરૂપિત અવ્યભિચારપદાર્થ-નિષ્ઠપ્રકારતા થઈ જશે.

ટૂંકમાં, જો પક્ષતાઅવચ્છેદકતાપર્યાપ્તિનો નિવેશ ન કરવામાં આવે તો અવ્યભિચાર-પદાર્થનિષ્ઠપ્રકારતા, કે જે **वह्न्यभाववदवृत्तिधूमवत्पर्वतः वह्निमान् धूमात्** - આવા પ્રકારની અનુમિતિની જનકતાની અવચ્છેદિકા છે, આવા પ્રકારની પ્રકારતા હેતુતાઅવચ્છેદકપર્યાપ્ત-હેતુતાઅવચ્છેદકતાકહેતુનિષ્ઠવિશેષ્યતાથી નિરૂપિત થઈ જાય છે. માટે, બાધ અને ભાગઅસિદ્ધિ દોષ દુર્વાર બને છે. હવે જો પક્ષતાઅવચ્છેદકતાપર્યાપ્તિનો નિવેશ કરવામાં આવે તો આ આપત્તિ ન આવે. કારણ કે પહેલા જણાવ્યું તે મુજબ જો સાધ્યાભાવવદ્અવૃત્તિત્વનિષ્ઠ-પક્ષતાઅવચ્છેદકતા લેવામાં આવે તો કોઈ આપત્તિ નથી. પણ, સામેવાળો પર્વતત્વનિષ્ઠપક્ષતા-અવચ્છેદકતા લઈ શકે છે. એટલે ખુલાસો એવો કરવાનો છે કે જેના દ્વારા બધી પક્ષતાઅવચ્છેદકતા લેવી જ પડે. કોઈ એકાદ પર્વતત્વનિષ્ઠપક્ષતાઅવચ્છેદકતાને લઈને આપત્તિ ન આપી શકાય. આવો ખુલાસો-પરિષ્કાર એટલે જ પક્ષતાઅવચ્છેદકતાપર્યાપ્તિનો નિવેશ. કારણ કે પક્ષતાઅવચ્છેદકતા માત્ર પર્વતત્વમાં પર્યાપ્ત નથી. કિંતુ ધૂમ - સાધ્યાભાવવદ્અવૃત્તિત્વ વગેરેમાં પણ વિદ્યમાન છે. આ બધાં પક્ષતાઅવચ્છેદકતાપર્યાપ્તિના

प्रकृतपक्षतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यता-निरूपितविषयत्वाभिन्न-प्रकृतहेतुतावच्छेदकपर्याप्तावच्छेदकताकविशेष्यता-निरूपिताऽव्यभिचारपदार्थतावच्छेदकतासमानाधिकरणावच्छेदकताकविषय-त्वानवच्छिन्नत्वस्य साध्यत्वात्,

●

(५) अनुमितिजनकता प्रकृतपक्षताऽवच्छेदकपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारता-ऽभिन्न-प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपिताऽव्यभि-चारपदार्थताऽवच्छेदकतासमानाधिकरणाऽवच्छेदकताकप्रकारताऽनवच्छिन्ना, प्रकृतपक्षताऽवच्छेदक-पर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरणधर्म-पर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितसाध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नप्रकारताऽवच्छिन्नत्वा-भावकूटाद् - इत्येवमुभयथा पर्याप्तिनिवेशस्य समानार्थकत्वाङ्गीकर्तॄणां मते अर्थादापन्नमनुमानम् ।

एतत्सर्वं मनसि निधायाह - **प्रकृतपक्षताऽवच्छेदकतापर्य्याप्त्यधिकरणधर्मपर्य्याप्ताऽवच्छेदक-ताकविशेष्यतानिरूपितविषयत्वाभिन्नप्रकृतहेतुतावच्छेदकपर्य्याप्ताऽवच्छेदकताकविशेष्यतानिरूपिताऽ-व्यभिचारपदार्थताऽवच्छेदकतासमानाधिकरणाऽवच्छेदकताकविषयत्वाऽनवच्छिन्नत्वस्य**, अत्र यत्र

●

અધિકરણીભૂત ધર્મો છે. આ બધામાં પર્યાપ્ત જે પક્ષતાઅવચ્છેદકતા તન્નિરૂપક જે પક્ષનિષ્ઠવિશેષ્યતા તેનાથી નિરૂપિતહેતુનિષ્ઠપ્રકારતાઆખ્યવિષયતાઅભિન્ન-હેતુતાઅવ-ચ્છેદકપર્યાપ્તહેતુતાઅવચ્છેદકતાકવિશેષ્યતાનિરૂપિતઅવ્યભિચારપદાર્થતાઅવચ્છેદકતાસમા-નાધિકરણપ્રકારતાઆખ્યવિષયતાઅવચ્છેદકતાનિરૂપકઅવ્યભિચારપદાર્થનિષ્ઠવિષયતાથી અનવચ્છિન્ન જ અનુમિતિજનકતા બનશે. કારણ કે, અવ્યભિચારપદાર્થમાં પક્ષતા-અવચ્છેદકતારૂપ જ વિષયતા છે. તદતિરિક્ત પક્ષતાઅવચ્છેદકતાકવિશેષ્યતાનિરૂપિતહેતુ-નિષ્ઠવિષયતાનિરૂપિત કોઈ વિષયતા અવ્યભિચારપદાર્થમાં રહેતી નથી. માટે તેનાથી અવચ્છિન્નત્વ પરામર્શનિષ્ઠ અનુમિતિજનકતામાં ન જ જાય. સાધ્યાભાવવદ્અવૃત્તિત્વ વગેરે નિષ્ઠવિષયતાઅવચ્છિન્નત્વ પણ ન જાય. આમ, હેતુ અને સાધ્ય ઉભય પક્ષમાં રહેતા હોવાને કારણે બાધ અને ભાગાસિદ્ધિનો કોઈ પ્રશ્ન નથી. આ રીતે ભાવાર્થ સંપૂર્ણ થયો. હવે શબ્દાર્થ જોઈ લઈએ.

❁ પરિષ્કારની પંક્તિનો સરળ શબ્દાર્થ ❁

શબ્દાર્થ :- પ્રસ્તુતપક્ષતાઅવચ્છેદકતાપર્યાપ્તિઅધિકરણીભૂત જે ધર્મ તેમાં પર્યાપ્ત

तादृशहेतुविषयत्वनिरूपितसाध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नविषयत्वावच्छिन्नत्वाभावकूटस्य हेतुत्वाच्च ।

●

यत्र विषयत्वपदं तत्र तत्र यथायथं प्रकारतादियोजनेन उभयत्र पर्याप्तेः समानरीत्या निवेशमङ्गीकृत्य एवमर्थः बोद्धव्यः यदुत प्रकृतपक्षताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारता(ऽऽख्यविषयता)ऽभिन्न-प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपिताव्यभिचारपदार्थताऽवच्छेदकतासमानाधिकरणाऽवच्छेदकताकप्रकारता(ऽऽख्यविषयता)ऽनवच्छिन्नत्वस्य **साध्यत्वात्**, पञ्चम्यर्थप्रयोज्यत्वस्य वाच्यत्वाभावेऽन्वयः, एतादृशसाध्याङ्गीकारेण 'पर्वतो वह्निमान् वह्न्यभाववदवृत्तिधूमाद्' इत्यादिस्थलीयः 'वह्न्यभाववदवृत्तिधूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसमानाधिकरणवह्न्यभाववदवृत्तिधूमविशिष्टः पर्वतः' इत्याकारकः यः परामर्शः तन्निष्ठाऽनुमितिजनकतायां तादृशसाध्यस्य सत्त्वाद् बाधदोषो निराकृतो भवतीति भावः ।

भागासिद्धिदोषनिराकरणं दर्शयति - **तादृशहेतुविषयत्वनिरूपितसाध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नविषयत्वावच्छिन्नत्वाभावकूटस्य**, अत्र तादृशहेतुविषयत्वपदेन प्रकृतपक्षताऽवच्छेदकतापर्याप्त्यधिकरण-

●

એવી જે પક્ષતાઅવચ્છેદકતા તન્નિરૂપક જે પક્ષનિષ્ઠવિશેષ્યતા કે જે હેતુની અપેક્ષાએ આવે છે, આ વિશેષ્યતાનિરૂપિત પ્રકારતાઆખ્યવિષયતા કે જે હેતુમાં રહેલ છે, આ વિષયતાથી અભિન્ન જે પ્રકૃતહેતુતાઅવચ્છેદકમાં પર્યાપ્તહેતુતાઅવચ્છેદકતાની નિરૂપક હેતુનિષ્ઠવિશેષ્યતા તેનાથી નિરૂપિત અવ્યભિચારપદાર્થતાઅવચ્છેદકસાધ્યાભાવવદ્અવૃત્તિત્વત્વ વગેરેમાં રહેલ જે અવ્યભિચારપદાર્થતાઅવચ્છેદકતા એને સમાનાધિકરણ જે જે અવ્યભિચારપદાર્થનિષ્ઠપ્રકારતાની અવચ્છેદકતા તન્નિરૂપક જે સાધ્યાભાવવદ્અવૃત્તિત્વ વગેરે અવ્યભિચારપદાર્થનિષ્ઠપ્રકારતાઆખ્યવિષયતા તેનાથી અનવચ્છિન્નત્વ એ અમારા મતે સાધ્ય છે. એટલે કે પ્રકૃતપક્ષતાઅવચ્છેદકતાપર્યાપ્તિઅધિકરણીભૂતધર્મપર્યાપ્તપક્ષતાઅવચ્છેદકતાનિરૂપકવિશેષ્યતાનિરૂપિતપ્રકારતાઆખ્યવિષયતાઅભિન્નપ્રકૃતહેતુતાઅવચ્છેદકપર્યાપ્તહેતુતાઅવચ્છેદકતાનિરૂપકવિશેષ્યતાનિરૂપિતઅવ્યભિચારપદાર્થતાઅવચ્છેદકતાસમાનાધિકરણપ્રકારતાઆખ્યવિષયતાઅવચ્છેદકતાનિરૂપકઅવ્યભિચારપદાર્થનિષ્ઠવિષયતાઅનવચ્છિન્નત્વ અનુમિતિજનકતામાં સાધ્ય છે તથા હેતુ આ મુજબ - તાદૃશહેતુવિષયતા = પ્રકૃતપક્ષતાઅવચ્છેદકતાપર્યાપ્તિઅધિકરણીભૂતધર્મપર્યાપ્તપક્ષતાઅવચ્છેદકતાનિરૂપકવિશેષ્યતાનિરૂપિતપ્રકારતાઆખ્યવિષ-

पक्षतावच्छेदकतापर्याप्तिनिवेशाच्च वह्न्यभाववदवृत्तिधूमवत्पर्वत-

●

धर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितविषयत्वाभिन्न-प्रकृतहेतुताऽवच्छेदकपर्याप्ताऽवच्छेदकताक-विशेष्यता ग्राह्या, तत्र पूर्वोक्तरीत्या परिवर्तने कृते अयमर्थः भवति - प्रकृतपक्षताऽवच्छेदकता-पर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुताऽवच्छेदकता-पर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितसाध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नप्रकारता-ऽवच्छिन्नत्वाभावकूटस्य **हेतुत्वाच्च** । एतादृशहेत्वङ्गीकारेण उक्तपरामर्शनिष्ठाऽनुमितिजनकतायां हेतोः सत्त्वेन न भागासिद्धिः इति भावः । व्याप्तिविधया परामर्शे अव्यभिचारपदार्थः न भासते, अतः पक्षता-तदवच्छेदकता-हेतुता-तदवच्छेदकताभ्योऽतिरिक्ता विषयता अव्यभिचारपदार्थे न भवति इत्येव प्रकृतपरिष्कारस्य मूलस्वत्वमिति विभावनीयम् ।

ननु 'पर्वतो वह्निमान् वह्न्यभाववदवृत्तिधूमाद्' इत्यादिस्थलीये 'वह्न्यभाववदवृत्तिधूम-समानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसमानाधिकरणवह्न्यभाववदवृत्तिधूमविशिष्टः पर्वतः' इत्याकारकपरामर्शे याऽनुमितिजनकता तामादाय बाध-भागाऽसिद्धिप्रसङ्गनिवारणाय हेतुताऽवच्छेद-कतापर्याप्तिनिवेशोऽस्तु, पक्षताऽवच्छेदकतापर्याप्तिनिवेशः किमर्थम् ? तद् ऋतेऽपि पूर्वोक्ताऽऽपत्ति-निराकरणसम्भवादित्याशङ्कायामाह - **पक्षतावच्छेदकते**त्यादि । भावार्थः प्राग्दर्शितः एव । शब्दार्थश्चैवम् - **पक्षतावच्छेदकतापर्याप्तिनिवेशाच्च** हेतौ इति शेषः, **वह्न्यभाववदवृत्तिधूमवत्पर्वत-पक्षक-वह्निसाध्यक-धूमहेतुकाऽनुमितिजनकत्वे** = 'वह्न्यभाववदवृत्तिधूमवत्पर्वतो वह्निमान् धूमाद्' इत्यादिस्थलीयः यः 'धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसमानाधिकरणधूमविशिष्टः

●

યતાઅભિન્નપ્રકૃતહેતુતાઅવચ્છેદકપર્યાપ્તહેતુતાઅવચ્છેદકતાનિરૂપકવિશેષ્યતાઆખ્ય-વિષયતા. આવા પ્રકારની વિષયતાથી નિરૂપિત, સાધ્યાભાવવદ્અવૃત્તિત્વત્વ - સાધ્યવદ્-ભિન્ન સાધ્યાભાવવદ્અવૃત્તિત્વત્વ વગેરેથી અવચ્છિન્ન સાધ્યાભાવવદ્અવૃત્તિત્વ વગેરેમાં રહેનાર જે વિષયતા તેનાથી અવચ્છિન્નત્વના અભાવનો સમૂહ એ હેતુ છે. એટલે તમે આપેલ દોષને કોઈ અવકાશ નહીં રહે.

તથા પ્રસ્તુતમાં હેતુ અને સાધ્યમાં પક્ષતાઅવચ્છેદકતાપર્યાપ્તિનો નિવેશ કરવાને કારણે વહ્નિઅભાવવદ્અવૃત્તિધૂમવત્પર્વતપક્ષક, વહ્નિસાધ્યક અને ધૂમહેતુક એવી અનુમિતિની = **वह्न्यभाववदवृत्तिधूमवत्पर्वतः वह्निमान् धूमात्** - આવા પ्રકારની અનુમિતિની જનકતામાં પુનઃ ભાગઅસિદ્ધિદોષ તેવો ને તેવો આવી નહીં પડે. મતલબ કે પહેલાં જે રીતે ભાગઅસિદ્ધિ

गू पक्षक-वह्निसाध्यक-धूमहेतुकानुमितिजनकत्वे 'न भागासिद्धिः ।

●

वह्न्यभाववदवृत्तिधूमवत्पर्वतः' इत्याकारकः परामर्शः तन्निष्ठाऽनुमितिजनकतायां **न भागासिद्धिः**, तादृशाऽनुमितिजनकतारूपपक्षैकदेशे पक्षताऽवच्छेदकतापर्याप्तिरहितहेतोः असत्त्वेऽपि पक्षताऽवच्छेदकतापर्याप्तिसहितहेतोः सत्त्वेन न भागासिद्धिरित्यर्थः । उपलक्षणात् "साध्येऽपि पक्षताऽवच्छेदकतापर्याप्तिनिवेशाद् 'वह्न्यभाववदवृत्तिधूमवत्पर्वतो वह्निमान् धूमाद्' इत्यादिस्थलीयपरामर्शनिष्ठाऽनुमितिजनकतायां तादृशसाध्यस्य सत्त्वेन न बाधः" इत्यपि बोद्धव्यम्, अन्यथा साध्यप्रविष्टपक्षताऽवच्छेदकतापर्याप्तिवैफल्याऽऽपत्तेः तत्प्रयोजनाऽप्रदर्शनेन ग्रन्थन्यूनताऽऽपत्तेः वा ।

या शो ल ता

साध्य-हेत्वोः परिष्कारं प्रदर्श्य पक्षपरिष्कारं प्रदिदर्शयिषुः पराक्रमते - **अनुमितिजनकतेति** ।

ननु उक्तरीत्या साध्यस्य हेतोश्च परिष्कारकरणेऽपि न बाध-भागासिद्धिनिवारणं भवेत्, प्रकृतपक्षताऽवच्छेदकविधया केवलपर्वतत्वादिकं गृहीत्वा प्रागुक्ताऽनुमितिजनकतायां बाध-भागासिद्धितादवस्थ्यात् । अयमाशयः - 'वह्न्यभाववदवृत्तिधूमवत्पर्वतो वह्निमान् धूमाद्' - इत्यादिस्थलीयः यः परामर्शः 'धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसमानाधिकरणधूमविशिष्टः वह्न्यभाववदवृत्तिधूमवत्पर्वतः' - इत्याकारकः तन्निष्ठाऽनुमितिजनकतायां प्रकृतपक्षताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपिताऽव्यभिचारपदार्थताऽवच्छेदकतासमानाधिकरणाऽ-

●

દોષ આપેલ તે રીતે પુનઃ દોષ આવી નહીં શકે.

આ રીતે હેતુ અને સાધ્યનો પરિષ્કાર બતાવ્યો. હવે પક્ષમાં પણ પરિષ્કાર દર્શાવે છે -

વિ ન મ્રા

❀ પુનઃ બાધ અને ભાગાસિદ્ધિની આપત્તિ ❀

પ્રશ્ન :- આપે આટલી મહેનત કરી છતાં આપત્તિ (= બાધ અને ભાગઅસિદ્ધિ) તો આવશે જ. કારણ કે અનુમિતિજનકતા આપણે '**वह्न्यभाववदवृत्तिधूमवत्पर्वतः वह्निमान्, धूमात्**' - આવા પ્રકારની અનુમિતિની લઈએ. તમે સાધ્યમાં પ્રકૃતપક્ષતાઅવચ્છેદકતાની પર્યાપ્તિ લેવાની કહેલ છે. પ્રકૃતપક્ષ તરીકે પર્વતને જ લઈશું. કારણ કે '**पर्वतः वह्निमान्**' -

१. मुद्रितप्रतौ जनकत्वेन इति भ्रामकः पाठः । एवम्प्रायाः क्षतयः नैकशः मुद्रितप्रतौ दृश्यन्ते ।

वच्छेदकताकप्रकारताऽवच्छिन्नत्वं प्रकृतपक्षताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताक-विशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकता-कविशेष्यतानिरूपितसाध्याभाववदवृत्तित्वत्वावच्छिन्नप्रकारताऽवच्छिन्नत्वं च स्यातामेव, यतः प्रकृत-पक्षताऽवच्छेदकविधया यदि उक्तपरामर्शे भासमानपर्वतनिष्ठपर्वतत्ववह्न्यभाववदवृत्तित्वादयो गृह्यन्ते तदा पक्षताऽवच्छेदकतापर्याप्त्यधिकरणविधया ते सर्वेऽपि ग्राह्याः स्युः, किन्तु अस्माभिः 'पर्वतो वह्निमान् धूमाद्' - इत्यनुमितिस्थलीयपरामर्शे भासमानपर्वतनिष्ठपर्वतत्वमेव पक्षताऽवच्छेदक-विधया गृह्यते, तादृशपर्वतत्वनिष्ठपक्षताऽवच्छेदकतापर्याप्तिश्च केवलपर्वतत्वे एव, तादृशपर्वतत्व-पर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुतावच्छेदकता-पर्याप्त्यधिकरणधर्म-पर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारता अव्यभिचारपदार्थे स्यादेव, उक्तस्थलीयपरामर्शे 'पर्वतो वह्निमान्' इत्यादिस्थलीयपर्वतत्वनिष्ठपक्षताऽवच्छेदकतातोऽतिरिक्तप्रकारतायाः अव्यभिचार-पदार्थे भानात् । एवं यदनुमितिजनकता प्रकृते पक्षविधया गृह्यते तद्भिन्नाऽनुमितिपक्षनिष्ठधर्मं प्रकृतपक्षताऽवच्छेदकविधया गृहीत्वा बाध-भागासिद्धिप्रसङ्गः दुर्निवारो भवति ।

एवमेव 'पर्वतो वह्निमान्, वह्न्यभाववदवृत्तिधूमाद्' इत्येतत्स्थलीयः यः 'वह्न्यभाववदवृत्तिधूम-समानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसमानाधिकरणवह्न्यभाववदवृत्तिधूमविशिष्टः पर्वतः' इत्याकारकः परामर्शः तन्निष्ठाऽनुमितिजनकतामादाय प्रकृतहेतुताऽवच्छेदकविधया 'पर्वतो वह्निमान् धूमाद्' इत्याद्यनुमितिस्थलीयधूमहेतुनिष्ठधूमत्वस्य ग्रहणे तादृशहेतुतावच्छेदकतायाः धूमत्वे पर्याप्ततया

●

આ અનુમિતિમાં ફક્ત પર્વત જ પક્ષ બને છે. આમ, પક્ષતાઅવચ્છેદકતા ફક્ત પર્વતત્વમાં જ પર્યાપ્ત બનશે. આ પક્ષતાઅવચ્છેદકતાનિરૂપક પર્વતનિષ્ઠ જે વિશેષ્યતા તેનાથી નિરૂપિતહેતુનિષ્ઠવિષયતાનિરૂપિતઅવ્યભિચારપદાર્થનિષ્ઠવિષયતા પરામર્શમાં ભાસિત થવાથી પરામર્શનિષ્ઠ અનુમિતિજનકતા પુનઃ તાદૃશવિષયતાથી અવચ્છિન્ન જ બનશે. આ રીતે બાધ-ભાગઅસિદ્ધિ દુર્વાર બનશે. તાત્પર્ય એટલું જ કે અનુમિતિજનકતા રૂપ જે પક્ષ છે તેમાં જે અનુમિતિપદ દ્વારા ગ્રાહ્ય છે તે જ અનુમિતિમાં ભાસિત પક્ષ એ સાધ્યગતપ્રકૃતપક્ષ દ્વારા ગ્રાહ્ય બને - એવું તો તમે કંઈ જણાવ્યું નથી. માટે, પક્ષમાં જે અનુમિતિપદ છે તેના દ્વારા વહ્નિઅભાવવદ્અવૃત્તિધૂમવત્પર્વત જેમાં પક્ષ બને તેવી અનુમિતિ લઈશું. અને સાધ્યમાં જે પ્રકૃતપક્ષ છે તેના દ્વારા અન્ય સાદી **'पर्वतो वह्निमान्, धूमात्'** આવા પ્રકારની અનુમિતિમાં ભાસમાન પર્વતને તથા પક્ષતાઅવચ્છેદક તરીકે આવા પ્રકારના પક્ષમાં રહેલ કેવલપર્વતત્વને લઈશું. એટલે ભાગઅસિદ્ધિ અને બાધ દોષ દુર્વાર બનશે.

बाध-भागासिद्धिप्रसङ्गः दुर्निवारः, तादृशाऽनुमितिजनकतायां प्रकृतपक्षताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मधूमत्वपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपिताऽव्यभिचारपदार्थताऽवच्छेदकतासमानाधिकरणाऽवच्छेदकताकप्रकारताऽवच्छिन्नत्वस्य सत्त्वेन तादृशप्रकारताऽनवच्छिन्नत्वरूपसाध्यस्याऽसत्त्वात् प्रकृतपक्षताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरणधर्मधूमत्वपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितसाध्याभाववदवृत्तित्वत्वावच्छिन्नप्रकारताऽवच्छिन्नत्वस्य सत्त्वेन तादृशविशेष्यतानिरूपितसाध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नप्रकारताऽवच्छिन्नत्वाऽभावकूटरूपहेतोरसत्त्वाच्चेति चेद् ?

नः प्रकृतपक्षताऽवच्छेदकाऽवच्छिन्नपक्षक-प्रकृतसाध्यताऽवच्छेदकाऽवच्छिन्नसाध्यक-प्रकृतहेतुताऽवच्छेदकावच्छिन्नहेतुकाऽनुमितिजनकतायाः पक्षत्वाङ्गीकारे उक्तदोषाभावात् । अयमाशयः - यादृशपक्षकाऽनुमितेः जनकता पक्षत्वेन आदीयते तादृशपक्षताऽवच्छेदकतापर्याप्त्यधिकरण... इत्यादि साध्यं हेतुश्च प्रकृते । तथा च यदि वह्न्यभाववदवृत्तिपर्वतपक्षकाऽनुमितिजनकताऽऽदीयते तर्हि प्रकृतपक्षताऽवच्छेदकताविधया तादृशाऽनुमितिजनकपरामर्शे भासमानपक्षनिष्ठपक्षताऽवच्छेदकता एव ग्राह्या, न तु 'पर्वतो वह्निमान्' इत्यादिस्थलीयपरामर्शे भासमानपर्वतनिष्ठा पक्षताऽवच्छेदकता । एवमेव हेतौ अपि बोद्धव्यम् ।

न च प्रकृतपक्षक-प्रकृतसाध्यक-प्रकृतहेतुकाऽनुमितिजनकतामेव पक्षतया गृह्णातु, वह्न्य-

●

❀ પક્ષમાં પરિષ્કાર, આપત્તિનો બહિષ્કાર ❀

उत्तर :- (अनु.) અરે ભાઈ ! આવા શું પ્રશ્ન કરો છો ? પક્ષગતઅનુમિતિપદ દ્વારા તમે જે અનુમિતિ લો તે જ અનુમિતિમાં ભાસમાન પક્ષ સાધ્યગતપ્રકૃતપક્ષપદથી લેવાનો હોય. ચાલો બસ ! તમારા મનની ખુશી ખાતર ખુલાસો કરી દઈએ. એટલે કે વક્ર જીવો પુનઃ આમાંથી આ રીતે છીંડું મેળવી ન લે તે માટે ખુલાસો કરી દઈએ કે -

પ્રકૃતહેતુતાઅવચ્છેદકઅવચ્છિન્નહેતુક-પ્રકૃતસાધ્યતાઅવચ્છેદકઅવચ્છિન્નવિધેયક(=સાધ્યક)-પ્રકૃતપક્ષતાઅવચ્છેદકઅવચ્છિન્નપક્ષકઅનુમિતિજનકતા લેવાની. હવે કોઈ આપત્તિ નહીં આવે. તમે સ્થળ લીધું હતું - **'वह्न्यभाववदवृत्तिधूमवत्पर्वतः वह्निमान् धूमात्'** મતલબ કે વહ્નિઅભાવવદ્અવૃત્તિધૂમવત્પર્વતત્વાવચ્છિન્નપક્ષકઅનુમિતિ લીધી હતી. આ અનુમિતિની જનકતામાં જ સાધ્યની સિદ્ધિ કરવાની આવે. તેથી સાધ્યમાં પણ વહ્નિઅભાવવદ્અવૃત્તિ-

भाववदवृत्तिधूमवत्पर्वतपक्षकाऽनुमितितः केवलपर्वतपक्षकाऽनुमितेः भिन्नतया प्रकृतपक्षताऽवच्छेदक-विधया केवलपर्वतनिष्ठपक्षताऽवच्छेदकतायाः प्रकृते ग्रहीतुमशक्यत्वात् । एवमेव हेतौ अपि ***इति वाच्यम्;***

विशिष्टस्य शुद्धाऽनतिरेकेण वह्न्यभाववदवृत्तिधूमविशिष्टपर्वतात् केवलपर्वतस्याऽनतिरेक-सिद्ध्या पूर्वोक्ताऽऽपत्तेः तादवस्थ्यात् । वह्न्यभाववदवृत्तिधूमविशिष्टपर्वतात् केवलपर्वतस्याऽनति-रेकेऽपि केवलपर्वतस्य वह्न्यभाववदवृत्तिधूम-पर्वतत्वोभयाऽवच्छिन्नत्वाऽभावेन प्रकृतपक्षताऽवच्छे-दकावच्छिन्नपक्षकेत्यादिरीत्या परिष्काराङ्गीकारे उक्तदोषाभावः इति ध्येयम् ।

ननु 'प्रकृतपक्षताऽवच्छेदकाऽवच्छिन्नपक्षकप्रकृतहेतुताऽवच्छेदकाऽवच्छिन्नहेतुकाऽनुमिति-जनकता ग्राह्या' इत्येवोच्यताम्, प्रकृतसाध्यताऽवच्छेदकाऽवच्छिन्नसाध्यकत्वस्य अनुमिति-विशेषणविधया किमर्थं निवेशः इष्यते ?, प्रयोजनविरहात् ।

न च तदनिवेशे 'पर्वतो वह्न्यभाववदवृत्तिधूमविशिष्टवह्निमान्, धूमाद्' इत्यादिस्थलीयपरा-मर्शनिष्ठाऽनुमितिजनकतामादाय केवलवह्निरूपसाध्यमादाय च मा बाध-भागासिद्धिप्रसङ्गः भवतु

●

धूमवत्पर्वतत्वनिष्ठपक्षताअवच्छेदकता જ લઈ શકાશે. કેવલપર્વતત્વનિષ્ઠ પક્ષતાઅવચ્છેદકતા નહીં. બંને જગ્યાએ પ્રકૃતશબ્દ દ્વારા સરખા જ પક્ષતાઅવચ્છેદક પકડાય. આ રીતે **पर्वतो वह्निमान् वह्न्यभाववदवृत्तिधूमात्**' - આ સ્થલે પણ હેતુતાઅવચ્છેદક વહ્નિઅભાવવદ્અવૃત્તિધૂમત્વ જ બને. બંને જગ્યાએ (= પક્ષમાં અને સાધ્યમાં) પ્રકૃતપદ દ્વારા આવા પ્રકારના જ હેતુતા-અવચ્છેદક પકડાશે. કેવલ ધૂમત્વ વગેરેને લઈને આપત્તિ નહીં આપી શકાય.

❄ साध्यताअवच्छेदकअवच्छिन्नविधेयकप्रवेशप्रयोजन ❄

प्रश्न :- પ્રસ્તુતમાં પ્રકૃતસાધ્યતાઅવચ્છેદકઅવચ્છિન્નવિધેયક લખવાની જરૂરત શી છે ? કારણ કે સાધ્યમાં પણ પ્રકૃતસાધ્યતાઅવચ્છેદકની પર્યાપ્તિનો પ્રવેશ કરવામાં આવ્યો નથી.

उत्तर :- પ્રકૃતસાધ્યતાઅવચ્છેદકઅવચ્છિન્નવિધેયક ન લખવામાં આવે તો '**पर्वतो वह्न्यभाववदवृत्तिधूमसमानाधिकरणवह्निमान्, धूमात्**' - આવા સ્થલમાં અનુમિતિજનકતા જે પરામર્શમાં જશે તે પરામર્શમાં પક્ષનિષ્ઠવિષયતા, હેતુનિષ્ઠવિષયતા વગેરેથી ભિન્ન એવી અવ્યભિચારનિષ્ઠવિષયતાનું ભાન થશે. આમ, પુનઃ બાધ અને ભાગઅસિદ્ધિ દોષ દુર્વાર બનશે.

इति तन्निवेशनीयम् । अयमाशयः - उक्तस्थले साध्यं वह्न्यभाववदवृत्तिधूमविशिष्टवह्निः, तत्र धूमवैशिष्ट्यं वह्नेः स्वजनकतासम्बन्धेन, वह्नेः धूमजनकत्वेन धूमस्य वह्नौ स्वजनकत्वसम्बन्धेन वृत्तेः । तथा साध्यताऽवच्छेदकधर्मः वह्नित्वम्, वह्न्यभाववदवृत्तिधूमश्च । अत्र परामर्शः 'धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्न्यभाववदवृत्तिधूमविशिष्टवह्निसमानाधिकरणधूमविशिष्टः पर्वतः' इत्याकारकः, संक्षेपतश्च 'वह्न्यभाववदवृत्तिधूमविशिष्टवह्निनिरूपितव्याप्तिविशिष्टधूमविशिष्टः पर्वतः' इत्याकारकः । एतादृशपरामर्शनिष्ठाऽनुमितिजनकतायां केवलवह्नित्वरूपसाध्यताऽवच्छेदकमादाय यो बाधादिप्रसङ्गस्तद्वारणाय तन्निवेशनीय***मिति वाच्यम्;***

सर्वथाऽसम्बद्धत्वात् । प्रकृतसाध्यताऽवच्छेदकाऽवच्छिन्नसाध्यकत्वं निवेश्यतां मा वा, उक्ताऽऽपत्तिरपरिहार्या एव । तथा हि - उक्तस्थलीयपरामर्शे पक्षताऽवच्छेदकता, हेतुताऽवच्छेदकता वह्न्यभाववदवृत्तित्वे न भासते, किन्तु धूमनिष्ठविशेष्यतानिरूपितप्रकारता भासते, एषा च प्रकारता साध्यताऽवच्छेदकतारूपा, वह्न्यभाववदवृत्तित्वस्य साध्यताऽवच्छेदकतया भानात् । तथा च वह्न्यभाववदवृत्तित्वनिष्ठा पक्षताऽवच्छेदकता-हेतुतावच्छेदकताऽतिरिक्ता प्रकारता उक्त-

●

·❊· પક્ષની જેમ સાધ્યમાં પણ સાધ્યતાવચ્છેદકતાપર્યાપ્તિની આપત્તિ ·❊·

પ્રશ્ન :- અરે ભાઈ ! આ કેવી વાત કરો છો ? આ આપત્તિ તો તમને પણ આવશે જ ને ? તમારા મતમાં ય મતલબ કે પ્રકૃતસાધ્યતાઅવચ્છેદકઅવચ્છિન્ન લખી લો પછી પણ આ આપત્તિ આવશે જ. જુઓ - આપણે પ્રકૃતપક્ષતાઅવચ્છેદક...ઈત્યાદિ તમે બતાવેલ જ અનુમિતિજનકતા લઈએ. એટલે પરામર્શ થાય - હેતુસમાનાધિકરણઅત્યંતાભાવઅપ્રતિયોગિસાધ્યસમાનાધિકરણહેતુમાન પક્ષ = ધૂમસમાનાધિકરણઅત્યંતાભાવઅપ્રતિયોગિવહ્નિઅભાવવદ્અવૃત્તિધૂમસમાનાધિકરણવહ્નિસમાનાધિકરણધૂમવાન પર્વત. આમાં, પ્રકૃતપક્ષતાઅવચ્છેદકતા માત્ર પર્વતત્વમાં પર્યાપ્ત છે. પર્વતત્વનિષ્ઠપક્ષતાઅવચ્છેદકતાપર્યાપ્તિઅધિકરણીભૂતધર્મ - પર્વતત્વ. તેમાં પર્યાપ્તપક્ષતાઅવચ્છેદકતાનિરૂપકવિશેષ્યતાનિરૂપિતપ્રકારતાઆખ્યવિષયતાઅભિન્નવિશેષ્યતા ધૂમમાં છે. પ્રસ્તુતમાં હેતુતાઅવચ્છેદકતાની પર્યાપ્તિ પણ માત્ર ધૂમત્વમાં જ છે. માટે, ધૂમનિષ્ઠવિશેષ્યતા હેતુતાઅવચ્છેદકપર્યાપ્તહેતુતાઅવચ્છેદકતા-(ધૂમત્વનિષ્ઠા)ની નિરૂપક બનશે. આ વિશેષ્યતાથી નિરૂપિત અવ્યભિચારપદાર્થતાઅવચ્છેદકતાસમાનાધિકરણપ્રકારતાઅવચ્છેદકતાનિરૂપકપ્રકારતાઆખ્યવિષયતા છે. મતલબ કે હેતુકોટિ - પક્ષકોટિ સંપૂર્ણતયા સમાવિષ્ટ કરી લીધા પછી પણ અવ્યભિચારપદાર્થનિષ્ઠવિષયતા હજુ બચે છે, તેનાથી અવચ્છિન્ન અનુમિતિજનકતા મળી જાય. માટે, પુનઃ બાધ

परामर्शे भासते इति तदवच्छिन्ना एव तादृशपरामर्शनिष्ठाऽनुमितिजनकता । एवञ्च 'वह्न्यभाववदवृत्तिधूमविशिष्टवह्निनिरूपितव्याप्तिविशिष्टधूमविशिष्टः पर्वतः' इत्याकारकपरामर्शनिष्ठाऽनुमितिजनकतायां प्रकृतपक्षताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्वतत्वपर्याप्तावच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरणधर्मधूमत्वपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपिताऽव्यभिचारपदार्थताऽवच्छेदकतासमानाधिकरणाऽवच्छेदकताकप्रकारताऽवच्छिन्नत्वस्यैव सत्त्वेन तादृशप्रकारताऽवच्छिन्नत्वाभावरूपसाध्यस्याऽसत्त्वात् प्रकृतपक्षताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्वतत्वपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मधूमत्वपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितवह्न्यभाववदवृत्तित्वत्वावच्छिन्नप्रकारताऽवच्छिन्नत्वस्य सत्त्वेन तादृशविशेष्यतानिरूपितसाध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नप्रकारताऽवच्छिन्नत्वाभावकूटरूपहेतोः असत्त्वाच्च बाध-भागासिद्धिप्रसङ्गः दुर्निवार ए***वेति चेद् ?***

मैवम्; साध्यताऽवच्छेदकतापर्याप्तिनिवेशे उक्तापत्तिवारणसम्भवात्, तथैव प्रकृतसाध्यतावच्छेदकावच्छिन्नसाध्यकत्वप्रवेशस्य सार्थक्यसम्भवाच्च । अयमाशयः - 'साध्यनिरूपितव्याप्तिविशिष्टहेतुमान् पक्षः' - इत्याकारकपरामर्शे साध्यं स्वनिरूपितत्वसम्बन्धेन व्याप्तौ विशेषणविधया भासते । ततश्च साध्यनिष्ठ-स्वनिरूपितत्वसम्बन्धावच्छिन्नप्रकारतानिरूपितविशेष्यता व्याप्तौ भवतीति

●

અને ભાગઅસિદ્ધિ દોષ લાગુ પડે. તમારે તો એવું સાબિત કરવું હતું કે પક્ષતાઅવચ્છેદકતાપર્યાપ્તિનો અને હેતુતાઅવચ્છેદકતાપર્યાપ્તિનો પ્રવેશ કર્યા પછી માત્ર વ્યાપ્તિનિષ્ઠવિષયતા જ બાકી રહે. અને તે અવ્યભિચારપદાર્થનિષ્ઠવિષયતા ન આવે. કિંતુ સિદ્ધાંતવ્યાપ્તિનિષ્ઠવિષયતા જ આવે. જ્યારે પ્રસ્તુતમાં તો ઉક્તપર્યાપ્તિદ્વયના પ્રવેશ પછી પણ વ્યાપ્તિનિષ્ઠવિષયતાઅતિરિક્ત સાધ્યતાઅવચ્છેદકતાસ્વરૂપ અવ્યભિચારપદાર્થનિષ્ઠવિષયતા મળી શકે છે. તેથી જેમ પક્ષતાઅવચ્છેદકતાપર્યાપ્તિનો અને હેતુતાઅવચ્છેદકતાપર્યાપ્તિનો નિવેશ કર્યો તે રીતે સાધ્યતાઅવચ્છેદકતાપર્યાપ્તિનો પણ નિવેશ અનિવાર્ય બનશે.

❋ તાદેશ પરિષ્કારપ્રવેશ અંગે વિકલ્પો ❋

ઉત્તર :- તમારી જિજ્ઞાસા વ્યાજબી છે. કિંતુ ગ્રંથકારશ્રીએ આ બાબતમાં કશી સ્પષ્ટતા કરી નથી. આપણે આ બાબત ઉપર આ રીતે વિચારી શકીએ.

(૧) ઉક્ત સાધ્યક અનુમિતિ સંભવી નહીં શકતી હોય. કારણ કે તેમાં સાધ્યમાં જ વ્યાપ્તિ સમાઈ જાય છે. જ્યારે સૌ પ્રથમ પ્રતિજ્ઞાવાક્ય હોય ત્યારે તો વ્યાપ્તિસ્મરણ થયું

स्पष्टमेव । किञ्च, उक्तपरामर्शे साध्याभाववदवृत्तित्वे साध्यताऽवच्छेदकतारूपैव प्रकारता, न व्याप्तिरूपा, साध्यतावच्छेदकतायाः पर्याप्त्याधिकरणग्रहणे तदपि साध्यताऽवच्छेदकतापर्याप्त्यधिकरणधर्मविधया गृह्यते एव, तत्र पर्याप्तसाध्यताऽवच्छेदकतानिरूपकप्रकारतानिरूपितविशेष्यता सिद्धान्तव्याप्तौ एव स्यात्, न तु वह्न्यभाववदवृत्तित्वे, तस्य साध्यताऽवच्छेदकतयैव भानात् । यदि व्याप्तिविधया तद् भासेत तर्हि स्यादेव तत्र तादृशविशेष्यता । किन्तु केवलान्वयिन्यव्याप्तेः तस्य व्याप्तित्वं न सम्भवति, अतः तद् व्याप्तिरूपेण न भासते । अतः न तत्र तादृशविशेष्यता स्यात् । एतादृशविशेष्यता पूर्वोक्तप्रकारता च अव्यभिचारपदार्थे पूर्वपक्षमतेन स्तः इति तयोरभेदः । साध्यं यथा साध्यताऽवच्छेदकतानिरूपकं भवति तथा साध्यनिष्ठप्रकारताऽपि साध्यताऽवच्छेदकतानिरूपिका भवति । अतः एवमनुमानं स्यात् -

प्रकृतपक्षताऽवच्छेदकावच्छिन्नपक्षक-प्रकृतसाध्यतावच्छेदकाऽवच्छिन्नसाध्यक-प्रकृतहेतुताऽवच्छेदकावच्छिन्नहेतुकाऽनुमितिजनकता प्रकृतपक्षताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽ-

●

જ ન હોય. માટે, ધૂમસામાનાધિકરણ્ય વહ્નિમાં કેવી રીતે ભાસે ? (આ વિકલ્પ અર્ધસત્ય સમાન છે. વસ્તુતઃ વહ્ન્યભાવવદ્અવૃત્તિત્વગર્ભિત સાધ્ય માનવામાં કોઈ બાધ નથી. આ વિકલ્પ સ્વીકારો તો પણ પ્રકૃતસાધ્યતાવચ્છેદકાવચ્છિન્નવિધેયકના પ્રવેશ સામે પ્રશ્નાર્થચિહ્ન ઉભો જ રહે છે.) અથવા

(૨) સાધ્યતાઅવચ્છેદકતાપર્યાપ્તિનો નિવેશ આ રીતે કરી શકાય - હેતુતાઅવચ્છેદકતાકહેતુનિષ્ઠવિશેષ્યતા સુધી તો જેમનું તેમ જ રાખીએ. તાદૃશવિશેષ્યતાનિરૂપિતપ્રકારતાઆખ્યવિષયતા બેમાં રહે - (૧) વ્યાપ્તિમાં, (૨) સાધ્યમાં. કારણ કે સાધ્યની વ્યાપ્તિ હેતુમાં રહે. માટે વ્યાપ્તિ દ્વારા સાધ્ય પણ હેતુમાં વિશેષણ બને. તથા સાધ્યસામાનાધિકરણ્ય હેતુમાં રહે, તેથી સાધ્ય પણ સામાનાધિકરણ્યસંબંધથી હેતુમાં વિશેષણ બનશે જ. આમ, બે પ્રકારતા આપણને મળી. બંને પ્રકારતા પણ પરસ્પર નિરૂપિત બને. એટલે કહી શકીએ કે -

હેતુનિષ્ઠવિશેષ્યતાનિરૂપિત < (૧) વ્યાપ્તિનિષ્ઠપ્રકારતા, (૨) સાધ્યનિષ્ઠપ્રકારતા > બંને વચ્ચે પણ નિરૂપ્ય-નિરૂપકભાવ.

એટલે હેતુનિષ્ઠવિશેષ્યતાનિરૂપિતસાધ્યનિષ્ઠપ્રકારતાઆખ્યવિષયતાનિરૂપિતઅવ્યભિચારપદાર્થનિષ્ઠવિષયતાઅનવચ્છિન્નત્વ સાદી ભાષામાં સાધ્ય બન્યું. આમાં પર્યાપ્તિનો

वच्छेदकताकविशेष्यतानिरूपित-प्रकृतसाध्यताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकता-कनिरूपितत्वसम्बन्धावच्छिन्नप्रकारतानिरूपितविशेष्यत्वाभिन्नाऽव्यभिचारपदार्थताऽवच्छेदकता-समानाधिकरणाऽवच्छेदकताकप्रकारताऽनवच्छिन्ना, प्रकृतपक्षताऽवच्छेदकतापर्याप्त्यधिकरणधर्म-पर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरण-धर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपित-प्रकृतसाध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽ-वच्छेदकताकनिरूपितत्वसम्बन्धावच्छिन्नप्रकारतानिरूपितविशेष्यत्वाऽभिन्नसाध्याभाववदवृत्तित्व-त्वाद्यवच्छिन्नप्रकारताऽवच्छिन्नत्वाभावकूटात् । अत्र प्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणधर्म-पर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितत्वम् अव्यभिचारपदार्थतावच्छेदकतासमानाधिकरणा-वच्छेदकताकप्रकारतायां बोध्यम् ।

उभयत्र पर्याप्तिनिवेशप्रयोजनं पूर्ववत् । यदि चाऽत्र प्रकृतसाध्यताऽवच्छेदकाऽवच्छिन्न-विधेयकत्वस्य प्रवेशः न इष्यते तर्हि उक्तस्थले एव प्रकृतसाध्यतावच्छेदकविधया 'पर्वतो वह्निमान्' इत्याद्यनुमितीयसाध्यनिष्ठवह्नित्वादिकमादाय पूर्वोक्तरीत्या बाध-भागासिद्ध्यादिकं स्यादिति तत्प्रवेशोऽपि सार्थकः इति सूक्ष्मबुद्ध्या पर्यालोचनीयम् । ***यद्यपि*** ग्रन्थकृता न साध्यताऽवच्छेदकता-पर्याप्तिनिवेशः दर्शितः ***तथाऽपि*** प्रकृतसाध्यताऽवच्छेदकावच्छिन्नविधेयकत्वस्याऽन्यथाऽसार्थक्येन उक्ताऽऽपत्तेश्चावारणेन सः सामर्थ्यगम्यः इति ।

अन्ये विद्वांसः अत्र साध्यस्य स्वनिरूपितव्याप्तिसम्बन्धेन हेतौ विशेषणत्वमुपगम्याऽनुमानमेवं दर्शयन्ति -

प्रकृतपक्षतावच्छेदकावच्छिन्नपक्षक-प्रकृतसाध्यताऽवच्छेदकावच्छिन्नसाध्यक-प्रकृतहेतुतावच्छेदका-

●

निवेश करीએ તો હેતુનિષ્ઠવિશેષ્યતાનિરૂપિતપ્રકૃતસાધ્યતાઅવચ્છેદકપર્યાપ્તસાધ્યતાઅવચ્છે-દકતાકસાધ્યનિષ્ઠવિશેષ્યતા-(જે સાધ્યતાઅવચ્છેદકની અપેક્ષાએ આવે છે તે. કારણ કે, સાધ્યતાઅવચ્છેદકતાનિરૂપક તાદૃશવિશેષ્યતા જ બની શકે. પૂર્વે પણ જયાં જયાં હેતુતાઅવચ્છેદકતાનિરૂપકવિશેષ્યતા જણાવેલ તે પણ હેતુતાઅવચ્છેદકની અપેક્ષાએ આવે. પણ, વ્યાપ્તિની અપેક્ષાએ આવતી વિશેષ્યતાથી તાદૃશવિશેષ્યતા અભિન્ન બનવાને કારણે તે વખતે વ્યાપ્તિનિરૂપિતવિશેષ્યતા લીધેલી. પૂર્વે બતાવેલ વાતનું ફરીથી અનુસંધાન કરીને આ વાત એકદમ ચોખ્ખી રાખશો.)અભિન્નપ્રકારતાનિરૂપિતઅવ્યભિચારપદાર્થતાઅવ-ચ્છેદકતાસમાનાધિકરણઅવચ્છેદકતાનિરૂપકવિષયતાઅનવચ્છિન્નત્વ સાધ્ય બનશે.

वच्छिन्नहेतुकाऽनुमितिजनकता प्रकृतपक्षताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताक-विशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताक-विशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतसाध्यताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताक-(साध्यनिष्ठ)विशेष्यतानिरूपिताऽव्यभिचारपदार्थताऽवच्छेदकतासमानाधिकरणाऽवच्छेदकताक-प्रकारताऽनवच्छिन्ना, प्रकृतपक्षताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यता-निरूपितप्रकारताऽभिन्न-प्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यता-निरूपितप्रकारताऽभिन्न-प्रकृतसाध्यताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यता-निरूपितसाध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नप्रकारताऽवच्छिन्नत्वाभावकूटात् । अत्र साध्यताऽवच्छेद-कता पर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकतानिरूपिका विशेष्यता साध्यतावच्छेदकनिरूपिता साध्य-निष्ठा, तन्निरूपितत्वं ***यद्यपि*** अव्यभिचारपदार्थनिष्ठतादृशप्रकारतायां न सम्भवति ***तथापि*** एकज्ञानीय-विषयतानां परस्परनिरूप्य-निरूपकभावापन्नत्वमिति नियमेन तादृशविशेष्यतानिरूपितत्वं तादृश-प्रकारतायां सम्भवतीति ध्येयम् । यद्वा तादृशविशेष्यता(ऽभिन्नप्रकारता)निरूपिका या हेतुताऽ-

य शो ल ता

वि न भ्रा

●

❁ સાધ્યની સ્પષ્ટ સમજણ, આકૃતિના માધ્યમે ❁



वच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यता तन्निरूपितत्वस्य तादृशप्रकारतायां सत्त्वेन तादृशविशेष्यतानिरूपकनिरूपित... इत्यादिरीत्या हेतु-साध्ययोः तत्प्रवेशः कर्तव्यः ।

ननु प्रकृतपक्षताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपित-प्रकारताऽभिन्न-प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपित -प्रकृतसाध्यताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकनिरूपितत्वसम्बन्धावच्छिन्न-प्रकारतानिरूपितविशेष्यत्वाऽभिन्नाऽव्यभिचारपदार्थताऽवच्छेदकतासमानाधिकरणाऽवच्छेदकताक-प्रकारताऽवच्छिन्नत्वं किं कुत्राऽपि प्रसिद्धम् ? येन तदभावः अनुमितिजनकतायां साध्यते ? एवमेव प्रकृतपक्षताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यतानिरूपितप्रकारताऽ-भिन्न-प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यतानिरूपित-प्रकृतसाध्यता-ऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताक-निरूपितत्वसम्बन्धावच्छिन्नप्रकारतानिरूपित-विशेष्यताऽभिन्न-साध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नप्रकारताऽवच्छिन्नत्वं किं कुत्राऽपि प्रसिद्धम् ? येन तदभावकूटस्य हेतुत्वं स्वीक्रियते ? ***इति चेद् ?***

न; अनुव्यवसायजनकतायां तत्प्रसिद्धेः । तथा हि - व्यवसायज्ञानं अनुव्यवसायजनकम्, यथा 'घटः' इति व्यवसायात्मकं ज्ञानं 'घटमहं जानामि' इत्यनुव्यवसायज्ञानजनकं भवति ।

●

આ રીતે પક્ષ-હેતુ-સાધ્ય સંબંધી સાક્ષાત્-પરંપરીયવિષયતાથી અતિરિક્ત અવ્યભિચાર-પદાર્થનિષ્ઠવિષયતાથી અનવચ્છિન્નત્વ અનુમિતિજનકતામાં રહે જ છે. કારણ કે વહ્નિઅભાવવદ્અવૃત્તિધૂમસમાનાધિકરણવહ્નિનિષ્ઠસાધ્યતાઅવચ્છેદકતારૂપ વિષયતા જ વહ્નિઅભાવવદ્અવૃત્તિત્વમાં રહે છે. તે સિવાયની કોઈ વિષયતા અવ્યભિચારપદાર્થમાં નથી કે જેનાથી અવચ્છિન્નત્વ અનુમિતિજનકતામાં આપણે કહી શકીએ. આમ, બાધ તથા ભાગાસિદ્ધિની આપત્તિનું નિવારણ થઈ જાય છે. પુનઃ સાધ્ય અને હેતુ આખા જોઈ લઈએઃ-

સાધ્ય = પ્રકૃતપક્ષતાઅવચ્છેદકતાપર્યાપ્તિઅધિકરણીભૂતધર્મપર્યાપ્તપક્ષતાઅવ-ચ્છેદકતાનિરૂપકપક્ષનિષ્ઠવિશેષ્યતાનિરૂપિતપ્રકારતાઆખ્યવિષયતાઅભિન્નપ્રકૃતહેતુતા-અવચ્છેદકપર્યાપ્તહેતુતાઅવચ્છેદકતાનિરૂપકહેતુનિષ્ઠવિશેષ્યતાનિરૂપિતપ્રકારતાઆખ્ય-વિષયતાઅભિન્નપ્રકૃતસાધ્યતાઅવચ્છેદકપર્યાપ્તસાધ્યતાઅવચ્છેદકતાનિરૂપકસાધ્યનિષ્ઠ-વિશેષ્યતાનિરૂપિતઅવ્યભિચારપદાર્થતાઅવચ્છેદકતાસમાનાધિકરણપ્રકારતાઆખ્યવિષયતા-અવચ્છેદકતાનિરૂપક-વિષયતાઅનવચ્છિન્નત્વ.

હેતુ = પ્રકૃતપક્ષતાઅવચ્છેદકતાપર્યાપ્તિઅધિકરણીભૂતધર્મપર્યાપ્તપક્ષતાઅવચ્છેદકતા-

ततश्च व्यवसायाऽऽत्मकज्ञानेऽनुव्यवसायज्ञानजनकता भवतीति । कस्यचिद् 'वह्निनिरूपिताऽव्यभिचारविशिष्टधूमविशिष्टः पर्वतः' इतिज्ञानमभवत्, यद्यपि एतज्ज्ञानमनुमितिजनकं न भवति तथापि 'तादृशपर्वतमहं जानामि' इत्यनुव्यवसायजनकं भवत्येव । 'वह्निनिरूपिताऽव्यभिचारविशिष्टधूमविशिष्टं पर्वतमहं जानामि' इत्याकाराऽनुव्यवसायजनकता 'वह्निनिरूपिताऽव्यभिचारविशिष्टधूमविशिष्टः पर्वतः' इत्याकारकव्यवसायात्मकज्ञाने एव । एतज्ज्ञाने च अव्यभिचारपदार्थे सर्वतोऽतिरिक्तप्रकारता भासते, प्रकृतपक्षताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्वतत्वपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरणधर्मधूमत्वपर्याप्तानिरूपकपक्षनिष्ठविशेष्यतानिरूपितप्रकारताआख्यविषयताअभिन्नप्रकृतहेतुताअवच्छेदकपर्याप्तहेतुताअवच्छेदकतानिरूपकहेतुनिष्ठविशेष्यतानिरूपितप्रकारताआख्यविषयताअभिन्नप्रकृतसाध्यताअवच्छेदकपर्याप्तसाध्यताअवच्छेदकतानिरूपकसाध्यनिष्ठविशेष्यतानिरूपितसाध्याभाववद्अवृत्तित्वत्वादिअवच्छिन्नत्वअभावकूट.

हवे जो पक्षमां प्रकृतसाध्यताअवच्छेदकअवच्छिन्नविधेयक न उमेरीओ तो कोई अनुमितिजनकतामां रहेल अनुमितिपद द्वारा **पर्वतो वह्न्यभाववदवृत्तिधूमसमानाधिकरणवह्निमान्, धूमात्** आ अनुमिति ले. तथा साध्यमां प्रकृतसाध्यता...ईत्यादि आवे त्यारे प्रकृतसाध्य तरीके **पर्वतो वह्निमान्, धूमात्** आ अनुमानमां भासित वह्निने ज ले अने केवलवह्नित्वने ज साध्यताअवच्छेदक तरीके ले तो पुनः बाध अने भागअसिद्धि दोष आवी ज पडे. माटे अनुमितिजनकतामां पण प्रकृतसाध्यताअवच्छेदकअवच्छिन्नविधेयक उमेरवुं जरूरी छे. तेनाथी जे प्रस्तुतमां अनुमिति लीधी ते ज अनुमितिमां भासमान साध्य साध्यगतप्रकृतसाध्यशब्द द्वारा लई शकाशे. आम, बाध तथा भागअसिद्धि दोष नीकळी जशे. आ रीते अमने जणाय छे. बहुश्रुतो अन्यथा पण संगति करी शके छे.

❁ अवच्छेदकअवच्छिन्नत्वप्रवेशप्रयोजन ❁

प्रश्न :- प्रकृतहेतुताअवच्छेदकअवच्छिन्नलिंगक-प्रकृतसाध्यताअवच्छेदकअवच्छिन्नसाध्यक-प्रकृतपक्षताअवच्छेदकअवच्छिन्नपक्षक अनुमितिजनकता लेवानुं तमे जणाव्युं. पण, आटलुं लांबुं केम कह्युं ? 'प्रकृतलिंगक-प्रकृतविधेयक-प्रकृतपक्षक अनुमितिजनकता लेवानी' फक्त आटलुं ज कहो. आना द्वारा पण आपत्ति दूर थई शके छे. कारण के जे प्रस्तुत हेतु होय ते ज साध्यगतप्रकृतहेतुपदथी ग्राह्य बनशे. तो पछी आटलुं लांबुं कहेवानुं कोई प्रयोजन खरुं ?

ऽवच्छेदकताकविशेष्यतानिरूपित-प्रकृतसाध्यताऽवच्छेदकतापर्याप्त्यधिकरणधर्मवह्नित्वपर्याप्ता-ऽवच्छेदकताकनिरूपितत्वसम्बन्धावच्छिन्नप्रकारतानिरूपितविशेष्यत्वाऽभिन्नाऽव्यभिचार-पदार्थताऽवच्छेदकतासमानाधिकरणाऽवच्छेदकताकप्रकारता प्रकृतज्ञाने अव्यभिचारपदार्थे भासते इति भावः । तादृशप्रकारताऽवच्छिन्नत्वं च तादृशव्यवसायात्मकज्ञाननिष्ठाऽनुव्यवसायजनकतायां प्रसिद्धम्, तदभावश्च अनुमितिजनकतायां साध्यते इति न कश्चिद् दोषः ।

एवञ्च 'वह्निनिरूपितसाध्याभाववदवृत्तित्वरूपाऽव्यभिचारविशिष्टधूमविशिष्टः पर्वतः', 'वह्न्य-भाववदवृत्तिधूमविशिष्टः पर्वतः' इत्याद्याकारकव्यवसायज्ञाननिष्ठस्वाऽनुव्यवसायजनकतायां प्रकृत-पक्षताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृत-हेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपित-प्रकृतसाध्यताऽवच्छेद-

य शो ल ता

●

उत्तर :- निरर्थक वस्तुना कथन साथे अमारे बारमो चंद्र छे. जो प्रकृतलिंगक आटलुं ज कहेवामां आवे तो **'पर्वतो वह्निमान्, वह्न्यभाववदवृत्तिधूमात्'** - आ स्थलमां पुनः बाध अने भागअसिद्धि दोष आवी पडशे. प्रकृतहेतु तरीके लईए वह्निअभाववद्अवृत्ति धूम. एतादृशहेतुकअनुमितिजनकतामां साध्य रहेवुं जोईए. साध्यमां ज्यारे प्रकृतहेतु...आवशे त्यारे लईशुं - **पर्वतो वह्निमान् धूमात्** स्थलीय धूम. प्रश्न थाय के - "पूर्वे जे प्रकृतहेतुथी हेतु लीधो ते ज प्रस्तुतमां प्रकृतहेतुथी ग्राह्य बने. बंने हेतु वच्चे अभेद होवो जोईए ?" जवाब स्पष्ट छे - अहीं अमे एवो ज हेतु लीधो छे. कारण के **'विशिष्टं शुद्धान्नातिरिच्यते'** न्यायथी वह्निअभाववद्अवृत्ति धूम अने शुद्ध धूम वच्चे अभेद ज छे. माटे, पक्षमां जे प्रकृतहेतु जणावेल छे तेना द्वारा विशिष्टहेतु लईशुं अने साध्यमां जे प्रकृतहेतु जणावेल छे तेना द्वारा शुद्धहेतु लईशुं. बंने वच्चे अभेद ज छे. आम, पुनः पूर्वोक्तरीत्या बाध अने भागअसिद्धि आवी जाय.

वि न भा

जो प्रकृतहेतुताअवच्छेदकअवच्छिन्नलिंगक कहेवामां आवे तो वह्निअभाववद्-अवृत्तिधूम ज बंने जग्याए = पक्षमां अने साध्यमां लेवो पडे. कारण के वह्निअभाववद्-अवृत्तिधूम अने धूम अभिन्न होवा छतां पण वह्निअभाववद्अवृत्तिधूमत्वावच्छिन्न अने केवलधूमत्वावच्छिन्न वच्चे तो भेद ज छे ने ? बंने थोडा एक छे ? जे रीते विशिष्टसत्ता अने शुद्धसत्ता वच्चे अभेद होवा छतां विशिष्टसत्तात्वअवच्छिन्न कहेवामां आवे त्यारे विशिष्टसत्ता ज आवे, शुद्धसत्ता न आवे. ते रीते प्रस्तुतमां पण समजवुं. माटे, हेतुताअवच्छेदक ईत्यादि जे लखेल छे ते सार्थक ज छे. जे रीते हेतुताअवच्छेदक माटे

अनुमितिजनकता च प्रकृतहेतुतावच्छेदकावच्छिन्नलिङ्गक-प्रकृत-साध्यतावच्छेदकावच्छिन्नविधेयक-प्रकृतपक्षतावच्छेदकावच्छिन्नपक्षका-नुमितिजनकतारूपा ग्राह्या ।

●

कतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकप्रकारतानिरूपितविशेष्यत्वाऽभिन्न-साध्याभाववद-वृत्तित्वाऽवच्छिन्नप्रकारताऽवच्छिन्नत्वं प्रसिद्धम्, एवमेव साध्यवद्भिन्नसाध्याभाववदवृत्तित्वादिषु अपि भावनीयम् । तथा च तादृशाऽवच्छिन्नत्वाभावकूटरूपहेतोरङ्गीकारे न कश्चिद् दोषः इति स्थितम् ।

शब्दार्थश्चैवम् - **अनुमितिजनकता च प्रकृतहेतुताऽवच्छेदकाऽवच्छिन्नलिङ्गक-प्रकृतसाध्यताऽव-च्छेदकाऽवच्छिन्नविधेयक-प्रकृतपक्षताऽवच्छेदकाऽवच्छिन्नपक्षकाऽनुमितिजनकतारूपा ग्राह्या,** प्रकृत-साध्यताऽवच्छेदकाऽवच्छिन्नविधेयकत्वप्रवेशस्याऽन्यथाऽनुपपत्त्या, उक्ताऽऽपत्तेः अपरिहारेण च साध्यतावच्छेदकतापर्याप्तिनिवेशस्याऽऽवश्यकत्वात् तत्पूर्वकमेवमनुमानं बोद्धव्यम् - 'प्रकृतहेतुताऽ-वच्छेदकावच्छिन्नलिङ्गक-प्रकृतसाध्यताऽवच्छेदकाऽवच्छिन्नविधेयक-प्रकृतपक्षताऽवच्छेदकाऽ-वच्छिन्नपक्षकाऽनुमितिजनकता प्रकृतपक्षताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताक-विशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताक-विशेष्यतानिरूपित-प्रकृतसाध्यताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकनिरूपितत्वादि-सम्बन्धावच्छिन्नप्रकारतानिरूपितविशेष्यत्वाभिन्नाऽव्यभिचारपदार्थतावच्छेदकतासमानाधिकरणाऽ-वच्छेदकताकप्रकारताऽनवच्छिन्ना, प्रकृतपक्षताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताक-विशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताक-विशेष्यतानिरूपित-प्रकृतसाध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकनिरूपितत्वादि-

●

બતાવ્યું તે જ રીતે સાધ્યતાઅવચ્છેદકની અને પક્ષતાઅવચ્છેદકની સાર્થકતા પણ તે તે સ્થળમાં સમજી લેવી. આ રીતે પ્રકૃતહેતુતાઅવચ્છેદકઅવચ્છિન્નલિંગક-પ્રકૃતસાધ્યતા-અવચ્છેદકઅવચ્છિન્નવિધેયક-પ્રકૃતપક્ષતાઅવચ્છેદકઅવચ્છિન્નપક્ષક અનુમિતિજનકતા પક્ષ તરીકે પ્રાપ્ત થશે.

હવે **શબ્દાર્થ** જોઈએ - અનુમિતિજનકતા પ્રસ્તુતમાં પ્રકૃતહેતુતાઅવચ્છેદકઅવચ્છિન્ન-લિંગક (લિંગ = હેતુ) પ્રકૃતસાધ્યતાઅવચ્છેદકઅવચ્છિન્નવિધેયક (વિધેય = સાધ્ય) પ્રકૃતપક્ષતાઅવચ્છેદકઅવચ્છિન્નપક્ષક અનુમિતિજનકતાસ્વરૂપ લેવાની.

नातः प्रागुक्तानुमितिजनकतायां केवलपर्वतत्वादिरूपपक्षतावच्छेदकमादाय भागासिद्धितादवस्थ्यम् ।

●

सम्बन्धाऽवच्छिन्नप्रकारतानिरूपितविशेष्यत्वाऽभिन्न-साध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नप्रकारताऽवच्छिन्नत्वाऽभावकूटात् । एतादृशाऽनुमानम् अङ्गीकरणीयमिति भावः ।

प्रकृतपरिष्कारप्रयोजनं प्रदर्शयति - **न अतः** = एतादृशाऽनुमानाङ्गीकारात् **प्रागुक्ताऽनुमितिजनकतायां** = 'वह्न्यभाववदवृत्तिधूमवत्पर्वतो वह्निमान्, धूमात्', 'पर्वतो वह्न्यभाववदवृत्तिधूमविशिष्टवह्निमान् धूमात्', 'पर्वतो वह्निमान् वह्न्यभाववदवृत्तिधूमाद्' इत्यादिकाः याः अनुमितयः यथासङ्ख्यं तज्जनकाः 'धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसमानाधिकरणधूमविशिष्टः वह्न्यभाववदवृत्तिधूमवत्पर्वतः', 'वह्न्यभाववदवृत्तिधूमविशिष्टवह्निनिरूपितव्याप्तिविशिष्टधूमविशिष्टः पर्वतः', 'वह्न्यभाववदवृत्तिधूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसमानाधिकरणवह्न्यभाववदवृत्तिधूमविशिष्टः पर्वतः' इत्याद्याकारकाः ये परामर्शाः तन्निष्ठतादृशाऽनुमितिजनकतायां **केवलपर्वतत्वादिरूपपक्षताऽवच्छेदकमादाय,** प्रकृतपक्षताऽवच्छेदकतापर्याप्त्यधिकरणधर्म... इत्यादिहेतु-साध्यकोटौ प्रकृतपक्षताऽवच्छेदकविधया 'पर्वतो वह्निमान्' इत्याद्यनुमितिविषयीभूतकेवलपर्वतत्वमादायेत्यर्थः । अत्र 'केवलपर्वतत्वादिरूपपक्षताद्यवच्छेदकमादाय' इत्येवम् आदिपदस्य पक्षतापदानन्तरमनुषङ्गः कर्तव्यः, तथा चोक्तत्रितयस्थलीयाऽनुमितिजनकतायां यथासङ्ख्यं केवलपर्वतत्वरूपपक्षताऽवच्छेदकमादाय, केवलवह्नित्वरूपसाध्यताऽवच्छेदकमादाय, केवलधूमत्वरूपहेतुताऽवच्छेदकमादाय चेति यावत्, पूर्वोक्तयुक्त्या हेतु-साध्याभावयोः तादृशाऽनुमितिजनकतायां सत्त्वेन **भागासिद्धितादवस्थ्यम्,** उपलक्षणाद् बाधतादवस्थ्यम्, पूर्वोक्तनञः अत्राऽन्वयः, तथा च उक्तपरिष्कारेण न बाध-भागासिद्धितादवस्थ्यमिति भावः ।

पुनः बाध-भागासिद्धी शङ्कते - **न चैवमित्यादिना** । अयमाशयः -

●

આથી પ્રાગુક્ત = **वह्न्यभाववदवृत्तिधूमवत्पर्वतः वह्निमान्, धूमात्** આવા પ્રકારની અનુમિતિની જનકતામાં ફક્ત પર્વતત્વ વગેરે સ્વરૂપ પક્ષતાઅવચ્છેદકને લઈને પુનઃ ભાગઅસિદ્ધિ તદવસ્થા = જેવી ને તેવી આવી નહીં જાય.

⌘ બાધ અને ભાગાસિદ્ધિની આપત્તિ વધુ એક વાર ⌘

(न चै.) **पूर्वपक्ष :-** તમે ગમે તેટલા પરિષ્કારો કરો. બાધ અને ભાગઅસિદ્ધિ દોષ

ननु बाध-भागासिद्धियुगलं भवता प्रदर्शिताऽनुमानसङ्गं न जातु त्यक्तुमिच्छति इति किमर्थं तद्वियोगाय भवता प्रयत्नः विधीयते ? एतादृशसुदीर्घपरिष्काराऽनन्तरमपि बाध-भागासिद्धिप्रसङ्गः न प्रतिनिवृत्तः । बाध-भागासिद्धी स्यातामेव । तथा हि - 'पर्वतो वह्निमान्, धूमाद्' इत्येतत्स्थले एव कस्यचिद् 'धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्य-वह्न्यभाववद-वृत्तित्वोभयविशिष्टधूमविशिष्टः पर्वतः' - इत्येतादृशः परामर्शः अभवत्, एतादृशज्ञानादुक्ताऽनुमितिस्तु भवत्येव, अतः एतादृशज्ञाने उक्ताऽनुमितिजनकता वर्तते, तादृशाऽनुमितिजनकतायाः अवच्छेदकता उक्तज्ञानीयविषयतायां भवति । उक्तज्ञाने धूमसामानाधिकरण्ये वह्न्यभाववदवृत्तित्वे च उभयस्मिन् विषयता, तादृशविषयता प्रकारताऽऽख्या धूमसामानाधिकरण्यत्व-वह्न्यभाव-वदवृत्तित्वत्वोभयाऽवच्छिन्ना, एतादृशी वह्न्यभाववदवृत्तित्वत्वावच्छिन्ना प्रकारता साध्यतावच्छेदकता, पक्षतावच्छेदकता, हेतुतावच्छेदकता - एतत्सर्वाऽवच्छेदकतातोऽतिरिक्ता एव, वह्न्यभाववदवृत्तित्वस्य साध्यताद्यवच्छेदकविधयाऽभानात् ।

ततश्चोक्तज्ञाननिष्ठाऽनुमितिजनकतायां वह्न्यभाववदवृत्तित्वत्वावच्छिन्नप्रकारताऽऽख्यविषयता-ऽवच्छिन्नत्वमस्ति एव, तादृशप्रकारताऽऽख्यविषयता च भवतां यादृशी अपेक्षिता तादृशी एव । अर्थात् तादृशाऽनुमितिजनकतायां प्रकृतपक्षताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताक-

●

તો અમે તમને આપવાના જ છીએ. હવે સાદું સ્થલ જ લઈએ - **पर्वतो वह्निमान् धूमात्** આ સ્થલમાં સામાન્યથી પરામર્શ થાય - ધૂમસમાનાધિકરણઅત્યંતાભાવઅપ્રતિયોગિવહ્નિ-સમાનાધિકરણધૂમવાન્ પર્વત. કોઈ વ્યક્તિને જાણમાં હતું કે ધૂમ વહ્નિઅવ્યભિચારી છે. એટલે કે વહ્નિઅભાવવદ્અવૃત્તિ છે. માટે તેમણે પરામર્શ આવો કર્યો - ધૂમસમાનાધિકરણ-અત્યંતાભાવઅપ્રતિયોગિવહ્નિસામાનાધિકરણ્ય-વહ્નિઅભાવવદ્અવૃત્તિત્વઉભયવિશિષ્ટધૂમવાન પર્વત. આ પરામર્શમાં રહેલી અનુમિતિજનકતા ધૂમસમાનાધિકરણઅત્યંતાભાવઅપ્રતિયોગિ-સાધ્યસામાનાધિકરણ્યત્વઅવચ્છિન્નવિષયતાથી જે રીતે અવચ્છિન્ન બને છે તે જ રીતે વહ્નિઅભાવવદ્અવૃત્તિત્વત્વઅવચ્છિન્નવિષયતાથી પણ અવચ્છિન્ન બનશે. કારણ કે ઉભય ધર્મો પરામર્શમાં ભાસે છે. તથા આ પરામર્શમાં સાધ્યાભાવવદ્અવૃત્તિત્વનિષ્ઠવિષયતા પક્ષ-હેતુ-સાધ્ય ત્રણે કોટિની વિષયતાથી અતિરિક્ત જ છે. એટલે કે પ્રકૃતપક્ષતાઅવચ્છેદક પર્વતત્વમાં જે પક્ષતાઅવચ્છેદકતા છે તેની પર્યાપ્તિનું અધિકરણ પર્વતત્વ. તેમાં પર્યાપ્ત-પક્ષતાઅવચ્છેદકતાનિરૂપકપર્વતનિષ્ઠવિશેષ્યતાનિરૂપિતપ્રકારતાઆખ્યવિષયતાઅભિન્નહેતુતા-અવચ્છેદકધૂમત્વમાં જ પર્યાપ્ત જે હેતુતાઅવચ્છેદકતા તન્નિરૂપકધૂમનિષ્ઠવિશેષ્યતાનિરૂપિત-

विशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताक-विशेष्यतानिरूपित-प्रकृतसाध्यताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकनिरूपित-त्वादिसम्बन्धावच्छिन्नप्रकारताकविशेष्यत्वाभिन्न-साध्याभाववदवृत्तित्वत्वाऽवच्छिन्नप्रकारताऽवच्छिन्न-त्वमेव स्यात्, न तु तादृशविशेष्यताऽभिन्न-साध्याभाववदवृत्तित्वत्वावच्छिन्नप्रकारताऽवच्छिन्नत्वाभाव-कूटरूपः हेतुः इति भागासिद्धिः दुर्वारा । तादृशानुमितिजनकताऽवच्छेदकीभूतप्रकारतायाः अवच्छेदकता साध्याभाववदवृत्तित्वत्वे अव्यभिचारपदार्थताऽवच्छेदकताधिकरणे इति तादृशाऽनुमिति-जनकतायां प्रकृतपक्षताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यतानिरूपित-प्रकारताऽभिन्न-प्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपित-प्रकृतसाध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकनिरूपितत्वादिसम्बन्धावच्छिन्न-प्रकारतानिरूपितविशेष्यत्वाभिन्नाऽव्यभिचारपदार्थतावच्छेदकतासमानाधिकरणाऽवच्छेदकताक-प्रकारताऽवच्छिन्नत्वमेव स्यात्, न तु तादृशप्रकारताऽनवच्छिन्नत्वरूपं साध्यमिति बाधोऽपि दुर्वारः

●

પ્રકારતાઆખ્યવિષયતાઅભિન્નસાધ્યતાઅવચ્છેદકવહ્નિત્વપર્યાપ્તસાધ્યતાઅવચ્છેદકતા-નિરૂપકવહ્નિનિષ્ઠવિશેષ્યતાનિરૂપિતઅવ્યભિચારપદાર્થતાઅવચ્છેદકતાસમાનાધિકરણપ્રકારતા-અવચ્છેદકતાનિરૂપકપ્રકારતાથી (= વિષયતાથી) અવચ્છિન્ન જ અનુમિતિજનકતા બનશે. કારણ કે તાદશવહ્નિનિષ્ઠવિશેષ્યતાનિરૂપિતસાધ્યાભાવવદ્અવૃત્તિત્વત્વઅવચ્છિન્ન(સાધ્યા-ભાવવદ્અવૃત્તિત્વનિષ્ઠ)વિષયતાથી અવચ્છિન્નત્વ જ અનુમિતિજનકતામાં જાય છે તાદશ-વિષયતાઅવચ્છિન્નત્વનો અભાવ નહીં. આમ, સાધ્ય અને હેતુ ઉભયનો પક્ષમાં અભાવ મળી જવાને કારણે બાધ અને ભાગઅસિદ્ધિ દુર્વાર બનશે. જો પક્ષમાં કે હેતુમાં કે સાધ્યમાં ક્યાંક પક્ષતાઅવચ્છેદક, સાધ્યતાઅવચ્છેદક કે હેતુતાઅવચ્છેદક તરીકે જ સાધ્યાભાવવદ્-અવૃત્તિત્વને ઘૂસાડ્યું હોત તો પક્ષતાઅવચ્છેદકતાપર્યાપ્તિ, હેતુતાઅવચ્છેદકતાપર્યાપ્તિ અને સાધ્યતાઅવચ્છેદકતાપર્યાપ્તિ - આ ત્રણનો નિવેશ કરવા દ્વારા જ તેની વિષયતાનું ગ્રહણ થઈ જાત. પણ આ તો સાધ્ય, હેતુ કે પક્ષમાં સાધ્યતાઅવચ્છેદક, હેતુતાઅવચ્છેદક કે પક્ષતાઅવચ્છેદક રૂપે જણાવાના બદલે સીધું પરામર્શમાં જ વ્યાપ્તિની સાથે હેતુના વિશેષણ તરીકે જણાય છે. માટે તેની વિષયતા તદ્દન અતિરિક્ત જ મળવાની, પક્ષતાઅવ-ચ્છેદકતા,સાધ્યતાઅવચ્છેદકતા કે હેતુતાઅવચ્છેદકતા સ્વરૂપ નહીં મળે. માટે, અનુમિતિ-જનકતામાં તાદશવિષયતાઅવચ્છિન્નત્વ જ રહેતું હોવાને કારણે બાધ તથા ભાગઅસિદ્ધિ દોષ આટ-આટલા પરિષ્કાર કર્યા પછી પણ દુર્વાર જ બનશે.

एव ।

न चैतादृशस्थले एव दोषप्रदर्शनं किमर्थम् ? 'धूमसमानाधिकरणाऽत्यन्ताभावाप्रतियोगिवह्निसमानाधिकरणधूमविशिष्टः पर्वतः, धूमश्च वह्न्यभाववदवृत्तिः' एतादृशज्ञाननिष्ठाऽनुमितिजनकताऽपि वह्न्यभाववदवृत्तित्वत्वावच्छिन्नविषयताऽवच्छिन्नैव स्यात्, वह्न्यभाववदवृत्तित्वस्योक्तज्ञाने धूमे प्रकारतया भानात्, एतच्च प्रकारत्वमपेक्षितमेव, न तु पक्षताद्यवच्छेदकतारूपम् । तथा चोक्तज्ञाननिष्ठाऽनुमितिजनकतायामपि प्रकृतपक्षताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्वतत्वपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरणधर्मधूमत्वपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपित-प्रकृतसाध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मवह्नित्वपर्याप्तावच्छेदकताक(निरूपितत्वसम्बन्धावच्छिन्न)प्रकारतानिरूपितविशेष्यत्वाभिन्नाऽव्यभिचारपदार्थताऽवच्छेदकतासमानाधिकरणाऽवच्छेदकताकप्रकारताऽवच्छिन्नत्वस्यैव सत्त्वेन तादृशप्रकारताऽनवच्छिन्नत्वरूपसाध्यस्याभावात् प्रकृतपक्षतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितप्रकृतसाध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकप्रकारतानिरूपितविशेष्यत्वाभिन्न-साध्याभाववदवृत्तित्वत्वावच्छिन्नप्रकारताऽवच्छिन्नत्वस्यैव सत्त्वेन तादृशविशेष्यत्वाभिन्नसाध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नप्रकारताऽवच्छिन्नत्वाभावकूटरूपहेतोरसत्त्वाच्च बाध-भागासिद्धिप्रसङ्गः स्यादेव ।

य शो ल ता

एवमुक्तज्ञाननिष्ठाऽनुमितिजनकतामादायाऽपि आपत्तिसम्भवे किमर्थम् उभयवैशिष्ट्याऽवगाहिज्ञानपर्यन्तमनुधावन***मिति वाच्यम्;***

उक्तस्थले तादृशाऽऽपत्तिविरहात्, तत एव तादृशस्थलाऽनुसरणस्योचितत्वाच्चेति । अयमाशयः - 'धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसमानाधिकरणधूमविशिष्टः पर्वतः, धूमश्च वह्न्यभाववदवृत्तिः' इति ज्ञाने यद्यपि 'पर्वतो वह्निमान्' इत्याकारकाऽनुमितिजनकता वर्तते तथापि तज्जनकताऽवच्छेदकता पर्वतनिष्ठविषयतायाम्, धूमनिष्ठविषयतायाम्, सामानाधिकरण्यनिष्ठविषयतायाम्, वह्निनिष्ठविषयतायां भवेत्, किन्तु वह्न्यभाववदवृत्तित्वनिष्ठविषयतायां न भवेत् । यतः 'पर्वतो वह्निमान्' इत्याद्यनुमितिजनकज्ञाने पर्वतः, धूमः, सामानाधिकरण्यम्, वह्निश्च विषयविधया भासन्ते एव, वह्न्यभाववदवृत्तित्वं भासेताऽपि, न भासेताऽपि । तथा च यत्र यत्र 'पर्वतो वह्निमान्' इत्याकारकाऽनुमितिजनकता भवेत् तत्र तत्र पर्वतादयः विषयविधया भासन्ते एवेति, यत्र यत्र च विषयविधया पर्वतादयो भासन्ते तत्र तत्र 'पर्वतो वह्निमान्'

इत्याकारकाऽनुमितिजनकता भवेदेवेति अनुमितिजनकतातो विषयतासम्बन्धेन पर्वतादयः अनतिरिक्तवृत्तयः इति अनतिरिक्तवृत्तित्वरूपाऽवच्छेदकत्वं तेषु, तन्निष्ठविषयतासु च वर्तते । किन्तु वह्न्यभाववदवृत्तित्वनिष्ठविषयता न तादृशी, यतः 'वह्न्यभाववदवृत्तित्वविशिष्टः धूमः' इत्येतादृशज्ञाने तादृशविषयता वह्न्यभाववदवृत्तित्वे भासते, अर्थाद् वह्न्यभाववदवृत्तित्वमत्र विषयतया भासते तथापि नात्राऽनुमितिजनकता ।

ततश्च यत्र यत्र विषयतासम्बन्धेन(= स्वनिष्ठविषयताकत्वसम्बन्धेन) वह्न्यभाववदवृत्तित्वं तत्र तत्र अनुमितिजनकता स्यादेव इति नियमाभावेन अनुमितिजनकतातो विषयतासम्बन्धेन वह्न्यभाववदवृत्तित्वमतिरिक्तवृत्ति अभवदिति न वह्न्यभाववदवृत्तित्वे अनतिरिक्तवृत्तित्वरूपाऽवच्छेदकता सम्भवति, अनतिरिक्तवृत्तिधर्मे एव तादृशाऽवच्छेदकतायाः सत्त्वादिति 'धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसमानाधिकरणधूमविशिष्टः पर्वतः धूमश्च वह्न्यभाववदवृत्तिः' इत्याकारकज्ञाननिष्ठाऽनुमितिजनकता प्रकृतपक्षतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितप्रकाराताऽभिन्न-प्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यतानिरूपित-प्रकृतसाध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकप्रकारतानिरूपितविशेष्यत्वाऽभिन्नाऽव्यभिचारपदार्थतावच्छेदकतासमानाधिकरणाऽवच्छेदकताकप्रकारताऽनवच्छिन्ना एव अस्ति, ततः कुतः बाधः ? एवं हेतोरपि तादृशाऽनुमितिजनकतायां सत्त्वात् कुतः भागासिद्धिः ?

'धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्य-वह्न्यभाववदवृत्तित्वोभयविशिष्टधूमविशिष्टः पर्वतः' इत्याकारकज्ञाननिष्ठाऽनुमितिजनकतामादायोक्तदोषाऽऽपत्तिः सम्भवत्येव। तथा हि - उक्तज्ञाने -



इत्येवं पर्वते विशेष्यता धूमनिरूपिता, धूमे च उभयस्य विशेष्यता, अतः पर्वतनिष्ठविशेष्यतानिरूपितप्रकारता धूमे वर्तते, धूमनिष्ठविशेष्यतानिरूपितप्रकारता धूमसमानाधिकरणाऽत्यन्ताभावाऽ-

प्रतियोगिवह्निसामानाधिकरण्ये वह्न्यभाववदवृत्तित्वे च अस्ति । उक्तज्ञाननिष्ठाऽनुमितिजनकता-वच्छेदकता तादृशप्रकारतायां स्यादेव, यतः यत्र यत्र अनुमितिजनकता तत्र तत्र पर्वतनिष्ठविशेष्यता-निरूपितप्रकारताऽभिन्नधूमनिष्ठविशेष्यतानिरूपिततादृशसामानाधिकरण्यनिष्ठप्रकारता स्यादेव । यथा 'धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसमानाधिकरणधूमविशिष्टः पर्वतः' इत्ये-तादृशज्ञाने अनुमितिजनकताऽस्ति तत्र परम्परासम्बन्धेन तादृशप्रकारताऽपि अस्ति एव ।

ततश्च उक्तज्ञाननिष्ठाऽनुमितिजनकता पर्वतनिष्ठविशेष्यतानिरूपितप्रकारताऽभिन्नधूमनिष्ठ-विशेष्यतानिरूपितधूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्यनिष्ठ-प्रकारताऽवच्छिन्ना भवत्येव । तादृशप्रकारता यथा धूमसमानाधिकरणाऽत्यन्ताभावाप्रतियोगिवह्नि-सामानाधिकरण्ये वर्तते तथा वह्न्यभाववदवृत्तित्वेऽपि, उभयत्र धूमनिरूपितायाः एकस्याः एव प्रकारतायाः सत्त्वात् । ततः यथा तांदृशप्रकारता धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगि-वह्निसामानाधिकरण्यत्वावच्छिन्ना तथा वह्न्यभाववदवृत्तित्वत्वावच्छिन्नाऽपि । अतः यथा तादृश-ज्ञाननिष्ठाऽनुमितिजनकता धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्यत्वाऽ-वच्छिन्नप्रकारताऽवच्छिन्ना भवति तथैव वह्न्यभाववदवृत्तित्वत्वावच्छिन्नप्रकारताऽवच्छिन्नाऽपि भवेदेव, तादृशप्रकारताऽवच्छेदकतायाः उभयत्र सत्त्वात् । तादृशसामानाधिकरण्यत्व-वह्न्यभाववद-वृत्तित्वत्वोभयावच्छिन्नविषयतायाः अनतिरिक्तवृत्तित्वेनाऽवच्छेदकत्वे वह्न्यभाववदवृत्तित्वत्वावच्छिन्न-विषयताया अवच्छेदकत्वं सिध्येदेवेति भावः ।

ततश्च 'धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्य-वह्न्यभाववदवृत्ति-त्वोभयविशिष्टधूमविशिष्टः पर्वतः' – इत्येतादृशज्ञाननिष्ठाऽनुमितिजनकतायां प्रकृतपक्षताऽ-वच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुताऽ-वच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यतानिरूपित-प्रकृतसाध्यतावच्छेदकता-पर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकप्रकारतानिरूपितविशेष्यत्वाभिन्नाऽव्यभिचारपदार्थता-वच्छेदकतासमानाधिकरणाऽवच्छेदकताकप्रकारतावच्छिन्नत्वमेव स्यादिति बाधः दुर्निवारः, एवं च तादृशविशेष्यत्वाभिन्नसाध्याभाववदवृत्तित्वत्वावच्छिन्नप्रकारतावच्छिन्नत्वस्यैव सत्त्वाद् भागासिद्धिरपि दुर्वारैवेति सम्यग् विभावनीयम् ।

एतदेवाह - **न चेत्यस्य 'वाच्यम्'** इति परेणाऽन्वयः । **एवम् अपि** = प्रकृतहेतुतावच्छेदका-वच्छिन्नलिङ्गक-प्रकृतसाध्यतावच्छेदकावच्छिन्नविधेयक-प्रकृतपक्षतावच्छेदकावच्छिन्नपक्षकानुमिति-

न चैवमपि 'धूमव्यापकवह्निसामानाधिकरण्य-वह्न्यभाववदवृत्तित्वोभयवद्धूमवान् पर्वतः'- इतिज्ञानीयतादृशसामानाधिकरण्यत्वावच्छिन्न-साध्याभाववदवृत्तित्वत्वावच्छिन्नविषयताया जनकतावच्छेदकत्वेन भागासिद्धितादवस्थ्यम् ।

गूढार्थ

●

जनकता प्रकृतपक्षतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यतानिरूपित-प्रकृतसाध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकप्रकारतानिरूपितविशेष्यत्वाभिन्नाऽव्यभिचारपदार्थतावच्छेदकतासमानाधिकरणाऽवच्छेदकताकप्रकारताऽनवच्छिन्ना, प्रकृतपक्षतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यतानिरूपित-प्रकृतसाध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकप्रकारतानिरूपितविशेष्यत्वाभिन्न-साध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नप्रकारताऽवच्छिन्नत्वाभावकूटाद् - इत्येवं परिष्कृताऽनुमानाङ्गीकारेऽपि '**धूमव्यापकवह्निसामानाधिकरण्य-वह्न्यभाववदवृत्तित्वोभयवद्धूमवान् पर्वतः' इतिज्ञानीयतादृशसामानाधिकरण्यत्वाऽवच्छिन्न-साध्याभाववदवृत्तित्वत्वावच्छिन्नविषयतायाः** = 'धूमसमानाधिकरणाऽत्यन्ताभावाप्रतियोगिवह्निसामानाधिकरण्य-वह्न्यभाववदवृत्तित्वोभयवद्धूमवान् पर्वतः' इतिज्ञानीयधूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्यत्वावच्छिन्न-साध्याभाववदवृत्तित्वत्वावच्छिन्नप्रकारताऽऽख्यविषयतायाः **जनकतावच्छेदकत्वेन** = 'पर्वतो वह्निमान्' इत्यनुमितिजनकताऽवच्छेदकत्वेन **भागासिद्धितादवस्थ्यम्**, उपलक्षणाद् बाधतादवस्थ्यम् ।

यशोलता

●

शब्दार्थ :- આટલા પરિષ્કાર કરશો તો પણ, ધૂમવ્યાપકવહ્નિસામાનાધિકરણ્ય (= ધૂમસમાનાધિકરણઅત્યંતાભાવઅપ્રતિયોગિવહ્નિસામાનાધિકરણ્ય) - વહ્નિઅભાવવદ્વૃઅવૃત્તિત્વઉભયવિશિષ્ટધૂમવાન પર્વત - આવા પ્રકારનું જ્ઞાન '**पर्वतो वह्निमान् धूमात्**' - આવા પ્રકારની અનુમિતિનું જનક બને છે. તથા ઉક્તજ્ઞાનીયધૂમવ્યાપકવહ્નિસામાનાધિકરણ્યત્વઅવચ્છિન્ન અને સાધ્યાભાવવદ્વૃઅવૃત્તિત્વત્વઅવચ્છિન્ન જે વિષયતા તે જ ઉક્તજ્ઞાનમાં રહેલ અનુમિતિજનકતાની અવચ્છેદક બનશે. માટે, ભાગઅસિદ્ધિ અને બાધ જેમના તેમ પાછા ઊભા રહેશે.

વિમર્શ

(હવે, આ પૂર્વપક્ષનું સમાધાન મધ્યસ્થ વ્યક્તિ ઉત્તરપક્ષવતી પોતાની રીતે કરે છે.

न च साध्याभाववदवृत्तित्वत्व-हेतुव्यापकसाध्यसामानाधिकरण्यत्वोभयधर्मावच्छिन्नप्रकारताऽवच्छिन्नत्वमनुमितिजनकतायामस्तु, किन्तु केवलसाध्याभाववदवृत्तित्वत्वावच्छिन्नप्रकारताऽवच्छिन्नत्वं तु अनुमितिजनकतायां न सम्भवत्येव, अर्थात् साध्याभाववदवृत्तित्वत्वातिरिक्तधर्माऽनवच्छिन्नप्रकारताऽनवच्छिन्नत्वमेव अनुमितिजनकतायां भवतीति फलितम्, एवम् अव्यभिचारपदार्थताऽवच्छेदक-धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्यत्वोभयवृत्त्यवच्छेदकताकप्रकारताऽवच्छिन्नत्वम् अनुमितिजनकतायामस्तु, केवलाऽव्यभिचारपदार्थताऽवच्छेदकनिष्ठाऽवच्छेदकताकप्रकारताऽवच्छिन्नत्वं तु नैव भवेत्, अर्थाद् अव्यभिचारपदार्थताऽवच्छेदकतातिरिक्तधर्माऽसमानाधिकरणाऽवच्छेदकताकप्रकारताऽनवच्छिन्नत्वं तु अनुमितिजनकतायां सम्भवति एव ।

ततश्चैवमनुमानम् - प्रकृतहेतुतावच्छेदकावच्छिन्नलिङ्गक-प्रकृतसाध्यतावच्छेदकावच्छिन्नविधेयक-प्रकृतपक्षतावच्छेदकावच्छिन्नपक्षकाऽनुमितिजनकता प्रकृतपक्षतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यतानिरूपित-प्रकृतसाध्यताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकप्रकारतानिरूपितविशेष्यत्वाभिन्नाऽव्यभिचारपदार्थतावच्छेदकताऽतिरिक्तधर्माऽसमानाधिकरणावच्छेदकताकप्रकारताऽनवच्छिन्ना, प्रकृतपक्षताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यतानिरूपित-प्रकृतसाध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकप्रकारतानिरूपितविशेष्यताऽभिन्नसाध्याभाववदवृत्तित्वत्वातिरिक्तधर्माऽनवच्छिन्नविषयता(प्रकारता)-वच्छिन्नत्वाभावकूटात् ।

'धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्य-वह्न्यभाववदवृत्तित्वोभय-

●

પણ, તે અંતિમ ઉત્તરપક્ષ નથી. તેનું ખંડન પૂર્વપક્ષ કરી જ નાંખશે. પછી મુખ્ય ઉત્તરપક્ષ આવશે.)

•⁂• तदतिरिक्तअनवच्छिन्नत्वनो प्रवेश : मध्यस्थ •⁂•

(साध्या.) मध्यस्थ :- અરે ભાઈ ! આમાં શું મોટી વાત છે ? એક નાનકડો ખુલાસો કરી દઈશું - હેતુ છે આપણો तादृशहेतुविषयतानिरूपितसाध्याभाववद्अवृत्तित्वत्व-अवच्छिन्नविषयताअनवच्छिन्नत्व. આની જગ્યાએ साध्याभाववद्अवृत्तित्वत्वअतिरिक्त-

विशिष्टधूमविशिष्टः पर्वतः' इत्याकारकज्ञाननिष्ठाऽनुमितिजनकतायां वह्न्यभाववदवृत्तित्वत्वातिरिक्तधूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्यत्वधर्मावच्छिन्नप्रकारताऽवच्छिन्नत्वम् = अव्यभिचारपदार्थतावच्छेदकतातिरिक्तधूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्यत्वत्वसमानधिकरणाऽवच्छेदकताकप्रकारताऽवच्छिन्नत्वम् अस्ति, यतः उक्तज्ञानीयधूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्यत्व-वह्न्यभाववदवृत्तित्वत्वोभयधर्मावच्छिन्नप्रकारतायाः एव तादृशज्ञाननिष्ठाऽनुमितिजनकताऽवच्छेदकत्वात् । तथा च तादृशाऽनुमितिजनकताऽवच्छेदकीभूतप्रकारताऽवच्छेदकता यथा अव्यभिचारपदार्थतावच्छेदकतासमानाधिकरणा तथा धूमसमानाधिकरणाऽत्यन्ताभावाप्रतियोगिवह्निसामानाधिकरण्यत्वत्वस्याऽपि समानाधिकरणा, तादृशाऽवच्छेदकतायाः अव्यभिचारपदार्थतावच्छेदकीभूते साध्याभाववदवृत्तित्वत्वे धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्यत्वे - उभयत्र सत्त्वात् ।

किन्तु तादृशज्ञाननिष्ठाऽनुमितिजनकतायां वह्न्यभाववदवृत्तित्वत्वातिरिक्तधर्माऽनवच्छिन्नप्रकारताऽवच्छिन्नत्वम्, अतः अव्यभिचारपदार्थताऽवच्छेदकताऽतिरिक्तधर्माऽसमानाधिकरणावच्छेदकताकप्रकारताऽवच्छिन्नत्वं नास्त्येव, तादृशज्ञानीयप्रकारतायाः उभयधर्मावच्छिन्नत्वाद् उभयधर्मसमानाधिकरणत्वाच्च ।

एवञ्च 'धूमसमानाधिकरणाऽत्यन्ताभावाप्रतियोगिवह्निसामानाधिकरण्य-वह्न्यभाववदवृत्ति-

●

ધર્મઅનવચ્છિન્નવિષયતાથી અનવચ્છિન્નત્વને હેતુ બનાવી દઈએ. તે જ રીતે સાધ્યમાં પણ ખુલાસો કરી દેવો કે અવ્યભિચારપદાર્થતાઅવચ્છેદકઅતિરિક્તધર્મઅનવચ્છિન્નવિષયતા-અનવચ્છિન્નત્વ. બસ, હવે કોઈ વાંધો નહીં આવે. કારણ કે તમે જે અનુમિતિજનકતા બતાવી તે સાધ્યાભાવવદ્અવૃત્તિત્વત્વથી અવચ્છિન્ન વિષયતાથી અવચ્છિન્ન છે. પણ, સાથે સાથે તે વિષયતા ધૂમવ્યાપકવહ્નિસામાનાધિકરણ્યત્વથી પણ અવચ્છિન્ન છે. અમારે તો ફક્ત સાધ્યાભાવવદ્અવૃત્તિત્વત્વથી જ અવચ્છિન્ન હોય, સાધ્યાભાવવદ્અવૃત્તિત્વત્વ સિવાયના ધૂમવ્યાપકવહ્નિસામાનાધિકરણ્યત્વ વગેરે ધર્મોથી અનવચ્છિન્ન હોય તેવી વિષયતાથી અનવચ્છિન્નત્વ અનુમિતિજનકતામાં લઈ જવું અભિપ્રેત છે. પૂર્વે જે જ્ઞાન બતાવ્યું તેમાં રહેલ અનુમિતિજનકતા (૧) ધૂમવ્યાપકવહ્નિસામાનાધિકરણ્યત્વઅવચ્છિન્ન અને (૨) વહ્નિઅભાવવદ્અવૃત્તિત્વત્વઅવચ્છિન્નવિષયતાથી અવચ્છિન્ન છે. જ્યારે અમારો હેતુ કેવલવહ્નિઅભાવવદ્અવૃત્તિત્વત્વથી જ અવચ્છિન્ન, ધૂમવ્યાપકવહ્નિસામાનાધિકરણ્યત્વ વગેરેથી અનવચ્છિન્ન એવી વિષયતાથી અનવચ્છિન્નત્વ જ છે. તે તો તાદૃશજ્ઞાનનિષ્ઠઅનુમિતિ-

त्वोभयविशिष्टधूमविशिष्टः पर्वतः' - इत्येतज्ज्ञाननिष्ठाऽनुमितिजनकतायां प्रकृतपक्षतावच्छेदकता-पर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितप्रकाराताऽभिन्न-प्रकृतहेतुताऽवच्छेदकता-पर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपित-प्रकृतसाध्यतावच्छेदकतापर्याप्त्य-धिकरणधर्मपर्याप्तावच्छेदकताकप्रकारतानिरूपितविशेष्यताऽभिन्नाऽव्यभिचारपदार्थतावच्छेदकताऽ-तिरिक्ताऽसमानाधिकरणाऽवच्छेदकताकप्रकारताऽनवच्छिन्नत्वरूपसाध्यस्य प्रकृतपक्षताऽवच्छेदकता-पर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितप्रकाराताऽभिन्न-प्रकृतहेतुताऽवच्छेदकता-पर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यतानिरूपित-प्रकृतसाध्यतावच्छेदकतापर्याप्त्यधिकरण-धर्मपर्याप्तावच्छेदकताकप्रकारतानिरूपितविशेष्यत्वाभिन्न-साध्याभाववदवृत्तित्वत्वाद्यतिरिक्तधर्माऽ-नवच्छिन्नप्रकाराताऽवच्छिन्नत्वाभावकूटरूपहेतोश्च सत्त्वात् कुतः बाध-भागासिद्धिगन्धलेशोऽपि ? ***इति वाच्यम्;***

●

જનકતામાં રહે જ છે. કારણ કે ધૂમવ્યાપકવહ્નિસામાનાધિકરણ્યત્વઅનવચ્છિન્નવિષયતા-અનવચ્છિન્નત્વ તો ઉક્ત અનુમિતિજનકતામાં વિદ્યમાન જ છે. આ રીતે વિવક્ષા કરવાથી હવે કોઈ દોષ નહીં આવે.

❖ તેવી વિવક્ષા કરતા અભિપ્રેતઅસિદ્ધિ : પૂર્વપક્ષ ❖

પૂર્વપક્ષ :- ભાગ્યશાળી ! તમે બતાવી તેવી વિવક્ષા કરવી શક્ય નથી. કારણ કે ફક્ત સાધ્ય અને હેતુ પક્ષમાં જાય - એટલું જ તમારે વિચારવાનું નથી. કિંતુ સાધ્યાભાવવદ્અવૃત્તિત્વત્વઅવચ્છિન્ન તમામ વિષયતાથી અનવચ્છિન્નત્વ પણ તમારે અનુમિતિજનકતામાં સાબિત કરવાનું છે. એટલે કે દુનિયાની તમામ સાધ્યાભાવવદ્-અવૃત્તિત્વત્વઅવચ્છિન્નવિષયતા અનુમિતિજનકતાઅવચ્છેદક નથી. તેવું તમારે સાબિત કરવાનું છે. તમે જે પરિષ્કાર કર્યો તે મુજબ હેતુ - સાધ્ય પક્ષમાં રહી જવાને કારણ બાધ અને ભાગઅસિદ્ધિ દોષ નહીં આવે. પણ, જે અભિપ્રેત છે કે સાધ્યાભાવવદ્અવૃત્તિત્વત્વ-અવચ્છિન્ન તમામે તમામ વિષયતાઓ અનુમિતિજનકતાઅનવચ્છેદક જ બને - આ વાત સિદ્ધ નહીં થાય. કારણ કે ધૂમસમાનાધિકરણઅત્યંતાભાવઅપ્રતિયોગિવહ્નિસામાનાધિકરણ્ય અને વહ્નિઅભાવવદ્અવૃત્તિત્વ આ ઉભયથી વિશિષ્ટત્વનું અવગાહન કરનાર જે પૂર્વોક્તજ્ઞાન તે જ્ઞાનનિરૂપિતસાધ્યાભાવવદ્અવૃત્તિત્વત્વઅવચ્છિન્નવિષયતા અનુમિતિજનકતાઅનવચ્છેદક સાબિત નહીં થાય. તમે આ વિષયતાની ઉપેક્ષા કરી. મતલબ કે "ઉક્તજ્ઞાનીય-સાધ્યાભાવવદ્અવૃત્તિત્વત્વઅવચ્છિન્નવિષયતાઅવચ્છિન્નત્વ અનુમિતિજનકતામાં જતું હોય

तथा सति साध्याभाववदवृत्तित्वाऽवच्छिन्नप्रकारतासामान्यस्य अनुमितिजनकताऽनवच्छेदकत्वाऽसिद्धेः । अयं भावः - साध्याभाववदवृत्तित्वाऽवच्छिन्नाः यावत्यः प्रकारताः तासु एका अपि अनुमितिजनकताऽवच्छेदिका न भवति इति साधनीयम्, साध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नविषयताऽवच्छिन्नत्वाभावकूटस्य हेतुत्वे तत्सिध्यति ।

किन्तु साध्याभाववदवृत्तित्वत्वाद्यतिरिक्तधर्माऽनवच्छिन्नप्रकारताऽवच्छिन्नत्वाभावकूटस्य हेतुत्वे साध्याभाववदवृत्तित्वत्वातिरिक्तधर्मानवच्छिन्नप्रकारतानाम् एव अनुमितिजनकताऽनवच्छेदकत्वं सिध्येत्। याः उभयधर्मविशिष्टधूमावगाह्युक्तज्ञानीयसाध्याभाववदवृत्तित्वत्वावच्छिन्नविषयताः सन्ति ताः अनुमितिजनकताऽनवच्छेदकतया न सिध्येयुः, यतः उभयधर्मविशिष्टधूमावगाह्युक्तज्ञानीयसाध्याभाववदवृत्तित्वत्वावच्छिन्नप्रकारतायाः अनुमितिजनकताऽवच्छेदकत्वं स्वीकृतमेव भवता ।

एवमेव अव्यभिचारपदार्थताऽवच्छेदकतासमानाधिकरणाऽवच्छेदकताकप्रकारतासामान्यमनुमितिजनकताऽनवच्छेदकमित्येव प्रकृते साधनीयम् । अव्यभिचारपदार्थताऽवच्छेदकताऽतिरिक्तधर्माऽसमानाधिकरणाऽवच्छेदकताकतादृशप्रकारताऽनवच्छिन्नत्वस्य साध्यत्वे याः अव्यभिचारपदार्थताऽवच्छेदकतातिरिक्तधर्मसमानाधिकरणाऽवच्छेदकताकप्रकारताः, यथा उक्तज्ञानीयप्रकारता, ताः अनुमितिजनकताऽनवच्छेदकतया न सिध्येयुः ।

तथा च उक्तपरिष्कारः नैव वक्तुं शक्यते । भवता च येन परिष्कारेण तादृशज्ञानीयसाध्याभाववदवृत्तित्वत्वाऽवच्छिन्नप्रकारता अपि अनुमितिजनकताऽनवच्छेदिका भवेत् स एव परिष्कारः आश्रयणीयः, उक्तपरिष्कारेण च तन्न सम्भवति इति बाध-भागासिद्धिप्रसङ्गो दुर्वारः एव - इत्येवं तटस्थशङ्कामाशङ्क्य निराकुर्वन्नाह -

●

तो भले જાઓ. કિંતુ ધૂમव्यापकवह्निसामानाधिकरण्यत्व વગેરે साध्याभाववद्अवृत्तित्वत्वेतरधर्मथी अनवच्छिन्नविषयताअनवच्छित्वत्व જતું રહ્યું. માટે, હેતુ જતો રહ્યો'' - આ પ્રમાણે તમે સિદ્ધ કર્યું. એટલે साध्याभाववद्अवृत्तित्वत्वअवच्छिन्नविषयता એવી મળે છે કે જે અનુમિતિજનકताअवच्छेदक બને છે - એમ નક્કી થયું. માટે 'તમામે તમામ साध्याभाववद्अवृत्तित्वत्वअवच्छिन्नविषयता અનુમિતિજનકताअनवच्छेदक બને' - આ વાત સાબિત નહીં થઈ શકે કે જે તમારે સિદ્ધ કરવાની હતી. તેથી, साध्याभाववद्-अवृत्तित्वत्वअतिरिक्तधर्मअनवच्छिन्नविषयताअनवच्छिन्नत्व સ્વરૂપ જે તમે પરિષ્કાર કર્યો તે કરી શકાય તેમ નથી. માટે, પુનઃ બાધ અને ભાગઅસિદ્ધિ આવી પડશે.

साध्याभाववदवृत्तित्वत्वातिरिक्तधर्मानवच्छिन्नविषयतानवच्छिन्नत्वं तु उभयवत्ताज्ञानीयतद्धर्मावच्छिन्नविषयताया जनकतानवच्छेदकत्वाऽसिद्ध्या विवक्षितुमशक्यम् ***इति वाच्यम्,***

●

'साध्याभाववदवृत्तित्वत्वातिरिक्तधर्माऽनवच्छिन्नविषयत्वाऽनवच्छिन्नत्वं = तादृशविशेष्यत्वाभिन्नसाध्याभाववदवृत्तित्वत्वाद्यतिरिक्तधर्माऽनवच्छिन्नप्रकारताऽवच्छिन्नत्वाभावकूटः हेतुः, उपलक्षणात् तादृशविशेष्यत्वाभिन्नाऽव्यभिचारपदार्थतावच्छेदकतातिरिक्तधर्माऽसमानाधिकरणावच्छेदकताकप्रकारताऽनवच्छिन्नत्वं साध्यम्' उक्ताऽऽपत्तिपरिहाराय इत्येवं **तु विवक्षितुमशक्यम्** ।

अत्र हेतुमाह - **उभयवत्ताज्ञानीयतद्धर्मावच्छिन्नविषयतायाः** = धूमसमानाधिकरणाऽत्यन्ताभावाप्रतियोगिवह्निसामानाधिकरण्य-वह्न्यभाववदवृत्तित्वोभयविशिष्टधूमवान् पर्वतः' इत्याद्याकारकधूमनिष्ठधूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्य-वह्न्यभाववदवृत्तित्वलक्षणोभयधर्मवत्ताविषयकज्ञाननिरूपितवह्न्यभाववदवृत्तित्वत्वाऽवच्छिन्नप्रकारताऽऽख्यविषयतायाः **जनकताऽनवच्छेदकत्वाऽसिद्ध्या** = 'पर्वतो वह्निमान्' इत्याद्यनुमितिजनकताऽनवच्छेदकत्वाऽसिद्ध्या, साध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नप्रकारतासामान्यस्य अव्यभिचारपदार्थतावच्छेदकतासमानाधिकरणाऽवच्छेदकताकप्रकारतासामान्यस्य च अनुमितिजनकताऽनवच्छेदकत्वासिद्धेः साध्याभाववदवृत्तित्वत्वातिरिक्तधर्मानवच्छिन्नप्रकारताऽनवच्छिन्नत्वं हेतुरिति **विवक्षितुमशक्य**मित्यर्थः ।

●

शाब्दार्थ :- સાધ્યાભાવવદ્અવૃત્તિત્વત્વઅતિરિક્તધર્મઅનવચ્છિન્ન વિષયતાઅનવચ્છિન્નત્વ - આ પ્રમાણે વિવક્ષા કરવી શક્ય નથી. કારણ કે તમે કહેલ વિવક્ષા કરવા જતા ઉભયવત્તાનું (= ધૂમસમાનાધિકરણઅત્યંતાભાવઅપ્રતિયોગિવહ્નિસામાનાધિકરણ્ય -વહ્નિઅભાવવદ્અવૃત્તિત્વ - આ ઉભયના વૈશિષ્ટ્યનું) ધૂમમાં અવગાહન કરનાર પૂર્વોક્તજ્ઞાનીય તદ્ધર્મ = સાધ્યાભાવવદ્અવૃત્તિત્વત્વઅવચ્છિન્નવિષયતા એ જનકતાઅનવચ્છેદક સિદ્ધ નહીં થાય. માટે, તમે કહેલ વિવક્ષા કરી શકાય તેમ નથી.

⁂ વિષયતાત્વઅવચ્છિન્નત્વપ્રવેશથી આપત્તિનિવારણ : ઉત્તરપક્ષ ⁂

ઉત્તરપક્ષ :- આ પ્રમાણે શંકા નહીં કરવી. કારણ કે હેતુ અને સાધ્યમાં થોડો પરિષ્કાર કરવાથી તમે આપેલ આપત્તિનું નિવારણ થઈ શકે છે. આપણું સાધ્ય છે - પ્રકૃતપક્ષતાઅવચ્છેદકતા....અવ્યભિચારપદાર્થતાઅવચ્છેદકતાસમાનાધિકરણઅવચ્છેદકતાનિરૂપકવિષયતાઅનવચ્છિન્નત્વ. આની જગ્યાએ તાદૃશવિષયતાત્વઅવચ્છિન્નઅવચ્છેદકતા-

तथा च उक्तज्ञाननिष्ठानुमितिजनकतायां हेतु-साध्ययोरभावेन बाध-भागासिद्धिप्रसङ्गो दुर्वारः एव ***इति चेद्*** ?

मैवम्; प्रागुक्तविषयतात्वावच्छिन्नावच्छेदकतानिरूपितत्वाभावस्यैव हेतु-साध्यविधया प्रवेशात् । अयमाशयः - 'धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्य-वह्न्यभाववद-वृत्तित्वोभयधर्मविशिष्टधूमविशिष्टः पर्वतः' इत्येतज्ज्ञाननिष्ठाऽनुमितिजनकता धूमसमानाधिकरणाऽ-त्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्यत्वावच्छिन्नप्रकारताऽवच्छिन्ना एव, यतः यदि उक्तज्ञाने वह्न्यभाववदवृत्तित्वं न भासेत तदापि तादृशज्ञाने अनुमितिजनकता भवेदेव । यदि तादृशज्ञाने धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्यं न भासेत तदा तादृशज्ञाने अनुमितिजनकता न भवेदेव । तथा च तादृशज्ञाननिष्ठाऽनुमितिजनकता धूमसमानाधिकरणाऽत्यन्ता-भावाऽप्रतियोगिवह्निसामानाधिकरण्यत्वावच्छिन्नप्रकारतावच्छिन्ना एव । किन्तु उक्तज्ञाने या प्रकारता धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्ये वर्तते सैव वह्न्यभाव-वदवृत्तित्वेऽपि वर्तते, अतः यथा धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधि-करण्यनिष्ठधूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्यत्वाऽवच्छिन्नप्रका-रताऽवच्छिन्ना उक्ताऽनुमितिजनकता भवति तथैव वह्न्यभाववदवृत्तित्वनिष्ठवह्न्यभाववद-वृत्तित्वत्वावच्छिन्नप्रकारताऽपि उक्ताऽनुमितिजनकतावच्छेदिका अभवत्, अतः एव पूर्वोक्ताऽऽपत्तिः प्रसक्ता ।

●

નિરૂપિતત્વાભાવ - આને સાધ્ય બનાવી દઈશું. તથા હેતુ પણ સાધ્યાભાવવદ્અવૃત્તિત્વત્વાદિ-અવચ્છિન્નવિષયતાત્વઅવચ્છિન્નઅવચ્છેદકતાનિરૂપિતત્વાભાવકૂટ બનશે. તાત્પર્ય એ છે - પહેલાં જણાવ્યા મુજબ અવ્યભિચારપદાર્થનિષ્ઠવિષયતાઅનવચ્છિન્નત્વ અનુમિતિજનકતામાં હોવું જોઈએ. એટલે કે અનુમિતિજનકતાઅવચ્છેદક અવ્યભિચારપદાર્થનિષ્ઠવિષયતા ન બનવી જોઈએ. મતલબ કે અવ્યભિચારપદાર્થનિષ્ઠવિષયતાનિષ્ઠવિષયતાત્વઅવચ્છિન્ન અનુમિતિજનકતાઅવચ્છેદકતા ન હોવી જોઈએ. એટલે કે જે અવ્યભિચારપદાર્થનિષ્ઠવિષયતા-નિષ્ઠવિષયતાત્વઅવચ્છિન્ન અવચ્છેદકતા હોય તેનાથી નિરૂપિત(પ્રસ્તુતમાં અનુમિતિજનકતા-નિરૂપિત અનુમિતિજનકતાઅવચ્છેદકતા અને અનુમિતિજનકતાઅવચ્છેદકતાનિરૂપિત અનુમિતિજનકતા બંને કહી શકાય છે. કારણ કે જો અનુમિતિજનકતા પરામર્શમાં આવે તો જ અનુમિતિજનકતાઅવચ્છેદકતા વ્યાપ્તિમાં આવે અને જો વ્યાપ્તિમાં અનુમિતિજનકતા-અવચ્છેદકતા આવે તો જ અનુમિતિજનકતા પરામર્શમાં આવે. આમ, બન્ને વચ્ચે પરસ્પર

वस्तुतः सा प्रकारता स्वस्यां धूमसामानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्यत्वावच्छिन्नत्वमस्ति अतः अनुमितिजनकताऽवच्छेदिका भवति, न तु वह्न्यभाववदवृत्तित्वत्वाऽवच्छिन्नत्वमस्तीत्यतः, यतः वह्न्यभाववदवृत्तित्वत्वाऽवच्छिन्नत्वं 'वह्न्यभाववदवृत्तिधूमवान् पर्वतः' इत्याकारकज्ञाननिरूपितप्रकारतायामपि अस्ति किन्तु सा नाऽनुमितिजनकताऽवच्छेदिका भवति, 'धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसमानाधिकरणधूमविशिष्टः पर्वतः' इत्येतज्ज्ञानीयप्रकारतायां धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्यत्वावच्छिन्नत्वमस्ति अतः अनुमितिजनकतावच्छेदकत्वमपि अस्ति । तथा च उभयवत्ताज्ञानीयतादृशप्रकारतायां धूमसमानाधिकरणाऽत्यन्ताभावाप्रतियोगिवह्निसामानाधिकरण्यत्व-वह्न्यभाववदवृत्तित्वत्वोभयधर्माऽवच्छिन्नत्वस्य सत्त्वेऽपि तस्यां धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्यत्वाऽवच्छिन्नत्वमस्ति, अत एव सा अनुमितिजनकताऽवच्छेदिका भवतीति स्थितम् ।

ततश्चेदमपि फलितं यदुत अनुमितिजनकताऽवच्छेदकताऽपि धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्यत्वाऽवच्छिन्नप्रकारतात्वाऽवच्छिन्ना एव भवेत्, न तु वह्न्यभाववदवृत्तित्वत्वावच्छिन्नप्रकारतात्वाऽवच्छिन्ना । यद्यपि 'धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्य-वह्न्यभाववदवृत्तित्वोभयविशिष्टधूमविशिष्टः पर्वतः' इत्येतादृशोभयवत्ताज्ञाननिष्ठाऽनुमितिजनकताऽवच्छेदकताविशिष्टतादृशप्रकारतायां धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्यत्वाऽवच्छिन्नप्रकारतात्वम् अपि अस्ति, वह्न्यभाववदवृत्तित्वत्वाऽवच्छिन्नप्रकारतात्वमपि अस्ति, तथापि तादृशप्रकारतानिष्ठाऽनुमितिजनकताऽवच्छेदकता धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्यत्वाऽवच्छिन्नप्रकारतात्वावच्छिन्ना एव भवति, न तु वह्न्यभाववदवृत्तित्वत्वाऽवच्छिन्नप्रकारतात्वावच्छिन्ना, यतः तत्र तत्र 'पर्वतो वह्निमान्'

●

નિરૂપ્ય-નિરૂપકભાવ છે.) અનુમિતિજનકતા ન બને. કારણ કે તાદૃશવિષયતાત્વઅવચ્છિન્નઅવચ્છેદકતા અનુમિતિજનકતાનિરૂપિત હોય જ નહીં. જો અનુમિતિજનકતાની (=નિરૂપિત) અવચ્છેદકતા તાદૃશવિષયતાત્વઅવચ્છિન્ન હોત તો તાદૃશવિષયતાત્વઅવચ્છિન્નઅવચ્છેદકતાનિરૂપિતત્વ અનુમિતિજનકતામાં જાત. પણ, સાધ્યાભાવવદ્અવૃત્તિત્વ(અવ્યભિચારપદાર્થ) નિષ્ઠવિષયતાનિષ્ઠવિષયતાત્વઅવચ્છિન્નઅવચ્છેદકતા અનુમિતિજનકતાની નથી હોતી. માટે, સાધ્યાભાવવદ્અવૃત્તિત્વનિષ્ઠવિષયતાનિષ્ઠવિષયતાત્વઅવચ્છિન્નઅવચ્છેદકતાનિરૂપિતત્વઅભાવ જ અનુમિતિજનકતામાં જશે.

इत्यनुमितिजनकताऽवच्छेदकता भवत्येव यत्र यत्र धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्नि-सामानाधिकरण्यत्वाऽवच्छिन्नप्रकारतात्वं स्यात् । यथा 'धूमसमानाधिकरणाऽत्यन्ताभावाऽ-प्रतियोगिवह्निसामानाधिकरण्यविशिष्टधूमविशिष्टः पर्वतः' - इत्यत्र धूमसमानाधिकरणाऽ-त्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्यनिष्ठप्रकारतायां धूमसमानाधिकरणाऽत्यन्ताभावाऽ-प्रतियोगिवह्निसामानाधिकरण्यत्वाऽवच्छिन्नप्रकारतात्वमस्ति, अतः 'पर्वतो वह्निमान्' इत्याकारकाऽ-नुमितिजनकताऽवच्छेदकत्वमप्यस्ति । 'वह्न्यभाववदवृत्तिधूमविशिष्टः पर्वतः' इत्यत्र वह्न्यभाववद-वृत्तित्वनिष्ठप्रकारतायां पर्वतो वह्निमान् - इत्याकारकाऽनुमितिजनकताऽवच्छेदकता नास्ति, तर्हि धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्यत्वावच्छिन्नप्रकारतात्वमपि नास्ति । तथा च धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्यत्वाऽवच्छिन्न-प्रकारतात्वम् अनुमितिजनकताऽवच्छेदकतातोऽनतिरिक्तवृत्ति ।

यत्र यत्र वह्न्यभाववदवृत्तित्वत्वावच्छिन्नप्रकारतात्वं तत्र तत्र 'पर्वतो वह्निमान्' इत्याकारकाऽ-नुमितिजनकताऽवच्छेदकता - इति वक्तुं न पार्यते, यतः 'वह्न्यभाववदवृत्तित्वविशिष्टधूमविशिष्टः पर्वतः' इत्याकारकज्ञानीयवह्न्यभाववदवृत्तित्वनिष्ठप्रकारतायां तादृशवह्न्यभाववदवृत्तित्वत्वावच्छिन्न-प्रकारतात्वमस्ति, नास्ति च 'पर्वतो वह्निमान्' इत्याकारकाऽनुमितिजनकताऽवच्छेदकता, तथा च वह्न्यभाववदवृत्तित्वत्वावच्छिन्नप्रकारतात्वमनुमितिजनकतावच्छेदकतातोऽतिरिक्तवृत्ति । ततश्च अनतिरिक्तवृत्तित्वरूपावच्छेदकता धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्य-त्वावच्छिन्नप्रकारतात्वे एव, न तु वह्न्यभाववदवृत्तित्वत्वावच्छिन्नप्रकारतात्वे । अत एव 'धूम-समानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्य-वह्न्यभाववदवृत्तित्वोभयविशिष्ट-

●

આ રીતે પરિષ્કાર કરી દેવાથી પ્રસ્તુત સ્થલમાં કોઈ વાંધો નહીં આવે. કારણ કે ધૂમસમાનાધિકરણઅત્યંતાભાવઅપ્રતિયોગિવહ્નિસામાનાધિકરણ્ય-વહ્નિઅભાવવદ્‌અવૃત્તિત્વ-ઉભયવિશિષ્ટધૂમવાન પર્વત - આવા જ્ઞાનની વિષયતા ધૂમસમાનાધિકરણઅત્યંતાભાવ-અપ્રતિયોગિવહ્નિસામાનાધિકરણ્યત્વ અને વહ્નિઅભાવવદ્‌અવૃત્તિત્વત્વ ઉભયધર્મથી અવચ્છિન્ન છે. માટે અનુમિતિજનકતાઅવચ્છેદક પણ ધૂમસમાનાધિકરણઅત્યંતાભાવઅપ્રતિયોગિવહ્નિ-સામાનાધિકરણ્યત્વ અને વહ્નિઅભાવવદ્‌અવૃત્તિત્વત્વ ઉભયધર્મથી અવચ્છિન્ન વિષયતા જ બનશે. પરંતુ જે અનુમિતિજનકતાની અવચ્છેદકતા વિષયતામાં જાય છે તે ફક્ત ધૂમસમાનાધિકરણઅત્યંતાભાવઅપ્રતિયોગિવહ્નિસામાનાધિકરણ્યત્વઅવચ્છિન્નવિષયતાત્વથી જ અવચ્છિન્ન છે. વહ્નિઅભાવવદ્‌અવૃત્તિત્વત્વઅવચ્છિન્નવિષયતાત્વથી નહીં. કારણ કે જ્યાં

धूमविशिष्टः पर्वतः' - इत्याकारकज्ञाननिष्ठाऽनुमितिजनकताऽवच्छेदकतायाः धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्यत्वावच्छिन्नप्रकारतात्व-वह्न्यभाववदवृत्तित्वत्वावच्छिन्नप्रकारतात्वोभयविशिष्टप्रकारतायां सत्त्वेऽपि सा अनुमितिजनकताऽवच्छेदकता धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्यत्वावच्छिन्नप्रकारतात्वेनैवाऽवच्छिन्ना, तस्य अनतिरिक्तवृत्तित्वात्, यथा घटाभावीयप्रतियोगितायाः घटत्व-द्रव्यत्वोभयविशिष्टघटे सत्त्वेऽपि घटत्वेनैवाऽवच्छिन्नत्वम्, न तु द्रव्यत्वेनाऽपि, घटत्वस्य अनतिरिक्तवृत्तित्वादिति स्थितम् ।

अनुमितिजनकतायाः अवच्छेदकता = अनुमितिजनकतानिरूपकाऽवच्छेदकता = अनुमितिजनकतानिरूपितावच्छेदकता = अनुमितिजनकताऽवच्छेदकता.. इत्यादिरीत्या कथयितुं शक्यम् । प्रकृते 'पर्वतो वह्निमान्' इत्याकारकाऽनुमितेः या जनकता 'धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्य-वह्न्यभाववदवृत्तित्वोभयविशिष्टधूमविशिष्टः पर्वतः' इत्याकारकज्ञाननिष्ठा सा यद्यपि धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्यत्वावच्छिन्नप्रकारतानिष्ठाऽवच्छेदकतानिरूपिताऽपि वह्न्यभाववदवृत्तित्वत्वावच्छिन्नप्रकारतानिष्ठाऽवच्छेदकतानिरूपिताऽपि वर्तते तथापि सा धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्यत्वावच्छिन्नप्रकारतात्वाऽवच्छिन्नाऽवच्छेदकतानिरूपिता एव भवति, न तु वह्न्यभाववदवृत्तित्वत्वावच्छिन्नप्रकारतात्वावच्छिन्नाऽवच्छेदकतानिरूपिता, तादृशाऽनुमितिजनकतानिरूपकाऽवच्छेदकतायाः तादृशप्रकारतानिष्ठायाः उक्तरीत्या धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्यत्वावच्छिन्नप्रकारतात्वेनैवावच्छिन्नत्वात्, वह्न्यभाववदवृत्तित्वत्वावच्छिन्नप्रकारतात्वेनाऽनवच्छिन्नत्वात् ।

●

જ્યાં વહ્નિઅભાવવદ્અવૃત્તિત્વત્વઅવચ્છિન્નવિષયતાત્વ જશે તે તે વિષયતામાં અનુમિતિજનકતાઅવચ્છેદકતા જશે જ - એવો નિયમ નથી, વહ્નિઅભાવવદ્અવૃત્તિધૂમવાન પર્વત - આવા જ્ઞાનની વિષયતા કે જેમાં વહ્નિઅભાવવદ્અવૃત્તિત્વત્વઅવચ્છિન્નવિષયતાત્વ રહે છે ત્યાં અનુમિતિજનકતાઅવચ્છેદકતા નથી જતી. માટે, વહ્નિઅભાવવદ્અવૃત્તિત્વત્વઅવચ્છિન્નવિષયતાત્વ એ તાદૃશવિષયતાનિષ્ઠઅનુમિતિજનકતાઅવચ્છેદકતાનું અવચ્છેદક ન બની શકે. કિંતુ ધૂમસમાનાધિકરણઅત્યંતાભાવઅપ્રતિયોગિવહ્નિસામાનાધિકરણ્યત્વથી અવચ્છિન્નવિષયતાત્વ જ તાદૃશવિષયતાનિષ્ઠઅનુમિતિજનકતાઅવચ્છેદકતાનું અવચ્છેદક બની શકે. કારણ કે જ્યાં જ્યાં ધૂમસમાનાધિકરણઅત્યંતાભાવઅપ્રતિયોગિવહ્નિસામાનાધિકરણ્યત્વઅવચ્છિન્નવિષયતાત્વ જાય છે તે તે વિષયતામાં અનુમિતિજનકતાઅવચ્છેદકતા પણ જાય જ. જેમ કે ધૂમસમાનાધિકરણઅત્યંતાભાવઅપ્રતિયોગિવહ્નિસમાનાધિકરણધૂમવાન પર્વત -

ततश्च वह्न्यभाववदवृत्तित्वत्वावच्छिन्नप्रकारतायाः अनुमितिजनकताऽवच्छेदकत्वेऽपि वह्न्यभाववदवृत्तित्वत्वाऽवच्छिन्नप्रकारतात्वस्य अनुमितिजनकताऽवच्छेदकतावच्छेदकत्वं नैव सम्भवति । एवम् अव्यभिचारपदार्थताऽवच्छेदकतासमानाधिकरणाऽवच्छेदकताकप्रकारतायाम् अनुमितिजनकताऽवच्छेदकत्वस्य कदाचित् सम्भवेऽपि अव्यभिचारपदार्थतावच्छेदकतासमानाधिकरणाऽवच्छेदकताकप्रकारतात्वस्य अनुमितिजनकताऽवच्छेदकतावच्छेदकत्वं तु नैव सम्भवति, यतः 'धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्य-वह्न्यभाववदवृत्तित्वोभयविशिष्टधूमविशिष्टः पर्वतः' इत्येतज्ज्ञाननिष्ठाऽनुमितिजनकताऽवच्छेदकतायाः वह्न्यभाववदवृत्तित्वत्वावच्छिन्नप्रकारतायां सत्त्वेन अव्यभिचारपदार्थतावच्छेदकतासमानाधिकरणाऽवच्छेदकताकप्रकारतायामपि तादृशाऽनुमितिजनकताऽवच्छेदकता भवति, किन्तु तादृशाऽनुमितिजनकतावच्छेदकतायाः अवच्छेदकतायाः वह्न्यभाववदवृत्तित्वत्वावच्छिन्नप्रकारतात्वे असत्त्वेन अव्यभिचारपदार्थताऽवच्छेदकतासमानाधिकरणाऽवच्छेदकताकप्रकारतात्वेऽपि तादृशाऽनुमितिजनकतावच्छेदकतावच्छेदकता न स्यादेव । ततः उक्तज्ञाननिष्ठानुमितिजनकतायाम् अव्यभिचारपदार्थताऽवच्छेदकतासमानाधिकरणाऽवच्छेदकताकप्रकारतात्वावच्छिन्नावच्छेदकताऽनिरूपितत्वमेव स्यात्, अनुमितिजनकतानिरूपकाऽवच्छेदकतायाः तादृशप्रकारतात्वेनाऽनवच्छिन्नत्वात् । एवं तादृशाऽनुमितिजनकतायां वह्न्यभाववदवृत्तित्वत्वावच्छिन्नप्रकारतात्वाऽवच्छिन्नाऽवच्छेदकताऽनिरूपितत्वमेव स्यात्, अनुमितिजनकतानिरूपकावच्छेदकतायाः तादृशप्रकारतात्वेनाऽनवच्छेदादेव । तथा च

●

આવા જ્ઞાનની વિષયતામાં ધૂમસમાનાધિકરણઅત્યંતાભાવઅપ્રતિયોગિવહ્નિસામાનાધિકરણ્યત્વઅવચ્છિન્નવિષયતાત્વ જાય છે તો ત્યાં અનુમિતિજનકતાઅવચ્છેદકતા પણ જાય છે. માટે, નક્કી થયું કે ધૂમસમાનાધિકરણઅત્યંતાભાવઅપ્રતિયોગિવહ્નિસામાનાધિકરણ્યત્વ-વહ્નિઅભાવવદ્વૃઅવૃત્તિત્વત્વઉભયધર્મથી અવચ્છિન્ન વિષયતામાં અનુમિતિજનકતાઅવચ્છેદકતા જતી હોવા છતાં પણ તાદૃશવિષયતાનિષ્ઠઅનુમિતિજનકતાઅવચ્છેદકતાનું અવચ્છેદક ધૂમસમાનાધિકરણઅત્યંતાભાવઅપ્રતિયોગિવહ્નિસામાનાધિકરણ્યત્વઅવચ્છિન્નવિષયતાત્વ જ બને. પણ, વહ્નિઅભાવવદ્વૃઅવૃત્તિત્વત્વઅવચ્છિન્નવિષયતાત્વ નહીં. માટે, અનુમિતિજનકતા વહ્નિઅભાવવદ્વૃઅવૃત્તિત્વત્વઅવચ્છિન્નવિષયતાત્વઅવચ્છિન્નઅવચ્છેદકતાનિરૂપિત તો પ્રસ્તુતમાં પણ ન જ બની. કિંતુ અનુમિતિજનકતા ધૂમસમાનાધિકરણઅત્યંતાભાવઅપ્રતિયોગિવહ્નિસામાનાધિકરણ્યત્વઅવચ્છિન્નવિષયતાત્વઅવચ્છિન્નઅવચ્છેદકતાનિરૂપિત જ બની. એટલે સાધ્ય અને હેતુ બંને અનુમિતિજનકતામાં રહેશે જ. માટે, બાધ તથા ભાગઅસિદ્ધિને

न बाध–भागासिद्धी ।

ततश्चैवमनुमानम् - प्रकृतहेतुतावच्छेदकावच्छिन्नलिङ्गक-प्रकृतसाध्यतावच्छेदकावच्छिन्नविधेयक-प्रकृतपक्षताऽवच्छेदकावच्छिन्नपक्षकाऽनुमितिजनकता प्रकृतपक्षतावच्छेदकतापर्याप्त्यधिकरणधर्म-पर्याप्तावच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुताऽवच्छेदकतापर्याप्त्यधिकरणधर्म-पर्याप्तावच्छेदकताकविशेष्यतानिरूपित-प्रकृतसाध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकप्रकारतानिरूपितविशेष्यत्वाभिन्नाऽव्यभिचारपदार्थतावच्छेदकतासमानाधिकरणाऽवच्छेदकताकप्रकारतात्वाऽवच्छिन्नाऽवच्छेदकताऽनिरूपिता, प्रकृतपक्षतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यतानिरूपित-प्रकृतसाध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकप्रकारतानिरूपितविशेष्यत्वाभिन्नसाध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नप्रकारतात्वावच्छिन्नावच्छेदकतानिरूपितत्वाभावकूटात् ।

अत्र वह्न्यभाववदवृत्तित्वत्वावच्छिन्नप्रकारतासामान्यं वह्न्यभाववदवृत्तित्वत्वावच्छिन्नप्रकारतात्वेनाऽनुमितिजनकताऽनवच्छेदकमेव सिध्यति, या वह्न्यभाववदवृत्तित्वत्वावच्छिन्नप्रकारता अनुमितिजनकतावच्छेदिका भवति साऽपि धूमव्यापकवह्निसामानाधिकरण्यत्वावच्छिन्नप्रकारतात्वेनैवाऽस्ति, न तु वह्न्यभाववदवृत्तित्वत्वावच्छिन्नप्रकारतात्वेनेति साध्याभाववदवृत्तित्वत्वावच्छिन्नप्रकारतात्वसामान्यम् अनुमितिजनकतावच्छेदकताऽनवच्छेदकविधया सिध्यति इति न विवक्षितार्थाऽसिद्धिः, तादृशोभयवत्ताज्ञानीयोभयधर्मावच्छिन्नप्रकारतायाः अपि तादृशसामानाधिकरण्यत्वावच्छिन्नप्रकारतात्वेनैवाऽवच्छेदकत्वादिति तत्राऽपि वह्न्यभाववदवृत्तित्वत्वावच्छिन्नप्रकारतात्वम् अनुमितिजनकतावच्छेदकताऽनवच्छेदकमेवेति भावः ।

●

કોઈ અવકાશ નહીં રહે. તથા આના દ્વારા વહ્નિઅભાવવદ્અવૃત્તિત્વત્વઅવચ્છિન્નવિષયતાત્વ અનુમિતિજનકતાઅવચ્છેદકતાઅનવચ્છેદક સાબિત થતા વહ્નિઅભાવવદ્અવૃત્તિત્વત્વ-અવચ્છિન્નવિષયતા પ્રસ્તુત સ્થલમાં પણ અનુમિતિજનકતાઅનવચ્છેદક જ સાબિત થશે. જો કે અનુમિતિજનકતાઅવચ્છેદકતા તાદશવિષયતામાં જાય છે છતાં પણ વહ્નિઅભાવ-વદ્અવૃત્તિત્વત્વઅવચ્છિન્નવિષયતાત્વ તો અનુમિતિજનકતાઅવચ્છેદકતાઅનવચ્છેદક સાબિત થશે જ. એનાથી પણ અભિપ્રેતની સિદ્ધિ થઈ જ જશે. આમ, હવે કોઈ તકલીફ નહીં આવે.

प्रागुक्तविषयतात्वावच्छिन्नावच्छेदकतानिरूपितत्वाभावस्यैव हेतु -साध्यविधया प्रवेशात्,

●

एतत्सर्वं चेतसिकृत्याह - **प्रागुक्तविषयतात्वावच्छिन्नावच्छेदकतानिरूपितत्वाभावस्यैव हेतु -साध्यविधया प्रवेशात्** = प्रकृतपक्षतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताक-विशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताक-विशेष्यतानिरूपित-प्रकृतसाध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकप्रकारतानिरूपित-विशेष्यत्वाभिन्नाऽव्यभिचारपदार्थताऽवच्छेदकतासमानाधिकरणाऽवच्छेदकताकप्रकारतात्वावच्छिन्ना-ऽवच्छेदकतानिरूपितत्वाभावस्य साध्यविधया प्रवेशात्, प्रकृतपक्षतावच्छेदकतापर्याप्त्यधिकरण-धर्मपर्याप्तावच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरण-धर्मपर्याप्तावच्छेदकताकविशेष्यतानिरूपित-प्रकृतसाध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ता-वच्छेदकताकप्रकारतानिरूपितविशेष्यत्वाभिन्नसाध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नप्रकारतात्वावच्छिन्ना-वच्छेदकतानिरूपितत्वाभावकूटस्य च हेतुविधया प्रवेशात् ।

नन्वेवमपि 'धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्य-वह्न्यभाववदवृत्ति-त्वोभयविशिष्टधूमविशिष्टः पर्वतः' - इत्याकारकज्ञाननिष्ठाऽनुमितिजनकतानिरूपकावच्छेदकतायाः धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्यत्वावच्छिन्न-वह्न्यभाववदवृत्तित्वत्वा-वच्छिन्नप्रकारतायां सत्त्वेन तादृशाऽवच्छेदकता धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्नि-सामानाधिकरण्यत्वावच्छिन्नप्रकारतात्वावच्छिन्ना वह्न्यभाववदवृत्तित्वत्वावच्छिन्नप्रकारतात्वावच्छिन्ना च भवेदेव।

तथा च तादृशाऽनुमितिजनकतायां प्रागुक्तवह्न्यभाववदवृत्तित्वत्वावच्छिन्नप्रकारतात्वा-वच्छिन्नाऽवच्छेदकतानिरूपितत्वस्य, प्रागुक्ताव्यभिचारपदार्थतावच्छेदकतासमानाधिकरणाऽ-वच्छेदकताकप्रकारतात्वावच्छिन्नाऽवच्छेदकतानिरूपितत्वस्य च सत्त्वेन बाध-भागासिद्धी स्याता-मेवेत्याशङ्कायामाह -

●

शब्दार्थ :- તમે જે શંકા કરી તે વ્યાજબી નથી. કારણ કે હેતુ અને સાધ્ય તરીકે ફક્ત તાદૃશવિષયતાઅનવચ્છિન્નત્વનો જ અમે પ્રવેશ નથી કરતા. કિંતુ તાદૃશવિષયતાત્વ-અવચ્છિન્નઅવચ્છેદકતાનિરૂપિતત્વાભાવનો જ પ્રવેશ કરીએ છીએ.

गूढा *उक्तज्ञानीयविषयताया अपि तादृशसामानाधिकरण्यत्वावच्छिन्न-विषयतात्वेनैवाऽवच्छेदकत्वात् ।*

●

उक्तज्ञानीयविषयताया अपि = 'वह्न्यभाववदवृत्तित्वविशिष्टधूमविशिष्टः पर्वतः' इत्याकारक-ज्ञानीयप्रकारतायां तादृशवह्न्यभाववदवृत्तित्वत्वावच्छिन्नप्रकारतात्वस्य सत्त्वेऽपि 'पर्वतो वह्निमान्' - इत्याकारकाऽनुमितिजनकताऽवच्छेदकतायाः असत्त्वेन 'पर्वतो वह्निमान्' - इत्याकारकाऽनुमितिजनकतावच्छेदकतातः तादृशवह्न्यभाववदवृत्तित्वत्वाऽवच्छिन्नप्रकारतात्वस्याऽतिरिक्तवृत्तित्वेन धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्यत्वावच्छिन्नप्रकारतात्वं यत्र भवति तत्र तादृशाऽनुमितिजनकताऽवच्छेदकतायाः अवश्यम्भावेन तादृशसामानाधिकरण्यत्वा-वच्छिन्नप्रकारतात्वस्य तादृशाऽनुमितिजनकतावच्छेदकतातोऽनतिरिक्तवृत्तित्वेन, ***यथा*** 'धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसमानाधिकरणधूमविशिष्टः पर्वतः' इत्याकारकज्ञानीय-धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्यत्वावच्छिन्नप्रकारतायाः धूमसमा-नाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्यत्वावच्छिन्नप्रकारतात्वेनैव तादृशाऽनु-मितिजनकताऽवच्छेदकत्वम्, न तु वह्न्यभाववदवृत्तित्वत्वावच्छिन्नप्रकारतात्वेन ***तथैव*** 'धूमसमाना-धिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्य-वह्न्यभाववदवृत्तित्वोभयविशिष्टधूमविशिष्टः पर्वतः' इत्याकारकज्ञानीयधूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्यत्वावच्छिन्न-वह्न्यभाववदवृत्तित्वत्वावच्छिन्नप्रकारतायाः अपि **तादृशसामानाधिकरण्यत्वावच्छिन्नविषयतात्वेन एव** = धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्यत्वावच्छिन्नप्रकारतात्वेन एव, न तु वह्न्यभाववदवृत्तित्वत्वाऽवच्छिन्नप्रकारतात्वेनेत्येवकारार्थः, **अवच्छेदकत्वात्** = तादृशाऽनुमितिजनकतायाः अवच्छेदकत्वात्, तथा च तादृशाऽनुमितिजनकतायां तादृशधूमसमानाधिकरणाऽ-

●

ઉક્તજ્ઞાનીય(= ધૂમસમાનાધિકરણઅત્યંતાભાવઅપ્રતિયોગિવહ્નિસામાનાધિકરણ્યત્વ-વહ્નિઅભાવવદ્અવૃત્તિત્વત્વઉભયવિશિષ્ટધૂમવાન પર્વત - આવા જ્ઞાનની) વિષયતા પણ તાદૃશસામાનાધિકરણ્યત્વ(=ધૂમસમાનાધિકરણઅત્યંતાભાવઅપ્રતિયોગિવહ્નિસામાનાધિકર-ણ્યત્વ)અવચ્છિન્નવિષયતાત્વ રૂપે જ અનુમિતિજનકતાઅવચ્છેદક બને છે, વહ્નિઅભાવવદ્-અવૃત્તિત્વત્વઅવચ્છિન્નવિષયતાત્વરૂપે ઉક્તજ્ઞાનીયવિષયતા અનુમિતિજનકતાઅવચ્છેદક નથી બનતી. એટલે હવે કોઈ દોષ નહીં આવે.

त्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्यत्वावच्छिन्नप्रकारतात्वावच्छिन्नावच्छेदकतानिरूपितत्वस्यैव सत्त्वेन तादृशसाध्याभाववदवृत्तित्वत्वावच्छिन्नप्रकारतात्वावच्छिन्नावच्छेदकतानिरूपितत्वाभावस्य, अतः एव तादृशसाध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नप्रकारतात्वावच्छिन्नावच्छेदकतानिरूपितत्वाभावकूटस्य च सत्त्वात्, तादृशाऽव्यभिचारपदार्थताऽवच्छेदकतासमानाधिकरणाऽवच्छेदकताकप्रकारतात्वावच्छिन्नावच्छेदकतानिरूपितत्वाभावस्याऽपि सत्त्वाच्च न बाध-भागासिद्धिप्रसङ्गः इत्यर्थः ।

अत्र स्पष्टावबोधाय सर्वे परिष्काराः यथाक्रमं सङ्ग्रहणीयाः । तत्सङ्ग्रहश्चैवम् -

→ 'अनुमितिजनकता अव्यभिचारपदार्थनिष्ठविषयताऽनवच्छिन्ना, साध्याभाववदवृत्तित्वत्वादिनिष्ठविषयतावच्छिन्नत्वाभावकूटाद्' - इत्येवमनुमानमादौ उपन्यस्तम् ।

→ 'पर्वतो वह्निमान्, वह्न्यभाववदवृत्तिधूमाद्' - इत्यादिस्थलीयबाध-भागासिद्धिनिवारणाय हेतुतावच्छेदकतापर्याप्तिं निवेश्य 'अनुमितिजनकता प्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यतानिरूपिताऽव्यभिचारपदार्थनिष्ठप्रकारताऽनवच्छिन्ना, प्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितसाध्याभाववदवृत्तित्वादिनिष्ठप्रकारताऽवच्छिन्नत्वाभावकूटाद्' - इत्येवमनुमानमुपन्यस्तम् ।

→ 'पर्वतो वह्न्यव्यभिचारिविशिष्टः, वह्न्यभाववदवृत्तिमत्त्वाद्'- इत्यादिस्थलीयबाधादिवारणाय 'अनुमितिजनकता प्रकृतहेतुतावच्छेदकताकपर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यतानिरूपिताऽव्यभिचारपदार्थतावच्छेदकतासमानाधिकरणावच्छेदकताकप्रकारताऽनवच्छिन्ना, प्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकसाध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नप्रकारतावच्छिन्नत्वाभावकूटाद्' - इत्येवमनुमानमुपन्यस्तम् ।

→ 'वह्न्यभाववदवृत्तिधूमवत्पर्वतो वह्निमान् धूमाद्' - इत्यादिस्थलीयबाधादिवारणाय पक्षताऽवच्छेदकतापर्याप्तिं निवेश्य 'अनुमितिजनकता प्रकृतपक्षतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यतानिरूपिताऽव्यभिचारपदार्थतावच्छेदकतासमानाधिकरणाऽवच्छेदकताकप्रकारताऽनवच्छिन्ना, प्रकृतपक्षताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यतानिरूपितसाध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नप्रकारताऽवच्छिन्नत्वाभावकूटाद्' - इत्येवमनुमानमुपन्यस्तम् ।

→ 'पर्वतो वह्न्यभाववदवृत्तिधूमवद्वह्निमान्, धूमाद्'- इत्यादिस्थलीयबाधादिवारणाय साध्यता-

वच्छेदकतापर्याप्तिं निवेश्य 'अनुमितिजनकता प्रकृतपक्षतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ता-वच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ता-वच्छेदकताकविशेष्यतानिरूपित-प्रकृतसाध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताक-प्रकारतानिरूपितविशेष्यताऽभिन्नाऽव्यभिचारपदार्थतावच्छेदकतासमानाधिकरणाऽवच्छेदकताक-प्रकारताऽनवच्छिन्ना, प्रकृतपक्षतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यता-निरूपितप्रकारताऽभिन्न-प्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यता-निरूपित-प्रकृतसाध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकप्रकारतानिरूपित-विशेष्यताऽभिन्नसाध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नप्रकारताऽवच्छिन्नत्वाभावकूटाद्' - इत्येव-मनुमानमुपन्यस्तम् ।

→ 'पर्वतो वह्निमान्, वह्न्यभाववदवृत्तिधूमात्', 'पर्वतो वह्न्यभाववदवृत्तिधूमविशिष्टवह्निमान्, धूमात्', 'वह्न्यभाववदवृत्तिधूमवत्पर्वतो वह्निमान्, धूमाद्' - इत्यादिस्थलीयबाधादिनिवारणाय यथाक्रमं पक्षे हेतुतावच्छेदकावच्छिन्नलिङ्गकत्वादिकं निवेश्य - 'प्रकृतहेतुतावच्छेदकावच्छिन्नलिङ्गक-प्रकृतसाध्यतावच्छेदकावच्छिन्नविधेयक-प्रकृतपक्षतावच्छेदकावच्छिन्नपक्षकाऽनुमितिजनकता प्रकृत-पक्षतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृत-हेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यतानिरूपित-प्रकृतसाध्यतावच्छेदकता-पर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकप्रकारतानिरूपितविशेष्यताऽभिन्नाऽव्यभिचारपदार्थतावच्छेद-कतासमानाधिकरणाऽवच्छेदकताकप्रकारताऽनवच्छिन्ना, प्रकृतपक्षतावच्छेदकतापर्याप्त्यधिकरणधर्म-पर्याप्तावच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणधर्म-पर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपित-प्रकृतसाध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छे-दकताकप्रकारतानिरूपितविशेष्यत्वाऽभिन्नसाध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नप्रकारतावच्छिन्नत्वा-भावकूटाद्' - इत्येवमनुमानमुपन्यस्तम् ।

→ 'पर्वतो वह्निमान्' इत्याकारकाऽनुमितिजनकतायां 'धूमसमानाधिकरणाऽत्यन्ताभावाऽ-प्रतियोगिवह्निसामानाधिकरण्य-वह्न्यभाववदवृत्तित्वोभयविशिष्टधूमविशिष्टः पर्वतः' - इत्याकारक-ज्ञाननिष्ठायां वह्न्यभाववदवृत्तित्वत्वावच्छिन्नप्रकारतावच्छिन्नत्वादेः सत्त्वेन बाधादिमाशङ्क्य तद्वारणाय 'प्रकृतहेतुतावच्छेदकावच्छिन्नलिङ्गक-प्रकृतसाध्यतावच्छेदकावच्छिन्नविधेयक-प्रकृतपक्षतावच्छेदका-वच्छिन्नपक्षकाऽनुमितिजनकता प्रकृतपक्षतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताक-

विशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताक-विशेष्यतानिरूपित-प्रकृतसाध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकप्रकारतानिरूपित-विशेष्यत्वाऽभिन्नाऽव्यभिचारपदार्थतावच्छेदकतासमानाधिकरणाऽवच्छेदकताकप्रकारतात्वावच्छिन्ना-वच्छेदकताऽनिरूपिता, प्रकृतपक्षतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यता-निरूपितप्रकारताऽभिन्न-प्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यता-निरूपित-प्रकृतसाध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकप्रकारतानिरूपित-विशेष्यत्वाऽभिन्न-साध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नप्रकारतात्वावच्छिन्नावच्छेदकतानिरूपितत्वाभाव-कूटाद्' - इत्येवमनुमानमुपन्यस्तम् ।

→ उभयरीत्या पर्याप्तिनिवेशे कृते अन्यान्यपि अनुमानानि पूर्वोक्तरीत्याऽनुसन्धेयानि ।

→ 'पर्वतः वह्न्यव्यभिचारिविशिष्टः वह्न्यभाववदवृत्तिमत्त्वाद्' इत्यादिस्थलीयबाधादिवारणाया-ऽव्यभिचरितत्वपदार्थताऽवच्छेदकतापर्याप्तिं निवेश्य 'प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुक-प्रकृत-साध्यतावच्छेदकावच्छिन्नविधेयक-प्रकृतपक्षतावच्छेदकावच्छिन्नपक्षकाऽनुमितिजनकता प्रकृतपक्षता-वच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुता-वच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यतानिरूपित-प्रकृतसाध्यतावच्छेदकता-पर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकप्रकारतानिरूपितविशेष्यत्वाऽभिन्नयत्किञ्चिदव्यभिचारपदार्थता-वच्छेदकपर्याप्तावच्छेदकताकप्रकारतात्वाऽवच्छिन्नावच्छेदकताऽनिरूपिता, प्रकृतपक्षतावच्छेदकता-पर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुतावच्छेदकता-पर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यतानिरूपित-प्रकृतसाध्यतावच्छेदकतापर्याप्त्यधिकरण-धर्मपर्याप्तावच्छेदकताकप्रकारतानिरूपितविशेष्यताऽभिन्न-साध्याभाववदवृत्तित्वत्वादिपर्याप्ताऽवच्छेदक-ताकप्रकारतात्वावच्छिन्नावच्छेदकतानिरूपितत्वाभावकूटाद्' - इत्येवं परिष्कृतमनुमानमुपन्यस्यम् । इति सङ्ग्रहः ।

अथ मीमांसकमतमवष्टभ्योक्तानुमाननैरर्थक्यं प्रतिपादयन्नाह कश्चिद् - **अथेत्यादि** ।

पूर्वपक्षग्रन्थस्याऽयमाशयः - साध्याभाववदवृत्तित्वादीनि पञ्च लक्षणानि मीमांसकानामिति

●

❀ मीमांसक मते साध्यसिद्धि, अभिप्रेत असिद्धि ❀

पूर्वपक्ष :- (अथ.) मीमांसक वगेरे पर लोकोना मते वह्निव्याप्यधूमवान पर्वत -

श्रुतिः । तथा चोक्तानुमानं भवता मीमांसकान् प्रति प्रयोज्यम् । तेषां मते तु 'वह्निनिरूपित-व्याप्तिविशिष्टधूमवान् पर्वतः' इत्याकारकः परामर्शः न भवति, किन्तु 'वह्निव्याप्यः धूमः', 'धूमवान् पर्वतः' इत्याकारकज्ञानद्वयेनाऽनुमितिः जायते । अत एव ते ज्ञानद्वयवादिनः कथ्यन्ते । तान् प्रति उक्ताऽनुमानेन भवता इदं साधनीयं यदुत 'वह्निव्याप्यः धूमः', 'धूमवान् पर्वतः' इत्याकारकज्ञानद्वयनिष्ठाऽनुमितिजनकता साध्याभाववदवृत्तित्वत्वाद्यवच्छिन्ना न भवति । तदर्थं भवतोक्ताऽनुमानं दर्शितम्, तथा चोक्तज्ञानद्वयनिष्ठाऽनुमितिजनकता पर्वतनिष्ठविषयतानिरूपित-हेतुनिष्ठविषयतानिरूपिताऽव्यभिचारपदार्थनिष्ठविषयताऽनवच्छिन्ना, तादृशहेतुनिष्ठविषयतानिरूपित-साध्याभाववदवृत्तित्वादिनिष्ठविषयतावच्छिन्नत्वाभावकूटाद् - इत्येवं (सङ्क्षेपतः) साधनीयम्, किन्तु तेषां मते इदं साध्यं सिद्धमेव, यतः साध्याभाववदवृत्तित्वरूपलक्षणमङ्गीकुर्वतां मतेऽपि 'वह्न्यभाववदवृत्तिः धूमः, धूमवान् पर्वतः' इत्याकारकज्ञानद्वयनिष्ठाऽनुमितिजनकतायां धूम-निष्ठविषयतानिरूपिताऽव्यभिचारपदार्थनिष्ठविषयताऽवच्छिन्नत्वस्य पर्वतनिष्ठविषयतानिरूपित-धूमनिष्ठविषयतावच्छिन्नत्वस्यैव च सत्त्वेन विशिष्टविषयताऽवच्छिन्नत्वं = पर्वतनिष्ठविषयतानिरूपित-धूमनिष्ठविषयतानिरूपिताऽव्यभिचारपदार्थनिष्ठविषयताऽवच्छिन्नत्वं तु न स्वीकुर्वन्त्येव ते ।

●

આવા જ્ઞાનના બદલે '**वह्निव्याप्यः धूमः, धूमवान् पर्वतः**' આવા પ્રકારનું વિશિષ્ટવૈશિષ્ટ્યઅનવ-ગાહી જ્ઞાન પણ અનુમિતિજનક બનતું હોવાને કારણે અનુમિતિજનકતાઅવચ્છેદક વિશિષ્ટ-વિષયતા નહીં બની શકે. એટલે કે પ્રકૃતપક્ષનિષ્ઠવિશેષ્યતાનિરૂપિતહેતુનિષ્ઠપ્રકારતાઅભિન્ન-વિશેષ્યતાનિરૂપિતવ્યાપ્તિનિષ્ઠપ્રકારતા જણાય જ નહીં. કારણ કે સળંગ વિશિષ્ટવૈશિષ્ટ્ય-અવગાહી જ્ઞાન થતું જ નથી. આમ, જે સાધ્યાભાવવદ્વૃઅવૃત્તિત્વને વ્યાપ્તિ = અનુમિતિ-જનકતાઅવચ્છેદક માને છે તે લોકો પણ અનુમિતિજનકતાને ઉક્તવિશિષ્ટવૈશિષ્ટ્ય-અવગાહિજ્ઞાનીય વિષયતાથી તો અનવચ્છિન્ન જ માનશે. એટલે કે તે લોકોના મતે 'વહ્નિ-અભાવવદ્વૃઅવૃત્તિ ધૂમ, ધૂમવાન પર્વત' - આવા પ્રકારનું જ્ઞાન થાય છે.'વહ્નિઅભાવવદ્વૃ-અવૃત્તિધૂમવાન પર્વત' આવું જ્ઞાન થતું જ નથી. માટે '**पर्वतो वह्निमान् धूमात्**' આવા પ્રકારની અનુમિતિ ઉત્પન્ન કરનાર જે પરામર્શ તેમાં જે અનુમિતિજનકતા રહે છે તે પક્ષનિષ્ઠવિશેષ્યતાનિરૂપિતહેતુનિષ્ઠપ્રકારતાઅભિન્નવિશેષ્યતાનિરૂપિતઅવ્યભિચારપદાર્થનિષ્ઠ-પ્રકારતાઆખ્યવિષયતાથી અનવચ્છિન્ન જ છે. (પ્રસ્તુતમાં આખું સાધ્ય ન લખવું પડે તેથી સંક્ષેપમાં જણાવેલ છે. બાકી મૂળ સાધ્ય જ સમજવું) કારણ કે વિશિષ્ટવૈશિષ્ટ્યઅવગાહી જ્ઞાન તો છે નહીં. આમ, સાધ્યાભાવવદ્વૃઅવૃત્તિત્વને વ્યાપ્તિ માનનારા પણ તમે કહેલ

अथ *परमते 'वह्निव्याप्यो धूमो धूमवान् पर्वतः' - इति ज्ञानस्यापि कारणत्वेन विशिष्टविषयतायाः कारणतानवच्छेदकतया साध्याभाववद-*

●

ज्ञानभेदेन विषयताभेदाद् ज्ञानद्वयनिरूपितविषयतानां परस्परं निरूप्य-निरूपकभावाऽनापन्नत्वाद् धूमनिष्ठविषयता यदि पर्वतनिष्ठविषयतानिरूपिता स्यात् तर्हि तादृशधूमनिष्ठविषयतानिरूपितत्वम् अव्यभिचारपदार्थनिष्ठविषयतायां न स्यात्, यदि अव्यभिचारपदार्थनिष्ठविषयता धूमनिष्ठविषयतानिरूपिता गृह्यते तर्हि तादृशधूमनिष्ठविषयता पर्वतनिष्ठविषयताऽनिरूपिता एव स्यात् । तथा च यदि ते साध्याभाववदवृत्तित्वादिनिष्ठविषयत्वानामनुमितिजनकतावच्छेदकत्वमङ्गीकुर्युः तदापि तेषां मते अनुमितिजनकतायां भवतोक्तं साध्यम् अस्ति एव, विशिष्टविषयतायां जनकताऽवच्छेदकतायाः तैरनङ्गीकारात्, तथा च 'ये साध्याभाववदवृत्तित्वादिनिष्ठविषयतानामनुमितिजनकतावच्छेदकत्वमङ्गीकुर्वन्ति ते तादृशविषयतानामनुमितिजनकताऽनवच्छेदकत्वमङ्गीकुर्युः उक्ताऽनुमानेन' इति यदभिलषितं तन्न उक्ताऽनुमानेन सिध्येत्, तादृशविषयतानामनुमितिजनकतावच्छेदकत्वाङ्गीकारेऽपि उक्ताऽनुमानसम्भवात्, उक्ताऽनुमानस्वीकारेऽपि तैरङ्गीकृतस्य तादृशविषयतानामनुमितिजनकतावच्छेदकत्वमतस्य अनपायात् ।

एतदेवाह - **अथ**शब्दः पूर्वपक्षद्योतने, परमते = मीमांसकमते **'वह्निव्याप्यः धूमः, धूमवान् पर्वतः' इतिज्ञानस्यापि** = यथा नैयायिकमते 'वह्निव्याप्यधूमवान् पर्वतः' इत्याकारकज्ञानस्य तथा मीमांसकमते 'वह्निव्याप्यः धूमः', 'धूमवान् पर्वतः' इत्याकारकज्ञानद्वयस्याऽपि अनुमितिं प्रति कारणत्वेन इत्यपिशब्दार्थः । मीमांसकमते 'वह्निव्याप्यधूमवान् पर्वतः' इत्याकारकज्ञानस्याऽनुमितिजनकताऽभावाद् "मीमांसकमते 'वह्निव्याप्यधूमवान् पर्वतः' इत्याकारकज्ञानमनुमितिजनकम्, 'वह्निव्याप्यः धूमः', 'धूमवान् पर्वतः' इत्याकारकज्ञानद्वयमपि अनुमितिजनकम्" - इति नार्थः अपेरित्यवधेयम् । अनुमितिं प्रति **कारणत्वेन विशिष्टविषयतायाः कारणताऽनवच्छेदकतया** =

●

સાધ્યને અનુમિતિજનકતામાં સ્વીકારી જ લેશે. એટલે તમારા અનુમાન દ્વારા તમારે જે સામાવાળાને જણાવવું છે કે સાધ્યાભાવવદ્અવૃત્તિત્વ એ અનુમિતિજનકતાઅવચ્છેદક નહીં બને - તે સિદ્ધ નહીં થાય. કારણ કે સાધ્યાભાવવદ્અવૃત્તિત્વને અનુમિતિજનકતાઅવચ્છેદક માન્યા પછી પણ તમે કહો છો તે અનુમાન સંભવે જ છે. એટલે તમને માન્ય એવા અર્થની સિદ્ધિ નહીં થઈ શકે.

शब्दार्थ :- અન્યલોકોના મતમાં 'वह्निव्याप्यः धूमः', 'धूमवान् पर्वतः' આવું જ્ઞાન પણ

गू ढा *वृत्तित्वविषयताया जनकतावच्छेदकत्वेऽपि साध्यसिद्धिरिति न विवक्षितार्थसिद्धिरिति चेत् ?*

●

'पर्वतो वह्निव्याप्यधूमवान्' इत्यत्र प्रागुक्तरीत्या भासमानायाः प्रकृतपक्षतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यतानिरूपित-प्रकृतसाध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकप्रकारतानिरूपितविशेष्यत्वाऽभिन्नसाध्याभाववदवृत्तित्वत्वावच्छिन्नत्वविशिष्टायाः प्रकारताऽऽख्यविषयतायाः अनुमितिजनकताऽनवच्छेदकतया **साध्याभाववदवृत्तित्वविषयतायाः जनकताऽवच्छेदकत्वेऽपि** = 'वह्निव्याप्यः धूमः', 'धूमवान् पर्वतः' इत्याकारकज्ञानद्वयनिष्ठाऽनुमितिजनकतायाः धूमनिष्ठविशेष्यतानिरूपितसाध्याभाववदवृत्तित्वनिष्ठप्रकारताऽऽख्यविषयतयाऽवच्छिन्नत्वस्वीकारेण तन्मते साध्याभाववदवृत्तित्वविषयताया अनुमितिजनकताऽवच्छेदकत्वेऽपि **साध्यसिद्धिः** = उक्ताऽनुमानेन साध्याभाववदवृत्तित्वाद्यव्यभिचारपदार्थनिष्ठविशिष्टविषयतायाः अनुमितिजनकतानवच्छेदकत्वरूपं यत् साधनीयं तस्य सिद्धिः तेषां मते अस्ति एव, तैः तथाऽभ्युपगमात्, **इति** हेतोः **न विवक्षितार्थसिद्धिः**, विवक्षितः यः अर्थः यदुत 'ये अव्यभिचारपदार्थनिष्ठविषयतायाः अनुमितिजनकतावच्छेदकत्वमङ्गीकुर्वन्ति तान् प्रति उक्ताऽनुमानेन अव्यभिचारपदार्थनिष्ठविषयतायाः अनुमितिजनकताऽनवच्छेदकत्वं साधनीयं' तस्य असिद्धिः, यतः ये अव्यभिचारपदार्थनिष्ठविषयतायाः अनुमितिजनकतावच्छेदकत्वं स्वीकुर्वन्ति तेषां मतेऽपि साध्यं सिद्धमेव । पर्वते वह्न्यनङ्गीकर्तारं पुरुषं प्रति 'पर्वतो वह्निमान्' इत्यनुमानेन वह्निः साध्यते, यदि सः 'काञ्चनमयः वह्निः पर्वते नास्ति' इत्येवमभ्युपगच्छति तदा 'पर्वतो वह्निमान्' इत्यत्र साध्यसिद्धिः तन्मतेऽस्ति एव । एवं मीमांसकाः अविशिष्टविषयतायाः अनुमितिजनकतावच्छेदकत्वमभ्युपगच्छन्ति तन्मते विशिष्टविषयतायाः जनकताऽनवच्छेदकत्वं सिद्धमेव । ते न साध्याभाववदवृत्तित्वनिष्ठविशिष्टविषयतायाः जनकताऽवच्छेदकत्वमङ्गीकुर्वन्ति, किन्तु साध्याभाववदवृत्तित्वनिष्ठाऽविशिष्टविषयतायाः एवेति भवता प्रदर्शितं साध्यं तन्मते सिद्धमेवेति ।

य शो ल ता

●

કારણ હોવાને કારણે આપે બતાવેલ વિશિષ્ટવિષયતા તો અનુમિતિકારણતાઅવચ્છેદક નહીં જ બને. એટલે સાધ્યાભાવવદ્અવૃત્તિત્વનિષ્ઠવિષયતાને જનકતાઅવચ્છેદક માની લો તો પણ સાધ્યની સિદ્ધિ થઈ શકે છે. માટે, તમને જે માન્ય છે - વિવક્ષિત છે કે 'સાધ્યાભાવવદ્અવૃત્તિત્વનિષ્ઠવિષયતા જનકતાઅવચ્છેદક ન બને' તે વાતની સિદ્ધિ નહીં થાય.

वि न

अनुमितिजनकतायां मीमांसकैः साध्याभाववदवृत्तित्वनिष्ठविषयताऽवच्छिन्नत्वस्य अभ्युपगतत्वेऽपि तादृशविषयता न भवदुक्तस्वरूपा, किन्तु अविशिष्टा एव । तथा च मीमांसकैः सामान्यविषयतावच्छिन्नत्वमनुमितिजनकतायाम् अभ्युपगम्यते, भवता च अनुमितिजनकतायां विशिष्टविषयतानवच्छिन्नत्वं साध्यते, तच्च तैः अभ्युपगम्यते एवेति न विवक्षितार्थसिद्धिः ।

उत्तरयति - **इति चेद् ? मैव**मित्यादिना । उत्तरपक्षस्याऽयमाशयः - भवता यदुक्तं तत्सत्यम्, ततः साध्यं परावर्त्यते । मीमांसकमते 'वह्निव्याप्यो धूमः', 'धूमवान् पर्वतः' - इति ज्ञानद्वितयम् अनुमितिकारणम् । तेषां मते 'धूमवान् पर्वतः' इत्याकारकज्ञानीया पर्वतनिष्ठविशेष्यता अपि अनुमितिजनकतावच्छेदिका भवति, धूमनिष्ठप्रकारता अपि । एवं 'वह्निव्याप्यः धूमः' इत्याकारकज्ञानीया धूमनिष्ठविशेष्यता अपि अनुमितिजनकतावच्छेदिका भवति, व्याप्तिनिष्ठप्रकारता अपि । अत्र पर्वतनिष्ठविशेष्यतानिष्ठाऽनुमितिजनकतावच्छेदकतानिरूपिता धूमनिष्ठप्रकारतानिष्ठाऽनुमितिजनकतावच्छेदकता एव भवति, न तु धूमनिष्ठविशेष्यतानिष्ठावच्छेदकता, न वा व्याप्तिनिष्ठप्रकारतानिष्ठावच्छेदकता । एकज्ञानीयविषयतानिष्ठावच्छेदकता एव परस्परं निरूप्यनिरूपकभावाऽऽपन्ना इति स्थितम् । धूमनिष्ठप्रकारतानिष्ठावच्छेदकता 'पर्वतो वह्निमान्'

य शो ल ता

●

⁂ मीमांसकमतनो संग्राहक परिष्कार ⁂

उत्तरपक्ष :- (**मैव.**) सारुं, ते अन्यलोकोना मतनो पण संग्रह थई जाय तेवा साध्य अने हेतु बनावी दईए -

साध्य :- प्रकृतपक्षताअवच्छेदकअवच्छिन्नविशेष्यतानिष्ठअनुमितिजनकताअवच्छेदकतानिरूपितप्रकृतहेतुताअवच्छेदकअवच्छिन्नप्रकारतानिष्ठअनुमितिजनकताअवच्छेदकताविशिष्टहेतुताअवच्छेदकअवच्छिन्नविशेष्यतानिष्ठअनुमितिजनकताअवच्छेदकतानिरूपितअव्यभिचारपदार्थताअवच्छेदकअवच्छिन्नविषयतात्वअवच्छिन्नअवच्छेदकतानिरूपितत्वाभाव.

वि ना श

हेतु :- प्रकृतपक्षताअवच्छेदकअवच्छिन्नविशेष्यतानिष्ठअनुमितिजनकताअवच्छेदकतानिरूपितप्रकृतहेतुताअवच्छेदकअवच्छिन्नप्रकारतानिष्ठअनुमितिजनकताअवच्छेदकताविशिष्टप्रकृतहेतुताअवच्छेदकअवच्छिन्नविशेष्यतानिष्ठअनुमितिजनकताअवच्छेदकतानिरूपितसाध्याभाववद्अवृत्तित्वत्वावच्छिन्नविषयतात्वअवच्छिन्नअवच्छेदकतानिरूपितत्वाभावकूट. मतलब के वह्निव्याप्य धूम अने धूमवान् पर्वत - आवा ज्ञानने कारण माननाराओना मते

इत्याकारकाऽनुमितिनजनकतायाः एव अस्ति, धूमनिष्ठविशेष्यतानिष्ठाऽवच्छेदकताऽपि तादृशाऽनुमितिजनकतायाः एव । तथा च -



ततश्च धूमनिष्ठप्रकारतानिष्ठावच्छेदकतानिरूपितत्वस्य धूमनिष्ठविशेष्यतानिष्ठावच्छेदकतायामसत्त्वेऽपि तयोः द्वयोरप्यवच्छेदकत्वयोः निरूपिका अनुमितिजनकता एका एव, उक्तरीत्या एकयैव अनुमितिजनकतया निरूपितावच्छेदकतायाः तादृशविशेष्यत्वादिषु सत्त्वात् । ततश्च धूमनिष्ठप्रकारतानिष्ठावच्छेदकता स्वनिरूपकाऽनुमितिजनकतानिरूपितत्वसम्बन्धेन धूमनिष्ठविशेष्यतानिष्ठावच्छेदकतायां वर्तते । तथा च 'वह्निव्याप्यः धूमः', 'धूमवान् पर्वतः' इत्याकारकज्ञाननिष्ठाऽनुमितिजनकता पर्वतनिष्ठविशेष्यतानिष्ठावच्छेदकतानिरूपितधूमनिष्ठप्रकारतानिष्ठावच्छेदकताविशिष्टधूमनिष्ठविशेष्यतानिष्ठावच्छेदकतानिरूपितव्याप्तिनिष्ठविषयतानिष्ठाऽवच्छेदकताऽनिरूपिता भवति, अत्र व्याप्तिविधया अव्यभिचारपदार्थः न भासते इति साधनीयम् । ततः एवं साध्यं वक्तुं शक्यते - प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यत्वनिष्ठावच्छेदकतानिरूपितप्रकृतहेतुतावच्छेदकावच्छिन्नप्रकारतानिष्ठावच्छेदकताविशिष्टप्रकृतहेतुताऽवच्छेदकावच्छिन्नविशेष्यता-

●

નિશ્ચયવિશિષ્ટ નિશ્ચય કારણ બન્યો. અર્થાત્ 'વહ્નિવ્યાપ્ય ધૂમ' - આવા નિશ્ચયથી (સામાનાધિકરણ્યસંબંધથી) વિશિષ્ટ 'ધૂમવાન પર્વત' - આવો નિશ્ચય એ અનુમિતિનું કારણ બને. આપણે પૂર્વે જોઈ ગયેલા કે અનુમિતિજનકજ્ઞાનમાં જે જે વિષય બને તે બધાં વિષયવિધયા અનુમિતિજનકતાઅવચ્છેદક બને. માટે પ્રકૃતપક્ષતાઅવચ્છેદકપર્વતત્વઅવચ્છિન્નપર્વતનિષ્ઠવિશેષ્યતા પણ અનુમિતિજનકતાઅવચ્છેદક બને. તથા તેનાથી નિરૂપિત જે પ્રકૃતહેતુતાઅવચ્છેદકધૂમત્વઅવચ્છિન્નધૂમનિષ્ઠપ્રકારતા છે તે પણ અનુમિતિજનકતાઅવચ્છેદક

निष्ठावच्छेदकतानिरूपिताऽव्यभिचारपदार्थनिष्ठविषयतानिष्ठावच्छेदकताऽनिरूपिता अनुमितिजनकता। वैशिष्ट्यं पूर्वोक्तस्वनिरूपकजनकतानिरूपितत्वसम्बन्धेन ।

ततश्चैवमनुमानम् - अनुमितिजनकता प्रकृतपक्षतावच्छेदकाऽवच्छिन्नविशेष्यतानिष्ठाऽवच्छेदकतानिरूपित-प्रकृतहेतुतावच्छेदकाऽवच्छिन्नप्रकारतानिष्ठावच्छेदकताविशिष्टप्रकृतहेतुतावच्छेदकावच्छिन्नविशेष्यतानिष्ठाऽवच्छेदकतानिरूपिताऽव्यभिचारपदार्थनिष्ठविषयतानिष्ठावच्छेदकताऽनिरूपिता, प्रकृतपक्षतावच्छेदकाऽवच्छिन्नविशेष्यतानिष्ठावच्छेदकतानिरूपितप्रकृतहेतुतावच्छेदकाऽवच्छिन्नप्रकारतानिष्ठावच्छेदकताविशिष्टप्रकृतहेतुताऽवच्छेदकावच्छिन्नविशेष्यतानिष्ठावच्छेदकतानिरूपितसाध्याभाववदवृत्तित्वादिनिष्ठप्रकारताऽऽश्रयविषयतानिष्ठावच्छेदकताऽनिरूपितत्वाभावकूटात् ।

इदञ्चात्र बोध्यम् - तादृशाऽव्यभिचारपदार्थनिष्ठविषयतायां याऽवच्छेदकता भवेत् साऽनुमितिजनकतायाः न स्यादिति अनुमितिजनकतायां तादृशाऽव्यभिचारपदार्थनिष्ठविषयतानिष्ठावच्छेदकतानिरूपितत्वं न भवेत् । 'वह्निव्याप्यं धूममहं जानामि', 'धूमवन्तं पर्वतमहं जानामि' - इत्याद्यनुव्यवसायजनकतायां 'वह्निव्याप्यो धूमः', 'धूमवान् पर्वतः'- इत्यादिज्ञाननिष्ठायां स्वनिरूपक-

●

બને. આ રીતે 'ધૂમવાન પર્વત' - આવો જે અનુમિતિજનકજ્ઞાનઘટક એક નિશ્ચય તેમાં ભાસમાન પર્વતત્વઅવચ્છિન્નપર્વતનિષ્ઠવિશેષ્યતા અને ધૂમત્વઅવચ્છિન્નધૂમનિષ્ઠપ્રકારતા આ ઉભયમાં પણ અનુમિતિજનકતાઅવચ્છેદકતા આવશે. પ્રસ્તુતમાં જો પર્વતત્વઅવચ્છિન્નપર્વતનિષ્ઠવિશેષ્યતામાં અનુમિતિજનકતાઅવચ્છેદકતા આવે તો ધૂમત્વઅવચ્છિન્નધૂમનિષ્ઠપ્રકારતામાં અનુમિતિજનકતાઅવચ્છેદકતા આવે. તથા જો ધૂમત્વઅવચ્છિન્નધૂમનિષ્ઠપ્રકારતામાં અનુમિતિજનકતાઅવચ્છેદકતા આવે તો પર્વતત્વઅવચ્છિન્નપર્વતનિષ્ઠવિશેષ્યતામાં અનુમિતિજનકતાઅવચ્છેદકતા આવે. આમ, ઉભયનિષ્ઠઅનુમિતિજનકતાઅવચ્છેદકતા પરસ્પર નિરૂપિત થાય. માટે, પર્વતત્વઅવચ્છિન્નપર્વતનિષ્ઠવિશેષ્યતાનિષ્ઠઅનુમિતિજનકતાઅવચ્છેદકતાનિરૂપિતા ધૂમત્વઅવચ્છિન્નધૂમનિષ્ઠપ્રકારતાનિષ્ઠઅનુમિતિજનકતાઅવચ્છેદકતા થાય. આ રીતે એક નિશ્ચય થયો. બીજો નિશ્ચય છે 'વહ્નિવ્યાપ્ય ધૂમ.' અહીં વ્યાપ્તિમાં પ્રકારતા અને ધૂમમાં વિશેષ્યતા ભાસિત થાય છે. માટે, ધૂમત્વઅવચ્છિન્નધૂમનિષ્ઠવિશેષ્યતાનિષ્ઠઅનુમિતિજનકતાઅવચ્છેદકતાનિરૂપિતા ધૂમસમાનાધિકરણઅત્યંતાભાવઅપ્રતિયોગિસાધ્યસામાનાધિકરણ્યત્વઅવચ્છિન્નધૂમસમાનાધિકરણઅત્યંતાભાવઅપ્રતિયોગિવહ્નિસામાનાધિકરણ્યનિષ્ઠપ્રકારતા થાય. પણ, ધૂમત્વઅવચ્છિન્નધૂમનિષ્ઠવિશેષ્યતાનિષ્ઠઅનુમિતિજનકતાઅવચ્છે-

जनकतानिरूपितत्वसम्बन्धेन प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिष्ठावच्छेदकतानिरूपित-प्रकृतहेतुतावच्छेदकावच्छिन्नप्रकारतानिष्ठावच्छेदकता*विशिष्ट*प्रकृतहेतुतावच्छेदकावच्छिन्नविशेष्यता-निष्ठावच्छेदकतानिरूपिताऽव्यभिचारपदार्थनिष्ठप्रकारतानिष्ठावच्छेदकतानिरूपितत्वं वर्तते, तादृशनिरूपितत्वमनुमितिजनकतायां न वर्तते इति भावः । ततश्च पूर्वं यत्र यत्र प्रकृतहेतुता-वच्छेदकावच्छिन्नविशेष्यतानिष्ठानुमितिजनकतावच्छेदकतेत्यादिरीत्या विशिष्य अनुमितिजनक-तावच्छेदकतायाः उल्लेखः तत्र तत्र सः प्रतिपत्तिसौकर्यार्थं कृत इति प्रतिपत्तव्यम्, वस्तुतः सामान्येनैव अवच्छेदकतायाः प्रवेशः कर्तव्यः इति ।

– पूर्वोक्तरीत्या 'पर्वतो वह्न्यव्यभिचारिविशिष्टः, वह्न्यभाववदवृत्तिमत्त्वाद्' इत्यादिस्थलीय-बाधादिवारणाय 'अनुमितिजनकता प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिष्ठावच्छेदकतानिरूपित-प्रकृतहेतुतावच्छेदकावच्छिन्नप्रकारतानिष्ठावच्छेदकताविशिष्टप्रकृतहेतुतावच्छेदकावच्छिन्नविशे-ष्यतानिष्ठावच्छेदकतानिरूपिताऽव्यभिचारपदार्थतावच्छेदकाऽवच्छिन्नप्रकारतानिष्ठावच्छेदकताऽ-निरूपिता, प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिष्ठावच्छेदकतानिरूपितप्रकृतहेतुतावच्छेदका-

दकतानिરૂપિત અવ્યભિચારપદાર્થતાઅવચ્છેદકઅવચ્છિન્નઅવ્યભિચારપદાર્થનિષ્ઠવિષયતા ન મળે. માટે, તાદૃશવિષયતાત્વઅવચ્છિન્નઅવચ્છેદકતાનિરૂપિતત્વ અનુમિતિજનકતામાં ન રહે. કિંતુ નિરૂપિતત્વાભાવ રહે. પ્રસ્તુતમાં આપણે બે નિશ્ચય જોયા. આમાં દ્વિતીય નિશ્ચય પ્રથમ નિશ્ચયથી વિશિષ્ટ બને તો કારણ બને. માટે, પર્વતત્વઅવચ્છિન્નપર્વતનિષ્ઠવિશેષ્યતા-નિષ્ઠઅનુમિતિજનકતાઅવચ્છેદકતાનિરૂપિતધૂમત્વઅવચ્છિન્નધૂમનિષ્ઠપ્રકારતાનિષ્ઠઅનુ-મિતિજનકતાઅવચ્છેદકતાથી વિશિષ્ટ ધૂમત્વઅવચ્છિન્નધૂમનિષ્ઠવિશેષ્યતાનિષ્ઠઅનુમિતિ-જનકતાઅવચ્છેદકતા બને અને તેનાથી નિરૂપિતઅવ્યભિચારપદાર્થતાઅવચ્છેદકઅવ-ચ્છિન્નઅવ્યભિચારપદાર્થનિષ્ઠવિષયતાનિષ્ઠવિષયતાત્વઅવચ્છિન્નઅવચ્છેદકતાનિરૂપિત-ત્વાભાવ સાધ્ય બને. વૈશિષ્ટ્ય સ્વનિરૂપકજનકતાનિરૂપિતત્વસંબંધથી. મતલબ કે ધૂમત્વ-અવચ્છિન્નધૂમનિષ્ઠપ્રકારતાનિષ્ઠઅનુમિતિજનકતાઅવચ્છેદકતાને ધૂમત્વઅવચ્છિન્નધૂમનિષ્ઠ-વિશેષ્યતાનિષ્ઠઅનુમિતિજનકતાઅવચ્છેદકતામાં રાખવાની છે. માટે, સ્વપદથી ધૂમત્વ-અવચ્છિન્નધૂમનિષ્ઠપ્રકારતાનિષ્ઠઅનુમિતિજનકતાઅવચ્છેદકતા આવશે. તાદૃશઅવચ્છેદકતા-નિરૂપક જે અનુમિતિજનકતા છે તેનાથી જ નિરૂપિત ધૂમત્વઅવચ્છિન્નધૂમનિષ્ઠવિશેષ્યતા-નિષ્ઠઅનુમિતિજનકતાઅવચ્છેદકતા છે. કારણ કે એક જ અનુમિતિની જનકતાઅવચ્છેદકતા વિશેષ્યતામાં અને પ્રકારતામાં રહે છે. માટે, સ્વનિરૂપકજનકતાનિરૂપિતત્વસંબંધથી

वच्छिन्नप्रकारतानिष्ठावच्छेदकताविशिष्टप्रकृतहेतुतावच्छेदकावच्छिन्नविशेष्यतानिष्ठावच्छेदकता-निरूपितसाध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नप्रकारतानिष्ठावच्छेदकतानिरूपितत्वाभावकूटाद्' - इत्येवमनुमानमुपदर्शनीयम् ।

– पर्वतो वह्निमान् - इत्याकारकानुमितिजनकताविशिष्टं 'धूमसमानाधिकरणाऽत्यन्ताभावाऽ-प्रतियोगिवह्निसामानाधिकरण्य-वह्न्यभाववदवृत्तित्वोभयविशिष्टो धूमः', 'धूमविशिष्टः पर्वतः' इत्याकारकं यज्ज्ञानद्वयं तज्ज्ञानीयोभयधर्माऽवच्छिन्नविषयतायाः अनुमितिजनकतावच्छेदकत्वेन बाधादिवारणाय 'अनुमितिजनकता प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिष्ठावच्छेदकतानिरू-पितप्रकृतहेतुतावच्छेदकावच्छिन्नप्रकारतानिष्ठावच्छेदकताविशिष्टप्रकृतहेतुतावच्छेदकावच्छिन्न-विशेष्यतानिष्ठावच्छेदकतानिरूपिताऽव्यभिचारपदार्थतावच्छेदकावच्छिन्नप्रकारतात्वावच्छिन्नाऽव-च्छेदकताऽनिरूपिता, प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिष्ठावच्छेदकतानिरूपितप्रकृतहेतुता-वच्छेदकावच्छिन्नप्रकारतानिष्ठावच्छेदकताविशिष्टप्रकृतहेतुतावच्छेदकाऽवच्छिन्नविशेष्यतानिष्ठावच्छेद-कतानिरूपितसाध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नप्रकारतात्वावच्छिन्नावच्छेदकतानिरूपितत्वाभावकूटाद्' - इत्येवमनुमानमुपदर्शनीयम् । अत्र तादृशहेतुतावच्छेदकावच्छिन्नविशेष्यतानिष्ठावच्छेदकतानिरूपि-तत्वम् अव्यभिचारपदार्थतावच्छेदकावच्छिन्नप्रकारतात्वाद्यवच्छिन्नाऽवच्छेदकतायां बोध्यम्, तादृशाऽव-च्छेदकताद्वितयस्य एकज्ञानीयविषयतानिष्ठत्वेन परस्परं निरूप्य-निरूपकभावस्य सुघटत्वात् ।

– अव्यभिचारपदार्थतावच्छेदकस्य तादृशाऽव्यभिचारपदार्थनिष्ठप्रकारतातोऽतिरिक्तवृत्तित्वेनाऽ-वच्छेदकत्वाऽसम्भवेन पूर्वोक्तयुक्त्या, 'अनुमितिजनकता प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यता-निष्ठावच्छेदकतानिरूपितप्रकृतहेतुतावच्छेदकावच्छिन्नप्रकारतानिष्ठावच्छेदकताविशिष्टप्रकृतहेतुताव-च्छेदकावच्छिन्नविशेष्यतानिष्ठावच्छेदकतानिरूपिताऽव्यभिचारपदार्थतावच्छेदकतासमानाधिकरणाऽ-वच्छेदकताकप्रकारतात्वाऽवच्छिन्नावच्छेदकताऽनिरूपिता, प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यता-निष्ठावच्छेदकतानिरूपितप्रकृतहेतुतावच्छेदकावच्छिन्नप्रकारतानिष्ठावच्छेदकताविशिष्टप्रकृतहेतुता-

●

ધૂમત્વઅવચ્છિન્નધૂમનિષ્ઠપ્રકારતાનિષ્ઠઅનુમિતિજનકતાઅવચ્છેદકતાવિશિષ્ટ ધૂમત્વઅવ-ચ્છિન્નધૂમનિષ્ઠવિશેષ્યતાનિષ્ઠઅનુમિતિજનકતાઅવચ્છેદકતા થશે. આ રીતે માનવાથી જે લોકો 'વહ્નિવ્યાપ્યધૂમવાન્ પર્વત' - આ રીતે વિશિષ્ટવૈશિષ્ટ્યઅવગાહિત્વેન પરામર્શ નથી સ્વીકારતા, કિંતુ 'વહ્નિવ્યાપ્ય ધૂમ, ધૂમવાન્ પર્વત' આ રીતે એક નિશ્ચયથી વિશિષ્ટ અન્યનિશ્ચયત્વ રૂપે પરામર્શ માને છે તે લોકોના મતે પણ કોઈ વાંધો નહીં આવે.

वच्छेदकाऽवच्छिन्नविशेष्यतानिष्ठावच्छेदकतानिरूपितसाध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नप्रकारतात्वावच्छिन्नावच्छेदकतानिरूपितत्वाभावकूटाद्' - इत्येवमनुमानमुपदर्शनीयम् ।

– 'वह्न्यभाववदवृत्तिधूमवत्पर्वतो वह्निमान्, धूमाद्' - इत्यादिस्थलीये अनुमितिजनकीभूते 'वह्निव्याप्यो धूमः', 'धूमवान् वह्न्यभाववदवृत्तिधूमवत्पर्वतः' - इत्याकारकज्ञानद्वितये याऽनुमितिजनकता तामादाय बाधादिवारणाय 'अनुमितिजनकता प्रकृतपक्षतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यतानिष्ठावच्छेदकतानिरूपितप्रकृतहेतुताऽवच्छेदकावच्छिन्नप्रकारतानिष्ठावच्छेदकताविशिष्टप्रकृतहेतुतावच्छेदकाऽवच्छिन्नविशेष्यतानिष्ठावच्छेदकतानिरूपिताऽव्यभिचारपदार्थताऽवच्छेदकतासमानाधिकरणाऽवच्छेदकताकप्रकारतात्वावच्छिन्नावच्छेदकताऽनिरूपिता, प्रकृतपक्षतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यतानिष्ठावच्छेदकतानिरूपितप्रकृतहेतुतावच्छेदकावच्छिन्नप्रकारतानिष्ठाऽवच्छेदकताविशिष्टप्रकृतहेतुतावच्छेदकाऽवच्छिन्नविशेष्यतानिष्ठावच्छेदकतानिरूपितसाध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नप्रकारतात्वावच्छिन्नावच्छेदकतानिरूपितत्वाभावकूटाद्' - इत्येवमनुमानमुपदर्शनीयम्, पक्षतावच्छेदकतापर्याप्तिनिवेशेन ।

– 'पर्वतो वह्निमान्, वह्न्यभाववदवृत्तिधूमाद्' - इत्यादिस्थले 'वह्निव्याप्यः वह्न्यभाववदवृत्तिधूमः, वह्न्यभाववदवृत्तिधूमविशिष्टः पर्वतः' इत्याकारकज्ञानद्वयनिष्ठाऽनुमितिजनकतामादाय बाधादिवारणाय 'अनुमितिजनकता प्रकृतपक्षतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिष्ठावच्छेदकतानिरूपितप्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकप्रकारतानिष्ठावच्छेदकताविशिष्टप्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिरूपिताऽव्यभिचारपदार्थतावच्छेदकतासमानाधिकरणाऽवच्छेदकताकप्रकारतात्वावच्छिन्नावच्छेदकताऽनिरूपिता, प्रकृतपक्षतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यतानिष्ठावच्छेदकतानिरूपितप्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकप्रकारतानिष्ठाऽवच्छेदकताविशिष्टप्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिष्ठावच्छेदकतानिरूपितसाध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नप्रकारतात्वावच्छिन्नावच्छेदकतानिरूपितत्वाभावकूटाद्' - इत्येवम् उभयत्र हेतुतावच्छेदकतापर्याप्तिनिवेशेनाऽनुमानमुपदर्शनीयम् ।

– 'पर्वतो वह्न्यभाववदवृत्तिधूमविशिष्टवह्निमान्, धूमाद्' - इत्यादिस्थले 'वह्न्यभाववदवृत्तिधूमविशिष्टवह्निनिरूपितव्याप्तिविशिष्टः धूमः', 'धूमवान् पर्वतः' - इत्याकारकज्ञान-

द्वयनिष्ठाऽनुमितिजनकतामादाय बाधादिवारणाय 'अनुमितिजनकता प्रकृतपक्षतावच्छेदकता-पर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यतानिष्ठाऽवच्छेदकतानिरूपितप्रकृतहेतुताऽव-च्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकप्रकारतानिष्ठाऽवच्छेदकताविशिष्टप्रकृत-हेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिष्ठाऽवच्छेदकतानिरूपित-प्रकृतसाध्यताऽवच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकप्रकारतानिष्ठाऽवच्छेदकता-निरूपिताऽव्यभिचारपदार्थतावच्छेदकतासमानाधिकरणाऽवच्छेदकताकप्रकारतात्वाऽवच्छिन्ना-वच्छेदकताऽनिरूपिता, प्रकृतपक्षतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यता-निष्ठावच्छेदकतानिरूपितप्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकप्रकारता-निष्ठावच्छेदकताविशिष्टप्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यता-निष्ठावच्छेदकतानिरूपित-प्रकृतसाध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकप्रकारता-निष्ठावच्छेदकतानिरूपितसाध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नप्रकारतात्वावच्छिन्नाऽवच्छेदकतानिरू-पितत्वाभावकूटाद्' - इत्येवं साध्यतावच्छेदकतापर्याप्तिनिवेशपूर्वकमनुमानमुपदर्शनीयम् ।

अत्र साध्यस्य स्वनिरूपितत्वादिसम्बन्धेन अव्यभिचारपदार्थे वृत्तित्वमस्ति, अतः साध्यतावच्छे-दकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकप्रकारतानिष्ठावच्छेदकतानिरूपितत्वम् अव्यभि-चारपदार्थताऽवच्छेदकतासमानाधिकरणाऽवच्छेदकताकप्रकारतात्वावच्छिन्नावच्छेदकतायां स्यादेव, प्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यतानिष्ठावच्छेदकतानिरूपि-तत्वञ्च तत्राऽस्ति एवेति ।

– 'पर्वतो वह्निमान् वह्न्यभाववदवृत्तिधूमात्', 'पर्वतो वह्न्यभाववदवृत्तिधूमविशिष्टवह्निमान्, धूमात्', 'वह्न्यभाववदवृत्तिधूमवत्पर्वतो वह्निमान्, धूमाद्' - इत्यादिस्थले 'वह्निव्याप्यः वह्न्यभाव-वदवृत्तिधूमः, वह्न्यभाववदवृत्तिधूमवान् पर्वतः', 'वह्न्यभाववदवृत्तिधूमविशिष्टवह्निनिरूपितव्याप्ति-विशिष्टः धूमः, धूमवान् पर्वतः', 'वह्निव्याप्यो धूमः, धूमवान् वह्न्यभाववदवृत्तिधूमवत्पर्वतः' - इत्यादिज्ञाननिष्ठाऽनुमितिजनकतायां केवलधूमत्वादिहेतुताद्यवच्छेदकमादाय बाधादिवारणाय 'प्रकृतहेतुतावच्छेदकावच्छिन्नलिङ्गक-प्रकृतसाध्यतावच्छेदकाऽवच्छिन्नविधेयक-प्रकृतपक्षतावच्छेद-कावच्छिन्नपक्षकाऽनुमितिजनकता प्रकृतपक्षतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताक-विशेष्यतानिष्ठावच्छेदकतानिरूपितप्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताक-प्रकारतानिष्ठावच्छेदकताविशिष्टप्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताक-

विशेष्यतानिष्ठावच्छेदकतानिरूपित-प्रकृतसाध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकप्रकारतानिष्ठाऽवच्छेदकतानिरूपिताऽव्यभिचारपदार्थतावच्छेदकतासमानाधिकरणाऽवच्छेदकताकप्रकारतात्वावच्छिन्नाऽवच्छेदकताऽनिरूपिता, प्रकृतपक्षतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यतानिष्ठावच्छेदकतानिरूपितप्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकप्रकारतानिष्ठाऽवच्छेदकताविशिष्टप्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यतानिष्ठाऽवच्छेदकतानिरूपित-प्रकृतसाध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकप्रकारतानिष्ठावच्छेदकतानिरूपितसाध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नप्रकारतात्वावच्छिन्नाऽवच्छेदकतानिरूपितत्वाभावकूटाद्' - इत्येवमनुमानमुपदर्शनीयम् ।

– 'पर्वतो वह्न्यव्यभिचारिविशिष्टः, वह्न्यभाववदवृत्तिमत्त्वाद्' इत्यादौ सिद्धान्तव्याप्तेः हेतुतावच्छेदकरूपत्वेन पूर्वोक्तयुक्त्या बाधादिवारणाय अव्यभिचारपदार्थताऽवच्छेदकादिपर्याप्ताऽवच्छेदकताग्रहणे 'प्रकृतहेतुतावच्छेदकाऽवच्छिन्नलिङ्गक-प्रकृतसाध्यतावच्छेदकावच्छिन्नविधेयकप्रकृतपक्षतावच्छेदकाऽवच्छिन्नपक्षकाऽनुमितिजनकता प्रकृतपक्षतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यतानिष्ठावच्छेदकतानिरूपितप्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकप्रकारतानिष्ठाऽवच्छेदकताविशिष्टप्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यतानिष्ठावच्छेदकतानिरूपित-प्रकृतसाध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकप्रकारतानिष्ठाऽवच्छेदकतानिरूपित(यत्किञ्चिद्)अव्यभिचारपदार्थतावच्छेदकपर्याप्तावच्छेदकताकप्रकारतात्वावच्छिन्नाऽवच्छेदकताऽनिरूपिता, प्रकृतपक्षतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यतानिष्ठावच्छेदकतानिरूपितप्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकप्रकारतानिष्ठाऽवच्छेदकताविशिष्टप्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकविशेष्यतानिष्ठाऽवच्छेदकतानिरूपित-प्रकृतसाध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकप्रकारतानिष्ठावच्छेदकतानिरूपित-साध्याभाववदवृत्तित्वत्वादिपर्याप्ताऽवच्छेदकताकप्रकारतात्वावच्छिन्नावच्छेदकतानिरूपितत्वाभावकूटाद्' - इत्येवम् अनुमानमुपदर्शनीयमिति दिक् ।

एतच्चाऽनुमानं नैयायिकमतेऽपि सम्भवत्येव, यतः तन्मते 'पर्वतो वह्निमान्' इत्याद्यनुमितिजनकता 'वह्निव्याप्यधूमवान् पर्वतः' - इत्याकारकज्ञाने भवति, तत्र पर्वतनिष्ठविशेष्यत्वादिकम् अनुमितिजनकताऽवच्छेदकं भवत्येव । ततः पर्वतनिष्ठविशेष्यतानिष्ठावच्छेदकतानिरूपिता

मैवम्; *प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यत्वनिष्ठावच्छेदकतानिरूपितप्रकृतहेतुतावच्छेदकावच्छिन्नप्रकारत्वनिष्ठावच्छेदकतावि शिष्टहेतुतावच्छेदकावच्छिन्नविशेष्यत्वनिष्ठावच्छेदकतानिरूपिताव्यभिचारपदार्थतावच्छेदकावच्छिन्नविषयतात्वावच्छिन्नावच्छेदकतानिरूपितत्वाभावस्यैव साध्यत्वात् ।*

●

हेतुनिष्ठप्रकारतानिष्ठावच्छेदकता भवति, तादृशाऽवच्छेदकताविशिष्टा हेतुनिष्ठविशेष्यतानिष्ठाऽवच्छेदकताऽपि स्यादेव, तादृशावच्छेदकतानिरूपकजनकतानिरूपितत्वस्य हेतुनिष्ठविशेष्यतानिष्ठावच्छेदकतायां सत्त्वात् । यद्यपि नैयायिकमते तादृशहेतुनिष्ठप्रकारतानिष्ठावच्छेदकतानिरूपितत्वमपि साक्षाद् हेतुनिष्ठविशेष्यतानिष्ठावच्छेदकतायामस्ति एव, तथापि उभयमतसङ्ग्रहाय एतदनुमानस्योपयोगित्वेन वैशिष्ट्यस्यैव आदरणीयत्वम्, अतः तदनुसारेण समन्वयः दर्शनीयः एवेति न दोषः, गौरवस्य सत्त्वेऽपि अवश्यं स्वीकरणीयत्वात्, अन्यथोक्ताऽऽपत्तेः । ततश्च अनुमितिजनकता 'वह्निव्याप्यधूमवान् पर्वतः' इत्याकारकविशिष्टवैशिष्ट्यावगाहिनिश्चयत्वेन स्वीकरोतु 'वह्निव्याप्यः धूमः', 'धूमवान् पर्वतः' इति निश्चयविशिष्टनिश्चयत्वेन वा, (वैशिष्ट्यं सामानाधिकरण्यादिसम्बन्धेन) साध्याभाववदवृत्तित्वादिरूपाऽव्यभिचारपदार्थः तादृशज्ञाने व्याप्तिविधया न भासते, तथा चाऽव्यभिचारपदार्थनिष्ठविषयताऽवच्छिन्नत्वमपि तत्र न स्यादित्यङ्गीकार्यमेवेति फलितमित्याशयेनाह -

प्रकृतपक्षताऽवच्छेदकावच्छिन्नविशेष्यत्वनिष्ठावच्छेदकतानिरूपितप्रकृतहेतुतावच्छेदकावच्छिन्नप्रकारत्वनिष्ठावच्छेदकताविशिष्टहेतुतावच्छेदकावच्छिन्नविशेष्यत्वनिष्ठावच्छेदकतानिरूपिताऽव्यभिचारपदार्थतावच्छेदकावच्छिन्नविषयतात्वावच्छिन्नावच्छेदकतानिरूपितत्वाऽभावस्य = प्रकृतपक्षताऽवच्छेदकं यत् पर्वतत्वादि तेनावच्छिन्नं यत् विशेष्यत्वं तन्निष्ठा या 'पर्वतो वह्निमान्' इत्याद्यनुमितेः अन्यस्य कस्यचिद्वा जनकताऽवच्छेदकता तन्निरूपिता प्रकृतहेतुतावच्छेदकीभूतधूमत्वावच्छिन्नप्रकारत्वनिष्ठा तादृश्येवानुमित्यादिजनकतावच्छेदकता, (एतच्च 'पर्वतो धूमवान्'

●

शब्दार्थ :- પ્રકૃતપક્ષતાઅવચ્છેદકઅવચ્છિન્નપક્ષનિષ્ઠવિશેષ્યતાનિષ્ઠઅનુમિતિજનકતાઅવચ્છેદકતાનિરૂપિતપ્રકૃતહેતુતાઅવચ્છેદકઅવચ્છિન્નહેતુનિષ્ઠપ્રકારતાનિષ્ઠઅનુમિતિજનકતાઅવચ્છેદકતાવિશિષ્ટ-પ્રકૃતહેતુતાઅવચ્છેદકઅવચ્છિન્નહેતુનિષ્ઠવિશેષ્યતાનિષ્ઠઅનુમિતિજનકતાઅવચ્છેદકતાનિરૂપિતઅવ્યભિચારપદાર્થતાઅવચ્છેદકઅવચ્છિન્નવિષયતાનિષ્ઠવિષયતાત્વ-

गूढार्थ

स्वनिरूपकजनकतानिरूपितत्वसम्बन्धेन वैशिष्ट्यं बोध्यम् ।

एवञ्च परमते निश्चयविशिष्टनिश्चयत्वेन जनकत्वेऽपि परामर्शस्य न दोषः ।

●

इत्याकारकज्ञानमाश्रित्य दर्शितम्, अतः परम् 'वह्निव्याप्यः धूमः' इति एतज्ज्ञानमाश्रित्य वक्ष्यते), तादृशाऽवच्छेदकतानिरूपिका या अनुमित्यादिजनकता सैवाऽनुमित्यादिजनकता 'वह्निव्याप्यः धूमः' - इत्येतज्ज्ञाने भासमानधूमत्वावच्छिन्नविशेष्यत्वनिष्ठावच्छेदकतायाः अपि निरूपिका, उभयज्ञानाभ्यां 'पर्वतो वह्निमान्' इत्याकारिकायाः एकस्याः एवाऽनुमितेरुत्पत्तेः । तथा च तादृशप्रकारतानिष्ठावच्छेदकतानिरूपकजनकतानिरूपितत्वस्य तादृशविशेष्यतानिष्ठावच्छेदकतायां सत्त्वेन स्वनिरूपकजनकतानिरूपितत्वसम्बन्धेन तादृशप्रकारतानिष्ठावच्छेदकताविशिष्टप्रकृतहेतुतावच्छेदकाऽवच्छिन्नविशेष्यतानिष्ठावच्छेदकता भवति, तादृशावच्छेदकतानिरूपिता या अव्यभिचारपदार्थताऽवच्छेदकावच्छिन्नप्रकारतात्वावच्छिन्नावच्छेदकता तन्निरूपितत्वाभावस्य **एव**, एवकारेण पूर्वोक्तसाध्यस्य व्यवच्छेदः, **साध्यत्वात्**, एवमेव प्रकृतपक्षतावच्छेदकाऽवच्छिन्नविशेष्यत्वनिष्ठावच्छेदकतानिरूपितप्रकृतहेतुतावच्छेदकावच्छिन्नप्रकारतानिष्ठावच्छेदकताविशिष्टप्रकृतहेतुतावच्छेदकावच्छिन्नविशेष्यत्वनिष्ठावच्छेदकतानिरूपितसाध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नप्रकारतात्वावच्छिन्नावच्छेदकतानिरूपितत्वाभावकूटस्य हेतुत्वादित्यपि बोध्यम् । **वैशिष्ट्यं स्वनिरूपकजनकतानिरूपितत्वसम्बन्धेन बोध्यम्** इति ।

यशोलता

एवञ्च = एतादृशसाध्यादिस्वीकारे च **परमते** = मीमांसकमते **निश्चयविशिष्टनिश्चयत्वेन**, यथा 'पर्वतो वह्निमान्' इत्यनुमितिं प्रति 'वह्निव्याप्यः धूमः', 'धूमवान् पर्वतः' इत्याकारकज्ञानद्वयरूप**परामर्शस्य** सामानाधिकरण्यादिसम्बन्धेन निश्चयविशिष्टनिश्चयत्वेन **जनकत्वेऽपि**, तथा चोक्तरीत्या आपत्तिसद्भावेऽपि **न दोषः**, उक्तसाध्याङ्गीकारेण, तत्र अवच्छेदकताविशिष्टाऽ-

●

અવચ્છિન્નઅવચ્છેદકતાનિરૂપિતત્વઅભાવને જ સાધ્ય માનવાથી તમે કહેલ દોષ નહીં આવે. (પ્રસ્તુતમાં દરેક જગ્યાએ અનુમિતિજનકતાઅવચ્છેદકતા જે લખેલ છે તે ન આવે. માત્ર અવચ્છેદકતા જ આવે. એટલે કે જ્યારે 'વહ્નિઅભાવવદ્અવૃત્તિ ધૂમ, ધૂમવાન્ પર્વત' આવું જ્ઞાન થાય ત્યારે તમામ ધૂમ, પર્વતનિષ્ઠવિશેષ્યતા વગેરેમાં જે અવચ્છેદકતા આવે તે અનુમિતિજનકતાઅવચ્છેદકતા ન હોય - તેમ પ્રસ્તુતમાં જણાવવું છે, એટલે કે આ બધી અવચ્છેદકતાનિરૂપિતઅવ્યભિચારપદાર્થનિષ્ઠવિષયતાનિષ્ઠવિષયતાત્વઅવચ્છિન્નઅવચ્છેદકતા-

વિમર્શ

वच्छेदकतानिवेशेन मीमांसकमते तस्याऽसिद्धत्वात् । तथा च यदि मीमांसकाः साध्याभाववद-वृत्तित्वनिष्ठविषयतामनुमितिजनकतावच्छेदकतयाङ्गीकुर्युः तदा न साध्यसिद्धिः, उक्ताऽनुमानेन च तादृशसाध्यं सिध्यति, तच्च तैः स्वीकर्तव्यमिति न कोऽपि विवक्षितार्थासिद्ध्यादिलक्षणो दोषः इति फलितम् ।

एतावता 'न तावदव्यभिचरितत्वम्' इत्यंशं व्याकुर्वता ग्रन्थकृता उक्ताऽनुमानं दर्शितम्, तत्र साध्यम् उक्तवाक्येन ज्ञायते, हेतुश्च 'तद्धि न साध्याभाववदवृत्तित्वम्' इत्याद्युत्तरवाक्येन ज्ञायते । यथा 'न तावदव्यभिचरितत्वम्' इत्यस्य 'अनुमितिजनकता न अव्यभिचारपदार्थता-वच्छेदकावच्छिन्नविषयताऽवच्छिन्ना' इत्यर्थः कृतः तथैव 'तद्धि न साध्याभाववदवृत्तित्वम्' इत्यादि-हेतुप्रदर्शकवाक्यस्याऽपि साध्याभाववदवृत्तित्वत्वावच्छिन्नप्रकारताऽनवच्छिन्ना अनुमितिजनकता इत्येतादृशाऽर्थ एव तात्पर्यं विज्ञेयम् ।

ननु शब्देभ्यः कथमेतादृगर्थलाभः ***इति चेद् ? न,*** वक्ष्यमाणरीत्या अर्थलाभसम्भवात् । तथा हि - 'तद्धि न साध्याभाववदवृत्तित्वम्' इत्यत्र तत्पदस्य अव्यभिचारपदार्थार्थकत्वम्, तथा च 'अव्यभिचारपदार्थः न साध्याभाववदवृत्तित्वम्' इत्यर्थः भवति, स च बाधितः, अव्यभिचार-पदार्थस्य साध्याभाववदवृत्तित्वादिरूपस्य सिद्धान्तेऽपि सम्मतत्वात्, तस्य व्याप्तित्वस्यैवाऽत्र निराकरणात् । ततः पूर्ववाक्याद् व्याप्तिपदस्याऽत्राऽनुषङ्गः कर्तव्यः । एवञ्च तद् = व्याप्ति-त्वेन अभिमतमव्यभिचरितत्वम् = अनुमितिजनकताऽवच्छेदकत्वेनाऽभिमतम् अव्यभिचरितत्वम् ।

●

નિરૂપિતત્વ અનુમિતિજનકતામાં ન જાય. ફક્ત સરળતા ખાતર જ અનુમિતિજનકતા લખેલ છે તે ધ્યાનમાં રાખવું.) વૈશિષ્ટ્ય પ્રસ્તુતમાં સ્વનિરૂપિતજનકતાનિરૂપકત્વસંબંધથી લેવું. આ પ્રમાણે ખુલાસો કરવાથી સામેવાળાના મતે નિશ્ચયવિશિષ્ટનિશ્ચયત્વરૂપે અનુમિતિજનકતા પરામર્શમાં હોવા છતાં પણ કોઈ વાંધો નહીં આવે.

•※• પંક્તિથી પ્રસ્તુત પદાર્થ સુધી •※•

પ્રશ્ન :- આપણી મૂળ વાત ચાલે છે કે તત્ત્વચિંતામણિકારે જે પંક્તિ જણાવી તેના દ્વારા 'અવ્યભિચારપદાર્થ અનુમિતિજનકતાઅવચ્છેદક નથી. કારણ કે સાધ્યાભાવવદ્અવૃત્તિત્વ વગેરેથી ભિન્ન છે' - આવા પ્રકારનું અનુમાન ફલિત થાય. પણ, આ અનુમાન સંભવતું નથી. માટે, તમે અન્ય પરિષ્કૃત અનુમાન બતાવ્યું. પણ, હવે વાત બાકી રહી તત્ત્વચિંતામણિની પંક્તિની. તે પંક્તિઓ છે - **(૧) न तावद् अव्यभिचरितत्वम्, (૨) तद्धि न साध्याभाववद्अवृत्तित्वम्.**

य ततश्च 'साध्याभाववदवृत्तित्वादिरूपा व्याप्तिः न = साध्याभाववदवृत्तित्वादिकं नाऽनुमिति-
शो जनकताऽवच्छेदकम्' इत्येवमव्यभिचरितत्वं गौणीकृत्य अर्थकरणे साध्याभाववदवृत्तित्वे अनुमिति-
ल जनकतावच्छेदकत्वाभावः प्रतीयते । तथा च उक्तवाक्याद् अनुमितिजनकता साध्याभाववद-
ता वृत्तित्वत्वाद्यवच्छिन्नविषयताऽनवच्छिन्ना इत्यर्थः प्रतीयते, नाऽत्र काऽप्यनुपपत्तिः ।

●

આમાં પ્રથમ પંક્તિ દ્વારા પક્ષ અને સાધ્ય નક્કી થાય છે. દ્વિતીય વાક્ય હેતુવાક્ય છે. એટલે કે બીજા વાક્ય દ્વારા હેતુ સૂચિત થાય છે. હેતુવાક્ય મુજબ तद् = અવ્યભિચરિતત્વ. માટે, અર્થ એ થાય કે સાધ્યાભાવવદ્અવૃત્તિત્વ અવ્યભિચરિતત્વપદાર્થ નથી. પણ, આ અર્થ તો બાધિત છે. કારણ કે અવ્યભિચરિતત્વપદાર્થ સાધ્યાભાવવદ્અવૃત્તિત્વ છે જ. સાધ્યાભાવવદ્અવૃત્તિત્વ અવ્યભિચારપદાર્થ કરતા કંઈ જુદી વસ્તુ નથી. માટે, તત્ત્વચિંતામણિકારની આ પંક્તિ બાધિત થાય છે. તમે આટલો પરિષ્કૃત અનુમાન પ્રયોગ ભલે બનાવ્યો. પણ, આ પંક્તિનું શું ?

ઉત્તર :- (एवं.) ભાઈ ! તમારી શંકાના સમાધાન માટે જ હવે ગ્રંથકારશ્રી જણાવે છે કે **तद्धि न**... ઈત્યાદિ જે હેતુવાક્ય છે તેનું તાત્પર્ય પણ 'સાધ્યાભાવવદ્અવૃત્તિત્વત્વ-અવચ્છિન્નવિષયતાથી અનવચ્છિન્ન અનુમિતિજનકતા છે'- આમ જ સમજવું. કારણ કે આપણે જોઈ ગયા તે મુજબ અનુમાનપ્રયોગમાં પણ હેતુ આ જ બને છે. આ જ રીતે
વિ અનુમાનપ્રયોગ ઘટી શકશે. અન્ય કોઈ રીત નથી.

ન **પ્રશ્ન :-** આ તો તમે તમારા મનનું જણાવો છો. મૂળ પંક્તિમાં તો ક્યાંય
ભા અનુમિતિજનકતા લખેલ જ નથી. તો તમે ક્યાંથી લઈ આવ્યા ? જે તત્પદનો અર્થ છે તે અવ્યભિચરિતત્વ ક્યાં ? આ રીતે શબ્દોને નેવે મૂકી તમારે અર્થ કરવા હોય તો તે ગ્રાહ્ય ન બની શકે. કારણ કે જિજ્ઞાસુ વ્યક્તિ પ્રસ્તુત ગ્રંથની પંક્તિના અર્થને સમજવા ઇચ્છે છે.

❋ તત્પદનો સમુચિત અર્થ ❋

ઉત્તર :- અરે ભાઈ ! આટલા ઉતાવળા કેમ થાઓ છો ? આખી પંક્તિનો અર્થ શબ્દ પ્રમાણે તમને બેસાડી આપીશું. જુઓ, પહેલા કહ્યું તેમ વ્યાપ્તિ શબ્દની અનુવૃત્તિ નહીં કરો તો વાક્યનો અર્થ બેસતો જ નથી. વાક્યાર્થ બાધિત થઈ જાય છે. માટે, આપણે વ્યાપ્તિ પદ આ વાક્યમાં જોડીએ છીએ. હવે પંક્તિ થશે - અવ્યભિચરિતત્વ વ્યાપ્તિ સાધ્યાભાવવદ્-અવૃત્તિત્વ નથી. અહીં વ્યાપ્તિ = અનુમિતિજનકતાઅવચ્છેદક. તેથી તત્પદ દ્વારા 'અનુમિતિજનકતાઅવચ્છેદક તરીકે અભિપ્રેત અવ્યભિચરિતત્વ' પકડાશે. તાદૃશ અવ્યભિચરિતત્વ સાધ્યાભાવવદ્અવૃત્તિત્વસ્વરૂપ નથી. મતલબ કે અવ્યભિચરિતત્વ

एवं सति ***तद्धि नेत्यादिहेतुवाक्यस्यापि साध्याभाववदवृत्तित्वत्वा-***

तथा च 'न तावद् अव्यभिचरितत्वम्', 'तद्धि न साध्याभाववदवृत्तित्वम्' इत्यादिवाक्यकदम्बकस्योक्ताऽनुमाने तात्पर्यं पर्यवस्यति इत्याशयेनाह - **एवं सति** = पूर्वोक्तयुक्त्या पूर्वोक्ताऽनुमाने स्थिते सति '**तद्धि न** साध्याभाववदवृत्तित्वम्' **इत्यादि**हेतुप्रदर्शक**वाक्यस्याऽपि**, अपिना

साध्याभाववद्अवृत्तित्व वगेरे स्वરૂપ જ છે. પણ તે વ્યાપ્તિ સ્વરૂપ નથી. એટલે કે તમે જેને વ્યાપ્તિ કહો છો તે અવ્યભિચરિતત્વ સાધ્યાભાવવદ્અવૃત્તિત્વ સ્વરૂપ ન સંભવે. કારણ કે કેવલાન્વયી સ્થલમાં અવ્યાપ્તિ આવવાને કારણે સાધ્યાભાવવદ્અવૃત્તિત્વ તો વ્યાપ્તિ સ્વરૂપ છે જ નહીં. આ જ રીતે વ્યાપ્તિ તરીકે માન્ય અવ્યભિચરિતત્વ સાધ્યવદ્ભિન્નસાધ્યાભાવવદ્અવૃત્તિત્વ સ્વરૂપ પણ સંભવી ન શકે. કારણ કે સાધ્યવદ્ભિન્નસાધ્યાભાવવદ્અવૃત્તિત્વ એ કેવલાન્વયી સ્થલમાં અવ્યાપ્તિગ્રસ્ત હોવાથી વ્યાપ્તિ નથી. આ રીતે પાંચેય લક્ષણમાં સમજી લેવું. અંતે આ પાંચેય સ્વરૂપ અવ્યભિચરિતત્વ સંભવતું ન હોવાથી અવ્યભિચરિતત્વ અનુમિતિજનકતાઅવચ્છેદક નથી - એમ સિદ્ધ થાય. ટૂંકમાં, વ્યાપ્તિસ્વરૂપ અવ્યભિચરિતત્વ એ સાધ્યાભાવવદ્અવૃત્તિત્વ વગેરે સ્વરૂપ નથી. મતલબ કે સાધ્યાભાવવદ્અવૃત્તિત્વ વગેરે સ્વરૂપ અવ્યભિચરિતત્વ વ્યાપ્તિ નથી. માટે, સાધ્યાભાવવદ્અવૃત્તિત્વત્વઅવચ્છિન્નવિષયતાઅનવચ્છિન્ન અનુમિતિજનકતા છે - આ પ્રમાણે જ તાત્પર્ય નીકળશે.

પ્રશ્ન :- વ્યાપ્તિ તરીકે અભિપ્રેત અવ્યભિચરિતત્વ સાધ્યાભાવવદ્અવૃત્તિત્વ સ્વરૂપ નથી - આવું કહેવા કરતા આવું જ કહેવું યોગ્ય રહે કે સાધ્યાભાવવદ્અવૃત્તિત્વ એ વ્યાપ્તિ નથી. તત્પદ દ્વારા અનુમિતિજનકતાઅવચ્છેદકનું = વ્યાપ્તિનું (અથવા વ્યાપ્યત્વ = વ્યાપ્તિનું) ગ્રહણ કરી લેવાનું. આવું કરવામાં શું વાંધો ?

❁ પંક્તિસ્પર્શી ન હોય તેવો અર્થ અમાન્ય ❁

ઉત્તર :- ના, આવું ન થઈ શકે. કારણ કે 'સાધ્યાભાવવદ્અવૃતિત્વ વ્યાપ્તિ નથી' - આવો અર્થ કરવામાં સાધ્યાભાવવદ્અવૃત્તિત્વમાં અનુમિતિજનકતાઅવચ્છેદકતાનો અભાવ જણાય છે. જ્યારે તત્ત્વચિંતામણિકારને અવ્યભિચરિતત્વમાં સાધ્યાભાવવદ્અવૃત્તિત્વનો ભેદ જણાવવો છે. માટે, તમારો અર્થ તત્ત્વચિંતામણિકારના તાત્પર્યાર્થથી દૂર ભાગે છે. શબ્દાર્થની નજીકનું તાત્પર્યાર્થ અમે જે બતાવ્યું તે જ થશે. મતલબ કે અનુમિતિજનકતાઅવચ્છેદક તરીકે અભિપ્રેત અવ્યભિચરિતત્વ સાધ્યાભાવવદ્અવૃત્તિત્વ સ્વરૂપ સંભવે નહીં. **तद्धि न**... ઇત્યાદિપંક્તિનો આ અર્થ વધુ વ્યાજબી જણાય છે.

गूढार्थ

वच्छिन्नविषयतानवच्छिन्नानुमितिजनकतेत्यत्रैव तात्पर्यम्, व्याप्तिपदानुषङ्गं विनोक्तवाक्यस्य बाधितार्थकत्वेन व्याप्तिपदानुषङ्गेण तद् = अनुमितिजनकतावच्छेदकत्वेनाभिमताऽव्यभिचरितत्वम्, साध्याभाववदवृत्तित्वादिरूपा न व्याप्तिः - इत्यर्थकरणे साध्याभाववदवृत्तित्व-

●

पूर्वोक्तसाध्यदर्शकवाक्यस्य समुच्चयः, यथा 'न तावद् अव्यभिचरितत्वम्' इत्यस्य अनुमितिजनकता न अव्यभिचारपदार्थतावच्छेदकावच्छिन्नप्रकारताऽवच्छिन्ना' इत्यर्थः कृतः तथा 'तद्धि न साध्याभाववदवृत्तित्वम्' इत्यादेरपि **'साध्याभाववदवृत्तित्वत्वाऽवच्छिन्नप्रकारताऽनवच्छिन्ना अनुमितिजनकता' इत्यत्रैव**, 'अव्यभिचरित्वपदार्थः साध्याभाववदवृत्तित्वत्वादिभेदकूटवान्' इत्यर्थस्यैवकारेण व्यवच्छेदः, **तात्पर्यम्**, कथङ्काराशङ्कायामाह - **व्याप्तिपदानुषङ्गं विना उक्तवाक्यस्य** = 'तद्धि न साध्याभाववदवृत्तित्वम्' इत्यादिवाक्यस्य, सिद्धान्तेऽपि साध्याभाववदवृत्तित्वादेरव्यभिचरितत्वपदवाच्यताङ्गीकारेण **बाधितार्थकत्वेन व्याप्तिपदानुषङ्गेण तत्** = 'तद्धि ने'त्यादिमूलवाक्यस्थतत्पदार्थः **अनुमितिजनकतावच्छेदकत्वेनाऽभिमताऽव्यभिचरितत्वम्**, अत्र अव्यभिचरितत्वं गौणीकृत्य **'साध्याभाववदवृत्तित्वादिरूपा न व्याप्तिः' इत्यर्थकरणे साध्याभाववदवृत्तित्वस्य**

●

शब्दार्थ :- एवं सति = આ રીતે અનુમાનપ્રયોગ ગોઠવાયે છતે અને साध्याभाववद्-अवृत्तित्वत्वअवच्छिन्नविषयताअनवच्छिन्नत्वने અનુમાનપ્રયોગમાં હેતુ માનતા **तद्धि न** ઇત્યાદિ જે હેતુવાક્ય તત્ત્વચિંતામણિકારે જણાવેલ છે તેનું પણ તાત્પર્ય 'साध्याभाववद्-अवृत्तित्वत्वअवच्छिन्नविषयताअनवच्छिन्नअनुमितिजनकता છે' - આવું જ સમજવું. વ્યાપ્તિપદનો અનુષંગ કર્યા વિના **तद्धि न** ઇત્યાદિ વાક્ય બાધિત અર્થવાળું હોવાને કારણે વ્યાપ્તિપદનો અનુષંગ કરી (= વ્યાપ્તિપદનું જોડાણ કરી) 'तद् = અનુમિતિજનકતાઅવચ્છેદક તરીકે તમને અભિપ્રેત અવ્યભિચરિતત્વ' - આ પ્રમાણે અર્થ કરવો. કારણ કે साध्याभाववद्-अवृत्तित्व વ્યાપ્તિ નથી - આ પ્રમાણે વ્યાપ્તિપદનું જોડાણ કરી સીધો આવો અર્થ કરવામાં આવે તો साध्याभाववद्अवृत्तित्वમાં અનુમિતિજનકતાઅવચ્છેદકનો ભેદ પ્રતીત થશે. પણ અવ્યભિચરિતત્વમાં જે साध्याभाववद्अवृत्तित्वનો ભેદ છે તે પ્રતીત નહીં થાય.

અથવા :-

⁂ પંક્તિનો વાસ્તવિક અર્થ ⁂

હવે આ જ બે પંક્તિનો આખો જુદો જ તથા વધુ સંગત જણાતો અર્થ જોઈએ-

स्यानुमितिजनकतावच्छेदकत्वव्यतिरेकप्रतीतेः ।

●

उपलक्षणात् साध्यवद्भिन्नसाध्याभाववदवृत्तित्वादेः **अनुमितिजनकताऽवच्छेदकत्वव्यतिरेकप्रतीतेः** = अनुमितिजनकतावच्छेदकत्वाभावप्रतीतेः, तथा चोक्तवाक्याद् 'अनुमितिजनकता साध्याभाववद-वृत्तित्वत्वावच्छिन्नविषयताऽनवच्छिन्ना' इत्यर्थः सुघटः । तत्पदेनाऽव्यभिचरितत्वस्यैव ग्रहणे पूर्वोक्तरीत्या 'अव्यभिचरितत्वपदार्थः न व्याप्तिः, साध्याभाववदवृत्तित्वादिभेदकूटवत्त्वाद्' - इत्येवमेवाऽनुमानं स्यात्, तच्च बाधितम्, तथा च उक्तरीत्या व्याप्तिपदमनुषज्य अव्यभिचरितत्वं न्यक्कृत्योक्तार्थः कक्षीकर्तव्यः इति समुदितार्थः ।

अत्र केचित् - **"व्याप्तिपदानुषङ्गं विनोक्तवाक्यस्य बाधितार्थकत्वेन व्याप्तिपदानुषङ्गेण तद् = अनुमितिजनकतावच्छेदकत्वेनाऽभिमताऽव्यभिचरितत्वम्** । तथा च 'अनुमितिजनकताऽ-वच्छेदकत्वेनाऽभिमतम् अव्यभिचरितत्वं न साध्याभाववदवृत्तित्वादिरूपम् = अव्यभिचरितत्वरूपम् अनुमितिजनकताऽवच्छेदकं न साध्याभाववदवृत्तित्वादि' इत्येवाऽर्थः । यदि तद् = व्याप्यत्वं इति कृत्वा **'साध्याभाववदवृत्तित्वादिरूपा न व्याप्तिः'** इत्यर्थोऽङ्गीक्रियते तदा 'साध्याभाववदवृत्ति-

●

વ્યાપ્તિપદનું જોડાણ કર્યું એટલે તદ્નો અર્થ આપણે કર્યો - 'વ્યાપ્તિ તરીકે અભિપ્રેત અવ્યભિચરિતત્વ.' માટે, 'વ્યાપ્તિ સ્વરૂપ અવ્યભિચરિતત્વ સાધ્યાભાવવદ્અવૃત્તિત્વસ્વરૂપ નથી' - એમ ફલિત થાય. એટલે કે વ્યાપ્તિ એ સાધ્યાંભાવવદ્અવૃત્તિત્વસ્વરૂપ નથી એમ જ ફલિત થયું ને ! કારણ કે વ્યાપ્તિસ્વરૂપ અવ્યભિચરિતત્વ છે. આમ, 'વ્યાપ્તિ એ સાધ્યાભાવવદ્અવૃત્તિત્વસ્વરૂપ નથી' - આવો અર્થ નક્કી થતા અનુમિતિજનકતા-અવચ્છેદકત્વનો વ્યતિરેક = અભાવ સાધ્યભાવવદ્અવૃત્તિત્વમાં જણાશે જ. માટે, સાધ્યાભાવવદ્અવૃત્તિત્વત્વઅવચ્છિન્નવિષયતામાં અનુમિતિજનકતાઅવચ્છેદકત્વનો અભાવ જણાશે. એટલે કે સાધ્યાભાવવદ્અવૃત્તિત્વત્વઅવચ્છિન્નવિષયતાઅનવચ્છિન્નત્વ અનુમિતિ-જનકતામાં જણાશે. આ રીતે ઉક્ત હેતુવાક્યનો જ ફલિતાર્થ એ થયો કે સાધ્યાભાવવદ્-અવૃત્તિત્વત્વઅવચ્છિન્નવિષયતાથી અનવચ્છિન્ન અનુમિતિજનકતા છે. આમ, અમે અનુમાનપ્રયોગમાં જે હેતુ બતાવ્યો તે અને પ્રસ્તુત તત્ત્વચિંતામણિકારે દર્શાવેલ હેતુવાક્યનો આ અર્થ - બંને સમાન જ થાય છે. માટે, બીજી કોઈ તકલીફ નહીં આવે. ગૂઢાર્થતત્ત્વાલોકની પંક્તિઓનો આ અર્થ વધુ સંગત જણાય છે. પૂર્વેના અર્થમાં અને આ અર્થમાં રહેલો તફાવત વિજ્ઞવાચકવર્ગના ધ્યાનમાં તુરંત આવી જ ગયો હશે...

त्वादिरूपा न व्याप्तिः' **इत्यर्थकरणे साध्याभाववदवृत्तित्वस्य अनुमितिजनकतावच्छेदकत्वव्यतिरेकः** एव प्रतीयते, न तु अव्यभिचरितत्वं प्रतीयते, तथा चोक्तरीत्यैवाऽर्थः प्रतिपत्तव्यः" ***इत्याहुः, तच्चिन्त्यम्*** ।

ननु अनुमितिजनकतायां साध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नविषयताऽवच्छिन्नत्वं किमर्थं न भासते ? इत्याशङ्कायामाह परममूले **तत्त्वचिन्तामणौ - केवलान्वयिन्यभावादिति** ।

ननु केवलान्वयिन्यभावादित्यस्य कोऽर्थः ? 'केवलान्वयिपदं केवलान्वयिसाध्यपरं तादृशस्थलपरं वा, तत्र अभावः साध्याभाववदवृत्तित्वादेः । तथा च केवलान्वयिनि साध्ये स्थले वा साध्याभाववद-वृत्तित्वादेरभावादित्यर्थः सम्भवति' इति चेद् ? न, तथा सति उक्तवाक्यस्य असम्भवितार्थकत्वापत्तेः, केवलान्वयिस्थले साध्याभाववदवृत्तित्वं किं कुत्रापि प्रसिद्धम् ? येन तदभावः केवलान्वयिनि वक्तुं शक्यते ? केवलान्वयिस्थले साध्याभावः एवाऽप्रसिद्धः, ततः साध्याभाववदवृत्तित्वं कथं प्रसिद्ध्येत् ? तदप्रसिद्धौ तदभावः केवलान्वयिनि वक्तुं कथं शक्यते ? अप्रसिद्धप्रतियोगिकत्वात् तादृशाभावस्य । तथा च 'केवलान्वयिन्यभावादि'ति अस्य कोऽर्थः ? इत्याशङ्कायां 'तादृशाऽ-नुमितिजनकतायां साध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नविषयताऽवच्छिन्नत्वं किमर्थं नास्ति ? - इत्याश-

●

પ્રશ્ન :- अनुमितिहेतु... ત્યાંથી લઈ '**तद्धि न साध्याभाववद्अवृत्तित्वम्**' આટલે સુધીની પંક્તિના અર્થ તમે જણાવ્યું તે પ્રમાણે કરીએ તો પણ **केवलान्वयिनि अभावात्** આ જે પંક્તિ આવશે તેનો અર્થ શું કરશો ? અત્યાર સુધી જે પંક્તિ આવી તેનો તાત્પર્યાર્થ આટલો નીકળ્યો કે - અનુમિતિજનકતા પ્રકૃતપક્ષતાઅવચ્છેદકઅવચ્છિન્નપક્ષનિષ્ઠવિશેષ્યતાનિષ્ઠઅનુમિતિ-જનકતાઅવચ્છેદકતા..... અવ્યભિચારપદાર્થતાઅવચ્છેદકઅવચ્છિન્નવિષયતા-અનવચ્છિન્ન છે. (= વિષયતાત્વઅવચ્છિન્નઅવચ્છેદકતાનિરૂપિતત્વાભાવવિશિષ્ટ છે.) કારણ કે પ્રકૃતપક્ષતાઅવચ્છેદક.....સાધ્યાભાવવદ્અવૃત્તિત્વત્વઅવચ્છિન્નવિષયતા-અનવચ્છિન્ન છે. હવે, સાધ્યાભાવવદ્અવૃત્તિત્વત્વઅવચ્છિન્નવિષયતાઅનવચ્છિન્ન અનુમિતિ-જનકતા કેમ છે ? તેનું કારણ બતાવે છે કે - કેવલાન્વયીમાં અભાવ છે. અહીં અભાવથી સાધ્યાભાવવદ્અવૃત્તિત્વનો અભાવ નહીં લઈ શકાય. કારણ કે કેવલાન્વયિસાધ્યક સ્થલમાં સાધ્યાભાવવદ્અવૃત્તિત્વનો અભાવ જ ન મળે. સાધ્યાભાવ જ અપ્રસિદ્ધ થવાને કારણે સાધ્યાભાવવદ્અવૃત્તિત્વસ્વરૂપ અભાવનો પ્રતિયોગી પણ અપ્રસિદ્ધ થઈ જશે. અપ્રસિદ્ધ-પ્રતિયોગિક અભાવ દુનિયામાં ન હોવાને કારણે સાધ્યાભાવવદ્અવૃત્તિત્વઅભાવ કેવલાન્વયિ-

ङ्कापनोदाय तत्त्वचिन्तामणिकृता प्रयुक्तं **'केवलान्वयिन्यभावाद्'** - इतिवाक्यं विवृण्वन्नाह - **केवलान्वयित्वग्रहे** इत्यादि ।

अयमाशयः - प्रकृते केवलान्वयिपदं केवलान्वयित्वग्रहकालीनाऽनुमितिजनकज्ञानपरम्, तत्र अभावात् = साध्याभाववदवृत्तित्वादिनिरूपितविषयित्वाभावादित्यर्थः । यदा 'इदं ज्ञेयम्, वाच्यत्वाद्' इत्यादौ 'ज्ञेयत्वं केवलान्वयि' इत्येवं ज्ञेयत्वे केवलान्वयित्वग्रहः जातः तदा ज्ञेयत्वाभाववदवृत्ति वाच्यत्वम् - इत्येवं ज्ञानं नैव भवति, ज्ञेयत्वस्य केवलान्वयित्वग्रहेण ज्ञेयत्वाभावविषयकज्ञानस्य प्रतिबन्धात् । ज्ञेयत्वं सर्वत्रैवाऽस्ति इत्याकारकज्ञानसत्त्वे ज्ञेयत्वाभावस्य ज्ञानं कथं भवेत् ? ततश्च यदा केवलान्वयित्वग्रहः भवति तदा यद् अनुमितिजनकज्ञानं भवेत् तत्र साध्याभाववदवृत्तित्वनिष्ठविषयतानिरूपितविषयिता नैव भवेत्, यतः 'केवलान्वयित्वग्रहः साध्याभाववदवृत्तित्वादिविषयकज्ञानं प्रति प्रतिबन्धकः' इति ज्ञानसत्त्वे अनुमितिजनकज्ञाने साध्याभाववदवृत्तित्वादि कथं भासेत ? तथा च केवलान्वयित्वग्रहः साध्याभाववदवृत्तित्वविषयकानुमितिजनकज्ञानं प्रति प्रतिबन्धकः इति स्थितम् । ततश्च केवलान्वयित्वग्रहे जाते सति साध्याभाववदवृत्तित्वादिविषयकम् अनुमितिजनकज्ञानं न भवति = केवलान्वयित्वग्रहे जाते सति यदनुमितिजनकज्ञानं भवेत् तत्र साध्याभाववदवृत्तित्वादिनिष्ठविषयतानिरूपितविषयिता नैव स्यात्, साध्याभाव-

●

साध्यक स्थलमां न कही शकाय. माटे आपणे जे तात्पर्यार्थ काढ्यो तेमां बंधबेसतो अने निरवद्य एवो आ पंक्तिनो अर्थ शुं ?

❀ केवलान्वयी एटले शुं ? ❀

उत्तर :- (**केवला.**) ग्रंथकार हवे ए ज पंक्तिनो अर्थ बतावे छे के केवलान्वयी = केवलान्वयित्वना ज्ञाननुं उत्तरकालीन अनुमितिजनक ज्ञान - आ प्रमाणे समजवुं. मतलब के केवलान्वयित्वनुं ज्ञान **'इदं वाच्यम् ज्ञेयत्वात्'** ईत्यादिमां थई जाय, ते पछी जे अनुमितिजनकज्ञान थाय = **ज्ञेयत्वव्याप्यवाच्यत्ववान् इदंपदार्थः** आवा प्रकारनुं जे ज्ञान थाय तेमां व्याप्ति तरीके साध्याभाववद्अवृत्तित्वनुं ज्ञान संभवतुं नथी. तादृशअनुमितिजनक ज्ञानमां जे विषयिता छे ते साध्याभाववद्अवृत्तित्वथी अने साध्याभाववद्अवृत्तित्वनिष्ठविषयताथी निरूपित नथी. माटे, 'साध्याभाववद्अवृत्तित्वत्वअवच्छिन्नविषयताअवच्छिन्न अनुमितिजनकता होय' - आवा ज्ञानमां 'साध्याभाववद्अवृत्तित्वत्वअवच्छिन्नसाध्याभाववद्अवृत्तित्वनिष्ठविषयतानिरूपितविषयिता अनुमितिजनकज्ञानमां नथी रहेती' -

वदवृत्तित्वादिविषयकानुमितिजनकग्रहं प्रति केवलान्वयित्वग्रहरूपस्य प्रतिबन्धकस्य सत्त्वादित्यर्थः ।

तथा च केवलान्वयित्वग्रहोत्तरकालीनानुमितिजनकज्ञाने साध्याभाववदवृत्तित्वत्वाद्यवच्छिन्न-विषयतानिरूपितविषयिताऽभावसत्त्वेन केवलान्वयिस्थले साध्याभाववदवृत्तित्वादिविषयकज्ञानेन अनुमित्यजननात् तदा यादृशविषयकत्वेन ज्ञानमनुमितिं जनयेत् तादृशस्यैव सर्वत्र अनुमित्युप-पादकत्वमुचितमिति भावः ।

केवलान्वयित्वग्रहे जाते सति पूर्वोक्तयुक्त्या साध्याभाववदवृत्तित्वादिविषयकम् अनुमितिजनक-ज्ञानं नैव भवति, तादृशज्ञानं प्रति केवलाऽन्वयित्वग्रहस्य प्रतिबन्धकत्वात्, किञ्च केवलान्वयित्वग्रहे सत्यपि 'इदं वाच्यम्, ज्ञेयत्वात्' - इत्याद्यनुमितिस्तु भवत्येव । तथा च आदौ वाच्यत्वे केवलान्वयित्वग्रहः जातः, तदनु अनुमितिजनकं ज्ञानमभवत् तदनु च उक्ताऽनुमितिः । अत्र अनुमितिजनकज्ञानं किंविषयकम् ? न साध्याभाववदवृत्तित्वादिविषयकमिति पूर्वमुक्तमेव, तथा च तत्र तादृशाऽनुमितिजनकज्ञानं हेतुव्यापकसाध्यसामानाधिकरण्यविषयकमेव स्वीकार्यम्, अर्थाद् 'ज्ञेयत्वसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवाच्यत्वसामानाधिकरण्यविशिष्टज्ञेयत्वविशिष्टमिदम्' - इत्याकारकज्ञानस्यैवाऽनुमितिजनकत्वं स्वीकार्यम् । तथा चात्र अनुमित्युपपादकं यादृशं व्याप्तिज्ञानमभवत् तादृशस्यैव सर्वत्राऽनुमित्युपपादकत्वम्, तादृशज्ञानविषयीभूतस्यैव च अनुमित्युपपादकत्वमङ्गीकरणीयमिति अनुमितिजनकज्ञानं सर्वदा सर्वत्र हेतुव्यापकसाध्यसामाना-धिकरण्यविषयकत्वेनैवाऽनुमितिजनकं भवतीत्यङ्गीकार्यम् । तथा च अनुमितिजनकतायां हेतु-व्यापकसाध्यसामानाधिकरण्यत्वावच्छिन्नविषयताऽवच्छिन्नत्वमेव स्यात्, साध्याभाववदवृत्तित्वत्वाद्य-वच्छिन्नविषयतावच्छिन्नत्वं न स्यादिति यावत् तात्पर्यम् ।

ननु भवतोक्तं साध्याभाववदवृत्तित्वमेव केवलान्वयिस्थलेऽप्रसिद्धम्, साध्याभावस्यैवाऽ-प्रसिद्धत्वात्, तर्हि तादृशाऽप्रसिद्धसाध्याभाववदवृत्तित्वनिरूपितविषयित्वाभावोऽपि तादृशज्ञाने कथं स्यात् ? अप्रसिद्धसाध्याभाववदवृत्तित्वादिनिरूपितत्वस्य विषयितायामसम्भवाद् ***इति चेद् ? न***, 'साध्याभाववदवृत्तित्वमप्रसिद्धम्' - इत्याकारकज्ञाननिष्ठविषयितायां साध्याभाववदवृत्तित्व-निरूपितत्वस्य प्रसिद्धेः, साध्याभाववदवृत्तित्वस्य अप्रसिद्धत्वेऽपि तत्र ज्ञाननिष्ठविषयितानिरूपकत्व-

●

આવું જ્ઞાન પ્રતિબંધક બને જ. એટલે પ્રતિબંધક હાજર હોવાને કારણે સાધ્યાભાવ-વદ્અવૃત્તિત્વત્વઅવચ્છિન્નવિષયતાઅવચ્છિન્નત્વ અનુમિતિજનકતામાં ન જણાય. કિંતુ અનવચ્છિન્નત્વ જ જણાય. તેથી કેવલઅન્વયીસ્થલે ફક્ત હેતુસમાનાધિકરણઅત્યંતાભાવ-અપ્રતિયોગિસાધ્યસામાનાધિકરણ્યસ્વરૂપવ્યાપ્તિજ્ઞાનથી જ અનુમિતિ થાય. સાધ્યાભાવવદ્-

केवलान्वयिन्यभावादिति । *केवलान्वयित्वग्रहेऽनुमितिजनकज्ञाने* सत्त्वे न बाधकं किमपि । केवलान्वयित्वग्रहे 'वाच्यत्वाभाववदवृत्तित्वविशिष्टज्ञेयत्वविशिष्टमिदम्' इत्येवं ज्ञानं न सम्भवति, अतः केवलान्वयित्वग्रहोत्तरकालीनानुमितिजनकज्ञाने तादृशसाध्याभाववद-वृत्तित्वनिरूपितविषयिता नैव भवेत् । केवलान्वयित्वग्रहोत्तरकालीनज्ञाने साध्याभाववदवृत्तित्वनिष्ठ-विषयतानिरूपितविषयिता सम्भवत्येव, केवलान्वयित्वग्रहे सत्यपि 'साध्याभाववदवृत्तित्वमत्र अप्रसि-द्धम्' - इत्याकारकज्ञानसम्भवात्, किन्तु केवलान्वयित्वग्रहे अनुमितिजनकज्ञानं यद् भवेत् तत्र साध्याभाववदवृत्तित्वादि नैव भासेत, यतः 'साध्याभाववदवृत्तित्वादिविशिष्टहेतुविशिष्टः पक्षः' इत्याकारकज्ञानमेव साध्याभाववदवृत्तित्वादेः व्याप्तित्वाङ्गीकर्तृणां मते अनुमितिजनकम् - 'साध्याभाववदवृत्तित्वविशिष्टः हेतुः', 'हेतुमान् पक्षः' - इत्याकारकज्ञानद्वयं वा, केवलाऽन्वयि-स्थले एतच्चाऽप्रसिद्धमेव, तथा च केवलान्वयित्वग्रहः साध्याभाववदवृत्तित्वादिविषयकानुमिति-जनकज्ञानं प्रति प्रतिबन्धकः इति स्वीकार्यमेव, केवलान्वयित्वग्रहे सति साध्याभाववदवृत्ति-त्वादिविषयकज्ञानसम्भवेऽपि साध्याभाववदवृत्तित्वादिविषयकानुमितिजनकज्ञानस्य पूर्वोक्तयुक्त्या अप्रसिद्धविषयकत्वेन असम्भवात्। ततश्च न काऽप्यनुपपत्तिरिति विभावनीयम् ।

यद्यपि केवलान्वयित्वग्रहे सत्यपि अनुमितिजनकज्ञाने वाच्यत्वं (= साध्यम्), घटाभावः, तेन विशिष्टं भूतलम्, तत्राऽवृत्तित्वम् इत्येवं परस्परं निरूप्य-निरूपकभावाऽनापन्नाः साध्याभाववद-वृत्तित्वघटकपदार्थाः भासेरन्, न तत्र काऽप्यनुपपत्तिः ***तथापि*** परस्परोपश्लिष्टं साध्याभाववद-वृत्तित्वं तु नैव जातुचिदपि भासेत, उक्तरीत्या साध्यम्, अभावः.... इत्यादिपदार्थानां प्रसिद्धौ अपि तत्र साध्यनिष्ठविषयतानिरूपितत्वमभावनिष्ठविषयतायां नास्ति, यदि वाच्यत्वाभावः गृह्यते तदैव वाच्यत्वस्य स्वप्रतियोगिकत्वसम्बन्धेन तादृशाऽभावे वृत्तित्वेन तादृशाऽभावनिष्ठविषयतायां वाच्यत्वनिष्ठप्रकारताऽऽख्यविषयतानिरूपितत्वं स्यात्, तादृशाऽभावश्चाऽप्रसिद्धः । ततश्च परस्परोपश्लिष्टसाध्याभाववदवृत्तित्वमपि अप्रसिद्धमेवेति केवलान्वयित्वग्रहोत्तरकालीनाऽनुमिति-जनकज्ञाने परस्परोपश्लिष्टसाध्याभाववदवृत्तित्वादिनिरूपितविषयिताभावादित्यर्थः इत्याशयेनाह - **केवलान्वयित्वग्रहे** सति **अनुमितिजनकज्ञाने** = केवलान्वयित्वग्रहोत्तरकालीनाऽनुमितिजनकज्ञाने

ગૂ

અવૃત્તિત્વ વગેરેના જ્ઞાનથી ન થઈ શકે. તેથી **पर्वतो वह्निमान् धूमात्** વગેરે તમામ સ્થળે ઉક્ત વ્યાપ્તિજ્ઞાનને જ અનુમિતિઉપપાદક માનવું યોગ્ય હોવાથી 'સાધ્યાભાવવદ્અવૃત્તિત્વનું જ્ઞાન અનુમિતિજનક છે' - આ બાબતમાં કોઈ પ્રમાણ નથી.

शब्दार्थ :- કેવલાન્વયિત્વનું જ્ઞાન થયું હોય તેને ઉત્તરકાલીન જે અનુમિતિજનક

या शो ल ता वि ना भा

विषयितायाः परस्परोपश्लिष्टसाध्याभाववदवृत्तित्वनिरूपिताया अभावात्प्रतिबन्धकसत्त्वादित्यर्थः ।

●

इत्यर्थः, केचन 'केवलाऽन्वयित्वग्रहसमकालीनाऽनुमितिजनकज्ञाने' इत्याहुः, तन्मन्दम्; समानकालीनाऽनुमितिजनकज्ञाने तादृशविषयितासत्त्वे बाधकाभावात्, प्रतिबन्धकेन स्वोत्पत्त्यनन्तरक्षणे एव प्रतिबध्यप्रतिबन्धात्, "वित्ते नष्टे वित्तहरणम् अहो कर्तुमिच्छन्ति मूढाः" ( ) इत्यादौ यथा वित्तनाशोत्तरकालीनवित्तहरणं कर्तुमिच्छन्ति..... इत्याद्यर्थबोधः तथाऽत्राऽपि सप्तमविभक्त्या उत्तरकालीनत्वरूपाऽर्थलाभसम्भवाच्चेति, **परस्परोपश्लिष्टसाध्याभाववदवृत्तित्वनिरूपितायाः** = परस्परनिरूप्य-निरूपकभावाऽऽपन्नसाध्याभाववदवृत्तित्वादिनिष्ठविषयतानिरूपितायाः **विषयितायाः अभावात्**, कुतः ? इत्याह - **प्रतिबन्धकसत्त्वात्** = साध्याभाववदवृत्तित्वस्य केवलान्वयिसाध्यकस्थले अप्रसिद्धत्वेन साध्याभाववदवृत्तित्वविषयकाऽनुमितिजनकज्ञानं प्रति केवलाऽन्वयित्वग्रहस्य प्रतिबन्धकत्वेन केवलान्वयित्वग्रहोत्तरकालीनाऽनुमितिजनकज्ञाने केवलान्वयित्वग्रहरूपप्रतिबन्धकसत्त्वान्न साध्याभाववदवृत्तित्वादिनिरूपितविषयिता इत्यर्थः ।

केचन "केवलान्वयित्वग्रहे जाते सति 'केवलान्वयिसाध्यकस्थले अनुमितिजनकज्ञाने साध्याभाववदवृत्तित्वादिनिरूपितविषयिता नास्ति' इतिज्ञानसम्भवेन तस्यैव 'केवलान्वयित्वग्रहकालीनाऽनुमितिजनकज्ञाने साध्याभाववदवृत्तित्वादिनिरूपितविषयिताऽस्ति' इतिज्ञानं प्रति प्रतिबन्धकत्वमि"***त्याहुः*** ।

ननु अस्तु केवलाऽन्वयिस्थले अनुमितिजनकज्ञाने प्रतिबन्धकसत्त्वात् साध्याभाववदवृत्तित्वादिनिष्ठविषयतानिरूपितविषयिताऽभावः, किन्तु अन्यत्र सैवाऽस्तु इति केवलान्वयिसाध्यकेतराऽनुमितिजनकता साध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नविषयताऽवच्छिन्ना स्यादेव इत्याशङ्कायामाह -

●

એવો પરામર્શ થાય તેમાં જે વિષયિતા આવે તે પરસ્પરઉપશ્લિષ્ટ(= અખંડ રીતે) સાધ્યાભાવવદ્અવૃત્તિત્વથી નિરૂપિત નથી. (પરસ્પર ઉપશ્લિષ્ટ કહેવા દ્વારા સાધ્ય, અભાવ, અવૃત્તિત્વ વગેરેની છૂટી છૂટી પ્રસિદ્ધિ હોય તો પણ વાંધો નથી. એટલે કે પ્રસ્તુતમાં સાધ્યાભાવ કેવલાન્વયીસ્થળે અપ્રસિદ્ધ હોવાથી 'સાધ્યાભાવવદ્અવૃત્તિત્વનિરૂપિતવિષયિતા અનુમિતિજનકજ્ઞાનમાં ન હોય' - તેવું આપણે સાબિત કરવા માંગીએ છીએ. કિંતુ સાધ્ય - અભાવ વગેરે છૂટા - છૂટા તો પ્રસિદ્ધ છે જ ને ! આ રીતે છૂટા - છૂટા કોઈ પ્રસિદ્ધ ન કરી લે તે માટે પરસ્પરઉપશ્લિષ્ટ લખ્યું. મતલબ કે અખંડ સાધ્યાભાવવદ્અવૃત્તિત્વનિરૂપિતવિષયિતા તો ઉક્ત જ્ઞાનમાં ન જ સંભવે. કારણ કે ઉક્ત સ્થલે = કેવલાન્વયી સ્થલે

तथा च तदानीमनुमित्युपपादकव्याप्तिज्ञानस्यैव सर्वत्र हेतुत्वसम्भवेन साध्याभाववदवृत्तित्वादिज्ञानस्यानुमितिजनकतायां मानाभाव इति भावः ।

●

तथा च = केवलाऽन्वयित्वग्रहोत्तरकालीनाऽनुमितिजनकज्ञाने प्रतिबन्धकसत्त्वात् साध्याभाववदवृत्तित्वादिनिरूपितविषयितायाः अभावेन **तदानीम्** = केवलान्वयित्वग्रहानन्तरम् अनुमितिजनकव्याप्तिज्ञानेन यदा अनुमितिः जाता तदा **अनुमित्युपपादकव्याप्तिज्ञानस्य** = यादृशेन व्याप्तिज्ञानेन अनुमितिः जाता तादृशव्याप्तिज्ञानस्यैव = 'ज्ञेयत्वसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवाच्यत्वसामानाधिकरण्यविशिष्टज्ञेयत्वविशिष्टमिदम्' इत्याकारकहेतुव्यापकसाध्यसामानाधिकरण्यरूपव्याप्त्यवगाहिज्ञानस्य **एव**, एवकारेण साध्याभाववदवृत्तित्वाद्यवगाहिज्ञानस्य व्यवच्छेदः कृतः, **सर्वत्र** = केवलान्वयितदितरसाध्यकेषु सर्वेषु स्थलेषु **हेतुत्वसम्भवेन** = जनकत्वसम्भवेन, तादृशव्याप्तिज्ञाने सर्वानुमितिनिरूपितकारणत्वसम्भवेनेत्यर्थः, **साध्याभाववदवृत्तित्वादिज्ञानस्य अनुमितिजनकतायां मानाभावः**, सदृशेनैवोपपत्तौ विसदृशस्वीकारस्यानुचितत्वा**दिति भावः** ।

ननु 'तद्धि न साध्याभाववदवृत्तित्वम्' इत्यादिषु अव्यभिचरितत्वपदं गृहीत्वा पुनः तद् गौणीकृत्य व्याख्यानं किमर्थं क्रियते ? ऋजुणा सिध्यतोऽर्थस्य वक्रेण साधनाऽयोगात् । एवमेवाऽर्थः क्रियतां यदुत - 'व्याप्तिः नाऽव्यभिचरितत्वपदार्थः, साध्याभाववदवृत्तित्वादिभेदकूटवत्त्वाद्' इति । एवमेवाऽनुमानमुपदर्श्य तत्त्वचिन्तामणिसन्दर्भः किमर्थं न व्याख्यायते ? **मथुरानाथेना**ऽपि अयमेव मार्गः अनुसृतः । तथा चोक्तं "तावद् वाक्यालङ्कारे, अव्यभिचरितत्वम् = अव्यभिचरितत्वपदप्रतिपाद्यम् । तत्र हेतुमाह - तद्धीत्यादि । हि = यस्मात् तद् = अव्यभिचरितत्वपदप्रतिपाद्यम् । नेति सर्वस्मिन्नेव लक्षणे सम्बध्यते । तथा च व्याप्तिर्यतः साध्याभाववद-

●

અખંડ સાધ્યાભાવવદ્અવૃત્તિત્વ જ અપ્રસિદ્ધ થાય છે.) માટે, 'સાધ્યાભાવવદ્અવૃત્તિત્વત્વ-અવચ્છિન્નવિષયતાઅવચ્છિન્ન અનુમિતિજનકતા હોય' - આવા જ્ઞાનમાં પ્રતિબંધક હાજર છે. માટે, આવું જ્ઞાન થઈ ન શકે. ત્યારે કેવલાન્વયિસ્થલમાં જે અનુમિતિઉપપાદક વ્યાપ્તિજ્ઞાન થયું તે જ વ્યાપ્તિજ્ઞાન દરેક સ્થલમાં અનુમિતિઉપપાદક તરીકે સંભવી શકતું હોવાથી 'સાધ્યાભાવવદ્અવૃત્તિત્વનું જ્ઞાન એ અનુમિતિજનક છે' - આ બાબતમાં કોઈ પ્રમાણ રહેતું નથી. આ પ્રમાણે પ્રસ્તુતમાં તાત્પર્ય છે.

वृत्तित्वादिरूपाऽव्यभिचरितत्वशब्दप्रतिपाद्यस्वरूपा न, अतोऽव्यभिचरितत्वशब्दप्रतिपाद्यरूपा न - इत्यर्थः पर्यवसितः । विशेषाभावकूटस्य सामान्याभावहेतुता च प्रसिद्धैवेति । अत एतन्नञ्द्वयोपादानं न निरर्थकम्" (पृ.६) इति । तथा चैवं क्लिष्टव्याख्यानुसरणं क्लिष्टपरिष्कारकरणं च किमर्थम् ? इत्याशङ्कायामाह -

●

શા માટે આટલા ક્લિષ્ટ પરિષ્કારો ?

પ્રશ્ન :- અરે ભાઈ ! તમે તો કમાલ કરી ! કેટ-કેટલા ક્લિષ્ટ પરિષ્કારો કર્યા. પછી દરેક પંક્તિના ક્લિષ્ટ અર્થ કર્યા. આટલું બધું કષ્ટ ઉઠાવવાની આપને શું જરૂર પડી ? એક સીધું સાદું અનુમાન છે. તેના દ્વારા જ બધું સિદ્ધ થઈ જશે. તો પછી આટલો બધો શ્રમ શા માટે ઊઠાવો છો ?

અનુમાન પ્રયોગ છે - વ્યાપ્તિ અવ્યભિચરિતત્વપદાર્થ નથી. કારણ કે તે સાધ્યાભાવવદ્-અવૃત્તિત્વવગેરેના ભેદકૂટથી વિશિષ્ટ છે. કેટલી સ્પષ્ટબોધદાયી આ અનુમિતિ છે ? તાત્પર્ય એ છે કે અવ્યભિચરિતત્વપદાર્થ અનુમિતિજનકતાઅવચ્છેદક ન બની શકે. કારણ કે સાધ્યાભાવવદ્અવૃત્તિત્વ વગેરે પાંચેય અનુમિતિજનકતાઅવચ્છેદક નથી. અનુમિતિજનકતા-અવચ્છેદકમાં સાધ્યાભાવવદ્અવૃત્તિત્વ વગેરે પાંચેયના ભેદનો કૂટ વિદ્યમાન છે. જો સાધ્યાભાવવદ્અવૃત્તિત્વ વગેરે પાંચેય વ્યાપ્તિસ્વરૂપ ન હોય તો અવ્યભિચરિતત્વ વ્યાપ્તિસ્વરૂપ કેવી રીતે હોય ? જ્યાં જ્યાં સાધ્યાભાવવદ્અવૃત્તિત્વાદિ પાંચેય લક્ષણના ભેદોનો કૂટ હોય ત્યાં ત્યાં અવ્યભિચરિતત્વપદાર્થનો પણ ભેદ હોય જ. અનુમિતિજનકતાઅવચ્છેદક વ્યાપ્તિમાં સાધ્યાભાવવદ્અવૃત્તિત્વાદિ પાંચેયનો ભેદ રહે જ છે. આ અનુમાનપ્રયોગથી જ અભિપ્રેત અર્થ સિદ્ધ થઈ જાય છે. મુખ્ય વાત તો એ છે કે આ અનુમાનપ્રયોગમાં પહેલાં જે બાધ - ભાગઅસિદ્ધિ વગેરે દોષો આવતા હતા તેમાંના એક પણ નહીં આવે. માટે જ એક પણ પરિષ્કારની જરૂરત નહીં પડે.

જુઓ → સ્થળ લઈએ - **पर्वतो वह्निमान् वह्न्यभाववदवृत्तिधूमात्**. અહીં અનુમિતિ-જનકપરામર્શ = वह्निअभाववद्अवृत्तिधूमसमानाधिकरणअत्यंताभावअप्रतियोगिवह्नि-समानाधिकरणवह्निअभाववद्अवृत्तिधूमवान पर्वत. આ પરામર્શમાં वह्निअभाववद्अवृत्तित्व ભાસિત થતું હોવા છતાં પણ તે વ્યાપ્તિરૂપે તો નથી જ જણાતું. વ્યાપ્તિ તરીકે તો हेतुसमानाधिकरणअत्यंताभावअप्रतियोगिसाध्यसामानाधिकरण्य જ જણાય છે. માટે, વ્યાપ્તિ અવ્યભિચારપદાર્થથી પણ ભિન્ન જ રહે છે અને સાધ્યાભાવવદ્અવૃત્તિત્વ વગેરે પાંચેયના

ईदृशव्याख्यानक्लेशश्च प्रश्नवाक्योद्देशस्योत्तरवाक्ये विधेयत्वनियमावष्टम्भेन ।

●

ईदृशव्याख्यानक्लेशश्च = तत्त्वचिन्तामणिसन्दर्भस्य क्लिष्टव्याख्यानाङ्गीकारे परिष्कृतोक्तानुमानाङ्गीकारे च यः क्लेशः जातः स च **प्रश्नवाक्योद्देश्यस्य उत्तरवाक्ये विधेयत्वनियमावष्टम्भेन** अङ्गीकृतः इति अध्याहार्यम् । तथा च 'नन्वनुमितिहेतुव्याप्तिज्ञाने का व्याप्तिः ?' इत्यत्र प्रश्नवाक्ये उद्देश्यं व्याप्तिः, तामुद्दिश्य प्रश्नकरणात्, तथा च 'न तावदि'त्याद्युत्तरवाक्ये व्याप्तिरेव विधेयतया अङ्गीकार्या । तथा च व्याप्तिभेदः साध्यम्, अव्यभिचरितत्वं पक्षः स्यात् । ततः 'अव्यभिचरितत्वं न तावद् व्याप्तिः, यतः तद्धि न...' इत्येवंरीत्यैव तदर्थः

●

ભેદકૂટથી પણ વિશિષ્ટ જ રહે છે. માટે, બાધ તથા ભાગઅસિદ્ધિ દોષને કોઈ અવકાશ નથી. આ રીતે આટલા સંક્ષિપ્ત અનુમાનથી કામ ચાલી જતું હોય તો છેક આવડા લાંબા અનુમાન સુધી દોડવાનું પ્રયોજન ખરું ?

⁂ પરિષ્કારોનું પ્રયોજન અનુશાસન ⁂

ઉત્તર :- (ईदृ.) પ્રયોજન વિના થોડું અમે આટલું લંબાણ કરીએ છીએ ? તમારા મનમાં જે અનુમાનપ્રયોગ છે તે અમને ધ્યાનમાં જ છે. પણ, એક નિયમને કારણે અમારા હાથ બંધાઈ ગયા છે. અને તે અનુમાનને અમે રજૂ નથી કરી શકતા. પરિણામે આટલો લાંબો અનુમાનપ્રયોગ અમારે દેખાડવો પડે છે. તમને પૂર્વે નિયમ જણાવ્યો જ હતો કે જે પ્રશ્નવાક્યમાં ઉદ્દેશ્ય હોય તે ઉત્તરવાક્યમાં વિધેય બને. જેમ કે ઘડો કોને કહેવાય ? - આ રીતે ઘડાને ઉદ્દેશીને પ્રશ્ન હોય તો 'કંબુગ્રીવાદિમાન્ પદાર્થ ઘડો કહેવાય' - આ રીતે કંબુગ્રીવાદિમાન્ પદાર્થને ઉદ્દેશીને ઘટત્વનું (તાદાત્મ્યથી ઘટનું) વિધાન કરવામાં આવે છે. માટે, પ્રશ્નવાક્યનો ઉદ્દેશ્ય ઉત્તરવાક્યમાં વિધેય બન્યો. આ જ રીતે પ્રસ્તુતમાં પ્રશ્નવાક્ય છે - વ્યાપ્તિ શું છે ? ઉત્તરવાક્ય છે - અવ્યભિચારપદાર્થ વ્યાપ્તિ નથી. પ્રશ્નવાક્યમાં વ્યાપ્તિ ઉદ્દેશ્ય બને છે. અને ઉત્તરવાક્યમાં વ્યાપ્તિ વિધેય બને છે. આપણે ઉત્તરવાક્યના આધારે અનુમાન ફલિત કરવાનું છે. જે ઉદ્દેશ્ય હોય એ પક્ષ બને. વિધેય હોય એ સાધ્ય બને. માટે, અવ્યભિચારપદાર્થ ઉદ્દેશ્ય હોવાથી પક્ષ બને. અને વ્યાપ્તિભેદ = અનુમિતિજનકતાઅવચ્છેદકભેદ વિધેય હોવાથી સાધ્ય બને. માટે, અનુમાનપ્રયોગ આવો ફલિત થાય કે - અવ્યભિચારપદાર્થ અનુમિતિજનકતાઅવચ્છેદકભિન્ન છે, કારણ કે સાધ્યાભાવવદ્અવૃત્તિત્વ

गू य शो ल ता

तदनङ्गीकारे, व्याप्तिः = अनुमितिजनकतावच्छेदको नाऽव्य-

करणीयः । तथा च 'अव्यभिचरितत्वपदार्थः न अनुमितिजनकताऽवच्छेदकः, साध्याभाववद-वृत्तित्वादिभेदकूटवत्त्वाद्' - इत्येवमनुमानं फलितम्, तच्च पूर्वोक्तयुक्त्या भागासिद्ध्यादिभिः दुष्टम्, अतः पूर्वोक्ताः परिष्काराः यथाक्रममनुसरणीयाः एव इति भावः ।

तदनङ्गीकारे = प्रश्नवाक्योद्देश्यस्य उत्तरवाक्ये विधेयत्वनियमाऽनङ्गीकारे 'प्रश्नवाक्योद्दे-श्यस्य उत्तरवाक्येऽपि उद्देश्यता सम्भवति' इत्यङ्गीकृत्य '**व्याप्तिः = अनुमितिजनकतावच्छेदकः**

વગેરે પાંચેયથી ભિન્ન છે. આ અનુમાનપ્રયોગ તો સ્વરૂપઅસિદ્ધિ, ભાગઅસિદ્ધિ વગેરે દોષોને કારણે સદંતર અસંભવિત છે. માટે, થોડું અનુમાન બદલવું જ પડશે. અવ્યભિચારપદાર્થ અનુમિતિજનકતાઅવચ્છેદક નથી. એટલે કે અનુમિતિજનકતા અવ્યભિચારપદાર્થથી અવચ્છિન્ન નથી. અવ્યભિચારપદાર્થથી એટલે કે અવ્યભિચારપદાર્થનિષ્ઠ વિષયતાથી. પરિણામે એ જ અનુમાનપ્રયોગ ફલિત થયો કે - અનુમિતિજનકતા અવ્યભિચારપદાર્થનિષ્ઠવિષયતાથી અવચ્છિન્ન નથી, કારણ કે સાધ્યાભાવવદ્અવૃત્તિત્વાદિનિષ્ઠવિષયતાથી અનવચ્છિન્ન છે.

આ અનુમાનપ્રયોગમાં બાધ અને ભાગઅસિદ્ધિ આવે. માટે એક પછી એક પરિષ્કાર જરૂરી બનતા ગયા. આ રીતે એક નિયમને કારણે અમારે લાચારીવશ એક પછી એક પરિષ્કાર કરવા પડ્યા છે. એટલે જ આટલો મોટો અનુમાનપ્રયોગ અમારે દેખાડવો પડ્યો. તત્વચિંતામણિકારની પંક્તિ તથા ઉક્ત નિયમ - એ બન્નેના આધારે તો અમે જે રસ્તો બતાવ્યો તે જ લેવો પડશે. તે સિવાય અન્ય કોઈ રસ્તો નથી. એટલે જ જે ગૌરવ આવે તે પણ સ્વીકારવું રહ્યું.

વિ ના મ્રા

હા ! જો 'જે પ્રશ્નવાક્યમાં ઉદ્દેશ્ય હોય તે ઉત્તરવાક્યમાં વિધેય હોય' - આ નિયમ ન માનો તો પછી તો "વ્યાપ્તિ = અનુમિતિજનકતાઅવચ્છેદક અવ્યભિચરિતત્વપદાર્થ નથી. કારણ કે તે સાધ્યાભાવવદ્અવૃત્તિત્વ વગેરેના ભેદકૂટથી વિશિષ્ટ છે" - આ અનુમાનપ્રયોગથી જ કામ ચાલી જશે. તત્ત્વચિંતામણિની પંક્તિનો પણ આ જ અર્થ કરી દેવાશે. આમાં બાધ અને ભાગઅસિદ્ધિ વગેરે દોષોમાંથી એકે દોષ નહીં આવે.

शब्दार्थ :- આવા પ્રકારના પરિષ્કારોની તથા પંક્તિઓની વ્યાખ્યા કરવાનો ક્લેશ અમે 'જે પ્રશ્નવાક્યમાં ઉદ્દેશ્ય હોય એ ઉત્તરવાક્યમાં વિધેય હોય' - આ નિયમનો ટેકો લઈ કરેલ છે. જો આ નિયમ ન સ્વીકારો તો 'વ્યાપ્તિ = અનુમિતિજનકતાઅવચ્છેદક

भिचरितत्वपदार्थः, साध्याभाववदवृत्तित्वादिभेदकूटवत्त्वादित्यर्थे बाधा-सिद्ध्याद्यभावात् ।

●

नाऽव्यभिचरितत्वपदार्थः, साध्याभाववदवृत्तित्वादिभेदकूटवत्त्वाद्' इत्यर्थे 'तात्पर्यम्' इति शेषः, 'न तावद् अव्यभिचरितत्वम्' इत्यस्य 'अव्यभिचरितत्वं न तावद् व्याप्तिः' इत्यर्थाऽनङ्गीकारेण 'व्याप्तिः न तावद् अव्यभिचरितत्वम्' इत्येवमुद्देश्य-विधेयभावं परावृत्त्य अर्थाङ्गीकारात् । एवमर्थाङ्गीकारे **बाध-भागासिद्ध्याद्यभावात्**, आदिपदेन विवक्षितार्थाऽसिद्ध्यादेर्ग्रहः, अत्रार्थे एव तात्पर्यं विज्ञेयमित्यर्थः ।

●

અવ્યભિચરિતત્વપદાર્થ નથી. કારણ કે તે સાધ્યાભાવવદ્અવૃત્તિત્વ વગેરેના ભેદકૂટથી વિશિષ્ટ છે' - આ પ્રમાણે '**न तावद् अव्यभिचरितत्वम्, तद्धि न साध्याभाववदवृत्तित्वम्**' ઈત્યાદિ તત્ત્વચિંતામણિની પંક્તિનો અર્થ કરતાં કોઈ જ બાધ અને ભાગઅસિદ્ધિ દોષ આવતા નથી. માટે પૂર્વોક્ત પરિષ્કારોથી પણ બચી જવાશે, તેનું ગૌરવ પણ નહીં આવે.

❁ અન્ય લોકોના મતે ભાવાર્થ ❁

(હવે અન્ય લોકોના મત મુજબ પ્રતિપાદન થશે. ત્યાર બાદ સ્વમત મુજબ મૂળ ગ્રંથની પંક્તિનો અર્થ જોઈશું.)

પ્રશ્ન :- તમે જે અનુમાન બનાવ્યું કે 'વ્યાપ્તિ અવ્યભિચરિતત્વપદાર્થસ્વરૂપ નથી, કારણ કે સાધ્યાભાવવદ્અવૃત્તિત્વ વગેરેનો ભેદ તેમાં રહેલો છે' - આ અનુમાનપ્રયોગમાં પક્ષતાઅવચ્છેદક વ્યાપ્તિત્વ થાય. આ વ્યાપ્તિત્વ ક્યાં રહેશે ? તમારે ક્યાં રાખવું છે ? શું હેતુસમાનાધિકરણઅત્યંતાભાવઅપ્રતિયોગિસાધ્યસામાનાધિકરણ્યમાં રાખવું છે ? મતલબ કે અનુમાનપ્રયોગ થાય - હેતુસમાનાધિકરણઅત્યંતાભાવઅપ્રતિયોગિસાધ્યસામાનાધિકરણ્ય એ અવ્યભિચરિતત્વપદાર્થ નથી, કારણ કે સાધ્યાભાવવદ્અવૃત્તિત્વાદિના ભેદકૂટથી વિશિષ્ટ છે. આવો અનુમાનપ્રયોગ કરવા જતા તો સિદ્ધસાધન દોષ આવશે. કારણ કે હેતુસમાનાધિકરણઅત્યંતાભાવઅપ્રતિયોગિસાધ્યસામાનાધિકરણ્ય એ સાધ્યાભાવવદ્અવૃત્તિત્વ સ્વરૂપ છે - આવું તો કોણ માને ? એ બન્ને લક્ષણો તો જુદા જ છે ને ? તેમાં ભેદ સાબિત કરવા જતા સિદ્ધસાધન દોષ દુર્વાર બને. આમ, તમે જે અનુમાન બતાવ્યું તે પણ નિર્દોષ નથી.

જો વ્યાપ્તિત્વ સાધ્યાભાવવદ્અવૃત્તિત્વ વગેરેમાં રહે છે તેમ માનો તો તો બાધ દોષ

સ્પષ્ટ જ છે. કારણ કે સાધ્યાભાવવદ્અવૃત્તિત્વમાં અવ્યભિચારપદાર્થનો ભેદ તો કેમ રહે ? માટે વ્યાપ્તિત્વ ક્યાં રહેશે ? - તે કહેવું મુશ્કેલ બનશે.

ઉત્તર :- (**વસ્તુ.**) જુઓ ભાઈ ! વાસ્તવમાં વ્યાપ્તિત્વ = પક્ષતાઅવચ્છેદક માત્ર હેતુસમાનાધિકરણઅત્યંતાભાવઅપ્રતિયોગિસાધ્યસામાનાધિકરણ્યમાં જ રહે. પણ, હજુ જ્યારે વ્યાપ્તિપંચકગ્રંથનું પ્રતિપાદન થઈ રહેલ છે ત્યારે હેતુસમાનાધિકરણઅત્યંતાભાવઅપ્રતિયોગિ-સાધ્યસામાનાધિકરણ્યમાત્રમાં = તમામે તમામ/ફક્ત સામાનાધિકરણ્યમાં વ્યાપ્તિત્વનો નિશ્ચય થયો જ નથી. કારણ કે હજુ એ વ્યાપ્તિ જ **ગંગેશ ઉપાધ્યાયે** નથી બતાવી. માટે, વ્યાપ્તિ એટલે સામેવાળાના મગજમાં અનુમિતિજનકતાઅવચ્છેદક - આટલો જ અર્થ ઉપસ્થિત થશે. વ્યાપ્તિત્વ = અનુમિતિજનકતાઅવચ્છેદકત્વ. અવ્યભિચારપદાર્થ અનુમિતિજનકતાઅવચ્છેદક છે કે નહીં ? એટલે કે અવ્યભિચારપદાર્થનું 'વહ્નિવ્યાપ્યધૂમવાન્ પર્વત' - આવા જ્ઞાનમાં 'વહ્નિઅવ્યભિચરિતધૂમવાન્ પર્વત' - આ રીતે જ્ઞાન થાય કે નહીં ? આવી શંકા તો શિષ્યના મગજમાં ઊભી જ છે. એટલે જ્યારે ગુરુ કહે કે 'અનુમિતિજનકતાઅવચ્છેદક અવ્યભિચરિ-તત્વપદાર્થ નથી' ત્યારે સિદ્ધસાધન દોષનો પ્રશ્ન નથી અને વ્યાપ્તિત્વ રહે તો હેતુવ્યાપકસાધ્ય-સામાનાધિકરણ્યમાં જ. જો સાધ્યાભાવવદ્અવૃત્તિત્વ વગેરેમાં રહે તો બાધ - સ્વરૂપઅસિદ્ધિ વગેરે દોષ આવત. પણ વ્યાપ્તિત્વ હેતુવ્યાપકસામાનાધિકરણ્યમાં જ રહેવાને કારણે બાધ વગેરે દોષ નહીં આવે.

વિ ના મા

❖ સિદ્ધસાધન દોષનું વારણ ❖

શબ્દાર્થ :- વાસ્તવમાં પક્ષતાઅવચ્છેદક વ્યાપ્તિત્વ એ હેતુસમાનાધિકરણઅત્યંતાભાવ-અપ્રતિયોગિસાધ્યસામાનાધિકરણ્યમાં જ રહેલ હોવાને કારણે અને હેતુસમાનાધિકરણઅત્યંતા-ભાવઅપ્રતિયોગિસાધ્યસામાનાધિકરણ્યમાત્રમાં હજુ વ્યાપ્તિત્વનો નિશ્ચય ન થયો હોવાને કારણે એટલે કે વ્યાપ્તિત્વરૂપે સામાનાધિકરણ્યમાત્રનો નિશ્ચય ન થયો હોવાને કારણે (સાધ્યાભાવવદ્અવૃત્તિત્વમાં વ્યાપ્તિત્વને લઈને જે બાધ વગેરે દોષ આપેલા તે પણ નહીં આવે અને) સિદ્ધસાધન દોષ પણ નહીં આવે. મતલબ કે અનુમિતિજનકતાઅવચ્છેદકત્વરૂપે જ અનુમિતિજનકતાઅવચ્છેદકસ્વરૂપ વ્યાપ્તિને પક્ષ તરીકે સ્વીકારવાની. માટે, સિદ્ધસાધન વગેરે દોષ નહીં આવે.

❁ સ્વમત મુજબ ભાવાર્થ ❁

અન્યોના મત પ્રમાણે શબ્દાર્થસહિત ભાવાર્થ જોઈ લીધો. હવે, વધુ સારો અર્થ જોઈએ.

જો 'જે પ્રશ્નવાક્યમાં ઉદ્દેશ્ય હોય તે ઉત્તરવાક્યમાં વિધેય હોય' - આ નિયમ ન

वस्तुतः पक्षतावच्छेदकस्य हेतुव्यापकसाध्यसामानाधिकरण्ये एव सत्त्वात्,

●

ननु उक्ताऽनुमानेऽपि पूर्ववत् परिष्काराः समाश्रयणीयाः एव, अन्यथा बाध-भागासिद्धि-प्रसङ्गः दुर्वारः । तथा हि - 'पर्वतो वह्निमान्, वह्न्यभाववदवृत्तिधूमाद्' - इत्यत्र अनुमितिजनक-ज्ञाने 'वह्न्यभाववदवृत्तिधूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्यविशिष्ट-वह्न्यभाववदवृत्तिधूमविशिष्टः पर्वतः' - इत्याकारके वह्न्यभाववदवृत्तित्वरूपाऽव्यभिचारपदार्थस्य विषयतया तन्निष्ठाऽनुमितिजनकतायाः अवच्छेदकत्वमपि स्यादेव । तथा च अनुमितिजनकताऽव-च्छेदकीभूताऽव्यभिचारपदार्थे अव्यभिचारपदार्थभेदस्य, तादृशभेदकूटस्य चाऽसत्त्वाद् बाध-भागा-सिद्धिप्रसङ्गः दुर्वारः, तन्निवारणाय पूर्वोक्तः पर्याप्तिनिवेशः एव कर्तव्यः, एवमेव अन्येऽपि परिष्काराः अत्र कर्तव्याः स्युः इत्याशङ्कायामाह - **वस्तुत** इति । ***यद्यपि*** अनुमितिजनकतावच्छे-दकतया तादृशपरामर्शनिष्ठाः सर्वे विषयाः प्राप्यन्ते ***तथापि*** **वस्तुतः** सिद्धान्तव्याप्तेः एव अनुमिति-जनकतावच्छेदकत्वेन (वह्न्यभाववदवृत्तित्वादेर्विषयत्वेऽपि तस्याऽनुमित्यजनकज्ञानेऽपि वृत्तितयाऽ-तिरिक्तवृत्तित्वात् तादृशानुमितिजनकताऽवच्छेदकत्वं नास्ति इति बोध्यम्) **पक्षतावच्छेदकस्या**ऽनुमि-तिजनकतावच्छेदकत्वस्य **हेतुव्यापकसाध्यसामानाधिकरण्ये एव**, एवकारेण तादृशपरामर्शज्ञाने भासमानानामन्यविषयाणां व्यवच्छेदः, **सत्त्वान्न** बाधादिप्रसङ्ग इत्यन्वयः, यतः अनुमितिजनकताव-च्छेदकीभूते हेतुव्यापकसाध्यसामानाधिकरण्ये अव्यभिचारपदार्थभेदः, तादृशभेदकूटश्च स्तः एवेति

●

માનવો હોય તો ઉક્ત તત્ત્વચિંતામણિપંક્તિના તાત્પર્યાર્થ તરીકે આવું જ અનુમાન સ્વીકારવું કે - અનુમિતિજનકતાઅવચ્છેદક અવ્યભિચરિતત્વપદાર્થ નથી. કારણ કે તે સાધ્યાભાવવદ્-અવૃત્તિત્વવગેરેથી તે ભિન્ન છે. આ અનુમાનમાં પૂર્વોક્ત બાધ-ભાગાસિદ્ધિ નથી આવતા.

પ્રશ્ન :- બાધ - ભાગાસિદ્ધિ શા માટે નહીં આવે ? આવશે જ. તે આ રીતે - સ્થળ લઈએ - '**पर्वतो वह्निमान्, वह्न्यभाववदवृत्तिधूमात्**' આ સ્થળમાં '**वह्न्यभाववदवृत्तिधूमसमा-नाधिकरणाऽत्यन्ताभावाप्रतियोगिवह्निसामानाधिकरण्यविशिष्टवह्न्यभाववदवृत्तिधूमविशिष्टः पर्वतः**' - આવા પ્રકારના પરામર્શમાં અનુમિતિજનકતા રહે છે. આ પરામર્શમાં સાધ્યાભાવવદ્-અવૃત્તિત્વરૂપ અવ્યભિચારપદાર્થ વિષય બને જ છે. માટે, વિષયવિધયા તે પરામર્શનિષ્ઠ-અનુમિતિજનકતાનો પણ અવચ્છેદક બને જ. પરિણામે બાધ અને ભાગાસિદ્ધિ દોષ દુર્વાર બનશે.

कुतः बाधः भागासिद्धिर्वा ?

य ***ननु*** अनुमितिजनकतावच्छेदकविधया हेतुव्यापकसाध्यसामानाधिकरण्यस्यैव ग्रहणे सिद्धसाधनम्,
शो 'हेतुव्यापकसाध्यसामानाधिकरण्यम् अव्यभिचारपदार्थः नास्ति' इत्येवमव्यभिचारपदार्थस्य व्याप्तित्वा-
ल ङ्गीकर्तृणां मतेऽपि सिद्धत्वात् । किञ्च, यदि हेतुव्यापकसाध्यसामानाधिकरण्ये एव अव्यभिच-
ता रितत्वभेदः दर्शनीयः तर्हि अनुमितिजनकतावच्छेदकत्वेन किमर्थं तदुपन्यासः ? हेतुव्यापक-
साध्यसामानाधिकरण्यं नाऽव्यभिचारपदार्थः - इत्यस्यैव कथनीयत्वादित्याशङ्कायामाह -

●

उत्तर :- (**वस्तुतः**) अनुमितिजनकताअवच्छेदकता स्वरूप पक्षताअवच्छेदक वास्तवमां तो हेतुव्यापकसाध्यसामानाधिकरण्यमां ज रहेल छे. माटे, प्रस्तुतमां अनुमितिजनकता-अवच्छेदकत्वेन हेतुव्यापकसाध्यसामानाधिकरण्य ज पक्ष छे. अने हेतुव्यापकसाध्यसामानाधिकरण्य अव्यभिचरितत्व के साध्याभाववद्वृत्तित्व वगेरेथी भिन्न ज छे. परिणामे, बाध अने भागासिद्धिनो कोई प्रश्न ज रहेतो नथी.

सवाल :- जो हेतुव्यापकसाध्यसामानाधिकरण्य ज प्रस्तुतमां पक्ष होय तो तेमां अव्यभिचरितत्व अने साध्याभाववद्वृत्तित्व वगेरेनो भेद अमने मान्य ज छे. जगतनी एवी कई व्यक्ति छे के जे हेतुव्यापकसाध्यसामानाधिकरण्य अने साध्याभाववद्वृत्तित्वने एक माने ? जयारे तमे तो उक्त अनुमान द्वारा हेतुव्यापकसाध्यसामानाधिकरण्यमां अव्य-
वि भिचारपदार्थनो भेद साबित करवा जई रह्या छो ! मतलब के आखी दुनिया जे माने
न छे तेने तमे सिद्ध करवा जई रह्या छो. तो पछी सिद्धसाधन दोष न आवे तो थाय शुं ?
तथा जो हेतुव्यापकसाध्यसामानाधिकरण्यमां ज अव्यभिचरितत्वनो भेद साधवो हतो तो
भा हेतुव्यापकसाध्यसामानाधिकरण्यने ज पक्ष तरीके जणावव्युं हतुं ने ? अनुमितिजनकता-अवच्छेदकने शा माटे मूलकारे पक्ष तरीके जणाव्युं ?

❁ अनुमितिजनकताअवच्छेदकत्वेन भेद के अभेद ? ❁

जवाब :- (**तन्मात्रस्य.**) हेतुव्यापकसाध्यसामानाधिकरण्यमां हेतुव्यापकसाध्यसामानाधिकरण्यत्वरूपे अव्यभिचारपदार्थनो भेद छे - आ वात बधां स्वीकारे ज छे. पण, अनुमितिजनकताअवच्छेदकत्वेन तेमां अव्यभिचारपदार्थनो भेद छे के नहीं ? ते साध्य छे, सिद्ध नथी. जेम घटमां घटत्वरूपे पटनो भेद छे - आ वात तो सिद्ध ज छे. परंतु घटमां द्रव्यत्वरूपे पटनो भेद नथी. कारण के घट अने पट - बन्ने द्रव्य ज छे. आ रीते घटमां घटत्वरूपे पटनो भेद रहेवानी साथे द्रव्यत्वरूपे पटनो अभेद पण रहेल ज छे. तेवी रीते

तन्मात्रस्य तत्त्वेनाऽनिश्चयाच्च न सिद्धसाधनम् ।

●

तन्मात्रस्य = अव्यभिचारपदार्थमात्रस्य = सर्वेषामव्यभिचारपदार्थानां **तत्त्वेन** = अनुमिति-जनकतावच्छेदकत्वेन हेतुव्यापकसाध्यसामानाधिकरण्यभिन्नत्वस्य **अनिश्चयाच्च**, अत्र चकारः 'वस्तुतः पक्षतावच्छेदकस्य हेतुव्यापकसाध्यसामानाधिकरण्ये एव सत्त्वाद्' इतिहेतुसमुच्चये नास्ति, तादृशहेतोः सिद्धसाधनाऽऽपादकत्वात्, प्रकृतहेतोश्च सिद्धसाधनाऽपाकर्तृत्वात्, ततश्च 'वस्तुतः पक्षतावच्छेदकस्य हेतुव्यापकसाध्यसामानाधिकरण्ये एव सत्त्वेन बाध-भागासिद्ध्याद्यभावात्, तन्मात्रस्य तत्त्वेनाऽनिश्चयेन सिद्धसाधनाद्यभावाच्च तत्त्वचिन्तामणिवाक्यानामुक्तार्थे एव तात्पर्यम्' इत्येवं समुच्चयार्थः चशब्दः, **न सिद्धसाधनम्** इति ।

●

જો અવ્યભિચરિતત્વપદાર્થ અનુમિતિજનકતાઅવચ્છેદકરૂપ = વ્યાપ્તિરૂપ હોય તો હેતુવ્યાપક-સાધ્યસામાનાધિકરણ્યત્વરૂપે હેતુવ્યાપકસાધ્યસામાનાધિકરણ્યમાં અવ્યભિચારપદાર્થનો ભેદ રહેવા છતાં અનુમિતિજનકતાઅવચ્છેદકત્વરૂપે ભેદ ન રહે. અવ્યભિચરિતત્વપદાર્થ વ્યાપ્તિ છે કે નહીં ? - તે હજુ સંદિગ્ધ છે. માટે, અનુમિતિજનકતાઅવચ્છેદકત્વરૂપે હેતુવ્યાપક-સાધ્યસામાનાધિકરણ્યમાં અવ્યભિચારપદાર્થનો ભેદ છે કે નહીં ? - તે વાત પણ સંદિગ્ધ જ રહેશે, સિદ્ધ નહીં થાય. ઉક્ત અનુમાન દ્વારા તે વાત સિદ્ધ થશે. માટે, અવ્યભિચારપદાર્થ વ્યાપ્તિ નથી - તે સિદ્ધ થશે. આ રીતે હેતુવ્યાપકસાધ્યસામાનાધિકરણ્યત્વરૂપે હેતુવ્યાપક-સાધ્યસામાનાધિકરણ્યને જો પક્ષ બનાવવામાં આવે તો સિદ્ધસાધન દોષ ચોક્કસ લાગુ પડે. પણ, અનુમિતિજનકતાઅવચ્છેદકત્વરૂપે તેને પક્ષ બનાવવામાં સિદ્ધસાધન દોષને કોઈ અવકાશ નથી. અને અનુમિતિજનકતાઅવચ્છેદકત્વરૂપે હેતુવ્યાપકસાધ્યસામાનાધિકરણ્યને પક્ષ બનાવવા માટે જ 'અનુમિતિજનકતાઅવચ્છેદક'નો પક્ષ તરીકે ઉલ્લેખ કરવામાં આવ્યો છે. જો હેતુવ્યાપકસાધ્યસામાનાધિકરણ્યનો જ પક્ષ તરીકે ઉલ્લેખ કરવામાં આવે તો હેતુવ્યાપક-સાધ્યસામાનાધિકરણ્યત્વરૂપે જ તે પક્ષ છે તેવું જણાય. અનુમિતિજનકતાઅવચ્છેદકરૂપે તેનો ઉલ્લેખ કરવામાં આવે તો જ અભિપ્રેત પદાર્થની સિદ્ધિ થાય.

शब्दार्थ :- 'પ્રશ્નવાક્યનો ઉદ્દેશ્ય ઉત્તરવાક્યમાં વિધેય હોય' - આ નિયમ ન સ્વીકારવામાં આવે તો 'અનુમિતિજનકતાઅવચ્છેદક = વ્યાપ્તિ અવ્યભિચારપદાર્થ નથી. કારણ કે તે સાધ્યાભાવવદ્અવૃત્તિત્વ વગેરેથી ભિન્ન છે' - આવા પ્રકારના અનુમાનપ્રયોગમાં જ તત્ત્વચિંતામણિગ્રંથની પંક્તિનું તાત્પર્ય સમજવું. કારણ કે આવો અર્થ કરવામાં બાધ-ભાગાસિદ્ધિ-વિવક્ષિતાર્થઅસિદ્ધિ દોષ આવતા નથી. વાસ્તવમાં પ્રસ્તુત સ્થલે પક્ષતાઅવચ્છેદક

ગૂ ય શો લ તા વિ ન ભા

अयमाशयः - यथा घट-पटयोः घटत्वेन पटत्वेन च भेदः किन्तु द्रव्यत्वेन न भेदः, उभयोः द्रव्यत्वात् । ततः घटत्वेन घट-पटयोः भेदनिश्चये सत्यपि द्रव्यत्वेन तयोः भेदः न सिध्यति । तथैव प्रकृते हेतुव्यापकसाध्यसामानाधिकरण्यत्वेन साध्याभाववदवृत्तित्वेन च तयोः पार्थक्यं प्रसिद्धमेव, किन्तु अनुमितिजनकताऽवच्छेदकत्वेन तयोः पार्थक्यमस्ति न वा ? इति तु न निश्चितम् । हेतुव्यापकसाध्यसामानाधिकरण्य-साध्याभाववदवृत्तित्वादिरूपाऽव्यभिचारपदार्थयोः उभयोरपि अनुमितिजनकताऽवच्छेदकत्वे = व्याप्तित्वे अनुमितिजनकतावच्छेदकत्वेन तयोरभेदः एव स्यात्, हेतुव्यापकसाध्यसामानाधिकरण्यत्वेन तयोः भेदे सत्यपि । तथा च हेतुव्यापक-साध्यसामानाधिकरण्यत्वेन साध्याभाववदवृत्तित्वेन च तयोः भेदे सिद्धेऽपि अनुमितिजनकता-वच्छेदकत्वेन तयोः भेदः न सिध्यति । ततः 'अनुमितिजनकताऽवच्छेदकत्वेन सर्वेषाम् अव्यभिचारपदार्थानां हेतुव्यापकसाध्यसामानाधिकरण्यतः भेदः अस्ति' इतिनिश्चयः कुतः स्यात् ? एतादृशनिश्चयाभावादेव, पक्षे साध्यस्य सन्देहाच्च न सिद्धसाधनम्, अतः एव हेतुव्यापकसाध्य-सामानाधिकरण्यं नाऽव्यभिचरितत्वपदार्थः... इत्यादिरीत्या अनुमानमनुपदर्श्य अनुमितिजनकता-ऽवच्छेदकः नाऽव्यभिचरितत्वपदार्थः... इत्येवं रीत्या अनुमानमुपदर्शितम्, तथैव अनुमितिजनकता-वच्छेदकत्वेन हेतुव्यापकसाध्यसामानाधिकरण्यस्य पक्षत्वप्राप्तेः, अन्यथा हेतुव्यापकसाध्य-सामानाधिकरण्यत्वेन एव तत्प्राप्तिः स्यात्, तथा सति सिद्धसाधनं स्यात् । अनुमितिजनकता-ऽवच्छेदकत्वेन हेतुव्यापकसाध्यसामानाधिकरण्ये अव्यभिचरितत्वपदार्थस्य भेदः तदैव सिध्यति यदा अव्यभिचरितत्वपदार्थमात्रम् अनुमितिजनकतावच्छेदकं न स्यात् । उक्ताऽनुमानेन अनुमिति-जनकताऽवच्छेदकत्वेन हेतुव्यापकसाध्यसामानाधिकरण्ये अव्यभिचरितत्वपदार्थस्य भेदसिद्ध्या अव्यभिचरितत्वपदार्थमात्रस्य व्याप्तित्वाभावः, हेतुव्यापकसाध्यसामानाधिकरण्यस्य व्याप्तित्वं च सिध्यतः एव ।

●

व्याप्तित्व = अनुमितिजनकताअवच्छेदकत्व हेतुव्यापकसाध्यसामानाधिकरण्यमां रहेल होवाथी बाधादिदोषोनो अवकाश नथी. अने अव्यभिचारपदार्थमात्रनो = तमाम अव्यभिचारपदार्थनो अनुमितिजनकताअवच्छेदकत्वरूपे भेद हेतुव्यापकसाध्यसामानाधिकरण्यमां छे तेवो निश्चय तो थयो नथी. माटे सिद्धसाधनदोषने पण कोई अवकाश नथी.

पूर्वेनी अने आ व्याख्यामांथी कई व्याख्या ग्रंथना अने ग्रंथकारना हार्दने स्पर्शी शकी छे ? तेनो निर्णय विज्ञ वाचकवर्ग उपर छोडेल छे.

यदि हि अनुमितिजनकताऽवच्छेदकत्वेन अव्यभिचारपदार्थे हेतुव्यापकसाध्यसामानाधिकरण्यभेदः स्यात् तदा अव्यभिचरितत्वपदार्थस्य व्याप्तित्वम्, हेतुव्यापकसाध्यसामानाधिकरण्यस्य व्याप्तित्वाभावश्च सिध्येताम् । अतः हेतुव्यापकसाध्यसामानाधिकरण्यस्यैव पक्षत्वमुचितम् । यथा घटत्वेन घटः पटाद् भिन्नः इति उच्यते, न तु पटत्वेन घटः पटाद् भिन्नः, एवमेव पटत्वेन पटः घटाद् भिन्न इत्युच्यते न तु घटत्वेन पटः घटाद् भिन्नः इति, घटत्वस्यैव घटे सत्त्वात्, पटत्वस्याऽसत्त्वाच्च, पटत्वस्यैव पटे सत्त्वात्, घटत्वस्याऽसत्त्वाच्च । यदि हि पटत्वेन घटः पटाद् भिन्नः इत्युच्यते तदा घटे पटत्वं सिध्येत् । तथैव प्रकृते अनुमितिजनकताऽवच्छेदकत्वेन हेतुव्यापकसाध्यसामानाधिकरण्यम् अव्यभिचारपदार्थमात्राद् भिन्नमिति साध्यते, तथैवाभिलषितसिद्धेः । न तु अनुमितिजनकतावच्छेदकत्वेन अव्यभिचरितत्वपदार्थः हेतुव्यापकसाध्यसामानाधिकरण्याद् भिन्नः इति, तथा सति विपरीतसिद्धेः इति व्यधिकरणधर्मावच्छिन्नाऽभावाऽनङ्गीकर्तृमते बोध्यम्, तादृशाऽभावाङ्गीकारे च पटत्वेन घटे पटभेदः स्यादेवेति सूक्ष्मदर्शिभिः विचारणीयम् ।

तथा च अनुमितिजनकतावच्छेदकत्वेन हेतुव्यापकसाध्यसामानाधिकरण्ये, अव्यभिचारपदार्थमात्रे पूर्वपक्षिमतेन व्याप्तित्वाभावस्याऽसिद्धत्वेन, अव्यभिचारपदार्थभेदस्याऽनिश्चयान्न सिद्धसाधनम् इति तात्पर्यम् ।

नन्वेवम् 'अनुमितिजनकता अव्यभिचारपदार्थानवच्छिन्ना, साध्याभाववदवृत्तित्वाद्यवच्छिन्नत्वाभावकूटाद्' - इत्येवानुमानमङ्गीकार्यम्, बाधाद्यभावात्, वस्तुतः अनुमितिजनकतायाः हेतुव्यापकसाध्यसामानाधिकरण्येनैवाऽवच्छिन्नत्वात् । किमर्थं तर्हि नूतनाऽनुमानाऽनुसरणं पूर्वोक्ताऽनुमाने व्यर्थपरिष्कारप्रदर्शनञ्च ? ***इति चेत् ?***

सत्यम्; तथापि अनुमितिजनकता 'वह्न्यभाववदवृत्तिधूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्यविशिष्टवह्न्यभाववदवृत्तिधूमविशिष्टः पर्वतः' - इत्याकारकज्ञाननिरूपिताऽव्यभिचारपदार्थनिष्ठविषयताऽनवच्छिन्ना इति वक्तुं न शक्यते, किन्तु यदा अनुमितिजनकतावच्छेदकमेव पक्षतया गृह्यते तदा अनुमितिजनकताऽवच्छेदकत्वेन केवलं हेतुव्यापकसाध्यसामानाधिकरण्यं ग्रहीतुं शक्यते एव, अनुमितिजनकतावच्छेदकत्वस्य विषयविधया पक्षादिषु सत्त्वेऽपि अनुमितिजनकतावच्छेदकत्वेन हेतुव्यापकसाध्यसामानाधिकरण्यस्यैव पक्षत्वसम्भवात्,

तथा च नाऽत्र बाधादि, तत्र च स्यादेव बाधादि उक्तपरिष्काराऽनाश्रयणे, यथा घटनिरूपितकारणता दण्डत्वेनाऽपि अवच्छिन्ना स्यात्, मृत्त्वेनाऽपि, कपालत्वेनाऽपि किन्तु घटनिरूपितकारणताऽवच्छेदकतया केवलदण्डत्वस्याऽपि ग्रहणं शक्यमेवेति विभावनीयमेतत्तत्त्वं पर्युपासितगुरुकुलैः ।

य
शो
ल
ता

ननु एवमनुमानाङ्गीकारेऽपि 'तद्धि न' इत्यादिवाक्यस्य कोऽर्थः ? 'अव्यभिचरितत्वं न साध्याभाववदवृत्तित्वम्' - इत्येव तदर्थः उपलक्ष्यते, तादृशाऽर्थस्वीकारे न भवतोक्ताऽनुमाने तात्पर्यं मूलकृतामवसीयते ***इति चेद् ? न;*** एतस्मिन् पक्षेऽपि व्याप्तिपदानुषङ्गं कृत्वा 'व्याप्तिः न तत्साध्याभाववदवृत्तित्वम्' इत्यर्थः कर्तव्यः, तद् = अव्यभिचरितत्वम्, तथा च 'अव्यभिचरितत्वरूपसाध्याभाववदवृत्तित्वरूपा व्याप्तिः नास्ति' इत्यर्थः पर्यवस्यति, 'अव्यभिचरितत्वं न साध्याभाववदवृत्तित्वम्' इत्येतादृशार्थाद् अयमेवाऽर्थः ज्यायान्, व्याप्तिपदानुषङ्गस्य अत्र पक्षे कर्तव्यत्वेऽपि अर्थप्रतिपत्तिसौकर्यसम्भवात् । यथा चैतत् तथा वक्ष्यते इति आशयेनाह -

●

प्रश्न :- ભલે ! આ રીતે અનુમાનપ્રયોગ તમારો વ્યવસ્થિત થઈ ગયો. કિંતુ પંક્તિના અર્થ તો તે રીતે બેસાડવા પડશે ને ? પહેલા કહેલ તે મુજબ **'न तावद् अव्यभिचरितत्वम्'** - આ પંક્તિ પક્ષ અને સાધ્ય સૂચવે છે. તથા **'तद्धि न साध्याभाववदवृत्तित्वम्'** - આ હેતુવાક્ય છે. મતલબ કે તમે જે અનુમાનપ્રયોગ બનાવો તેમાં હેતુ જે હોય તે જ **तद्धि**..... ઈત્યાદિ પંક્તિનો અર્થ હોવો જોઈએ. આ પંક્તિનો અર્થ છે કે - અવ્યભિચરિતત્વ એ સાધ્યાભાવવદ્અવૃત્તિત્વસ્વરૂપ નથી. હવે, આને કેવી રીતે તમારા અનુમાનપ્રયોગમાં હેતુ તરીકે બતાવશો ?

વિ
ન
મ્રા

उत्तर :- (अत्रा.) જે રીતે અનુમિતિજનકતાપક્ષકઅનુમિતિપક્ષમાં **तद्धि**..... આ પંક્તિનો અર્થ કરતી વખતે વ્યાપ્તિપદની અનુવૃત્તિ કરી હતી. એટલે કે પ્રશ્નવાક્યમાં રહેલ વ્યાપ્તિપદનું જોડાણ આ વાક્યમાં કરેલ તે રીતે વ્યાપ્તિપદનું જોડાણ આ પક્ષમાં = વ્યાપ્તિપક્ષકઅનુમિતિ માનનાર પક્ષમાં પણ કરી લેવું. માટે, હવે વાક્ય આમ થશે કે - **'व्याप्तिः न तत्साध्याभाववदवृत्तित्वम्'** અર્થ થશે - વ્યાપ્તિ એ તે સાધ્યાભાવવદ્અવૃત્તિત્વ સ્વરૂપ નથી. એટલે કે જે સાધ્યાભાવવદ્અવૃત્તિત્વ અવ્યભિચારપદાર્થ છે તે વ્યાપ્તિ નથી. આમ, તે વાક્ય દ્વારા વ્યાપ્તિનો ભેદ અવ્યભિચારપદાર્થસ્વરૂપ સાધ્યાભાવવદ્અવૃત્તિત્વમાં ભાસિત થાય છે કે જે હેતુનો અર્થ છે. આ રીતે અનુમાનપ્રયોગમાં જે હેતુ છે તે જ અર્થ આ હેતુવાક્યનો થયો.

अत्रापि पक्षे तद्धीत्यादेर्व्याप्तिपदानुषङ्गेण तत्साध्याभाववदवृत्तित्वं न व्याप्तिः इत्यर्थ एव ज्यायान्,

●

अत्रापि पक्षे = यथा अनुमितिजनकतापक्षकाऽनुमित्यङ्गीकर्तृपक्षे 'तद्धि न' इत्यादिवाक्यस्य व्याप्तिपदानुषङ्गं कृत्वा अर्थः प्रदर्शितः तथैव अनुमितिजनकतावच्छेदकपक्षकाऽनुमानाङ्गीकर्तृमतेऽपि **'तद्धि' इत्यादेः** = 'तद्धि न साध्याभाववदवृत्तित्वम्' इत्यादेः **व्याप्तिपदानुषङ्गेण 'तत्साध्याभाववदवृत्तित्वं न व्याप्तिः' इत्यर्थः एव ज्यायान्** = 'व्याप्तिः न अव्यभिचारपदार्थ-स्वरूपसाध्याभाववदवृत्तित्वम्' - इत्येवमेव अर्थः 'अव्यभिचरितत्वं न साध्याभाववदवृत्तित्वम्' इत्यर्थापेक्षया ज्यायान् = उपादेयतरः इत्यर्थः । अत्र व्याप्तेः पक्षत्वाङ्गीकारेण, तत्र साध्याभाव-वदवृत्तित्वादिभेदकूटस्य हेतुत्वाङ्गीकारेण च व्याप्तिमुद्दिश्यैव साध्याभाववदवृत्तित्वादिभेदस्य विधानमुचितम् । उद्देश्य-विधेयोपस्थापकपदयोः पौर्वापर्यरूपा आकाङ्क्षा इति नियमेन उद्देश्यवाचकपदस्य पूर्वत्वस्यावश्यकत्वेन 'तत्साध्याभाववदवृत्तित्वं न व्याप्तिः' - इत्यस्य 'व्याप्तिः न अव्यभिचरितत्वस्वरूपसाध्याभाववदवृत्तित्वम्' इति अर्थः कर्तव्यः इति ।

ननु 'अव्यभिचरितत्वं न साध्याभाववदवृत्तित्वम्' इत्यर्थस्य सर्वथाऽसम्भवात् तस्य सर्वथाऽनु-पादेयत्वम् । ततश्च भवतोक्तः एकः एवार्थः अवशिष्यते, तर्हि कस्य अर्थस्य अपेक्षया 'अयमर्थः ज्यायान्' इत्युक्तिः ? ***इति चेत् ?***

सत्यम्; तथापि अग्रे ग्रन्थकृता 'अव्यभिचरितत्वं न साध्याभाववदवृत्तित्वम्' इत्यर्थः समर्थयिष्यते तदा एतत् स्फुटीभविष्यति ।

ननु 'व्याप्तिः न तत्साध्याभाववदवृत्तित्वम्' इत्येवमर्थकरणे तत्पदं निरर्थकं स्यात्, 'व्याप्तिः न साध्याभाववदवृत्तित्वम्' इत्युक्तावपि विवक्षितार्थलाभसम्भवात्, व्याप्तौ साध्याभाववदवृत्तित्वादि-भेदकूटस्य एव हेतुत्वात्, न तु अव्यभिचारपदार्थरूपसाध्याभाववदवृत्तित्वादिभेदकूटस्य हेतुत्व***मिति चेद् ?***

●

★ तत्पदनो प्रयोग शा माटे ? ★

प्रश्न :- जो तत्त्वचिंतामणिकारने आवो ज अर्थ अभिप्रेत होय तो ते तत्पदनो निरर्थक प्रयोग शा माटे करे ? तेमणे **तद्धि** कहेवा द्वारा तत्पदनो प्रयोग न ज कर्यो होत. जे रीते **'न तावद् अव्यभिचरितत्वम्'** आ वाक्यमां तत्पदनो प्रयोग नथी करेल ते ज रीते

मैवम्; तत्पदप्रयोगेण अप्रयोजकत्वशङ्काव्युदासात् । अयमाशयः - अस्माभिः 'अनुमिति-जनकतावच्छेदकः न अव्यभिचरितत्वपदार्थः, साध्याभाववदवृत्तित्वादिभेदकूटवत्त्वाद्' इत्येवम-नुमानमङ्गीकृतम्, तत्र कोऽपि शङ्केत - "अस्तु साध्याभाववदवृत्तित्वादिभेदकूटवत्त्वम्, मास्तु अव्यभिचरितत्वपदार्थभेदवत्त्वम् – तर्हि को दोषः ? 'पर्वतो वह्निमान् धूमाद्' - इत्यादिस्थले 'अस्तु धूमः मास्तु वह्निः ? तर्हि को दोषः ?' इति यद्युच्यते तदा धूम-वह्निकार्यकारणभाव-भङ्गप्रसङ्गलक्षणतर्कः वर्तते इत्यतः उक्तशङ्का निरस्यति, ततः धूमहेतुः वह्नेः प्रयोजकः भवति । अत्र उक्तहेतुः प्रयोजको नास्ति, साध्याभाववदवृत्तित्वादिभेदकूटवत्त्वसत्त्वेऽपि अव्यभिचार-पदार्थभेदवत्त्वाभावे बाधकाभावात् । "यत्राऽनुकूलतर्को नास्ति सोऽप्रयोजकः" (न्या.कु. पृ.३५१) इति **न्यायकुसुमाञ्जलौ उदयनाचार्यः** । पूर्वोक्तकार्य-कारणभावभङ्गादिः अनुकूलतर्कः उच्यते इति ध्येयम् ।" एतादृशशङ्काव्यपोहाय एवं वक्तव्यं यदुत - अत्रापि अनुकूलतर्कोऽस्ति एव। तथा हि - यथा यत्र नील-पीतादियावद्घटाभावः वर्तते तत्र घटसामान्याभावः स्यादेव, यावद्विशेषाभावस्य सामान्याभावप्रयोजकत्वात्, 'यो यदीययावद्विशेषाभाववान् स तत्सामान्याभाववान्' इति व्याप्तेः । तथा प्रकृतेऽपि अव्यभिचरितत्वपदार्थः - साध्याभाववदवृत्तित्वम्, साध्यवद्भिन्न-साध्याभाववदवृत्तित्वम्, साध्यवत्प्रतियोगिकाऽन्योन्याभावाऽसामानाधिकरण्यम्, सकलसाध्याभाव-वन्निष्ठाऽत्यन्ताभावाऽप्रतियोगित्वम्, साध्यवद्भिन्नाऽवृत्तित्वम् - एतद्लक्षणपञ्चकरूपः एव ।

●

આ વાક્યમાં પણ તત્પદનો પ્રયોગ ન જ કરત. પણ, તત્પદનો પ્રયોગ કરેલ છે. એના દ્વારા જણાય છે કે તત્પદ દ્વારા તેમને અવ્યભિચરિતત્વ માન્ય છે. અને આ વાક્ય દ્વારા સાધ્યાભાવવદ્અવૃત્તિત્વનો ભેદ એમને અવ્યભિચરિતત્વમાં પ્રતિપાદિત કરવો છે.

❀ અપ્રયોજકત્વની શંકા દૂર કરવા માટે ❀

ઉત્તર :- (तदा.) અરે ભાઈ ! અમે જે અર્થ જણાવ્યો તે જ બરાબર છે. તેમાં પણ જો તત્પદ ન લખવામાં આવે તો બહુ મોટી તકલીફ પડે. જુઓ - '**व्याप्तिः अव्यभिचरितत्व-पदार्थभिन्ना, साध्याभाववदवृत्तित्वादिभेदकूटवत्त्वात्**' - આ અનુમાનપ્રયોગમાં કોઈ અપ્રયોજકત્વ દોષ આપે. એટલે કે '**अस्तु साध्याभाववदवृत्तित्वादिभेदकूटवत्त्वम्, मास्तु अव्यभिचरितत्वपदार्थभेदः तर्हि को दोषः ?**' આવી રીતે કોઈ પ્રશ્ન કરે તો અનુકૂલ તર્ક શું ? આની સામે કહી શકાય કે સામાન્યાભાવ યાવદ્વિશેષાભાવને વ્યાપક છે. એટલે કે જ્યાં જ્યાં યાવદ્વિશેષાભાવ હોય ત્યાં ત્યાં સામાન્યાભાવ હોય જ. જેમ કે દુનિયામાં પાંચ ઘડા છે - (૧) નીલ ઘટ

यथा घटः नीलघटादिरूपः एव । ततः साध्याभाववदवृत्तित्वादयः अव्यभिचरितत्वपदार्थ-रूपसामान्यस्य विशेषभूताः, यथा वृक्षसामान्यापेक्षया आम्रादयः वृक्षविशेषाः, एवं साध्याभाव-वदवृत्तित्वादीनि लक्षणानि अव्यभिचरितत्वविशेषभूतानि । ततश्च यत्र साध्याभाववदवृत्ति-त्वादिभेदकूटः तत्र अव्यभिचरितत्वभेदोऽपि अङ्गीकार्य एव, यावद्विशेषाभावस्य सामान्या-भावप्रयोजकत्वादिति पूर्वोक्तयुक्तेरेवेति नाऽप्रयोजकत्वं साध्याभाववदवृत्तित्वादिभेदकूटरूपहेतोः। तथा च पूर्वोक्तरीत्या अप्रयोजकत्वशङ्काव्युदासाय साध्याभाववदवृत्तित्वादेरव्यभिचरितत्वविशेषत्व-ज्ञानमावश्यकमिति स्थितम् ।

ननु साध्याभाववदवृत्तित्वादयः अव्यभिचारपदार्थविशेषभूताः इति कथं ज्ञातम् ? मूले तथाऽनुक्तत्वा***दिति चेद् ? न***; तत्पदप्रयोगेणैवोक्तार्थलाभसम्भवात् । मूले 'व्याप्तिः न तत्साध्या-

(२) पीत घट (૩) श्याम घट (४) २क्त घट (५) हरित घट. आ पांचे घडा विशेष कहेवाय. જ્યાં જ્યાં આ પાંચેય વિશેષ ઘડાનો અભાવ હોય ત્યાં ત્યાં ઘટસામાન્યનો અભાવ હોય જ. માટે કહી શકાય કે વિશેષાભાવકૂટને વ્યાપક સામાન્યાભાવ છે. પ્રસ્તુતમાં साध्याभाववद्अवृत्तित्व, साध्यवद्भिन्नसाध्याभाववद्अवृत्तित्व વગેરે પાંચ લક્ષણો વિશેષ છે. अव्यभिचरितत्व सामान्य छे. माटे, જ્યાં જ્યાં વિશેષોના અન્યોન્યાભાવનો કૂટ હોય ત્યાં ત્યાં અવ્યભિચરિતત્વનો અન્યોન્યાભાવ હોય જ. એટલે साध्याभाववद्अवृत्तित्वादि પાંચેય વિશેષોના ભેદકૂટને અવ્યભિચરિતત્વ સ્વરૂપ સામાન્યનો ભેદ વ્યાપક છે. માટે, જો 'જ્યાં જ્યાં साध्याभाववद्अवृत्तित्वादि પાંચ વિશેષોનો ભેદ હોય ત્યાં ત્યાં અવ્યભિચરિતત્વ-સામાન્યનો ભેદ હોય' - આવું ન માનો એટલે કે આને અપ્રયોજક કહો તો સામે અનુકૂલ તર્ક આપી શકાય કે - "**यदि 'यत्र यत्र साध्याभाववदवृत्तित्वादिभेदकूटः तत्र तत्र अव्यभिचरितत्वभेदः' इति न कक्षीक्रियते तर्हि विशेषाभावकूटस्य सामान्याभावव्याप्यत्वं नैव स्यात्।**" આ અનુકૂલ તર્કને આધારે અપ્રયોજકદોષનું નિવારણ થઈ શકે છે.

આ બધી વાતોનું દિક્સૂચન तत्त्वचिंतामणिકારે કરેલ તત્પદના પ્રયોગમાં છૂપાયેલું છે. કારણ કે પૂર્વે જણાવી ગયા તે મુજબ तत्पदनो अर्थ-अव्यभिचरितत्वपदार्थ. તે અવ્ય-भिचरितत्वपदार्थ स्वरूप साध्याभाववद्अवृत्तित्व એ વ્યાપ્તિ નથી. તે જ રીતે અવ્ય-भिचरितत्वपदार्थस्वरूप साध्यवद्भिन्नसाध्याभाववद्अवृत्तित्व એ વ્યાપ્તિ નથી..... આ રીતે અર્થો પ્રાપ્ત થવાથી સૂચિત થાય કે અવ્યભિચરિતત્વપદાર્થ એ સામાન્ય છે અને साध्याभाववद्अवृत्तित्व વગેરે વિશેષ છે. જો તત્પદ ન લખેલ હોત તો અવ્યભિચરિતત્વપદાર્થ

गूढा

तदा सम्बन्धात् साध्याभाववदवृत्तित्वादेरव्यभिचरितत्वविशेषत्वलाभेन प्रकृतानुमानस्य विशेषाभावकूटहेतुकसामान्याभावसाध्यकत्वप्राप्त्या-

●

भाववदवृत्तित्वम्' इत्येवं तत्पदप्रयोगो वर्तते । तत्पदस्य अव्यभिचरितत्वमर्थः, तथा च 'व्याप्तिः न अव्यभिचरितत्वरूपसाध्याभाववदवृत्तित्वम्' - इत्यर्थः फलितः । अनेन साध्याभाववदवृत्तित्वादेः अव्यभिचरितत्वरूपत्वसिद्ध्या अव्यभिचारस्य सामान्यत्वं तद्विशेषत्वं च साध्याभाववदवृत्तित्वादेः सिद्धमेवेत्यतः एव तत्पदप्रयोग उक्तरीत्या अप्रयोजकत्वशङ्काव्युदासाय आवश्यकः इति स्थितमित्याशयेनाह -

य शो ल ता

तदेत्यादि । 'तदा' इतिपदं तत्सर्वनाम्नः तृतीयैकवचनम्, तदा तदे तदः.... इत्यादिरीत्या। ततश्च **तदा सम्बन्धात्** = साध्याभाववदवृत्तित्वादिपदानां तत्पदेन समं सम्बन्धात्, अनेन 'तद्धि न' इतिपदानि सर्वस्मिन्नेव लक्षणे योज्यानि इति सूचितम् । तथा च 'तद्धि न साध्याभाववदवृत्तित्वम्, तद्धि न साध्यवद्भिन्नसाध्याभाववदवृत्तित्वम् .....' इत्यादिरीत्या मूलपाठार्थः ज्ञेयः। **साध्याभाववदवृत्तित्वादेः अव्यभिचरितत्वविशेषत्वलाभेन प्रकृताऽनुमानस्य** = अनुमिति-

●

સ્વરૂપ સાધ્યાભાવવદ્અવૃત્તિત્વ વગેરે છે - તેવું ખબર ન પડત. માટે, તત્પદ લખવું જરૂરી છે. આ તત્પદ લખવાથી અવ્યભિચરિતત્વ સામાન્ય છે - તેવું સૂચિત થશે. અને સાધ્યાભાવવદ્અવૃત્તિત્વ વગેરે તે અવ્યભિચરિતત્વસામાન્યના વિશેષો છે - તેવું સૂચિત થશે. માટે, સાધ્યાભાવવદ્અવૃત્તિત્વ વગેરેનો ભેદકૂટ કે જેને અનુમાનપ્રયોગમાં આપણે હેતુ બનાવ્યો છે તે વિશેષાભાવકૂટ (વિશેષઅન્યોન્યાભાવકૂટ) સ્વરૂપ થશે. અને અવ્યભિચારપદાર્થભેદ કે જેને અનુમાનપ્રયોગમાં આપણે સાધ્ય બનાવેલ છે તે સામાન્યાભાવ (સામાન્યઅન્યોન્યાભાવ) સ્વરૂપ થશે. માટે, પ્રકૃત અનુમાન એ વિશેષાભાવકૂટહેતુક અને સામાન્યાભાવસાધ્યક બનશે. ફલતઃ, આ અનુમાનપ્રયોગમાં અપ્રયોજકત્વ દોષ નહીં આપી શકાય.

વિ ન મ્રા

આ બધાનાં મૂળમાં છે તત્પદનો પ્રયોગ. તત્પદના પ્રયોગ દ્વારા જ આ બધું જ્ઞાત થાય છે. માટે, તત્ત્વચિંતામણિકારે તત્પદનો પ્રયોગ બહુ વિચારીને કરેલો છે.

શબ્દાર્થ :- આ પક્ષમાં પણ (= જે રીતે અનુમિતિજનકતાપક્ષકઅનુમિતિ સ્વીકારનારાઓના પક્ષમાં **तद्धि** આવા વાક્યનો અર્થ કરતી વખતે વ્યાપ્તિપદનું જોડાણ કરેલ તે જ રીતે વ્યાપ્તિપક્ષક અનુમિતિ સ્વીકારનાર પ્રસ્તુત પક્ષમાં પણ) **तद्धि** ઈત્યાદિ વાક્યનો વ્યાપ્તિપદનું જોડાણ કરી 'તે સાધ્યાભાવવદ્અવૃત્તિત્વ એ વ્યાપ્તિ નથી' - આવો અર્થ માનવો જ શ્રેયસ્કર છે,

ऽप्रयोजकत्वव्युदासात् ।

●

जनकतावच्छेदकः न अव्यभिचरितत्वपदार्थः, साध्याभाववदवृत्तित्वादिभेदकूटवत्त्वाद् इतिप्रकृतानुमानस्य **विशेषाभावकूटहेतुकसामान्याभावसाध्यकत्वप्राप्त्या** = 'द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते' इति न्यायेन साध्याभाववदवृत्तित्वादिभेदकूटरूपविशेषाभावकूटहेतुकत्वस्य अव्यभिचरितत्वभेदरूपसामान्याभावसाध्यकत्वस्य च प्राप्त्या **अप्रयोजकत्वव्युदासात्** = अप्रयोजकत्वशङ्काव्युदासात्, पञ्चम्यर्थः हेतुत्वम्, तस्य च 'अर्थः एव ज्यायान्' इत्यत्राऽन्वयः, तदा सम्बन्धात् प्रकृतहेतोरप्रयोजकत्वशङ्काव्युदासेनानुपपत्त्यभावादुक्तः अर्थः एव ज्यायान् इति भावः ।

ननु व्याप्तिपदानुषङ्गं विना 'तद्धि न साध्याभाववदवृत्तित्वम्' इत्यादेः 'अव्यभिचरितत्वं न साध्याभाववदवृत्तित्वम्' इति यथाश्रुतार्थः एव स्वीक्रियताम् ***इति चेद् ? न,*** तथा सति अव्यभिचरितत्वपदानन्तरम् 'अनुमितिजनकताऽवच्छेदकत्वेनाऽभिमतम्' इति पूरणीयम्, तथा च 'अनुमितिजनकतावच्छेदकत्वेनाभिमतमव्यभिचरितत्वं न साध्याभाववदवृत्तित्वम्' इत्येवमर्थः अङ्गीकरणीयः, अन्यथा 'अव्यभिचरितत्वं साध्याभाववदवृत्तित्वरूपम्' इतिसिद्धान्तेऽपि मान्यत्वेन उक्तवाक्यस्य बाधितार्थकत्वापत्तेः । ततश्च अयमर्थः क्लेशेन समर्थनीयः, तदपेक्षया पूर्वोक्तार्थे प्रतिपत्तिसौकर्यम्, ततः स एव ग्राह्यः इति यावत् तात्पर्यम् ।

●

વધુ સારો છે. અહીં પ્રસ્તુતમાં ('**तदा**' એ તત્પદની તૃતીયાવિભક્તિ છે - **तदा, तदे, तदः** ઈત્યાદિ) તત્પદનો સંબંધ થવાને કારણે = તત્પદનો પ્રયોગ કરેલો હોવાને કારણે 'સાધ્યાભાવવદ્-અવૃત્તિત્વ વગેરે અવ્યભિચરિતત્વની અપેક્ષાએ વિશેષસ્વરૂપ છે' - આવું જણાવાથી પ્રસ્તુત '**व्याप्तिः अव्यभिचरितत्वपदार्थभिन्ना, साध्याभाववदवृत्तित्वादिभेदकूटवत्त्वात्**' આવા પ્રકારનો અનુમાનપ્રયોગ વિશેષાભાવકૂટહેતુક અને સામાન્યાભાવસાધ્યક સાબિત થશે. તેથી 'આ વ્યાપ્તિ અપ્રયોજક છે' - આ પ્રમાણે કોઈ અપ્રયોજકત્વની આપત્તિ આપે તો તેનું પણ નિરાકરણ થઈ ગયું. કારણ કે 'વિશેષાભાવકૂટ એ સામાન્યાભાવનો વ્યાપ્ય છે' - આ તર્ક જ 'સાધ્યાભાવવદ્-અવૃત્તિત્વ વગેરેના ભેદનો કૂટ એ અવ્યભિચરિતત્વપદાર્થભેદને વ્યાપ્ય છે' - આવું સાબિત કરી આપશે, અને આવું સાબિત કરવામાં પ્રયોજકનું કામ કરશે તત્પદ !

'**तद्धि न साध्याभाववद्अवृत्तित्वम्**' આ વાક્યનો 'અવ્યભિચરિતત્વપદાર્થ સાધ્યાભાવવદ્-અવૃત્તિત્વસ્વરૂપ નથી' - આવો સીધો અર્થ ન કરતા વ્યાપ્તિપદના અનુસંગથી કેમ અર્થ કરવામાં આવે છે ? હમણાં બતાવ્યો તે અર્થ કરવામાં શું વાંધો ? તે જણાવતા કહે છે કે -

गूढार्थ प्रकाशः

अव्यभिचरितत्वं न साध्याभाववदवृत्तित्वादिस्वरूपम् - इत्यर्थस्तु अव्यभिचरितत्वमित्यनन्तरम् अनुमितिजनकतावच्छेदकत्वेनाभिमतम् इत्यस्य पूरणेन क्लेशेन समर्थनीयः ।

●

एतदेवोपदर्शयति - '**अव्यभिचरितत्वं न साध्याभाववदवृत्तित्वादिस्वरूपम्**' - **इत्यर्थस्तु** '**अव्यभिचरितत्वम्**' **इत्यस्याऽनन्तरम्** '**अनुमितिजनकताऽवच्छेदकत्वेन अभिमतम्**' **इत्यस्य पूरणेन क्लेशेन** = तादृशपूरणरूपक्लेशेन पूरणजन्यात्मगतदुःखरूपक्लेशेन वा **समर्थनीयः**, तथा च 'अव्यभिचरितत्वमनुमितिजनकताऽवच्छेदकत्वेनाऽभिमतं न साध्याभाववदवृत्तित्वादिस्वरूपम्'

●

❀ अव्यभिचरितत्वमां साध्या.....नो भेद रही शके ? ❀

(**अव्य.**) 'अव्यभिचरितत्व साध्याभाववद्अवृत्तित्वस्वरूप नथी' - आवो अर्थ करवो होय तो उक्तवाक्यमां 'अनुमितिजनकताअवच्छेदक तरीके अभिमत' - आटलुं उमेरवुं पडे. एटले के 'अनुमितिजनकताअवच्छेदक तरीके अभिमत एवुं अव्यभिचरितत्व ए साध्याभाववद्अवृत्तित्वस्वरूप नथी' - आ प्रमाणे वाक्य बनाववुं पडे. आवुं करवामां वधारे तकलीफ पडे छे. क्लेशथी आ अर्थनुं समर्थन करवुं पडे. जो अमे कह्युं एटलुं उमेरवामां न आवे तो अर्थ थाय - 'अव्यभिचरितत्व साध्याभाववद्अवृत्तित्व स्वरूप नथी.' ज्यारे नैयायिक वगेरेना सिद्धांतमां पण अव्यभिचरितत्व = साध्याभाववद्अवृत्तित्व ए तो मान्य ज छे. अव्यभिचरितत्वमां साध्याभाववद्अवृत्तित्वरूपता सिद्धान्तमतमां पण स्वीकृत ज छे. माटे, साध्याभाववद्अवृत्तित्वना भेदनुं ज्ञान अव्यभिचरितत्वमां थई ज न शके. एटले 'अव्यभिचरितत्व साध्याभाववद्अवृत्तित्व स्वरूप नथी' - आवा अर्थवाळुं **तद्धि न** ईत्यादि वाक्य असंगत थई जवानी आपत्ति आवे. जे रीते दुनियामां गेरहाजर एवी वस्तुनुं अवगाहन करनार '**शशशृङ्गं समस्ति**' - आवुं वचन असंगत छे ते ज रीते अव्यभिचारपदार्थनिष्ठसाध्याभाववद्अवृत्तित्वभेदनुं प्रतिपादन करनार = जे भेद दुनियामां क्यांय प्रसिद्ध ज नथी तेवा भेदनुं प्रतिपादन करनार **तद्धि न**... ईत्यादि तत्त्वचिंतामणिनुं वचन असंगत थवानी आपत्ति आवे ज. माटे, 'अनुमितिजनकताअवच्छेदकत्वरूपे अभिमत' - आटलुं उमेरवुं ज पडे.

जो आवुं पूरवामां आवे तो 'अनुमितिजनकताअवच्छेदक रूपे तमने अभिमत अव्यभिचरितत्व साध्याभाववद्अवृत्तित्वस्वरूप नथी' - आवा प्रकारनो **तद्धि न** ईत्यादि

अन्यथा अव्यभिचरितत्वे साध्याभाववदवृत्तित्वादिरूपतायाः सिद्धान्तेऽपि सत्त्वेन तद्भिन्नत्वस्य प्रतिपत्त्यसम्भवेनाऽसङ्गत्यापत्तेः ।

●

इत्येवमर्थः वक्तव्यः, **अन्यथा** = एवमर्थाऽनभ्युपगमे 'अव्यभिचरितत्वं न साध्याभाववदवृत्तित्वादिस्वरूपम्' - इत्येवमेवाऽर्थाभ्युपगमे **अव्यभिचरितत्वे साध्याभाववदवृत्तित्वादिरूपतायाः सिद्धान्तेऽपि सत्त्वेन** = नैयायिकानामपि साध्याभाववदवृत्तित्वादिरूपत्वस्य अव्यभिचरितत्वे मान्यत्वेन, यथा पूर्वपक्षमते अव्यभिचरितत्वे तादृशत्वमस्ति तथा उत्तरपक्षमतेऽपि इत्यप्यर्थः। **तद्भिन्नत्वस्य** = अव्यभिचरितत्वे साध्याभाववदवृत्तित्वादिभेदस्य **प्रतिपत्त्यसम्भवेन** = बोधाऽसम्भवेन उक्तवाक्यस्य **असङ्गत्यापत्तेः** ।

●

वाक्यनो अर्थ नीकळे. आवा अर्थमां वांधो नथी. कारण के केवलान्वयी स्थळमां अव्याप्ति आवती होवाने कारणे साध्याभाववद्अवृत्तित्व वगेरे व्याप्ति स्वरूप नहीं ज बनी शके. माटे, साध्याभाववद्अवृत्तित्व वगेरे अनुमितिजनकताअनवच्छेदक बने. पोते अनुमितिजनकताअनवच्छेदक होय एटले अनुमितिजनकताअवच्छेदक जे जे बनता होय तेमां पोतानो भेद रहे ज. तमे अनुमितिजनकताअवच्छेदकस्वरूप अव्यभिचरितत्वने मानो छो. ज्यारे साध्याभाववद्अवृत्तित्व अनुमितिजनकताअनवच्छेदकस्वरूप छे. अनुमितिजनकताअनवच्छेदकनो भेद अनुमितिजनकताअवच्छेदकमां रहे ज ने ? एटले साध्याभाववद्अवृत्तित्वनो भेद अनुमितिजनकताअवच्छेदक तरीके अभिमत अव्यभिचरितत्वमां सारी रीते ग्राह्य बनशे. तेनुं ज्ञान सरळताथी थई जशे.

आ रीते 'अव्यभिचरितत्व ए साध्याभाववद्अवृत्तित्व स्वरूप नथी' - आ अर्थनुं समर्थन 'अनुमितिजनकताअवच्छेदकतया अभिमत' - आटलुं उमेरीने क्लेशथी करी शकाय तेम छे. एना करता व्याप्तिपदना अनुषंगथी जे 'अव्यभिचरितत्वस्वरूपसाध्याभाववद्अवृत्तित्व ए व्याप्ति नथी' - आवो अर्थ बताव्यो ते वधु व्याजबी छे. तथा तेना द्वारा जे अनुमानप्रयोग फलित थाय छे ते पण लघु अने सरळ छे.

शब्दार्थ :- 'अव्यभिचरितत्व ए साध्याभाववद्अवृत्तित्वादिस्वरूप नथी' - आवा प्रकारनो अर्थ तो अव्यभिचरितत्वपद पछी 'अनुमितिजनकताअवच्छेदकतया अभिमत' - आटलुं उमेरीने क्लेशथी समर्थन करवा योग्य छे. जो आवुं उमेरो नहीं तो अव्यभिचरितत्वमां साध्याभाववद्अवृत्तित्वरूपता सिद्धान्तमां पण स्वीकृत होवाने कारणे अव्यभिचरितत्वमां साध्याभाववद्अवृत्तित्वभिन्नत्वनो बोध थवो असंभवित होवाथी **तद्धि**

गू ढा य शो ल ता वि ना मा

गू ढा *पूरणे तु केवलान्वयिन्यभावात्साध्याभाववदवृत्तित्वादेरनुमिति-जनकतानवच्छेदकतया तादृशस्य तस्य भेदोऽनुमितिजनकतावच्छेदक-त्वेनाभिमते सुग्रहः ।*

●

ननु 'अनुमितिजनकताऽवच्छेदकत्वेनाऽभिमतम् अव्यभिचरितत्वं न साध्याभाववदवृत्तित्वादि-स्वरूपम्' इत्यर्थाङ्गीकारेऽपि साध्याभाववदवृत्तित्वादिभेदः अव्यभिचरितत्वे कथं नु स्यात् ? तस्य साध्याभाववदवृत्तित्वादिरूपत्वात्, भवदुक्तरीत्या सिद्धान्ते तथैव सम्मतत्वा**च्चेति चेद्** ? ***न;*** यतः केवलान्वयिन्यभावादिति वक्ष्यमाणहेतुना साध्याभाववदवृत्तित्वादिकमनुमितिजनकताऽ-वच्छेदकं नास्तीति स्पष्टं निश्चीयते । ततः अनुमितिजनकताऽवच्छेदकं यद् यत् तत्र तत्र साध्याभाववदवृत्तित्वादेः भेदः स्यादेव, ततश्च यदि अव्यभिचरितत्वम् अनुमितिजनकतावच्छेद-य कत्वेनाऽभिमतं तर्हि तत्राऽपि साध्याभाववदवृत्तित्वादेः भेदः स्यादेव । एवञ्च 'अनुमितिजनकता-शो वच्छेदकत्वेनाऽभिमतमव्यभिचरितत्वं न साध्याभाववदवृत्तित्वादिस्वरूपम्' इतिवाक्याद् अनुमितिजनक-ल तावच्छेदकीभूते अव्यभिचरितत्वे साध्याभाववदवृत्तित्वादिभेदः सुखेन गृह्यते, अव्यभिचरितत्वपदा-ता र्थत्वेनाऽपार्थक्येऽपि अनुमितिजनकतावच्छेदकत्वेन पार्थक्यस्याऽवश्यमङ्गीकार्यत्वाद् इत्याशयेनाह - **पूरणे तु** = 'अव्यभिचरितत्वम्' इतिपदानन्तरम् 'अनुमितिजनकतावच्छेदकत्वेनाऽभिमतम्' इत्यस्य पूरणे तु = 'अनुमितिजनकतावच्छेदकत्वेनाऽभिमतम् अव्यभिचरितत्वं न साध्याभाववदवृत्ति-त्वादिस्वरूपम्' इत्याद्यर्थाऽभ्युपगमे तु **केवलान्वयिन्यभावात्** = केवलान्वयिस्थले साध्याभाववद-वृत्तित्वादिलक्षणस्य अप्रसिद्धत्वात् **साध्याभाववदवृत्तित्वादेरनुमितिजनकतानवच्छेदकतया तादृशस्य** = अनुमितिजनकतानवच्छेदकस्य **तस्य** = साध्याभाववदवृत्तित्वादेः **भेदः अनुमितिजनकतावच्छेद-कत्वेनाऽभिमते** कस्मिंश्चिदपि **सुग्रहः**, किं पुनः अव्यभिचरितत्वे इति भावः ।

●

न ઈત્યાદિ વાક્ય અસંગત બની જવાની આપત્તિ આવે. જો 'અનુમિતિજનકતાઅવચ્છેદકતયા અભિમત' - આટલું ઉમેરવામાં આવે તો કેવલાન્વયી સ્થલમાં સાધ્યાભાવવદ્અવૃત્તિત્વનો વि અભાવ હોવાને કારણે એટલે કે કેવલાન્વયી સ્થલમાં સાધ્યાભાવવદ્અવૃત્તિત્વલક્ષણની ना અવ્યાપ્તિ આવતી હોવાને કારણે સાધ્યાભાવવદ્અવૃત્તિત્વ વગેરે અનુમિતિજનકતાઅનવચ્છેદક બનતા અનુમિતિજનકતાઅનવચ્છેદક એવા સાધ્યાભાવવદ્અવૃત्तित्वનો ભેદ અનુમિતિજનકતા-भ्रा અવચ્છેદક તરીકે અભિમત અવ્યભિચરિતત્વમાં સારી રીતે જ્ઞેય બનશે. સુખેથી એનું જ્ઞાન થઈ શકશે.

ननु अस्तु उक्तवाक्यम् अनवद्यार्थकम्, किन्तु तेन को लाभः ? 'अनुमितिजनकताऽवच्छेदकं न तत्साध्याभाववदवृत्तित्वादिस्वरूपम्' - इत्यर्थकरणे साध्याभाववदवृत्तित्वादेः अनुमितिजनकताऽनवच्छेदकत्वसिद्ध्या अव्यभिचरितत्वमपि तथा सिध्यति, किन्तु 'अनुमितिजनकतावच्छेदकत्वेनाऽभिमतम् अव्यभिचरितत्वं न साध्याभाववदवृत्तित्वम्' इत्यर्थमभ्युपगम्य अनुमितिजनकताऽवच्छेदकत्वेनाभिमते अव्यभिचरितत्वे साध्याभाववदवृत्तित्वादिभेदसाधने को लाभः ? ***इति चेद् ? न,*** भवतोक्तलाभस्यैव सम्भवात् । तथा हि - अनुमितिजनकताऽवच्छेदकत्वेनाऽभिमतम् अव्यभिचरितत्वं न साध्याभाववदवृत्तित्वादिस्वरूपम् - इत्यर्थाभ्युपगमे साध्याभाववदवृत्तित्वादिस्वरूपम् अव्यभिचरितत्वं न अनुमितिजनकताऽवच्छेदकम् इति सिध्यति, यद् भवता अनुमितिजनकतावच्छेदकत्वेनाऽभिमन्यते तदव्यभिचरितत्वं साध्याभाववदवृत्तित्वादिरूपं न सम्भवति, साध्याभाववदवृत्तित्वादेः पूर्वोक्तयुक्त्या अनुमितिजनकताऽनवच्छेदकत्वात् । अव्यभिचरितत्वं साध्याभाववदवृत्तित्वादितोऽतिरिक्तं नास्ति एव । ततश्च अनुमितिजनकताऽवच्छेदकत्वेनाभिमतम् अव्यभिचरितत्वमेव गगनारविन्दसोदरम्, यच्च साध्याभाववदवृत्तित्वादिरूपं तदव्यभिचरितत्वम् अनुमितिजनकताऽनवच्छेदकमेव सिध्यति, साध्याभाववदवृत्तित्वादेरनुमितिजनकताऽनवच्छेदकत्वादित्येवम् अव्यभिचरितत्वमुक्तवाक्यादनुमितिजनकताऽनवच्छेदकरूपं सिध्यति, अनुमितिजनकतावच्छेदकत्वेनाऽव्यभिचरितत्वस्य साध्याभाववदवृत्तित्वभिन्नत्वोक्तौ साध्याभाववदवृत्तित्वादिभेदकूटः अनुमितिजनकतावच्छेदके पर्यवस्यत्येवेति न उक्तवाक्यमनर्थकमिति एवं निष्कर्षमुपदर्शयन्नाह -

●

(**तथा.**) એટલે ફલિત એ થયું કે - અવ્યભિચરિતત્વ કે જેને તમે અનુમિતિજનકતાઅવચ્છેદક સ્વરૂપ માનો છો તે સાધ્યાભાવવદ્અવૃત્તિત્વસ્વરૂપ ન સંભવે, સાધ્યવદ્ભિન્નસાધ્યાભાવવદ્અવૃત્તિત્વસ્વરૂપ પણ ન સંભવે, સાધ્યવત્પ્રતિયોગિકઅન્યોન્યાભાવઅસામાનાધિકરણ્યસ્વરૂપ પણ ન સંભવે, સકલસાધ્યવન્નિષ્ઠઅત્યંતાભાવપ્રતિયોગિત્વસ્વરૂપ પણ ન સંભવે અને સાધ્યવદ્ભિન્નઅવૃત્તિત્વસ્વરૂપ પણ ન સંભવે. બીજી બાજુ આ પાંચથી અતિરિક્ત કોઈ અવ્યભિચરિતત્વપદાર્થ છે જ નહીં કે જેને તમે અનુમિતિજનકતાઅવચ્છેદક સ્વરૂપ માની શકો. આમ, સાધ્યાભાવવદ્અવૃત્તિત્વ વગેરેનો ભેદ જ્યારે અનુમિતિજનકતાઅવચ્છેદકમાં હોય ત્યારે અવ્યભિચરિતત્વનો પણ ભેદ અનુમિતિજનકતાઅવચ્છેદકમાં આવી જ જાય. આમ, અવ્યભિચરિતત્વ પણ વ્યાપ્તિ નથી - આવું સિદ્ધ થશે. આ પ્રમાણે પ્રસ્તુતમાં ભાવ છે.

शब्दार्थ :- તેથી વાસ્તવમાં અવ્યભિચરિતત્વ સાધ્યાભાવવદ્અવૃત્તિત્વ વગેરેથી

गूढार्थ *तथा चाव्यभिचरितत्वस्य साध्याभाववदवृत्तित्वाद्यतिरिक्तविधया अभावेन तेषां भेदस्यानुमितिजनकतावच्छेदके पर्यवसितत्वेऽव्यभिचरितत्वभेदः सिद्ध्यतीति भावः ।*

●

तथा च अव्यभिचरितत्वस्य साध्याभाववदवृत्तित्वाद्यतिरिक्तविधया अभावेन तेषां = साध्याभाववदवृत्तित्वादिलक्षणानां **भेदस्य अनुमितिजनकतावच्छेदके पर्यवसितत्वे** अनुमिति-

या जनकताऽवच्छेदके **अव्यभिचरितत्वभेदः सिध्यतीति भावः** इति ।

शो ***ननु*** 'केवलान्वयिनि अभावाद्' इत्यस्य प्रकृतपक्षे कोऽर्थः ? यथा 'तद्धि न' इत्यादेः यथाश्रुतार्थः गृहीतः तथाऽत्रापि किं यथाश्रुतः एवार्थः ? तथा सति सिद्ध्यसिद्धिभ्यां व्याघातः ।

ल तथा हि - केवलान्वयिस्थले किं साध्याभाववदवृत्तित्वं प्रसिद्धम् ? अप्रसिद्धं वा ? प्रसिद्धं

ता चेत् ? तदा कथं केवलान्वयिनि तस्य अप्रसिद्धिः उद्घोष्यते ? तल्लक्षणं निर्दुष्टमेव स्यात् । अप्रसिद्धं चेत् ? कथं तदभावः कथयितुं शक्यते ? तदभावस्य अप्रसिद्धप्रतियोगिकत्वात्, न हि अप्रसिद्धप्रतियोगिकोऽभावः केनाऽपि व्यवह्रियते इत्येवं सिद्ध्यसिद्धिभ्यामुभयथाऽपि व्याघातः

●

અતિરિક્ત ન હોવાને કારણે સાધ્યાભાવવદ્અવૃત્તિત્વાદિ પાંચનો ભેદ અનુમિતિજનકતા-અવચ્છેદકમાં સિદ્ધ થાય એટલે અવ્યભિચરિતત્વનો ભેદ પણ અનુમિતિજનકતાઅવચ્છેદકમાં સિદ્ધ થઈ જ જાય. આમ, અવ્યભિચરિતત્વ અનુમિતિજનકતાઅવચ્છેદક નથી - આવું સિદ્ધ થઈ જશે. આ પ્રમાણે પ્રસ્તુતમાં ભાવ છે.

❀ કેવલાન્વયીનો અર્થ પૂર્વે બતાવ્યો તે જ ❀

વિ **પ્રશ્ન :-** ચલો ભાઈ ! '**व्याप्तिः अव्यभिचरितत्वपदार्थभिन्ना, साध्याभाववदवृत्तित्वादिभेद-कूटवत्त्वात्**' - આ અનુમાનપ્રયોગ પણ સ્વીકાર્યો અને '**तद्धि न साध्याभाववदवृत्तित्वम्**' ઈત્યાદિ

ल પંક્તિનો તમે બતાવેલ અર્થ પણ માન્યો. કિંતુ હવે પ્રશ્ન છે અમારો '**केवलान्वयिनि अभावात्**'

प्रा - આ પંક્તિ માટે. આ પંક્તિનો અર્થ શું ? 'સાધ્યાભાવવદ્અવૃત્તિત્વનો અભાવ કેવલાન્વયિસ્થલમાં છે' - આવો જ અર્થ કરશો ને ? એટલે કે કેવલાન્વયિસ્થલીયહેતુમાં સાધ્યાભાવવદ્અવૃત્તિત્વનો અભાવ છે. આ અભાવનો પ્રતિયોગી થાય - સાધ્યાભાવવદ્-અવૃત્તિત્વ. આ સાધ્યાભાવવદ્અવૃત્તિત્વસ્વરૂપ પ્રતિયોગી એટલે કે '**सर्वं ज्ञेयम्, वाच्यत्वात्**' આવા પ્રકારના કેવલાન્વયી સ્થળને આશ્રયીને જ્ઞેયત્વાભાવવદ્અવૃત્તિત્વ પ્રસિદ્ધ છે કે અપ્રસિદ્ધ ? જો પ્રસિદ્ધ હોય તો પછી જ્ઞેયત્વાભાવવદ્અવૃત્તિત્વ જ વાચ્યત્વ નામના હેતુમાં જશે, એનો અભાવ નહીં જાય. જો 'જ્ઞેયત્વાભાવવદ્અવૃત્તિત્વ અપ્રસિદ્ધ જ છે. કારણ કે

केवलान्वयिन्यभावादिति *तूक्तार्थकमेव,*

●

= अभिप्रेतार्थाऽसिद्धिः इत्याशङ्कायामाह - **केवलान्वयिन्यभावादिति तूक्तार्थकमेव**, तुकारेण विशेषः द्योतितः, यथा 'तद्धि न' इत्यादेः यथाश्रुतार्थः गृहीतः तथा नाऽत्र यथाश्रुतार्थः ग्रहीतव्यः,

●

तद्घटकीभूत ज्ञेयत्वाभाव अप्रसिद्ध छे' - आवुं कहेशो तो 'ज्ञेयत्वाभाववद्अवृत्तित्वनो अभाव केवलान्वयिस्थलीयहेतुमां रहे छे' - आवुं नहीं कही शकाय. कारण के जे रीते शशशृंगनो अभाव क्यांय कही न शकाय ते रीते अप्रसिद्ध एवा ज्ञेयत्वाभाववद्अवृत्तित्वनो अभाव पण केवी रीते कही शकाय ? कारण के अभाव योग्यप्रतियोगिक ज होय, अप्रसिद्ध-प्रतियोगिक अभाव न होय. आम, 'केवलान्वयिस्थलमां साध्याभाववद्अवृत्तित्वनो अभाव छे' - आवा अर्थवाळुं '**केवलान्वयिन्यभावात्**' वाक्य असंगत बनी जशे.

सिद्धि के असिद्धि ? उभयथा व्याघात

उत्तर :- (केव.) '**केवलान्वयिन्यभावात्**' आवा वाक्यनो अर्थ अमे पहेला बतावी गया ते ज छे. मतलब के केवलान्वयित्वज्ञानउत्तरकालीनअनुमितिजनक ज्ञानमां जे विषयिता आवे तेमां साध्याभाववद्अवृत्तित्वनिरूपितत्वनो अभाव छे. साध्याभाव ईत्यादि पदार्थो परस्परोपश्लिष्ट लेवाना. मतलब के ज्ञेयत्वनिरूपितअभावनिरूपितअधिकरणनिरूपित-अवृत्तित्व - आ रीते परस्पर निरूप्य-निरूपकभावआपन्न एवा साध्याभाववद्अवृत्तित्वना निरूपितत्वनो अभाव अनुमितिजनकज्ञानमां आवशे ज. आवो अर्थ करवामां हवे कोई बाध नथी. माटे ज तमे जे विकल्पो आप्या हता के साध्याभाववद्अवृत्तित्व प्रसिद्ध छे के नहीं ? उभयथा तकलीफ पडशे - आ वात प्रस्तुतमां लागु नहीं पडे. अमारी वातनो तेना द्वारा व्याघात नहीं थाय. प्रस्तुतमां एक वस्तु ध्यानमां राखवी के ज्ञेयत्वाभाववद्अवृत्तित्व એ क्यांय पण प्रसिद्ध नथी. किंतु ज्ञानमां तो ज्ञेयत्वाभाववद्अवृत्तित्व भासी ज शके छे. जेम के कोईने ज्ञान थयुं के '**ज्ञेयत्वाभाववदवृत्तित्वं न कुत्राऽपि वर्तते**' आ ज्ञाननी विषयिता ज्ञेयत्वाभाववद्अवृत्तित्वथी निरूपित थई. किंतु जे केवलान्वयिअनुमितिजनक ज्ञान छे के 'वाच्यत्वसमानाधिकरणअत्यंताभावअप्रतियोगिज्ञेयत्वसमानाधिकरणवाच्यत्ववान् सर्वपदार्थ' - आ ज्ञाननिष्ठविषयिता तो साध्याभाववद्अवृत्तित्व = ज्ञेयत्वाभाववद्अवृत्तित्वथी निरूपित न ज होय. आम, ज्ञेयत्वाभाववद्अवृत्तित्वनिरूपितत्व जे '**ज्ञेयत्वाभाववदवृत्तित्वं न कुत्राऽपि वर्तते**' ईत्यादि ज्ञाननिष्ठविषयितामां वर्तमान छे तेनो अभाव केवलान्वयिस्थलीय-अनुमितिजनकज्ञाननिष्ठविषयितामां रहेवो जोईએ. जे रहे ज छे. आम, ज्ञेयत्वाभाववद्-अवृत्तित्वनिरूपितत्वाभाव प्रसिद्धप्रतियोगिक बनवाने कारणे कोई आपत्ति नहीं आवे.

गू या शो

वि ना भ्रा

तेन न साध्याभाववदवृत्तित्वसिद्ध्यसिद्धिभ्यां व्याघात **इति दिक्** ।।

●

किन्तु उक्तार्थः ग्रहीतव्यः इति । एवञ्च यथाश्रुतार्थव्यवच्छेदकः एवकारोऽपि सार्थकः । 'केवलान्वयिनि = केवलान्वयित्वग्रहोत्तरकालीनाऽनुमितिजनकज्ञाने साध्याभाववदवृत्तित्वादिनिरूपित-विषयिताया अभावाद्' इति पूर्वोक्तोऽर्थः अत्राऽनुसन्धेयः । तत्प्रयोजनमाह - **तेन** = यथाश्रुतार्थपरि-त्यागपूर्वकोक्तार्थग्रहणेन **न साध्याभाववदवृत्तित्वसिद्ध्यसिद्धिभ्यां व्याघातः**, उक्तार्थे साध्याभाववद-वृत्तित्वादिनिरूपितविषयितायाः अन्यत्र प्रसिद्धायाः एव अभावस्य केवलान्वयित्वग्रहोत्तरकालीनाऽ-नुमितिजनकज्ञाने स्वीकारादिति न कोऽपि दोषः **इति दिक्** ।

दिक्शब्दः 'प्रस्तुतार्थे बहु वक्तव्यं तत्तु विस्तारादिभयान्नात्रोच्यते अनया दिशा तत्स्वयमूह्यम्' इति सूचनाय ।

अत्र दिक्शब्दद्योतितः परामर्शः लेशतः दर्श्यते । 'न तावद् अव्यभिचरितत्वम्' इत्यादि-मूलवाक्यानामर्थः ***कैश्चिद् एवं वर्ण्यते*** - "न तावद् अव्यभिचरितत्वम् - इत्यादिमूलवाक्ये अव्यभिचरितत्वभेदस्याऽनुयोगिनो वाचकं पदमेव नास्तीति अतः 'ननु अनुमितिहेतुव्याप्तिज्ञाने

●

આ રીતે એક પ્રકરણ સંપૂર્ણ થયું, હજુ આ દિશામાં ઘણું ઘણું વિચારી શકાય છે - તે સૂચવવા માટે ગ્રંથકારે **'दिक्'** શબ્દનો પ્રયોગ કર્યો છે.

❁ व्याघातनुं विसर्जन ❁

शब्दार्थ :- 'केवलान्वयिन्यभावात्' આ વાક્યનો અર્થ તો પહેલા જે જણાવ્યો તે જ સમજવો. મતલબ કે કેવલાન્વયિત્વગ્રહઉત્તરકાલીનઅનુમિતિજનકજ્ઞાનનિષ્ઠવિષયિતામાં સાધ્યાભાવવદ્અવૃત્તિત્વ વગેરેથી નિરૂપિતત્વનો અભાવ છે - આ પ્રમાણે અર્થ સમજવો. આવો અર્થ કરવાથી 'સાધ્યાભાવવદ્અવૃત્તિત્વનો કેવલાન્વયિસ્થલીયહેતુમાં અભાવ છે' - અહીં 'સાધ્યાભાવવદ્અવૃત્તિત્વ સિદ્ધ છે કે અસિદ્ધ છે ?' - આ બે વિકલ્પ ઉપસ્થિત થાય. આ બન્ને વિકલ્પોથી તમે જે અર્થ કર્યો તેમાં વ્યાઘાત આવશે. માટે, કેવલાન્વયિસ્થલીય હેતુમાં સાધ્યાભાવવદ્અવૃત્તિત્વનો અભાવ છે - આવું કહી નહીં શકાય - ઉક્ત અર્થ સ્વીકારતા આવું કોઈ કહે તો પણ કોઈ વાંધો નથી. કારણ કે અમે જે અર્થ સ્વીકાર્યો છે તેમાં કોઈ વ્યાઘાતને અવકાશ નથી.

આ દિશામાં હજુ ઘણું ચિંતન કરી શકાય છે. તે સૂચવવા માટે **'दिक्'** શબ્દનો પ્રયોગ ગ્રન્થકારશ્રીએ કર્યો છે.

का व्याप्तिः ?' इत्येतत्प्रश्नवाक्यस्थं व्याप्तिपदमत्र वाक्ये अनुषञ्जनीयम् । 'प्रश्नवाक्योद्देश्यम् उत्तरवाक्ये विधेयं भवति' - इति नियमस्तु अस्माभिः नाङ्गीक्रियते । तथा च 'न तावद्' इत्यादिवाक्याऽनुसारिणि अनुमानेऽपि व्याप्तिरेव पक्षः । अव्यभिचरितत्वम् = अव्यभिचरितत्वपद-प्रतिपाद्यम् । 'तद्धि न साध्याभाववदवृत्तित्वम्' इत्यादेः अपि व्याप्तिपदानुषङ्गात्, 'तद्धि न' इत्यस्य सर्वेषु लक्षणेषु योजनाच्च 'अनुमितिजनकतावच्छेदकं न साध्याभाववदवृत्तित्वं तद् = अव्यभिचरितत्वशब्दप्रतिपाद्यम्' इत्येवमर्थः, ततश्चैवमनुमानं भवति - व्याप्तिः अव्यभिचरितत्व-शब्दप्रतिपाद्यभिन्ना, साध्याभाववदवृत्तित्वरूपाऽव्यभिचरितत्वशब्दप्रतिपाद्यभेद-साध्यवद्भिन्नसाध्या-भाववदवृत्तित्वरूपाऽव्यभिचरितत्वशब्दप्रतिपाद्यभेद-साध्यवत्प्रतियोगिकाऽन्योन्याभावाऽसामानाधिक-रण्यरूपाऽव्यभिचरितत्वशब्दप्रतिपाद्यभेद-सकलसाध्याभाववन्निष्ठाभावप्रतियोगित्वरूपाऽव्यभिचरितत्व-शब्दप्रतिपाद्यभेद-साध्यवद्भिन्नाऽवृत्तित्वरूपाऽव्यभिचरितत्वशब्दप्रतिपाद्यभेदकूटवत्त्वात् । न चाऽत्र हेतुरप्रयोजकः, यावद्विशेषाभावस्य सामान्याभावप्रयोजकत्वेन यावद्विशेषाऽन्योन्याभावरूपहेतोः सामान्याभावरूपसाध्यप्रयोजकत्वसिद्धेः ।

ननु किमिदं पक्षतावच्छेदकं व्याप्तित्वम् ? न तावद् हेतुव्यापकसाध्यसामानाधिकरण्यत्व-रूपम्, हेतुव्यापकसाध्यसामानाधिकरण्यत्वावच्छिन्ने अव्यभिचरितत्वशब्दप्रतिपाद्यभेदस्य उभयवादि-सम्मततया सिद्धसाधनप्रसङ्गात् । साध्याभाववदवृत्तित्वत्वादिरूपं पक्षतावच्छेदकम् इत्यपि वक्तुं न शक्यते, साध्याभाववदवृत्तित्वत्वावच्छिन्ने अव्यभिचरितत्वशब्दप्रतिपाद्यभेदविरहेण साध्यस्य पक्षेऽवृत्तित्वाद्बाधापत्तेः, न हि साध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नम् अव्यभिचरितत्वशब्दप्रति-पाद्यभिन्नम् ।

किञ्च, 'न तावद् अव्यभिचरितत्वम्, तद्धि न साध्याभाववदवृत्तित्वम्' इत्यादिना एकमनुमानं सूच्यते, 'केवलान्वयिनि अभावाद्' इत्येवं हेतुवाक्यानुसारि अन्यदपि अनुमानं कर्तव्यम् । तथा च 'व्याप्तिः अव्यभिचरितत्वशब्दप्रतिपाद्यभिन्ना, साध्याभाववदवृत्तित्वादिरूपाऽव्यभिचरितत्व-शब्दप्रतिपाद्यभेदकूटवत्त्वात्', 'व्याप्तिः साध्याभाववदवृत्तित्वादिरूपाऽव्यभिचरितत्वशब्दप्रतिपाद्य-भेदकूटविशिष्टा, केवलान्वयिनि अभावाद्' - इत्येवमनुमानद्वितयं सूच्यते । तत्र यथा प्रथममनुमानं न सम्भवति तथा द्वितीयमपि न सङ्गच्छते, यतः अत्र व्याप्तित्वं हेतुव्यापकसाध्यसामानाधिक-रण्यत्वरूपं गृह्यते तदा स्वरूपासिद्धिः, हेतुव्यापकसाध्यसामानाधिकरण्यस्य पक्षत्वेन तत्र 'केवला-न्वयिनि अभावाद्' इतिहेतोः असत्त्वात्, सिद्धान्तव्याप्तेः केवलान्वयिनि प्रसिद्धत्वात् । यदि

च साध्याभाववदवृत्तित्वत्वादिरूपं व्याप्तित्वमङ्गीक्रियते तदा साध्याभाववदवृत्तित्वे तादृशभेदकूट-विरहाद् बाधः दुर्निवारः, एवमेकमपि अनुमानं न सङ्गच्छते ।

यस्तु "ननु अतः एव अस्माभिः उच्यते - अव्यभिचरितत्वं पक्षीकृत्य व्याप्तिभेदः साधनीयः, एवमङ्गीकारे प्रश्नवाक्योद्देश्यस्य उत्तरवाक्ये विधेयत्वनियमोऽपि अखण्डितो भवेत् । तथा च 'अव्यभिचरितत्वं न व्याप्तिः, साध्याभाववदवृत्तित्वादिभेदकूटवत्त्वाद्' इत्येवमेवानुमानं स्वीकार्यम् ।

अथ अव्यभिचरितत्वस्य पक्षत्वे पक्षताऽवच्छेदकमननुगतं स्यात्, अव्यभिचरितत्वत्वस्य साध्याभाववदवृत्तित्वत्वादिरूपत्वेनाऽननुगतत्वात् । ***न चा***ऽननुगतमेव पक्षतावच्छेदकं भवतु को दोषः ? ***इति वाच्यम्;*** साध्याभाववदवृत्तित्वत्वरूपाऽव्यभिचरितत्वत्वावच्छिन्ने उक्ताऽनुमानेन व्याप्तित्वशङ्कानिरासेऽपि साध्यवद्भिन्नसाध्याभाववदवृत्तित्वत्वादिरूपाऽव्यभिचरितत्वत्वावच्छिन्ने व्याप्तित्वशङ्काऽनिरासात्, अव्यभिचरितत्वत्वस्य अननुगतत्वात् । ***न चा***ऽव्यभिचरितत्वपदं व्याप्तिपञ्चकपरम्, तथा च अव्यभिचरितत्वपदेन पञ्चाऽपि लक्षणानि बोध्यन्ते, ततः अव्यभिचरित-त्वत्वस्य एकस्याऽभावेऽपि अव्यभिचरितत्वपदेन एव लक्षणपञ्चकग्रहणान्न पूर्वोक्ता क्षतिः ***इति वाच्यम्;*** सकृदुच्चरितशब्दः सकृदेवाऽर्थं गमयति इति न्यायविरोधाऽऽपत्तेः । मूलकृता अव्यभिचरि-तत्व शब्दः सकृदेवोच्चरितः, ततः सः सकृदेवाऽर्थं गमयेत् । सः अर्थः साध्याभाववदवृत्तित्वरूपः स्यात्, अन्यलक्षणरूपो वा किन्तु एकमेवाऽर्थं गमयेत् । यदि अव्यभिचरितत्वत्वमनुगतमेकं स्यात्, तदा अव्यभिचरितत्वेन सकृदेवाऽर्थबोधनेऽपि अव्यभिचरितत्वत्वाऽवच्छिन्नत्वेन सर्वस्याऽपि सङ्ग्रहः स्यात्, यथा एकेन घटत्वेन सर्वेषां घटानाम् ।

न च आवृत्तिः कर्तव्या अव्यभिचरितत्वपदस्य, एवं पञ्चवारमुच्चरितस्याऽव्यभिचरितत्व-शब्दस्य पञ्च अर्थाः भवेयुरेव, न तत्र उक्तन्यायविरोधाऽऽपत्तिरिति ***वाच्यम्;*** वाक्यभेदाऽऽपत्तेः, न हि एकस्मिन्नेव वाक्ये पदं पुनः पुनः आवर्त्यते । तथा च अव्यभिचरितत्वस्य पक्षत्वम् एव न युज्यते ***इति चेद् ? न,*** अव्यभिचरितत्वपदप्रतिपाद्यत्वेन पक्षताऽङ्गीक्रियते, अव्यभिचारपदा-र्थत्वमत्र पक्षतावच्छेदकमिति भावः, पदार्थत्वम् = पदजन्यप्रतीतिविषयत्वम् । यथा घटपदार्थः घटपदजन्या या प्रतीतिः तस्याः विषयो भवति, एवं प्रकृते अव्यभिचरितत्वपदजन्यप्रतीतिविषयत्वं पक्षतावच्छेदकमिति फलितम्, एतच्चाऽनुगतमेव । ततः अव्यभिचरितत्वपदजन्यप्रतीतिविषयत्वेन सर्वेषां लक्षणानां सङ्ग्रहः भविष्यतीति न अव्यभिचरितत्वत्वस्य साध्याभाववदवृत्तित्वत्वादि-साधारणस्य एकस्य अभावेऽपि क्षतिः ।

न चैवमपि अव्यभिचरितत्वं पक्षीकृत्य व्याप्तिभेदः भवता साध्यते, तत्र व्याप्तिः का अभिप्रेता ? सिद्धान्तव्याप्तिः, साध्याभाववदवृत्तित्वादिरूपा वा ?, सिद्धान्तव्याप्तिभेदस्य साध्यत्वे सिद्धसाधनम्, अव्यभिचरितत्वे सिद्धान्तव्याप्तिभेदस्य उभयवादिसम्मतत्वात् । साध्याभाववदवृत्तित्वादिरूपव्याप्तिभेदस्य साध्यत्वे बाधः, अव्यभिचरितत्वपदप्रतिपाद्यस्य साध्याभाववदवृत्तित्वादिरूपत्वा***दिति वाच्यम्;*** अनुमितिजनकज्ञानविषयत्वाभावस्यैव साध्यत्वात् । तथा च अनुमितिजनकज्ञानविषयत्वस्याऽव्यभिचरितत्वपदार्थे संदिग्धत्वेन न बाधः, सिद्धसाधनं वा" ***इत्याह, तदपि न चारुतरम्,*** यतः अव्यभिचरितत्वम् अनुमितिजनकज्ञानविषयत्वाभाववत् = अव्यभिचरितत्वपदार्थः अनुमितिजनकज्ञानविषयभिन्नः इत्यनुमाने अनुमितिजनकज्ञानविषयतया सिद्धान्तव्याप्तेः ग्रहणे तस्याः भेदस्य अव्यभिचरितत्वे उभयवादिसम्मततया सिद्धसाधनम्, साध्याभाववदवृत्तित्वादिग्रहणे तद्भेदस्य अव्यभिचरितत्वेऽसत्त्वेन बाधः दुर्निवारः । एवम् अव्यभिचरितत्वं पक्षीकृत्याऽनुमानं नैव सङ्गच्छते । पूर्वोक्तरीत्या च व्याप्तिं पक्षीकृत्याऽपि प्रदर्शिताऽनुमानद्वितयं न सङ्गच्छते ***इति चेद् ?***

मैवम्; यतः 'व्याप्तिः अव्यभिचरितत्वशब्दप्रतिपाद्यभिन्ना, साध्याभाववदवृत्तित्वादिरूपाऽव्यभिचरितत्वशब्दप्रतिपाद्यभेदकूटवत्त्वाद्' इत्येवमेव अनुमानाङ्गीकारेऽपि हेतुव्यापकसाध्यसामानाधिकरण्यत्वेन साध्याभाववदवृत्तित्वत्वेन वा न पक्षताङ्गीक्रियते येनोक्तदोषाः सिद्धसाधनादयः स्युः, किन्त्वस्माभिः अनुमितिजनकतावच्छेदकहेतुनिष्ठप्रकारतानिरूपितप्रकारतावत्त्वेनैव व्याप्तेः पक्षत्वमङ्गीक्रियते । परामर्शे यच्च व्याप्तिरूपेण भासते तत्र हेतुनिष्ठप्रकारतानिरूपितप्रकारतावत्त्वं स्यादेव, ***यद्यपि*** व्याप्तिनिष्ठप्रकारतानिरूपितविशेष्यता हेतौ स्यात्, ततश्च हेतुनिष्ठविशेष्यतानिरूपितप्रकारता व्याप्तौ स्यात् ***तथापि*** पक्षनिष्ठविशेष्यतानिरूपितप्रकारतायाः परामर्शे हेतौ भासनात् तादृशप्रकारतायाश्च तादृशविशेष्यतातोऽभिन्नत्वेन यथा व्याप्तिनिष्ठप्रकारता हेतुनिष्ठविशेष्यतानिरूपिता भवति तथा हेतुनिष्ठप्रकारतानिरूपिताऽपि स्यादेव, व्याप्तिनिष्ठप्रकारता च अनुमितिजनकताऽवच्छेदिका, अतः अनुमितिजनकतावच्छेदकहेतुनिष्ठप्रकारतानिरूपितप्रकारतावत्त्वं व्याप्तौ एव स्यात् । यदि 'पर्वतो वह्निमान् धूमाद्' - इत्येतत्स्थले 'धूमव्यापकवह्निसामानाधिकरण्यविशिष्टधूमवान् पर्वतः' इत्याकारकपरामर्शादनुमितिः भवति तदा अनुमितिजनकतावच्छेदकहेतुनिष्ठप्रकारतानिरूपितप्रकारतावत्त्वं धूमव्यापकवह्निसामानाधिकरण्ये स्यात्, यदि 'वह्न्यभाववदवृत्तिधूमवान् पर्वतः' इत्याकारकपरामर्शेन अनुमितिः जायते तदा अनुमितिजनकताऽवच्छेदकहेतुनिष्ठप्रकारता-

निरूपितप्रकारतावत्त्वं साध्याभाववदवृत्तित्वरूपाऽव्यभिचरितत्वशब्दप्रतिपाद्ये स्यात् । किन्त्वेतदधुना संदिग्धमेव यदुत अव्यभिचरितत्वशब्दप्रतिपाद्यविशिष्टहेतुमत्ताज्ञानस्य अनुमितिजनकत्वं हेतुव्यापक-साध्यसामानाधिकरण्यविशिष्टहेतुमत्ताज्ञानस्य वा ? ततश्च अनुमितिजनकताऽवच्छेदकहेतुनिष्ठ-प्रकारतानिरूपितप्रकारतावति अव्यभिचरितत्वशब्दप्रतिपाद्यभेदः संदिग्धः एव, यदि अव्यभिचरितत्व-शब्दप्रतिपाद्यविशिष्टहेतुमत्ताज्ञानेन अनुमितिः भवेत् तदा अनुमितिजनकतावच्छेदकहेतुनिष्ठप्रकारता-निरूपितप्रकारता अव्यभिचरितत्वशब्दप्रतिपाद्ये स्यात्, तत्र अव्यभिचरितत्वपदप्रतिपाद्यभेदः न स्यात् । यदि अनुमितिजनकं ज्ञानं हेतुव्यापकसाध्यसामानाधिकरण्यविशिष्टहेतुमत्तावगाहि तदा अनुमितिजनकताऽवच्छेदकहेतुनिष्ठप्रकारतानिरूपितप्रकारतायाः हेतुव्यापकसाध्यसामानाधिकरण्ये सत्त्वेन अनुमितिजनकतावच्छेदकहेतुनिष्ठप्रकारतानिरूपितप्रकारताशालिनि अव्यभिचरितत्व-शब्दप्रतिपाद्यभेदः स्यात् । एवम् अनुमितिजनकतावच्छेदकहेतुनिष्ठप्रकारतानिरूपितप्रकारताविशिष्टे अव्यभिचरितत्वशब्दप्रतिपाद्यभेदस्य संदिग्धत्वेन न सिद्धसाधनं न वा बाधः इति ।

य शो ल ता

न च एवमनुमितिजनकज्ञानस्य संशयगोचरत्वाऽभ्युपगमे साध्याभाववदवृत्तित्वादिरूपप्रत्येक-लक्षणविशिष्टहेतुमत्ताज्ञानस्य अनुमितिजनकतासंशयाद् 'अनुमितिजनकतावच्छेदकहेतुनिष्ठप्रकार-तानिरूपितप्रकारताविशिष्टः अव्यभिचरितत्वशब्दप्रतिपाद्यभिन्नः साध्याभाववदवृत्तित्वादिरूपाऽव्यभि-चरितत्वशब्दप्रतिपाद्यभेदकूटवत्त्वाद्' इत्येवमनुमाने अनुमितिजनकतावच्छेदकहेतुनिष्ठप्रकारतानिरू-पितप्रकारताविशिष्टे साध्याभाववदवृत्तित्वादिरूपाऽव्यभिचरितत्वशब्दप्रतिपाद्यभेदकूटवत्त्वस्य संदिग्ध-त्वाऽऽपत्त्या संदिग्धासिद्धिः दुर्निवारा, यदा पक्षे हेतुसत्त्वं संदिग्धं तदा संदिग्धासिद्धिः भवति, यथा पर्वते धूमः बाष्पं वा ? इत्यनिश्चये 'पर्वतो वह्निमान्, धूमाद्' - इत्येवमनुमानकरणे धूमः संदिग्धासिद्धः भवति । तदुक्तं **भासर्वज्ञेन न्यायसारस्वोपज्ञव्याख्यायां न्यायभूषणाभिधानायाम्** "संदिग्धासिद्धो यथा धूम-बाष्पादिविवेकाऽनिश्चये कश्चिदाह अग्निमानयं प्रदेशो धूमवत्त्वाद्" (न्या.भू.पृ.३१२) इति । तथा च प्रकृतेऽपि अनुमितिजनकज्ञानीयविषयता कुत्र ? हेतुव्यापक-साध्यसामानाधिकरण्ये ? अव्यभिचरितत्वपदप्रतिपाद्ये ? वा इत्यनिश्चयात्, साध्याभाववदवृत्तित्वादि-रूपलक्षणविशिष्टहेतुमत्ताज्ञानस्य अनुमितिजनकत्वसन्देहाद् अनुमितिजनकतावच्छेदकहेतुनिष्ठप्रका-रतानिरूपितप्रकारताशालिनि साध्याभाववदवृत्तित्वादिरूपाऽव्यभिचरितत्वशब्दप्रतिपाद्यभेदकूटवत्त्वस्य संदिग्धत्वसिद्ध्या संदिग्धासिद्धिः दुर्वारा एव इत्याशङ्कायां ***यदि*** एवमुच्यते यदुत नैव संदिग्धा-सिद्धिः, 'केवलाऽन्वयिन्यभावाद्' इतिवाक्योपदर्शिताऽनुमानेन तन्निवारणात्, तादृशवाक्याद् 'अनुमि-

तिजनकतावच्छेदकहेतुनिष्ठप्रकारतानिरूपितप्रकारताविशिष्टः साध्याभाववदवृत्तित्वादिरूपाऽव्यभिचरितत्वशब्दप्रतिपाद्यभेदकूटवान्, केवलान्वयिन्यभावाद्' - इत्येवमनुमानं सिध्यति । तथा च साध्याभाववदवृत्तित्वादिरूपाऽव्यभिचरितत्वशब्दप्रतिपाद्यभेदकूटवत्त्वमनुमितिजनकतावच्छेदकहेतुनिष्ठप्रकारतानिरूपितप्रकारताशालिनि सिद्ध्यति इति न संदिग्धासिद्धिः इति; ***तदा*** स्वरूपासिद्धिरुक्तानुमाने दुर्वारा, अनुमितिजनकतावच्छेदकहेतुनिष्ठप्रकारतानिरूपितप्रकारताशालिनः = अनुमितिजनकज्ञानविषयीभूतस्य केवलान्वयिनि वृत्तित्वनियमात्, अन्यथा तस्य अनुमितिजनकतावच्छेदकहेतुनिष्ठप्रकारतानिरूपितप्रकारताशालित्वमेव न स्यात्, तथा च प्रकृताऽनुमाने अनुमितिजनकतावच्छेदकहेतुनिष्ठप्रकारतानिरूपितप्रकारताशालिरूपपक्षे केवलान्वयिनि अभावरूपहेतोः अभावात् स्वरूपासिद्धिः दुर्वारा एव ***इति वाच्यम्;***

यतः 'अनुमितिजनकतावच्छेदकहेतुनिष्ठप्रकारतानिरूपितप्रकारताविशिष्टः साध्याभाववदवृत्तित्वादिरूपाऽव्यभिचरितत्वशब्दप्रतिपाद्यभेदकूटवान्, केवलान्वयिनि अभावाद्' इत्येवमनुमानं नाङ्गीक्रियते, किन्तु 'साध्याभाववदवृत्तित्वादि अनुमितिजनकतावच्छेदकहेतुनिष्ठप्रकारतानिरूपितप्रकारताविशिष्टभिन्नम्, केवलान्वयिन्यभावाद्' इत्येवमनुमानमङ्गीक्रियते, तथा च साध्याभाववदवृत्तित्वस्य केवलान्वयिन्यभावान्न स्वरूपासिद्धिः । य शो ल ता

न चोक्तानुमानेन साध्याभाववदवृत्तित्वम् अनुमितिजनकताऽवच्छेदकहेतुनिष्ठप्रकारतानिरूपितप्रकारताविशिष्टभिन्नं सिध्येत्, किन्तु अनुमितिजनकतावच्छेदकहेतुनिष्ठप्रकारतानिरूपितप्रकारताविशिष्टे साध्याभाववदवृत्तित्वादिरूपाऽव्यभिचरितत्वशब्दप्रतिपाद्यभेदकूटस्य अनिश्चयान्न प्रथमाऽनुमाने सन्दिग्धासिद्धिनिरासः ***इति वाच्यम्;*** साध्याभाववदवृत्तित्वादेः अनुमितिजनकतावच्छेदकहेतुनिष्ठप्रकारतानिरूपितप्रकारताविशिष्टभिन्नत्वसिद्धौ अनुमितिजनकताऽवच्छेदकहेतुनिष्ठप्रकारतानिरूपितप्रकारताविशिष्टे साध्याभाववदवृत्तित्वादिरूपाव्यभिचरितत्वशब्दप्रतिपाद्यभेदकूटस्य मानसबोधसम्भवादिति न संदिग्धासिद्धिः इति ।" एतत्सर्वं केषाञ्चिद् मतेनोपदर्शितम् ।

तदुक्तं **व्याप्तिपञ्चकमाथुरीगङ्गायां शिवदत्तमिश्रेण** "मूलेऽनुयोगिवाचकपदाभावाद् व्याप्तिरिति पदं प्रश्नस्थमनुषञ्जनीयम् । तथा च 'व्याप्तिः अव्यभिचरितत्वशब्दप्रतिपाद्यभिन्ना, साध्याभाववदवृत्तित्वरूपाऽव्यभिचरितत्वशब्दप्रतिपाद्यभेद-साध्यवद्भिन्नसाध्याभाववदवृत्तित्वरूपाऽव्यभिचरितत्वशब्दप्रतिपाद्यभेद-साध्यवत्प्रतियोगिकाऽन्योन्याभावाऽसामानाधिकरण्यरूपाऽव्यभिचरितत्वशब्दप्रतिपाद्यभेद-सकलसाध्याभाववन्निष्ठाभावप्रतियोगित्वरूपाऽव्यभिचरितत्वशब्दप्रतिपाद्यभेद-साध्यवदन्याऽवृत्तित्वरूपाऽव्यभिचरितत्व-

शब्दप्रतिपाद्यभेदकूटवत्त्वाद्' इत्यनुमानं मूलाभिप्रेतम् । न चाऽप्रयोजकम्, 'यो यदीययावद्विशेषाभाववान् सः तत्सामान्याभाववान्' - इति वक्ष्यमाणव्याप्तेः प्रयोजकत्वात् ।

अथ किमिदं पक्षतावच्छेदकं व्याप्तित्वम् ? न तावद्धेतुव्यापकसाध्यसामानाधिकरण्यत्वम्, तदवच्छिन्नेऽव्यभिचरितत्वशब्दप्रतिपाद्यभेदनिश्चयेन सिद्धसाधनप्रसङ्गात् । नापि साध्याभाववद-वृत्तित्वत्वादिकम्, तदवच्छिन्नेऽव्यभिचरितत्वशब्दप्रतिपाद्यभेदरूपसाध्यविरहेण बाधप्रसङ्गात् । एवं वक्ष्यमाणेन 'केवलान्वयिन्यभावाद्' - इत्यनेन व्याप्तौ साध्याभाववदवृत्तित्वादिरूपाऽव्यभिचरितत्व-शब्दप्रतिपाद्यभेदकूटः साधनीयः । सोऽपि न सम्भवति, केवलान्वयिहेतुनिरूपितवृत्तित्वाभावरूपहेतोः सिद्धान्तसिद्धव्याप्तौ अभावात् ।

यस्तु 'अत एव अव्यभिचरितत्वं पक्षो व्याप्तिभेदः साध्यः । ***ननु*** अव्यभिचरितत्वस्य पक्षत्वे पक्षतावच्छेदकाऽननुगमः, ***न च*** अस्तु अननुगतमेव पक्षतावच्छेदकम् ***इति वाच्यम्;*** एकधर्माऽवच्छिन्नस्य व्याप्तित्वनिराकरणेऽपि अन्यधर्मावच्छिन्नस्य व्याप्तित्वशङ्कानिरासाऽयोगात्, अव्यभिचरितत्वस्य व्याप्तिपञ्चकपरत्वे 'सकृदुच्चरित' इतिन्यायविरोधाऽऽपत्तेः ।

आवृत्तौ वाक्यभेदापत्तेः ***इति चेद् ? न;*** अव्यभिचरितत्वपदप्रतिपाद्यत्वेन पक्षता, तथा चाऽव्यभि-चरितत्वपदजन्यप्रतीतिविषयत्वं पक्षतावच्छेदकम्, नातोऽव्यभिचरितत्वत्वस्य साध्याभाववदवृत्तित्वा-दिसाधारणस्य एकस्याऽभावेऽपि क्षतिः । ***न च*** तथापि व्याप्तिभेदस्य साध्यत्वे सिद्धान्तव्याप्तिभेदमादाय सिद्धसाधनम्, साध्याभाववदवृत्तित्वादिभेदसाधने बाधः ***इति वाच्यम्,*** अनुमितिजनकज्ञानविषय-त्वाभावस्यैव साध्यत्वा***दि'ति आह, तन्न,*** अनुमितिजनकज्ञानविषयस्य सिद्धान्तव्याप्तेः भेदसाधने सिद्धसाधनम्, तादृशस्य साध्याभाववदवृत्तित्वादिरूपव्याप्तेः भेदसाधने बाधः ***इति चेद् ?***

न; न हि व्यापकसामानाधिकरण्यत्वादिरूपं व्याप्तित्वं प्रकृते पक्षतावच्छेदकतयाऽभिप्रेतम्, नापि अव्यभिचरितत्वत्वम्, येनोक्तदोषाः स्युः । किन्त्वनुमितिजनकतावच्छेदकहेतुप्रकारतानिरूपित-प्रकारतावत्त्वमेव, तथा च अव्यभिचरितत्वशब्दप्रतिपाद्यविशिष्टहेतुमत्ताज्ञानस्याऽनुमितिजनकत्वं व्यापक-सामानाधिकरण्यविशिष्टहेतुमत्ताज्ञानस्य वा ? इति संशयाद् अनुमितिजनकतावच्छेदकहेतुप्रकारता-निरूपितप्रकारत्वावच्छिन्नेऽव्यभिचरितत्वशब्दप्रतिपाद्यभेदः सन्दिग्ध एवेति न सिद्धसाधनं न वा बाध इति ।

न च साध्याभाववदवृत्तित्वादिरूपप्रत्येकव्याप्तिविशिष्टहेतुमत्ताज्ञानानामनुमितिजनकतासंशयादुक्त-पक्षतावच्छेदकावच्छिन्ने उक्तभेदकूटसन्देहेन संदिग्धासिद्धिरित्याशङ्कायां कूटघटकप्रत्येकभेदसाधकत्वेन 'केवलान्वयिन्यभावादि'त्यनेनोपन्यस्तकेवलाऽन्वयिवृत्तित्वाभावरूपहेतौ स्वरूपासिद्धिर्दुर्वारैव, वस्तुतोऽ-नुमितिजनकज्ञानविषयस्य केवलान्वयिवृत्तित्वनियमाद् ***इति वाच्यम्;***

अनुमितिजनकतावच्छेदकहेतुप्रकारतानिरूपितप्रकारत्वावच्छिन्नं पक्षीकृत्य केवलान्वयिवृत्तित्वाभावरूपहेतुना साध्याभाववदवृत्तित्वादिभेदो न साध्यते, किन्तु साध्याभाववदवृत्तित्वं पक्षीकृत्य तेनैव हेतुना तादृशप्रकारत्वावच्छिन्नभेद एव । तथा च साध्याभाववदवृत्तित्वादौ केवलान्वयिवृत्तित्वाभावरूपहेतोः सत्त्वेन न स्वरूपासिद्धिरिति ।

न चैतादृशाऽनुमानेन साध्याभाववदवृत्तित्वे तादृशप्रकारत्वावच्छिन्नभेदसिद्धावपि तादृशप्रकारत्वरूपपक्षताऽवच्छेदकावच्छिन्ने साध्याभाववदवृत्तित्वादिभेदाऽसिद्ध्या न प्रथमानुमाने संदिग्धासिद्धिनिरास ***इति वाच्यम्;***

साध्याभाववदवृत्तित्वत्वाद्यवच्छिन्ने तादृशप्रकारत्वावच्छिन्नभेदसिद्धौ तदुत्तरं तादृशप्रकारत्वावच्छिन्ने साध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नभेदस्य मानसबोधसम्भवादिति" (व्या.प.गङ्गा पृ.७-८,११-१२) इति।

एतन्मन्दम्; तथा हि - **गूढार्थतत्त्वालोक**कृता दर्शितरीत्या 'व्याप्तिः अव्यभिचरितत्वशब्दप्रतिपाद्यभिन्ना, साध्याभाववदवृत्तित्वादिभेदकूटवत्त्वाद्' - इत्यत्र अनुमितिजनकताऽवच्छेदकत्वेन हेतुव्यापकसाध्यसामानाधिकरण्यस्यैव पक्षत्वाङ्गीकारौचित्यात् । ***न च*** हेतुव्यापकसाध्यसामानाधिकरण्ये अव्यभिचरितत्वशब्दप्रतिपाद्यभेदस्योभयसम्मततया सिद्धसाधन***मिति वाच्यम्;*** हेतुव्यापकसाध्यसामानाधिकरण्यत्वेन अव्यभिचारपदार्थभेदस्य हेतुव्यापकसाध्यसामानाधिकरण्ये सत्त्वेऽपि अनुमितिजनकतावच्छेदकत्वेन तद्भेदस्य संदिग्धत्वादित्युक्तमेव पूर्वम् ।

किञ्च, भवता यदनुमानमुपदर्शितम्, तत्रापि सिद्धसाधनदोषो दुर्निवारः । 'अनुमितिजनकतावच्छेदकहेतुप्रकारतानिरूपितप्रकारताविशिष्टः अव्यभिचरितत्वशब्दप्रतिपाद्यभिन्नः' इत्यादिरीत्या भवताऽनुमानमङ्गीकृतम्, अत्र अनुमितिजनकतावच्छेदकहेतुप्रकारतानिरूपितप्रकारताविशिष्टं किं हेतुव्यापकसाध्यसामानाधिकरण्यम् ? साध्याभाववदवृत्तित्वादिकं वा ? आद्ये सिद्धसाधनम्, अन्त्ये बाधः ।

न च तत्सन्दिग्ध***मिति वाच्यम्;*** हन्त ! एवं सति अनुमितिजनकज्ञानविषयोऽपि सन्दिग्धः एव इत्यभ्युपेयते न वा ? अभ्युपेयते चेत् ? तर्हि 'अव्यभिचरितत्वं न व्याप्तिः' इत्यादिरीत्या अव्यभिचरितत्वपदार्थं पक्षीकृत्य यदा पूर्वपक्षेण अनुमितिजनकज्ञानविषयभेदस्य साध्यत्वमङ्गीकृतं तदा 'अनुमितिजनकज्ञानविषयस्य सिद्धान्तव्याप्तेः भेदसाधने सिद्धसाधनम्, साध्याभाववदवृत्तित्वादेः भेदसाधने बाधः' इत्येवमाक्षेपः किमर्थं कृतः ? अनुमितिजनकज्ञानविषयस्य संदिग्धत्वेन तादृशविषयभेदस्य साध्यत्वाऽनपायात् । यदि च अनुमितिजनकज्ञानविषयः संदिग्धः इति नाऽभ्युपेयते

तदा अनुमितिजनकतावच्छेदकहेतुप्रकारतानिरूपितप्रकारताशाली सन्दिग्धः इति अपि अभ्युपेतुं न शक्यते, यः अनुमितिजनकज्ञानविषयो भवति तस्मिन्नेव अनुमितिजनकतावच्छेदकहेतुनिष्ठप्रकारतानिरूपितप्रकारता भवति, तथा च अनुमितिजनकज्ञानविषयस्य असन्दिग्धत्वे अनुमितिजनकतावच्छेदकहेतुनिष्ठप्रकारतानिरूपितप्रकारताविशिष्टस्याऽपि असन्दिग्धत्वमेव स्यात्, ततः 'अनुमितिजनकतावच्छेदकहेतुनिष्ठप्रकारतानिरूपितप्रकारताशालित्वेन किं हेतुव्यापकसाध्यसामानाधिकरण्यं गृह्यते साध्याभाववदवृत्तित्वादिकं वा ? आद्ये सिद्धसाधनम्, अन्त्ये बाधः' इत्यपि वक्तुं शक्यते एव ।

तथा च अनुमितिजनकज्ञानविषयः, अनुमितिजनकतावच्छेदकहेतुनिष्ठप्रकारतानिरूपितप्रकारताशाली च सन्दिग्धतया एव अभ्युपेयः, ततः 'अव्यभिचरितत्वम् अनुमितिजनकज्ञानविषयभिन्नम्' इत्याद्यनुमाने सिद्धसाधनं बाधो वा पूर्वोक्तयुक्त्या दर्शयितुं न युज्यते, किन्तु गूढार्थतत्त्वालोककृता दर्शिता भागासिद्धिः स्वरूपासिद्धिर्वा एव दोषतया ज्ञेया, यतः 'अव्यभिचरितत्वपदार्थः अनुमितिजनकताऽनवच्छेदकः, साध्याभाववदवृत्तित्वादिभेदकूटवत्त्वाद्' - इत्याद्यनुमाने प्रत्येकस्य हेतुत्वे भागासिद्धिः मिलितस्य च हेतुत्वे स्वरूपासिद्धिः पूर्वोक्तयुक्त्या भवति एव । अतः अव्यभिचरितत्वं पक्षीकृत्य उक्ताऽनुमानाङ्गीकारे भागासिद्ध्यादिकमेव दर्शनीयम्, न तु बाधादिकमिति दृढतरं पर्यालोचनीयम् ।

किञ्च, 'अनुमितिजनकतावच्छेदकहेतुनिष्ठप्रकारतानिरूपितप्रकारताविशिष्टः अव्यभिचरितत्वशब्दप्रतिपाद्यभिन्नः, साध्याभाववदवृत्तित्वादिरूपाऽव्यभिचरितत्वशब्दप्रतिपाद्यभेदकूटवत्त्वाद्' - इत्येवमनुमानं तु दूरतः त्याज्यम्, यतः अत्र 'पर्वतो वह्निमान्, वह्न्यभाववदवृत्तिधूमाद्' इत्यादिस्थलीयपरामर्शे 'वह्न्यभाववदवृत्तिधूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्यविशिष्टवह्न्यभाववदवृत्तिधूमविशिष्टः पर्वतः' इत्याकारके या अनुमितिजनकता तदवच्छेदकीभूता हेतुनिष्ठप्रकारतानिरूपितप्रकारता अव्यभिचरितत्वशब्दप्रतिपाद्येऽस्ति, तत्र तद्भेदः कथं नु स्यात् ? तथा च बाधः भागासिद्धिश्च प्रसज्येते एव । तन्निवारणाय हेतुतावच्छेदकतापर्याप्तिः निवेश्या एवमेव पूर्वोक्तरीत्या सर्वे परिष्काराः पक्षे कर्तव्याः स्युः ।

तथा च 'प्रकृतपक्षतावच्छेदकावच्छिन्नपक्षक-प्रकृतसाध्यतावच्छेदकाऽवच्छिन्नविधेयक-प्रकृतहेतुतावच्छेदकावच्छिन्नलिङ्गकाऽनुमितिजनकतावच्छेदकीभूतप्रकृतपक्षतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यतानिरूपितप्रकारताभिन्न-प्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरण-

धर्मपर्याप्तावच्छेदकताकविशेष्यतानिरूपित-प्रकृतसाध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्ताऽवच्छेदकताकप्रकारतानिरूपितविशेष्यत्वाभिन्नप्रकारताविशिष्टः अव्यभिचरितत्वशब्दप्रतिपाद्यभिन्नः, साध्याभाववदवृत्तित्वादिभेदकूटवत्त्वाद्' - इत्येवमनुमानं वक्तव्यम् ।

एवमनुमानाङ्गीकारेऽपि 'धूमसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगिवह्निसामानाधिकरण्यवह्न्यभाववदवृत्तित्वोभयविशिष्टधूमवान् पर्वतः' - इत्याकारकज्ञाननिष्ठा या 'पर्वतो वह्निमान्' - इत्याकारकाऽनुमितिजनकता तन्निरूपितावच्छेदकताया अव्यभिचरितत्वशब्दप्रतिपाद्यनिष्ठतादृशप्रकारतायां सत्त्वेन पुनः बाधादिवारणाय तादृशप्रकारताविशेषणविधया तादृशाऽनुमितिजनकतानिरूपितावच्छेदकताऽवच्छेदकप्रकारतात्वविशिष्टत्वस्य प्रवेशः कर्तव्यः, यथा पूर्वं प्रकारतात्वावच्छिन्नावच्छेदकतानिरूपितत्वाभावप्रवेशः कृतः तदनुसारेणैवाऽत्र तादृशपरिष्कारः कर्तव्यः । तथा चैवमनुमानम् - प्रकृतपक्षतावच्छेदकावच्छिन्नपक्षक-प्रकृतसाध्यतावच्छेदकावच्छिन्नविधेयक-प्रकृतहेतुतावच्छेदकावच्छिन्नलिङ्गकाऽनुमितिजनकतानिरूपिताऽवच्छेदकताऽवच्छेदकप्रकारतात्वविशिष्टप्रकृतपक्षतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यतानिरूपितप्रकारताऽभिन्न-प्रकृतहेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यतानिरूपित-प्रकृतसाध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकप्रकारतानिरूपितविशेष्यत्वाभिन्नप्रकारताविशिष्टः अव्यभिचरितत्वशब्दप्रतिपाद्यभिन्नः, साध्याभाववदवृत्तित्वादिरूपाऽव्यभिचरितत्वशब्दप्रतिपाद्यभेदकूटवत्त्वाद् इति ।

किञ्चैवमपि न निस्तारः, तादृशोभयवत्ताज्ञानीयप्रकारतायाः हेतुव्यापकसाध्यसामानाधिकरण्यत्वावच्छिन्नप्रकारतात्वेनैव अनुमितिजनकतावच्छेदकत्वेऽपि तादृशप्रकारतात्वविशिष्टा या प्रकारता सा तु अव्यभिचरितत्वशब्दप्रतिपाद्येऽपि वर्तते एव, पूर्वोक्तयुक्त्या हेतुनिष्ठविशेष्यतानिरूपितताद्दशप्रकारतायाः उभयत्र सत्त्वादिति बाधादिकं दुर्वारमेवेति सूक्ष्ममीक्षणीयम् । तथा चैतद् व्याख्यानम् अतिक्लिष्टं जातम् । तदपेक्षया प्रश्नवाक्योद्देश्यस्य उत्तरवाक्ये विधेयत्वनियममङ्गीकृत्य गूढार्थतत्त्वालोककृद्दर्शितमनुमानमेव कक्षीकरणीयं स्यात् ।

अनुमितिजनकतावच्छेदकः न अव्यभिचरितत्वपदार्थः, साध्याभाववदवृत्तित्वादिभेदकूटवत्त्वाद् - इत्येतादृशाऽनुमाने अनुमितिजनकताऽवच्छेदकत्वेन हेतुव्यापकसाध्यसामानाधिकरण्यस्यैव पक्षत्वमङ्गीकृत्य 'हेतुव्यापकसाध्यसामानाधिकरण्यत्वेन हेतुव्यापकसाध्यसामानाधिकरण्ये अव्यभिचरितत्वपदार्थभेदस्य सिद्धत्वेऽपि अनुमितिजनकतावच्छेदकत्वेन हेतुव्यापकसाध्यसामानाधिकरण्ये अव्यभि-

चरितत्वपदार्थभेदः न सिद्धः' इति एवं कदाग्रहमुक्तमानसैः स्वीकार्यम्, इत्थमेव सर्वमुपपद्यते । तथा च कथञ्चिद् भेदः कथञ्चिच्चाऽभेदः इत्येवमङ्गीकारे **जयत्यनेकान्तकण्ठीरवः *इति दिक् ।***

एवं प्रकृतप्रकरणे (१) समारब्ध... इत्यादिदीधितिसन्दर्भतात्पर्यम्, (२) ननु... इत्यादि-तत्त्वचिन्तामणिसन्दर्भतात्पर्यम्, (३) न तावद्... इत्यादिवाक्यसूचिताऽनुमानानां विशदचर्चा च... इत्यादयः पदार्थाः विमृष्टा इति शम् ।

य शो ल ता

*।। इति सकलसङ्घहितचिन्तकाचार्यप्रवर**श्रीभुवनभानुसूरीश्वर**शिष्यरत्न-*
*पूज्यपूनाजिल्होद्धारकाचार्यप्रवर**श्रीविश्वकल्याणसूरीश्वर**शिष्यरत्न-*
*पूज्यसंविग्नमूर्त्याचार्यप्रवर**श्रीयशोविजयसूरीश्वर**शिष्यलव-*
मुनिभक्तियशविजयविरचितायां
व्याप्तिपञ्चकविवृतिवृत्तियशोलतायां
प्रथमा दीधितिः ।।

●●●

❀ संपूर्णता समये सिंहावलोकन ❀

અત્યાર સુધીમાં આપણે -

(૧) '**समारब्ध**' ઈત્યાદિ દીધિતિપંક્તિના તમામે તમામ પદોની સાર્થકતા તથા તેના અર્થ જેવા કે કૃતિત્વ, સમીચીનત્વ.....વગેરે,

વિ ન ભ્રા

(૨) '**ननु**' ઈત્યાદિ તત્ત્વચિંતામણિની પંક્તિના દરેક પદની સાર્થકતા તથા તેના અર્થો,

(૩) '**न तावद्**' ઈત્યાદિ પંક્તિ દ્વારા ફલિત થતા અનુમાનો તથા તેની ચર્ચા જોઈ ગયા. **इति शम् ।**

॥ मुनिभक्तियशविजयरचित विनभ्राव्याख्यामां
प्रथम दीधितिनुं विवरण संपूर्ण ॥

अथ

।। द्वितीया दीधितिः ।।

अथ साध्याभाववदवृत्तित्वं व्याचष्टे - **साध्याभाववदवृत्तित्वमित्यादि** । 'नन्वनुमितिहेतु-व्याप्तिज्ञाने...' इत्यादिवाक्यानां तात्पर्यार्थोपदर्शनानन्तरमेतदवसरप्राप्तमिति तदेव व्याख्यातुमुचितमिति ।

संहिता च पदं चैव, पदार्थः पदविग्रहः ।
चालना प्रत्यवस्थानम्, व्याख्या सूत्रस्य षड्विधा ।। ( )

इत्यभियुक्तोक्तेः संहिता-पद-पदार्थानां गतार्थत्वेन पदविग्रहः प्रदर्श्यते - **अत्रेत्यादिना** । **अत्र** = साध्याभाववदवृत्तित्वे 'इत्येवं विग्रहः' - इति शेषः । साध्याभाववदवृत्तित्वादेः त्रयो विग्रहाः, तत्र विग्रहद्वितयं प्राचीनोपदर्शितं न चारु इति साधयित्वा सिद्धान्तसम्मतः विग्रहः प्रदर्शयिष्यते, वक्ष्यमाणप्रथमाऽनुशासनेन प्रथमः विग्रह एव न सङ्गच्छते, यः द्वितीयः विग्रहः प्रदर्शयिष्यते सः प्रथमाऽनुशासनेन न असङ्गतः, स तु द्वितीयानुशासनेन दूषयिष्यते, तथापि प्रतिपत्तिसौकर्यार्थं समकमेव तदुपन्यासः अत्र कृतः इत्यवधेयम् ।

अत्र तावद् एतद् मतद्वितयं यथा माथुरीवृत्तौ तद्वृत्तौ च दर्शितम्, तथाऽत्राऽनुसन्धेयं येनैतत् सुग्राह्यं स्यात् ।

●

अत्यार सुधी '**ननु**' वगेरे तत्त्वचिंतामणिनी पंक्तिओना अर्थ बतावी दीधा. हवे, '**साध्याभाववद्अवृतित्त्व**' - आनो अर्थ शुं ? तेनो विग्रह शुं ? कयो विग्रह मान्य बने अने कयो विग्रह मान्य न बने अने ते पण शा माटे ? ईत्यादि बाबतोनी सुविस्तृत छणावट शरू करता कहे छे के -

❀ साध्याभाववद्अवृत्तित्वनो विग्रह - अन्य मते ❀

(**अत्र.**) साध्याभाववद्अवृत्तित्व - आ पदमां केटलांक आ रीते विग्रहो देखाडे छे - वृत्त = वृत्ति. मतलब के निष्ठाप्रत्यय = कर्मणिभूतकृदन्तनो '**क्त**' प्रत्यय भावअर्थमां लागेल छे. माटे वृत्तनो अर्थ 'रहेलुं' न करवो, किंतु 'रहेवुं' आ प्रमाणे करवो. '**वृत्तस्याभावः = अवृत्तम् = वृत्त्यभावः**' एटले के न रहेवुं. '**साध्याभाववतः अवृत्तम् = साध्याभाववदवृत्तम्**' = साध्याभाववान्मां न रहेवुं. '**साध्याभाववदवृत्तम् अस्य अस्ति इति साध्याभाववदवृत्ती**' साध्याभाववान्मां न रहेवापणुं जेमां होय तेने साध्याभाववद्अवृत्ती कहेवाय. तेनो भाव = साध्याभाववद्अवृत्तित्व. आ विग्रहमां

तदुक्तं **व्याप्तिपञ्चकरहस्ये मथुरानाथतर्कवागीशकृते** "साध्याभाववदवृत्तित्वमिति । वृत्तम् वृत्तिः, भावे निष्ठाप्रत्ययात् । वृत्तस्याऽभावोऽवृत्तम्, वृत्त्यभावः इति यावत् । साध्याऽभाववतोऽवृत्तं साध्याभाववदवृत्तम्, साध्याभाववद्वृत्त्यभावः इति यावत् । तद् यत्राऽस्ति स साध्याभाववदवृत्ती, मत्वर्थीयेन्प्रत्ययात् । तस्य भावः साध्याभाववदवृत्तित्वम् । तथा च साध्याभाववद्वृत्त्यभाववत्त्वमिति फलितमिति प्राञ्चः" (व्या.प.माथुरी - पृ.७) इति ।

तद्व्याख्यायां श्रीवामाचरणभट्टाचार्येण "साध्याभाववदवृत्तित्वमित्यस्य प्राचीनप्रदर्शितव्युत्पत्तिसिद्धमर्थमाह - वृत्तमिति। वृत्तिः = वृत्तित्वम् । ननु वृत्तमित्यस्य कथं वृत्तित्वमर्थः ? इत्याशङ्कायामाह - भावेति । भावो = धर्मत्वावच्छिन्नः तादृशेऽर्थे इत्यर्थः । निष्ठाप्रत्ययात् = वृत्धातूत्तरक्तप्रत्ययस्य विधानात् । वृत्तस्याभावः = वृत्तित्वस्याभावः । वृत्त्यभावः = वृत्तित्वाभावः । साध्याभाववद्वृत्त्यभावः = साध्याभावाधिकरणनिरूपितवृत्तित्वाभावः । ततः साध्याभाववदवृत्तं यत्र = वह्न्यादिसाध्यकधूमादिरूपसद्धेतौ सः तादृशधूमादिस्वरूपो हेतुः । ननु 'साध्याभाववदवृत्ती'त्यनेन तादृशवृत्तित्वाभावसम्बन्धिनो हेत्वादेः कुतो लाभः ? इत्यतः आह - मत्वर्थीयेति । तथा च साध्याभाववदवृत्तशब्दोत्तरसम्बन्ध्यर्थकमत्वर्थीयेन्प्रत्ययस्य विधानादेव तादृशार्थलाभ इति भावः । तस्य = साध्याभाववदवृत्तिनः । फलितार्थमाह - तथा चेति । साध्याभावाधिकरणनिरूपितवृत्तित्वाभाववत्त्वमव्यभिचरितत्वमिति फलितमित्यर्थः । प्राञ्च इति । वदन्तीति शेषः ।" इत्येवमुक्तम् ।

●

(१) '**वृत्तम् = वृत्तिः**' ભાવમાં નિષ્ઠાપ્રત્યય લગાડ્યો.

(२) '**वृत्तस्य अभावः = अवृत्तम्**' આ રીતે અવ્યયીભાવ સમાસ કર્યો.

(૩) '**साध्याभाववतोऽवृत्तम् = साध्याभाववदवृत्तम्**' આ રીતે ષષ્ઠીતત્પુરુષસમાસ કર્યો.

(४) '**साध्याभाववदवृत्तम् अस्य अस्ति = साध्याभाववदवृत्ती**' આ રીતે મત્વર્થીય ઈન્ પ્રત્યય લગાડ્યો.

(५) '**साध्याभाववदवृत्तिनः भावः = साध्याभाववदवृत्तित्वम्**' આ રીતે ભાવમાં ત્વ પ્રત્યય લગાડ્યો.

હવે બીજી રીતે પણ વિગ્રહ જોઈએ.

'**वृत्तेरभावः = अवृत्ति, साध्याभाववतः अवृत्ति यत्र सः साध्याभाववदवृत्तिः**' મતલબ કે ન રહેવું = અવૃત્તિ. પ્રથમ અવ્યયીભાવ સમાસ કર્યો. ત્યાર બાદ સાધ્યાભાવવદ્રમાં ન રહેવાપણું જે હેતુમાં છે તેને સાધ્યાભાવવદ્રઅવૃત્તિ કહેવાય - આ રીતે બહુવ્રીહિસમાસ કર્યો. ત્યાર બાદ ભાવઅર્થમાં **त्व** પ્રત્યય લગાડવો. જેમ કે **साध्याभाववदवृत्तेः भावः = साध्याभाववद-**

साध्याभाववदवृत्तित्वमिति । *अत्र 'वृत्तं वृत्तिर्वृत्तस्याभावोऽवृत्तं साध्याभाववतोऽवृत्तं = साध्याभाववदवृत्तम्, तदस्यास्तीति साध्याभाववद-वृत्ती, तस्य भावः = साध्याभाववदवृत्तित्वम् इति ।*

●

द्वितीयविग्रहश्च **रहस्ये** एवमुक्तः - "वृत्तेरभावोऽवृत्ति - इत्यव्ययीभावाऽनन्तरं साध्याभाववतोऽ-वृत्ति यत्र इति बहुव्रीहिः" (व्या.प. माथुरी पृ.१०) इति । **तद्वृत्तौ विवृत्यभिधानायां श्रीवामाचरणभट्टा-चार्याः** "वृत्तेः = वृत्तित्वस्य । अवृत्ति = वृत्तित्वाभावः । साध्याभाववतः = साध्याभावाधिक-रणस्य । अवृत्ति = वृत्तित्वाभावः । यत्र = हेत्वादौ । इति बहुव्रीहिः = इत्याकारकव्युत्पत्तिबल-लभ्यार्थप्रतिपादकबहुव्रीहिसमासः" (पृ.१०) इति उक्तवन्तः ।

एतदेवाह - **वृत्तम् = वृत्तिः**, वृद्धातूत्तरक्तप्रत्ययस्य भावार्थे विधानात्, **वृत्तस्याऽभावः = अवृत्तम्** - इत्येवमव्ययीभावसमासः, **साध्याभाववतोऽवृत्तं = साध्याभाववदवृत्तम्** - इत्येवं तत्पुरुष-समासः, **तदस्याऽस्तीति साध्याभाववदवृत्ती** = साध्याभाववदवृत्तम् अस्ति यस्य धूमादिसद्धेतोः सः साध्याभाववदवृत्ती इति मत्वर्थीयेन्प्रत्ययः । **तस्य** = साध्याभाववदवृत्तिनः **भावः** = साध्याभाव-वदवृत्तित्व**मिति** तद्धितप्रत्ययविधानम् ।

●

वृत्तित्वम् । पूर्वेनी पद्धतिमां तत्पुरुष समास करी मत्वर्थीय **इन्** प्रत्यय लगाडेल. आ पद्धतिमां अव्ययीभावसमास करी सीधो बहुव्रीहिसमास करी दीधो. आ बन्ने रीते विग्रहो केटलांक लोको जणावे छे.

शाब्दार्थ :- साध्याभाववद्अवृत्तित्व - अहीं वृत्त = वृत्ति, भावअर्थमां निष्ठाप्रत्यय थयेल छे. (१) **वृत्तस्य अभावः = अवृत्तम्** (= वृत्तिअभाव) आ रीते अव्ययीभावसमास कर्यो, (२) **साध्याभाववतः अवृत्तम् = साध्याभाववदवृत्तम्** (= साध्याभाववद्वृत्तिअभाव) आ रीते षष्ठी तत्पुरुषसमास कर्यो. त्यार बाद (३) **साध्याभाववदवृत्तम् अस्ति अस्येति साध्याभाववदवृत्ती** (= साध्याभाववद्वृत्तित्वाभाववान्) - आ रीते मत्वर्थीय **इन्** प्रत्यय लगाववामां आव्यो. (४) **साध्याभाववदवृत्तिनः भावः = साध्याभाववदवृत्तित्वम्** (= साध्याभाववद्वृत्तित्वाभाववत्त्व) आ रीते भावमां त्वप्रत्यय लगाडवाथी अभिप्रेत पद बनी जाय.

अथवा (१) **वृत्तेरभावः अवृत्ति** (= न रहेवुं = न रहेवापणुं) आ रीते अव्ययीभाव

१. 'वृत्तं वृत्तिः' इतिपाठः मुद्रितप्रतौ केषाञ्चिन्मतीयविग्रहस्यादौ न्यस्तो वर्तते, तत्र चाऽघटमानत्वात्, माथुर्याद्यनुसारेणाऽपि अत्रैव तस्य युक्तत्वादत्रोपन्यस्त इति ध्येयम् ।

गूढार्थप्रकाशः

*वृत्तेरभावोऽवृत्ति, साध्याभाववतोऽवृत्ति यत्र स साध्याभाववदवृत्ति-स्तस्य भावस्तत्त्वमिति वा विग्रहं वर्णयन्ति **केचित्,***

●

अधुना अन्येषां मतेनैवाऽन्यविग्रहं वर्णयति - **वृत्तेरभावः = अवृत्ति** इत्येवमव्ययीभावः, **साध्याभाववतः अवृत्ति यत्र सः साध्याभाववदवृत्तिः** इति बहुव्रीहिः, **तस्य** = साध्याभाववदवृत्तेः **भावः = तत्त्वम्** = साध्याभाववदवृत्तित्वम् **इति वा**, वाशब्दः पूर्वोक्तविग्रहाऽपेक्षया नूतनविग्रहोपदर्शनार्थः, **विग्रहं वर्णयन्ति केचित्** ।

शोल

●

સમાસ કરીને (૨) **साध्याभाववतः अवृत्ति यत्र हेतौ सः साध्याभाववदवृत्तिः** (= સાધ્યાભાવવાનૂમાં ન રહેવાપણું જે હેતુમાં હોય તે સાધ્યાભાવવદ્અવૃત્તિ હેતુ કહેવાય) આ રીતે સીધો બહુવ્રીહિ સમાસ પણ કરી શકાય છે. ત્યાર બાદ **साध्याभाववदवृत्तेः भावः = साध्याभाववदवृत्तित्वम्** આ રીતે ભાવમાં ત્વ પ્રત્યય લગાડી દેવાથી ઈષ્ટ રૂપ પ્રાપ્ત થઈ જશે. વિગ્રહની આ બે રીતો કેટલાંક લોકો વર્ણવે છે.

⊠ તે વિગ્રહ અયોગ્ય, અનુશાસન બાહ્ય ⊠

(**तन्न.**) પણ, આ બન્ને રીતો વ્યાજબી નથી. તેમાંથી પહેલી પદ્ધતિ વ્યાજબી ન હોવાનું કારણ એ કે તેમાં ષષ્ઠીતત્પુરુષ કર્યા પછી મત્વર્થીયપ્રત્યય લગાડેલ છે. જે વ્યાજબી નથી, કારણ કે અનુશાસન = નિયમ છે - કર્મધારય સમાસ પછી મત્વર્થીય પ્રત્યય ન લાગે, જો બહુવ્રીહિસમાસ દ્વારા જ તે અર્થ પ્રાપ્ત થઈ જતો હોય તો. જેમ કે **पीताम्बरः कृष्णः** આ સ્થળે **पीतम् अम्बरं यस्य सः पीताम्बरः कृष्ण** આ રીતે બહુવ્રીહિસમાસ દ્વારા અર્થ પ્રાપ્ત થઈ જ જાય છે. તો પછી અહીં **पीतञ्च तद् अम्बरं च** આ રીતે કર્મધારય સમાસ કરી **पीताम्बरम् अस्ति अस्य = पीताम्बरवान् कृष्णः** આ રીતે મત્વર્થીય પ્રત્યય ન લગાડી શકાય. જો કે પ્રસ્તુતમાં મત્વર્થીય પ્રત્યય કર્મધારય સમાસ પછી નથી લગાડેલ, કિંતુ ષષ્ઠીતત્પુરુષ સમાસ કરી મત્વર્થીય પ્રત્યય લગાડેલ છે. તો પણ ઉક્ત અનુશાસનનો અર્થ એમ છે કે - બહુવ્રીહિ સિવાયના સમાસ પછી મત્વર્થીય પ્રત્યય ન લગાડી શકાય જો બહુવ્રીહિ દ્વારા જ મત્વર્થીયપ્રત્યયનો જે અર્થ હોય તે પ્રાપ્ત થઈ જતો હોય તો. પ્રસ્તુતમાં બહુવ્રીહિ સમાસથી કામ ચાલી જ જાય છે (આગળ ત્રિપદવ્યધિકરણ બહુવ્રીહિ સમાસ કરવા દ્વારા સાધ્યાભાવવદ્અવૃત્તિત્વનો વિગ્રહ બતાવવામાં આવશે જ.) તો પછી બહુવ્રીહિ સિવાયનો ષષ્ઠીતત્પુરુષ સમાસ કરીને **इन्** પ્રત્યય શા માટે લગાડવો ? અનુશાસન મુજબ ન લાગી શકે. માટે જે પહેલી પદ્ધતિ બતાવી તે વ્યાજબી નથી.

વિન્યાસ

तन्न चारु, न कर्मधारयान्मत्वर्थीयः (प्रयुञ्जीत), बहुव्रीहिश्चेत्तदर्थ-प्रतिपत्तिकरः - इत्यनुशासनविरोधात् ।

●

तत् = तादृशविग्रहद्वितयं विग्रहद्वितयवर्णनं वा **न चारु** । प्रथमविग्रहवर्णनस्य अचारुत्वे हेतुमाह - **न कर्मधारयान्मत्वर्थीयः** प्रयुञ्जीत, **बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः इत्यनुशासनविरोधात्** ।

अयमाशयः - पीतं च तदम्बरं च = पीताम्बरम्, पीताम्बरमस्ति अस्य इति पीताम्बरवान् - इत्येवं कर्मधारयसमासोत्तरं मत्वर्थीयप्रत्ययः न भवति, 'पीतमम्बरं यस्य सः पीताम्बरः' इत्येवं बहुव्रीहिसमासेनैव कर्मधारयसमासघटितमत्वर्थीयार्थस्य बोधनात्, तथा च वृत्तिद्वय-कल्पनाऽपेक्षया एकया वृत्त्या अर्थकल्पनायाः एव लघीयस्त्वान्न कर्मधारयान्मत्वर्थीयः प्रयुञ्जीत, बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः - इति अनुशासनम् । कर्मधारयसमासं कृत्वा मत्वर्थीयः प्रत्ययः न प्रयुञ्जीत, यादृशार्थबोधः कर्मधारयसमासघटितमत्वर्थीयप्रत्ययेन भवति तादृशार्थबोधः यदि बहुव्रीहिसमासेन भवति तदा, यथा पीताम्बरवान् - इत्येवं कर्मधारयघटितमत्वर्थीयप्रत्ययेन पीतवस्त्रविशिष्टस्य बोधः भवति, तस्यैव बोधः 'पीताम्बरः' इत्येवं बहुव्रीहिसमासाश्रयणेऽपि भवति । ततः 'पीताम्बरवान्' इति न प्रयुञ्जीत, किन्तु 'पीताम्बरः' इत्येवमेव प्रयोगं कुर्यादिति भावः । एतदनुशासनबलेनैव महान्तौ च तौ बाहू च = महाबाहू, तौ स्तः यस्य सः महाबाहुमान् इत्येवं समासो न भवति, किन्तु महान्तौ बाहू यस्य सः = महाबाहुः नलः - इत्येवमेव समासो भवति, कर्मधारयघटितमत्वर्थीयप्रत्ययप्रयुक्तमहाबाहुमच्छब्दप्रतिपाद्यार्थस्य 'महाबाहुः' इत्येवं बहुव्रीहिसमासाश्रयणेऽपि लाभसम्भवादिति विभावनीयम् ।

ननु प्रकृते 'वृत्तस्याऽभावः = अवृत्तम्, साध्याभाववतः = अवृत्तम् = साध्याभाववदवृत्तम्, तदस्यास्तीति साध्याभाववदवृत्ती' इत्येवम् अव्ययीभावसमासघटिताऽवृत्तपदानन्तरं मत्वर्थीयेन्प्रत्ययः प्रयुक्तः अनुशासनेन च कर्मधारयान्मत्वर्थीयप्रत्ययविधानमेव विप्रतिषिध्यते । ततश्चोक्ताऽनुशासनेन

●

शब्दार्थ :- साध्याभाववद्अवृत्तित्वनो जे पहेलो विग्रह बताव्यो ते योग्य नथी. कारण के 'कर्मधारय समास पछी मत्वर्थीय प्रत्यय न लागी शके, जो बहुव्रीहि ज मत्वर्थीय प्रत्ययना अर्थने जणावी देतो होय तो' - आ अनुशासननो ते पद्धतिए विग्रह करवामां विरोध आवे छे.

आ अनुशासननो अर्थ एे छे के - बहुव्रीहि सिवायना समास पछी मत्वर्थीय

गू ढा *तदर्थश्च बहुव्रीहीतरसमासान्मत्वर्थीयो न भवति, बहुव्रीहिसमासेन मत्वर्थीयार्थलाभे ।*

●

अस्माकं का क्षति***रिति चेद् ?***

न; कर्मधारयपदस्य बहुव्रीहीतरसमासे लाक्षणिकत्वेन 'बहुव्रीहीतरसमासान्न मत्वर्थीयः प्रयुञ्जीत, बहुव्रीहिश्चेत् तदर्थप्रतिपत्तिकरः' इत्येवमेव अनुशासनस्याऽर्थात् । तथा च अव्ययीभावसमासाऽनन्तरमपि मत्वर्थीयप्रत्ययः विप्रतिषिद्धः । ततः उक्तविग्रहः न सङ्गतिमङ्गति, अत्र वक्ष्यमाणरीत्या बहुव्रीहिणा एव तादृशाऽर्थलाभसम्भवात् । एतदेवाह - **तदर्थश्च** = 'न कर्मधारयान्मत्वर्थीयः, बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः' इत्यनुशासनार्थश्च **बहुव्रीहीतरसमासान्मत्वर्थीय**प्रत्ययः **न भवति**, बहुव्रीहिसमासेन बहुव्रीहीतरसमासघटित**मत्वर्थीयार्थलाभे** इति ।

य शो ल ता

ननु किं भवतोऽस्मान् प्रति मत्सरः येन अस्माभिः प्रदर्शितस्य विग्रहस्य खण्डनाय एवमनुशासनार्थोऽपि परावर्त्यते ***इति चेद्*** ?

●

પ્રત્યય ન લગાવી શકાય, જો બહુવ્રીહિ સમાસ દ્વારા મત્વર્થીય પ્રત્યયનો અર્થ પ્રાપ્ત થઈ જતો હોય તો.

❀ અનુશાસનમાં પરિષ્કાર શા માટે ? ❀

પ્રશ્ન :- અનુશાસન તો 'કર્મધારય સમાસ પછી મત્વર્થીય પ્રત્યય ન લાગી શકે, જો બહુવ્રીહિ મત્વર્થીય પ્રત્યયના અર્થને જણાવતો હોય તો' આટલું જ છે. તથા દૃષ્ટાંત પીતામ્બરનું આ રીતે જ ઘટે છે. તો પછી અમારા વિગ્રહને ખોટો પાડવા માટે અનુશાસનનો અર્થ થોડો બદલી શકાય ? બહુવ્રીહિ સિવાયના સમાસ પછી મત્વર્થીય પ્રત્યય ન લાગે - આવો અર્થ તમે ક્યાંથી લાવ્યા ? જો આવો અર્થ ન કરો તો શું ક્યાંય તકલીફ પડે છે ? કે જેથી અમારે તમે જણાવ્યો તેવો અર્થ માનવો પડે ? બાકી, આ રીતે અમારી વાતને ખોટી પાડવા નવા - નવા અર્થ તમે બતાવ્યે રાખો તે થોડું યોગ્ય કહેવાય ?

વિ ન ભા

❀ પરિષ્કાર અન્યત્ર આપત્તિનિવારણ માટે જરૂરી ❀

ઉત્તર :- (અગુ.) અરે ભાઈ ! અમને થોડો તમારી ઉપર દ્વેષ છે કે જેથી તમારા વિગ્રહને ખોટો પાડવા આખા અનુશાસનનો અર્થ બદલાવી દઈએ. આપણા (= નૈયાયિકોના) પ્રાચીન પૂર્વાચાર્યોએ જ આ રીતે અર્થ કરેલો છે. તેઓએ પણ પોતાની ઇચ્છાથી નથી કર્યો પણ જરૂરી છે માટે જ કર્યો છે. આ વાત દીધિતિરહસ્ય અને ગુણપ્રકાશરહસ્ય નામના

न; अगुणवत्त्वमितिसाधर्म्यव्याख्यानावसरे एतादृशार्थस्याऽवश्यं स्वीकरणीयत्वात् । एतच्च **गुणप्रकाशरहस्ये दीधितिरहस्ये** च स्फुटम् । इदमत्र तत्त्वम् - **भाष्ये** 'रूपादीनां गुणानां द्रव्याश्रितत्वं निष्क्रियत्वमगुणवत्त्वं चे'त्येवं साधर्म्यमुक्तम् । **वर्धमानोपाध्यायकृतप्रकाशनामक**टीकाग्रन्थे तदुपरि **रघुनाथशिरोमणिकृतदीधिति**नामकव्याख्याग्रन्थे च अगुणवत्त्वमिति गुणानां साधर्म्यव्याख्यानावसरे उक्तार्थो दर्शितः । तत्र पूर्वपक्षेण - "गुणस्य अभावः = अगुणम् इत्येवम् अव्ययीभावसमासः, तदस्याऽस्तीति अगुणवान्, तस्य भावः अगुणवत्त्वम् - इत्येवं विग्रहः अगुणवत्त्वस्य, गुणस्य अभावः अव्याप्यवृत्तितया जन्यद्रव्येषु अपि उत्पत्तिकालाऽवच्छेदेन वर्तते, सर्वेषां जन्यद्रव्याणाम् उत्पत्तेः प्रथमसमये निर्गुणत्वात् । तथा च अगुणं जन्यद्रव्याणामपि अस्ति इति अगुणवत्त्वं जन्यद्रव्याणां प्रथमसमये स्यादेव । ततश्च अगुणवत्त्वस्य गुणसाधर्म्यविधयोपदर्शनं भाष्यकृताम् असङ्गतम्" - इत्येवमभिहिते एवं समाहितम् - "ननु गुणस्याऽभावः = अगुणम्, तदस्यास्तीति

●

ગ્રંથોમાં સ્પષ્ટ છે. **गुणनिरूपण**ગ્રંથ ઉપર **वर्धमान उपाध्याय**ની **गुणप्रकाशरहस्य** નામની વૃત્તિ છે. તથા તેના ઉપર **रघुनाथ शिरोमणि**એ **दीधितिरहस्य** નામની વૃત્તિ રચી છે. આ ગ્રંથોમાં જ્યારે ગુણ અને કર્મના સાધર્મ્યનું નિરૂપણ ચાલતું હતું ત્યારે **अगुणवत्त्व** ને ગુણ અને કર્મના સાધર્મ્ય તરીકે દર્શાવવામાં આવ્યું છે. અહીં પ્રશ્ન થાય કે **अगुणवत्त्व**નો વિગ્રહ કેવી રીતે થશે ? એક રીત છે કે - **गुणस्य अभावः = अगुणम्** આ રીતે અવ્યયીભાવ સમાસ કરી **अगुणं विद्यते अस्य = अगुणवान्** આ રીતે મત્વર્થીય પ્રત્યય લગાડી દેવો. **अगुणवतः भावः = अगुणवत्त्वम्** આ રીતે **अगुणवत्त्व**નો વિગ્રહ થઈ જાય. તથા બીજી રીત છે - **गुणः अस्ति अस्य = गुणवान्** આ રીતે મત્વર્થીય પ્રત્યય લગાડી **न गुणवान् = अगुणवान्** આ રીતે નઞ્ તત્પુરુષસમાસ કરી **अगुणवतः भावः = अगुणवत्त्वम्** આ રીતે ભાવ પ્રત્યય લગાડીને પણ **अगुणवत्त्व** શબ્દ બનાવી શકાય છે. આમાંથી પહેલી પદ્ધતિએ વિગ્રહ કરી શકાય તેમ નથી. કારણ કે તે રીતે વિગ્રહ કરવામાં આવે તો અગુણવત્ત્વ સાધર્મ્ય માત્ર ગુણ - કર્મમાં જ વૃત્તિ ન બનતા દ્રવ્યમાં પણ વૃત્તિ થઈ જાય. કારણ કે ગુણનો અત્યંતાભાવ અવ્યાપ્યવૃત્તિ છે. મતલબ કે જ્યાં ગુણ હોય ત્યાં ગુણનો અત્યંતાભાવ પણ સંભવી શકે. પ્રથમક્ષણવૃત્તિ જે જન્યદ્રવ્ય હોય તેમાં તો કોઈ પણ ગુણ સંભવતા નથી. માટે, તે વખતે તેમાં ગુણાભાવ કહી શકાય. તેથી, પ્રથમ વિગ્રહ મુજબ **अगुणवत्त्व** પ્રથમક્ષણવૃત્તિ દ્રવ્યમાં જતું રહેશે. જો બીજી પદ્ધતિએ વિગ્રહ કરશો તો ગુણવાનનો ભેદ વ્યાપ્યવૃત્તિ છે. જ્યાં ગુણ રહે ત્યાં ગુણવાનનો ભેદ ન રહે અને જ્યાં ગુણવાનનો ભેદ રહે ત્યાં ગુણ ન રહે. માટે, ઘટમાં

अगुणवान् इत्येवं विग्रहः एव न सम्भवति, 'न कर्मधारयान्मत्वर्थीयः प्रयुञ्जीत, बहुव्रीहिश्चेत् तदर्थप्रतिपत्तिकरः' इत्यनुशासने कर्मधारयपदस्य बहुव्रीहीतरसमासपरत्वेन उक्ताऽनुशासनेन अव्ययीभावसमासोत्तरमपि मत्वर्थीयप्रत्ययानां निषेधात् । तथा चैवं विग्रहः अङ्गीकरणीयः - गुणः अस्य अस्तीति गुणवान्, न गुणवान् = अगुणवान् = गुणवद्भिन्नः, तस्य भावः = अगुणवत्त्वम्, गुणवद्भिन्नत्वमित्यर्थः । तथा च जन्यद्रव्येषु प्रथमसमये गुणाभावस्य सत्त्वेऽपि गुणवद्भेदस्याऽसम्भवात्, गुणाभावस्य कादाचित्कसत्त्वासत्त्वाभ्यामव्याप्यवृत्तित्वेऽपि गुणवद्भेदस्याऽव्याप्यवृत्तित्वविरहान्न क्षतिः । गुणवद्भेदः यदि स्यात्, सर्वदा स्यात्, न स्यात् कदापि न स्यात्, न च कदाचिदस्ति, कदाचिन्नेत्येवमव्याप्यवृत्तित्वम् अन्योन्याभावस्य न्यायसम्प्रदाये सम्मतमिति । तथा च प्रथमसमयेऽपि जन्यद्रव्याणि गुणविशिष्टानि न सन्ति तथापि गुणवद्भेदः तत्र न स्यात्, अन्यथा द्वितीयादिसमयेषु अपि तत्र गुणवद्भेदकक्षीकारापत्तेः, न चैतदिष्टम्, अतः प्रथमसमयेऽपि गुणवद्भेदः नास्ति, गुणाभावसत्त्वेऽपि इत्यङ्गीकार्यमेवेति न गुणवान् = अगुणवान् - इत्यादिविग्रहाङ्गीकारे न दोषलेशगन्धोऽपि ।

य शो ल ता

●

પ્રથમ ક્ષણે પણ ગુણવાનનો ભેદ નહીં રહી શકે. કારણ કે દ્વિતીયાદિક્ષણે ઘટમાં ગુણ રહેવાના છે. આમ, પ્રથમક્ષણવૃત્તિજન્યદ્રવ્ય પણ અગુણવાન ન કહી શકાય. તેથી **अगुणवत्त्व** સાધર્મ્ય માત્ર ગુણ - કર્મમાં જ રહેશે. દ્રવ્યમાં નહીં રહે.

પરંતુ, પહેલી પદ્ધતિએ વિગ્રહ કરવામાં વાંધો શું ? કોઈ પહેલી પદ્ધતિએ વિગ્રહ કરે તો તેને તમે અટકાવી ન શકો. તમારી વ્યાખ્યા મુજબ અગુણવત્ત્વ દ્રવ્યમાં ન જવું જોઈએ. પણ, એટલા માત્રથી એનો જે વિગ્રહ સંભવતો હોય તેને થોડો અટકાવી શકાય ? માટે, પ્રકાશકારે અને દીધિતિકારે તે વખતે પ્રથમ પદ્ધતિએ વિગ્રહને દોષિત ઠેરવવા આ અનુશાસન ધર્યું. અને એ વખતે કર્મધારયપદનો અર્થ બહુવ્રીહિઈતરસમાસ કરી દીધો. પ્રથમ પદ્ધતિમાં અવ્યયીભાવ સમાસ કરી મત્વર્થીય પ્રત્યય લગાડેલ છે. અનુશાસન મુજબ બહુવ્રીહિઈતરસમાસ પછી મત્વર્થીય પ્રત્યય ન લગાડી શકાય. માટે, પહેલી પદ્ધતિએ કરેલ વિગ્રહ વ્યલીક સાબિત થશે. આમ, અગુણવત્ત્વ સાધર્મ્ય દ્રવ્યમાં ન જાય તે માટે પૂર્વાચાર્યોએ જ આ રીતે અનુશાસન બતાવ્યું છે કે - બહુવ્રીહિઈતરસમાસ પછી મત્વર્થીય પ્રત્યય ન લગાવવો જોઈએ, જો બહુવ્રીહિ દ્વારા મત્વર્થીય પ્રત્યયના અર્થનો લાભ થઈ જતો હોય તો. આ અનુશાસન મુજબ પ્રસ્તુતમાં જે ષષ્ઠી વિભક્તિતત્પુરુષસમાસ પછી મત્વર્થીય પ્રત્યય લગાડેલ છે તે પ્રસ્તુત અનુશાસનથી અસંગત સાબિત થશે.

વિ ન ભા

अगुणवत्त्वमित्यत्र गुणस्याभावोऽगुणम्, तदस्यास्तीत्यगुणवान् इति विग्रहनिराकरणेन न गुणवान् = अगुणवान् इति विग्रहस्य ***गुणप्रकाशरहस्यादौ*** *दर्शनेन कर्मधारयपदस्य बहुव्रीहीतरपरत्वात्।*

●

एवं 'बहुव्रीहीतरसमासपरकत्वं कर्मधारयपदस्य' अनेन प्रबन्धेन स्पष्टं ज्ञायते, तथा च भवता 'न वृत्तम् = अवृत्तम्, तदस्याऽस्तीति अवृत्ती' इत्येवमव्ययीभावसमासोत्तरं मत्वर्थीयेन्प्रत्ययः विहितः सः नैव सङ्गतिमङ्गति, 'बहुव्रीहीतरसमासान्न मत्वर्थीयः प्रयुञ्जीत, बहुव्रीहिश्चेत् तदर्थप्रतिपत्तिकरः' इत्यनुशासनविरोधादित्याशयेनाह - **'अगुणवत्त्वम्' इत्यत्र** = इत्येतादृशसाधर्म्यव्याख्यानावसरे **'गुणस्याभावः' = अगुणम्, तदस्याऽस्तीति अगुणवान्' - इति विग्रहनिराकरणेन** = इत्येतादृशविग्रहनिराकरणपूर्वकं **'न गुणवान् = अगुणवान्' इतिविग्रहस्य गुणप्रकाशरहस्यादौ,** आदिपदेन तद्वृत्तौ दीधितिरहस्ये च **दर्शनेन कर्मधारयपदस्य बहुव्रीहीतरपरत्वात्** = बहुव्रीहीतरपरत्वमिति निश्चयादित्यर्थः, अन्यथा तत्रापि अव्ययीभावसमासोत्तरमेव मत्वर्थीयप्रत्ययविधानेन तादृशसमासप्रतिक्षेपाऽसङ्गतेरिति ध्येयम् । ततश्च 'बहुव्रीहीतरसमासान्न मत्वर्थीयः प्रयुञ्जीत, बहुव्रीहिश्चेत् तदर्थप्रतिपत्तिकरः' इतिनियमः फलितः ।

प्रकृते "तदसत्, 'न कर्मधारयान्मत्वर्थीयः (भवति), बहुव्रीहिश्चेत् तदर्थप्रतिपत्तिकरः' - इत्यनुशासनविरोधात्, तत्र कर्मधारयपदस्य बहुव्रीहीतरसमासपरत्वात्, तच्च 'अगुणवत्त्वम्' इति साधर्म्यव्याख्यानावसरे गुणप्रकाशरहस्ये तद्दीधितिरहस्ये च स्फुटम्" - इत्येवं **माथुरीप्रबन्धं** व्याख्यानयता **श्रीवामाचरणभट्टाचार्येण विवृत्तौ** "तन्मतं दूषयति - **तदसदिति** । **नेत्यादि** । **कर्मधारयात्** = कर्मधारयसमासात् । अव्यवहितोत्तरत्त्वं पञ्चम्यर्थः । अस्य च नञ्पदोत्तराध्याहृत'भवती'त्यनेन

●

શબ્દાર્થ :- अगुणवत्त्व - આ પ્રમાણે જે સાધર્મ્ય છે તેમાં **गुणस्य अभावः = अगुणम्** આ રીતે અવ્યયીભાવ સમાસ કરી **अगुणम् अस्ति अस्य = अगुणवान्** આ રીતે મત્વર્થીય પ્રત્યય લગાડી **अगुणवतः भावः = अगुणवत्त्वम्** આ રીતે ભાવઅર્થમાં ત્વપ્રત્યય લગાડીને પણ અગુણવત્ત્વ શબ્દ રચી શકાય છે. પણ, આવા વિગ્રહનું નિરાકરણ કરી ત્યાં **गुणः अस्ति अस्य = गुणवान्, न गुणवान् = अगुणवान्, अगुणवतः भावः = अगुणवत्त्वम्** આ રીતે મત્વર્થીય પ્રત્યય લગાડી નઞ્ તત્પુરુષ સમાસ કરી ભાવાર્થક ત્વપ્રત્યય લગાડીને **अगुणवत्त्व** શબ્દ બનાવવામાં આવે છે. આમ, ગુણપ્રકાશરહસ્ય વગેરે ગ્રંથમાં આવા પ્રકારનો વિગ્રહ દેખાડ્યો હોવાથી 'કર્મધારય પદ બહુવ્રીહિઈતર સમાસને જણાવવામાં તત્પર છે' - એ વાતની સિદ્ધિ થાય છે.

(सह अन्वयः) । **मत्वर्थीयः** = मत्वर्थीयप्रत्ययः । तथा च कर्मधारयसमासोत्तरं मत्वर्थीयप्रत्ययो न भवतीत्यर्थः । कथन्तानिवृत्तये आह - **बहुव्रीहीत्यादि** । **चेद्** = यदि बहुव्रीहिसमासः **तदर्थप्रतिपत्तिकरः** = कर्मधारयसमासार्थघटितमत्वर्थीयार्थस्य बोधजनकतावच्छेदकः तदा इत्यर्थः । तथा च कर्मधारयसमास-लभ्यार्थावच्छिन्नस्य मत्वर्थीयार्थसम्बन्धिनश्च यदि बहुव्रीहिसमासाद् बोधः सम्पद्यते तदा कर्मधार-यान्मत्वर्थीयो न भवत्येवाऽत एव 'महाधनी'ति न प्रयोगः, महाधनरूपकर्मधारयार्थविशिष्टमत्व-र्थीयेन्प्रत्ययार्थसम्बन्धिनो महाधनरूपबहुव्रीहिसमासेन बोधनाद् 'महाधनः' एव प्रयोग इत्याशयः । **इत्यनुशासनविरोधाद्** = इत्यनुशासनस्य कर्मधारयोत्तरमत्वर्थीयप्रत्ययोत्पत्तौ प्रतिबन्धकत्वात् ।

ननु तादृशावृत्तशब्दस्य अव्ययीभावसमासतया तदुत्तरं मत्वर्थीयप्रत्ययोत्पत्तौ न किमपि बाधकमत आह - **तत्रेति** । निरुक्तानुशासने इत्यर्थः । घटकत्वं सप्तम्यर्थः, तस्य च पञ्चम्यन्तकर्मधारयपदेन सहान्वयः । **बहुव्रीहीतरसमासपरत्वात्** = बहुव्रीहिभिन्नयावत्समासबोधेच्छया उच्चरितत्वात् । तथा च निरुक्तानुशासनघटकीभूतस्य कर्मधारयपदस्य बहुव्रीहिभिन्नसमासमात्रे लाक्षणिकतया अव्ययीभावस्याऽपि कर्मधारयत्वेन तदुत्तरमपि न मत्वर्थीयप्रत्यय इति भावः ।

नन्वेवं प्राचीनमते दोषप्रदानार्थं कर्मधारयपदस्य तादृशसमासमात्रे लाक्षणिकत्वं न युक्तम् इत्यत आह - **तच्चेति** । कर्मधारयपदस्य बहुव्रीहीतरसमासपरत्वञ्चेत्यर्थः । अस्य च **स्फुटमिति** परेणान्वयः । **अगुणवत्त्वम् इति साधर्म्यव्याख्यानावसरे** = 'अगुणवत्त्वम्' इत्यस्य गुणादिमात्रनिष्ठत्वव्याख्यानोत्तरकाले । **गुणप्रकाशरहस्ये** = वर्धमानोपाध्यायकृतप्रकाशनामकटीकाग्रन्थे **तदीधितिरहस्ये च** = तस्य = गुणप्रकाश-रहस्यस्य रघुनाथशिरोमणिकृतदीधितिनामकटीकाग्रन्थे च । **स्फुटं** = निश्चितम् ।

इदं तु तत्त्वम् - गुणस्याऽभावोऽगुणम्, तद् यत्राऽस्ति इति अगुणवान्, तस्य भावः = अगुणवत्त्वमिति व्युत्पत्त्या अगुणवत्त्वं गुणादिमात्रनिष्ठं भवितुं नार्हति, गुणाभावस्याऽव्याप्यवृत्तितया जन्यद्रव्येऽपि उत्पत्तिकालावच्छेदेन तस्य सत्त्वात्, तस्यापि अगुणवत्त्वं स्यादतो निरुक्ताऽनुशासन-घटकीभूतकर्मधारयपदस्य बहुव्रीहीतरसमासपरत्वमवश्यं वक्तव्यम्, एवञ्चागुणशब्दस्याऽव्ययीभावत्वेन कर्मधारयतया तदुत्तरं मत्वर्थीयप्रत्ययस्याऽसम्भवात् पूर्वोक्ता व्युत्पत्तिः न साधीयसी, अपि तु 'गुणो विद्यते यत्र स गुणवान्, न गुणवान् = अगुणवान्, तस्य भावः = अगुणवत्त्वम् - इत्येव व्युत्पत्तिः

●

❀ અનુશાસનમાં પરિષ્કાર અપેક્ષિત ❀

આ રીતે "બહુવ્રીહિ સિવાયના સમાસ પછી મત્વર્થીય પ્રત્યય ન લાગે, જો બહુવ્રીહિસમાસ દ્વારા મત્વર્થીય પ્રત્યયથી ઉપસ્થાપ્ય અર્થનો બોધ થઈ જતો હોય તો" - આ પ્રમાણે અનુશાસન ફલિત થયું. આ અનુશાસન મગજમાં સ્થિર કરી દેવું. કારણ કે હવે

आदरणीया, भेदस्य व्याप्यवृत्तित्वेन निरुक्तव्युत्पत्तिसिद्धाऽगुणवत्त्वस्य जन्यद्रव्ये वर्तमानतया वक्तुमशक्यत्वात् - इत्यादिकं तत्तद्ग्रन्थे परिस्फुटम्, तथा च प्राचीनमते दोषप्रदानार्थं कर्मधारयपदं न तादृशार्थे लाक्षणिकम्, अपि तु अगुणवत्त्वस्य जन्यद्रव्यादिसाधर्म्यतावारणार्थमेवेति" (पृ.८-९) इत्येवमुक्तमनुसन्धेयम् ।

अधुना 'बहुव्रीहीतरसमासान्न मत्वर्थीयः, बहुव्रीहिश्चेत् तदर्थप्रतिपत्तिकरः' इत्यनुशासनस्थप्रत्येकपदसार्थक्यमुपपिपादयिषया आदौ पूर्वपक्षमुत्थापयति - **न चेत्यादि** । पूर्वपक्षस्यायमाशयः - ननु 'समासान्मत्वर्थीयो न भवति, बहुव्रीहिश्चेत् तदर्थप्रतिपत्तिकरः' इत्येवोच्यताम्, किमर्थं समासविशेषणविधया बहुव्रीहीतरत्वनिवेशः ? बहुव्रीहिव्यवच्छेदः किमर्थम् ?

न च तथा सति बहुव्रीहिसमासाद् अपि मत्वर्थीयप्रत्ययो न स्यात्, 'महान्तौ बाहू यस्य सः = महाबाहुः नलः, सः अस्ति यत्र = महाबाहुमान् देशः' - इत्येवं बहुव्रीहिसमासानन्तरं मत्वर्थीयप्रत्ययो भवत्येव, एतच्चाऽनुपपन्नं स्यात्, बहुव्रीहिसमासाऽनन्तरमपि मत्वर्थीयप्रत्ययस्य उक्तानुशासनेन निषेधात्, यदि बहुव्रीहीतरत्वं तद्विशेषणविधया निवेश्यते तदा बहुव्रीहीतरसमासादेव मत्वर्थीयप्रत्ययः विप्रतिषिध्यते, न तु बहुव्रीहिसमासादपि । तथा च 'महाबाहुमान्' इतिप्रयोगः नानुपपन्न ***इति वाच्यम्;***

बहुव्रीहिसमासान्मत्वर्थीयप्रत्ययः उक्तानुशासनेन तदैव अनुपपन्नः स्यात्, यदा बहुव्रीहिः तदर्थप्रतिपत्तिकरः भवेदित्यनुशासनाऽर्थं विस्मृत्यैव उक्तापत्तेरापादनात् । 'महाबाहुमान्' इत्येतादृश-

●

આ અનુશાસનના આધારે જ આગળ ચર્ચા ચલાવવામાં આવશે. હવે, અનુશાસનગત દરેક પદનું કૃત્ય શું છે ? તે દર્શાવે છે -

અનુશાસન જ ગૌરવગ્રસ્ત

पूर्वपक्ष :- (न च.) અરે ભાઈ ! નિરર્થક શબ્દો મૂકવાનો શું તમને શોખ છે ? બહુવ્રીહિ સિવાયના સમાસ પછી મત્વર્થીય પ્રત્યય ન લાગે - અહીં બહુવ્રીહિ સિવાય પણ લખવાની જરૂરત નથી, સમાસ પણ લખવાની જરૂરત નથી. ફક્ત 'જો બહુવ્રીહિ સમાસ દ્વારા અર્થ બોધિત થતો હોય તો મત્વર્થીય પ્રત્યય લગાડી ન શકાય' - આટલું જ કહો. કારણ કે જ્યારે બહુવ્રીહિસમાસ કર્યા પછી મત્વર્થીય પ્રત્યય લગાડવામાં આવે ત્યારે બહુવ્રીહિ સમાસ દ્વારા તે અર્થ જણાવી શકાય જ નહીં. તાત્પર્ય એ છે કે 'બહુવ્રીહિ સિવાય' ન લખીએ તો 'મત્વર્થીય પ્રત્યય કોઈને લાગે નહીં' - આવો અર્થ પ્રાપ્ત થાય. માટે, **महान्तौ**

शब्दाद् यः अर्थः प्रतीयते सः यदि बहुव्रीहिणा प्रतिपाद्यते तदैव 'महाबाहुमान्' इत्येवं बहुव्रीह्युत्तरं मत्वर्थीयः अनुपपन्नः स्यात् । 'महाबाहुमान्' इत्यनेन महाबाहुनलविशिष्टदेशस्य भानं भवति, 'महान्तौ बाहू यस्य सः = महाबाहुः' - इत्येवं बहुव्रीह्याश्रयणे महाबाहुनलस्यैव भानं भवति, तथा च यादृशार्थः बहुव्रीह्युत्तरवर्तिमत्वर्थीयप्रत्ययप्रयुक्तशब्देन प्रतिपाद्यते तादृशार्थस्य बहुव्रीहिणा अप्रतिपादनात् 'समासान्मत्वर्थीयः न भवति, बहुव्रीहिश्चेत् तदर्थप्रतिपत्तिकरः' इत्यनुशासनाऽङ्गीकारे न काऽप्यनुपपत्तिरिति भावः ।

न च 'महान्तौ बाहू यस्य सः = महाबाहुः नलः, विद्यमानः महाबाहुः यत्र सः = विद्यमानमहाबाहुकः देशः' - इत्येवं बहुव्रीहिणा महाबाहुनलविशिष्टदेशस्य प्रतिपादनादनुपपन्न एव स्याद् 'महाबाहुमान्' इत्येतादृशप्रयोगः ***इति वाच्यम्;*** तावत्पदबहुव्रीहिणा तादृशार्थाऽप्रतिपादनात् । 'महाबाहुमान्' इत्येवं मत्वर्थीयप्रत्ययसमभिव्याहारेण (समभिव्याहारः = साहित्यम्, सहोच्चरितत्वम्, एकवाक्यताऽऽपन्नत्वमिति ।) महाबाहुशब्देन यादृशोऽर्थः प्रतिपाद्यते तादृशः एव अर्थः यदि महाबाहुशब्देन बहुव्रीहिणा प्रतिपाद्यते तदैव महाबाहुशब्दोत्तरं मत्वर्थीयप्रत्ययः अनुपपन्नो भवतीति

●

बाहू यस्य सः महाबाहुः नलः तथा **महाबाहुः अस्ति यत्र सः महाबाहुमान् देशः** - આ રીતે મત્વર્થીય પ્રત્યય જે બહુવ્રીહિ સમાસ પછી લગાડવામાં આવેલ છે તે સંગત ન થાય. પણ, આખું અનુશાસન એ છે કે 'બહુવ્રીહિ સમાસ જો અર્થબોધક બનતો હોય તો મત્વર્થીય પ્રત્યય ન લાગે.' જો બહુવ્રીહિ સમાસ દ્વારા અર્થ જણાતો ન હોય તો તો મત્વર્થીયપ્રત્યય લાગે જ ને ! પ્રસ્તુતમાં પણ **महाबाहुमान्** અર્થ માત્ર બહુવ્રીહિ સમાસ દ્વારા જણાવી જ શકાય નહીં. જેમ **पीताम्बरवान्** શબ્દ દ્વારા જે અર્થ પ્રતિપ્રાદ્ય છે તે **पीताम्बर** આટલા જ શબ્દના બહુવ્રીહિ સમાસથી પણ પ્રતિપાદ્ય છે. માટે, પીતામ્બર શબ્દને મત્વર્થીય પ્રત્યય ન લાગે. તે જ રીતે પ્રસ્તુતમાં **महाबाहुमान्** શબ્દ દ્વારા જે નલવિશિષ્ટદેશનું ભાન થાય છે તે ફક્ત **महाबाहुः** આટલા જ પદના બહુવ્રીહિસમાસ દ્વારા જણાવી શકાતું હોય તો **महाबाहुमान्** - આ પ્રમાણે પ્રયોગ સંભવિત ન બનત. પણ, મહાબાહુ - આટલા પદના બહુવ્રીહિ દ્વારા ફક્ત નલ પદાર્થ જ બોધ્ય છે. નલપદાર્થવિશિષ્ટ દેશ નહીં. જ્યારે **महाबाहुमान्** દ્વારા નલપદાર્થવિશિષ્ટ દેશનું જ્ઞાન થાય છે. માટે, **महाबाहुमान्** પ્રયોગ શક્ય બનશે જ. તેને ઉક્ત અનુશાસન અટકાવી નહીં શકે. આમ, બહુવ્રીહિ સમાસની બાદબાકી કરવાનું કોઈ પ્રયોજન નથી.

તે જ રીતે સમાસ પદ લખવાનું પણ પ્રયોજન નથી. કારણ કે સમાસ પદ ન લખીએ તો આપણે પહેલાં જોયો તે જ અર્થ નીકળશે કે 'મત્વર્થીય પ્રત્યય કોઈને પણ ન લાગે,

तादृशाऽनुशासनार्थः । 'महाबाहुमान्' इतिशब्देन यादृशोऽर्थः प्रतीयते तादृशोऽर्थः महाबाहुशब्देन बहुव्रीहिणा न प्रतिपाद्यते, किन्तु विद्यमानमहाबाहुकशब्देन बहुव्रीहिणा प्रतिपाद्यते । ततः नोक्ताऽनुशासनेन 'महाबाहुमान्' इतिप्रयोगो विप्रतिषिध्यते । यदि महाबाहुशब्देन बहुव्रीहिणा तादृशार्थः प्रत्याय्यते तदैव 'महाबाहुमान्' इतिप्रयोगः अनुपपन्नः स्यात्, न चैतद् अस्ति इति निष्फलमेव बहुव्रीहीतरत्वविशेषणम् इति ।

●

જો બહુવ્રીહિ સમાસ તાદૃશઅર્થબોધક હોય તો.' જ્યારે **पाचक** પદ પછી મત્વર્થીય પ્રત્યય લગાડવામાં આવે ત્યારે કૃદન્તપદ પછી મત્વર્થીય પ્રત્યય લગાડ્યો કહેવાય. માટે, કોઈ કહે કે 'જો સમાસ પદ ન લખો તો આવા કૃદન્ત, તદ્ધિત વગેરે પછી જે મત્વર્થીય પ્રત્યયો લાગે છે તે અસંગત થઈ જશે. કારણ કે તમારા જણાવ્યા મુજબ મત્વર્થીય પ્રત્યય કોઈને ન લાગે. જો એમ કહો કે સમાસ પછી મત્વર્થીય પ્રત્યય ન લાગે તો વ્યાજબી કહેવાય. મતલબ કે પાચક વગેરે પદો સમસ્ત પદો નથી. કૃદન્ત પદ છે. માટે, તેના પછી મત્વર્થીય પ્રત્યયો લાગી શકે. એટલે પાચકવાન્ વગેરે પ્રયોગો સંભવી શકે. પણ, આના માટે સમાસ પદ તો લખવું જ પડે.' આવું કોઈનું કથન તેની મંદબુદ્ધિતાને સૂચિત કરે છે. કારણ કે અનુશાસન જો બહુવ્રીહિ દ્વારા અર્થબોધ થતો હોય તો જ મત્વર્થીય પ્રત્યય લગાડવાનો નિષેધ કરે છે. બહુવ્રીહિ દ્વારા અર્થબોધ ન થતો હોય તો મત્વર્થીય પ્રત્યય લગાડવાનો નિષેધ અનુશાસન ક્યાં કરે જ છે ? પ્રસ્તુતમાં **पाचकवान्**, **वामेयवान्** ઈત્યાદિ સ્થલે કૃદન્ત, તદ્ધિતાન્ત વગેરે પદ પછી મત્વર્થીય પ્રત્યય લગાડેલ છે. અહીં જો મત્વર્થીય પ્રત્યય ન લગાડો તો બહુવ્રીહિ સમાસ દ્વારા અર્થબોધ ન થઈ શકે. કારણ કે કેવલ પાચક કે વામેય પદનો બહુવ્રીહિ સમાસ જ અસંભવિત છે. આમ, પ્રસ્તુતમાં બહુવ્રીહિ સમાસ અર્થબોધક ન બનવાને કારણે મત્વર્થીય પ્રત્યય લાગે તેમાં કોઈ જ તકલીફ નથી. જો બહુવ્રીહિ સમાસ અર્થ જણાવવા સક્ષમ હોત અને મત્વર્થીય પ્રત્યય લગાડેલ હોત તો ચોક્કસ તે પ્રયોગ અસાધુ થઈ જાત. કિંતુ બહુવ્રીહિ સમાસ અર્થબોધક બનતો જ નથી. અરે ! બહુવ્રીહિ સમાસ જ સંભવતો નથી તો પછી મત્વર્થીય પ્રત્યય લગાડીને **पाचकवान्**, **वामेयवान्** આવા પ્રયોગો કરવામાં આવે તેમાં અનુશાસનનો વિરોધ ક્યાં આવ્યો ?

⁂ અનુશાસનમાં નિરર્થક પદોનો સમાવેશ : આક્ષેપ ⁂

આ રીતે 'જો બહુવ્રીહિસમાસ અર્થબોધક બનતો હોય તો મત્વર્થીયપ્રત્યયો ન લાગે' - આટલા અનુશાસનથી જ કામ ચાલી જતું હોય તો આ અનુશાસનમાં બહુવ્રીહિઈતરસમાસ ઉમેરવાની જરૂરત શી ? એટલે કે બહુવ્રીહિ ઈતરસમાસ પછી મત્વર્થીય પ્રત્યયો ન લાગે

किञ्च, समासत्वमपि विशेषणविधया न निवेश्यम्, 'न मत्वर्थीयः प्रयुञ्जीत, बहुव्रीहिश्चेत् तदर्थप्रतिपत्तिकरः' इत्येव अनुशासनं साधु, अनुपपत्त्यापत्त्यभावात् । ***न च*** 'न मत्वर्थीयः प्रयुञ्जीत' इत्येतादृशाऽनुशासनाङ्गीकारे 'पाचकवान्' इत्येवं कृदन्तोत्तरम्, 'वामेयवान्' - इत्येवं तद्धितान्तोत्तरं मत्वर्थीयः न स्यात्, मत्वर्थीयप्रत्ययस्य उक्ताऽनुशासनेन विप्रतिषिद्धत्वात् । यदि 'समासान्मत्वर्थीयः न प्रयुञ्जीत, बहुव्रीहिश्चेत् तदर्थप्रतिपत्तिकरः' इत्येवमनुशासनं स्वीक्रियते तदा केवलसमासोत्तरमेव मत्वर्थीयस्य प्रतिषेधात् कृदन्ताद्युत्तरं तद्विधाने बाधकाभावः एवेति न काऽप्यनुपपत्तिरिति ***वाच्यम्;***

अहो विस्मरणशीलता भवतः ! पूर्वोक्तसमाधानस्य विस्मरणात्, किं पाचकपदेन बहुव्रीहिणा तादृशाऽर्थः प्रत्याय्यते ? येन 'पाचकवान्' इत्यस्य अनुपपत्तिः स्यात् । पाचकपदस्य बहुव्रीहेरे-

●

- આવું કહેવામાં આવે એટલે સહજ જ પ્રશ્ન થાય કે બહુવ્રીહિ સિવાયના સમાસ પછી મત્વર્થીય પ્રત્યય ન લાગે એટલે શું બહુવ્રીહિ પછી અને કૃદન્ત, તદ્ધિત વગેરે પછી બહુવ્રીહિ અર્થબોધક બને છતાં મત્વર્થીય પ્રત્યય લાગે ? જો લાગતા હોય તો જ બહુવ્રીહિઈતર-સમાસપદનો પ્રવેશ સાર્થક ગણાય. કારણ કે વિશેષણ હંમેશા વ્યભિચારવારક હોય. મતલબ કે 'બહુવ્રીહિઈતરસમાસ ન લખવામાં આવે તો બહુવ્રીહિ અર્થબોધક હોવા છતાં પણ બહુવ્રીહિસમાસાન્ત પદો પછી અને કૃદન્ત તથા તદ્ધિતાન્ત પદ પછી જે મત્વર્થીય પ્રત્યયો લગાવવામાં આવે છે તે અસંગત થઈ જાય' - આ રીતે કોઈ વ્યભિચાર વગેરે આવતો હોય તો બરાબર છે. તો જ 'બહુવ્રીહિઈતરસમાસ' આ રીતે વિશેષણ લખેલું સાર્થક ગણાય. પણ, આપણે જોયું તે મુજબ બહુવ્રીહિ અર્થબોધક બનતો હોય તેવા સંજોગોમાં બહુવ્રીહિ સમાસ પછી કે કૃદન્ત અને તદ્ધિતાન્ત પદ પછી મત્વર્થીય પ્રત્યય લગાવવામાં જ નથી આવતા. જ્યારે બહુવ્રીહિ સમાસ પછી અને કૃદન્ત તથા તદ્ધિતાન્ત પદો પછી મત્વર્થીય પ્રત્યયો લગાવવામાં આવે છે ત્યારે બહુવ્રીહિ સમાસ સંભવિત જ નથી હોતો. એટલે કે બહુવ્રીહિ સમાસ અર્થબોધક બનતો ન હોય તેવા સંજોગોમાં જ બહુવ્રીહિ સમાસ અને કૃદન્ત, તદ્ધિતાન્ત પદો પછી મત્વર્થીય પ્રત્યયો લગાડવામાં આવે છે. માટે, કોઈ વ્યભિચાર ન આવતો હોવાને કારણે 'બહુવ્રીહિ સિવાયના સમાસ પછી મત્વર્થીય પ્રત્યય ન લાગે' - આવું કહેવાની જરૂરત જ નથી. ફક્ત 'જો બહુવ્રીહિ સમાસ અર્થબોધક હોય તો મત્વર્થીય પ્રત્યયો ન લાગે' - આટલું અનુશાસન કાફી છે. માટે તમે બતાવેલ અનુશાસનમાં જે બહુવ્રીહિઈતરત્વ અને સમાસત્વ વિશેષણ મૂકેલા છે (મત્વર્થીય પ્રત્યય માટે અયોગ્યના) તે નક્કામા છે, વ્યર્થ છે.

न च *बहुव्रीहीतरत्वं समासत्वञ्च व्यर्थम्, बहुव्रीहेरन्यपदार्थप्रधानतया तदुत्तरमत्वर्थीयार्थस्य तावत्पदबहुव्रीहिणा बोधयितुमशक्यत्वात्,*

वाऽसम्भवान्नैव पाचकपदेन मत्वर्थीयसमभिव्याहृतेन यादृशोऽर्थः प्रतीयते तादृशोऽर्थः बहुव्रीहिणा बोधयितुं शक्यते । तथा च बहुव्रीहीतरत्वं समासत्वञ्चैतद्विशेषणद्वितयमपि व्यर्थमिति ।

एतदेव दर्शयति - **न चे**ति, **वाच्यमि**ति परेणाऽन्वयः, **बहुव्रीहीतरत्वं समासत्वं च व्यर्थम्,** 'न मत्वर्थीयः भवति, बहुव्रीहिश्चेत् तदर्थप्रतिपत्तिकरः' इत्येवमेवाऽनुशासनमङ्गीकरणीयम् । ननु 'महाबाहुमान्' इतिप्रयोगाऽनुपपत्तिरित्याशङ्कायामाह - **बहुव्रीहेरन्यपदार्थप्रधानतया,** महान्तौ बाहू यस्य सः = महाबाहुः इति बहुव्रीहिसमाश्रयणे महत्पदार्थबाहुपदार्थातिरिक्तनलादिपुरुषपदार्थस्य बोधनेन, **तदुत्तरमत्वर्थीयार्थस्य** = 'महाबाहुमान्' इत्येतादृशवाक्यप्रतिपाद्यनलविशिष्टदेशरूपाऽर्थस्य **तावत्पदबहुव्रीहिणा** = महाबाहुशब्देन बहुव्रीहिणा = महत्पद-बाहुपदयोः बहुव्रीहिणा **बोधयितुमशक्यत्वात्,** विद्यमानमहाबाहुकशब्देन बहुव्रीहिणा तादृशार्थबोधनेऽपि तादृशबहुव्रीहेः तावत्पदबहुव्रीहित्वाऽभावान्न क्षतिः ।

अत्रेदमवधेयम् - कश्चित् समासः पूर्वपदप्रधानः भवति, येन तादृशसमासेन पूर्वपदार्थविशेष्यकाऽन्वयबोधो भवति, यथा प्राप्तः जायां = प्राप्तजायः, अत्र पत्नीं प्राप्तस्य पूर्वपदार्थस्य अन्वयबोधे विशेष्यत्वम्, अर्धं पिप्पल्याः = अर्द्धपिप्पली, अत्र पिप्पल्याः अर्द्धभागस्य पूर्वपदार्थस्य अन्वयबोधे विशेष्यत्वमिति ।

कश्चित् समासः उत्तरपदार्थविशेष्यकाऽन्वयबोधजनकतया उत्तरपदार्थप्रधानः भवति, यथा राज्ञः पुरुषः = राजपुरुषः इत्यत्र पुरुषस्यैव विशेष्यत्वम् ।

बहुव्रीहिश्चाऽन्यपदप्रधानः कथ्यते, येन बहुव्रीहिजन्याऽन्वयबोधे अन्यपदार्थः विशेष्यतया भासते, यथा चित्राः गावः यस्य सः चित्रगुः गोपालः, अत्र चित्रपदार्थः गोपदार्थः वा न

शब्दार्थ :- અરે ભાઈ ! બહુવ્રીહિઈતરત્વ અને સમાસત્વ જે તમે અનુશાસનમાં જણાવેલ છે તે વ્યર્થ છે. કારણ કે બહુવ્રીહિ સમાસ તો અન્યપદપ્રધાન હોવાને કારણે (મતલબ કે **महाबाहु** પદ દ્વારા જ વિશાળ હસ્ત વિશિષ્ટ નલનો બોધ થઈ જતો હોવાને કારણે. અન્યપદ પ્રધાન એટલે કે સમાસાન્તર્ગતપદ સિવાયના નલ વગેરે પદને મુખ્ય રાખી તેના લિંગાદિને બહુવ્રીહિ સમાસ અનુસરે. માટે, બહુવ્રીહિ સમાસ અન્યપદપ્રધાન કહેવાય.) તાદૃશબહુવ્રીહિસમાસ પછી લગાવવામાં આવેલ મત્વર્થીય પ્રત્યયનો જે અર્થ (=

गू ढा *कृदन्त-तद्धितान्तादिपदोत्तरमत्वर्थीयार्थस्य तादृशपदबहुव्रीहिसमा-*
*सस्यैवाऽसम्भवेन बोधयितुमशक्यत्वा**च्चेति वाच्यम्;***

●

विशेष्यतया भासते, किन्तु गोपालः विशेष्यतया भासते । अत एव 'महाबाहुमान्' इत्यनेन प्रतिपाद्यार्थः तावत्पदबहुव्रीहिणा नैव भासते । महान्तौ च तौ बाहू च = महाबाहू, तौ स्तः यस्य सः महाबाहुमान् इत्येवम् उत्तरपदप्रधानतत्पुरुषसमासानन्तरं मत्वर्थीयविधाने 'महाबाहुमान्' इत्यनेन प्रतिपाद्यार्थः 'महान्तौ बाहू यस्य सः = महाबाहुः' - इत्येवं महाबाहुशब्देन बोध्यते एव, तादृशतत्पुरुषस्य उत्तरपदप्रधानत्वात् । किन्तु यदा 'महान्तौ बाहू यस्य सः = महाबाहुः, सोऽस्ति यत्र = महाबाहुमान्' इत्येवं बहुव्रीह्युत्तरं मत्वर्थीयः विधीयते तदा बहुव्रीहेरन्यपदप्रधानतया 'महाबाहुमान्' इत्यनेन प्रतिपाद्यः यः महाबाहुनलविशिष्टदेशलक्षणोऽर्थः स महत्पद-बाहुपदयोः बहुव्रीहिणा न प्रतिपाद्यते, अतः एव नं काप्यनुपपत्तिरित्येवं 'बहुव्रीहेरन्यपदार्थप्रधानतया' इत्यस्य सोपपत्तिकं व्याख्यानं ज्ञेयमिति ।

य शो ल ता

ननु समासपदाऽनुपादाने कृदन्त-तद्धितान्ताद्युत्तरमपि मत्वर्थीयाऽनुपपत्तेः 'पाचकवान्' इत्यादि-प्रयोगाऽसङ्गतिरित्याशङ्कायामाह - **कृदन्त-तद्धिताऽन्तादिपदोत्तरमत्वर्थीयार्थस्य** = 'पाचकवान्', 'वामेयवान्' इत्यादिशब्दप्रतिपाद्यार्थस्य **तादृशपदबहुव्रीहिसमासस्य एव** पाचकादिपदस्य अनेकपद-त्वाभावेन बहुव्रीहित्वस्य चाऽनेकपदव्याप्तत्वेन तादृशवामेयादिपदस्य बहुव्रीहिसमासस्य एवाऽ**सम्भवेन बोधयितुमशक्यत्वाच्चेत्यर्थः**, अत्र एवकारः अयोगव्यवच्छेदकः, समासः सम्भवति इति नैव इत्यर्थः, चकारः पूर्वोक्तहेतुसमुच्चये इति ।

●

મહાબાહુમાન્માં જે મહાબાહુનલવિશિષ્ટ દેશનો બોધ થાય છે તે અર્થ) તેનો બોધ તો મહા અને બાહુ પદના બહુવ્રીહિ સમાસ દ્વારા = તાવત્પદબહુવ્રીહિ દ્વારા = તેટલા પદના બહુવ્રીહિ સમાસ દ્વારા ન જ થઈ શકે. માટે, તેના પછી મત્વર્થીયપ્રત્યય લાગે તે વ્યાજબી જ છે. તેવા પ્રયોગોને અનુશાસન નહીં અટકાવે કે જેના કારણે અનુશાસનમાં તમારે બહુવ્રીહિઈતરત્વનો પ્રવેશ કરાવવો પડે. તે જ રીતે કૃદન્ત, તદ્ધિતાન્ત વગેરે - પાચક, વામેય વગેરે પદ પછી જે મત્વર્થીય પ્રત્યય લગાડવામાં આવે તેનો જે અર્થ થાય, પાચક વિશિષ્ટ, વામામાતાના અપત્યથી વિશિષ્ટ ઈત્યાદિ, તેનો બોધ તો બહુવ્રીહિ સમાસ દ્વારા થઈ જ ન શકે. કારણ કે એકલા પાચક, વામેય વગેરે પદોનો બહુવ્રીહિ સમાસ જ શક્ય નથી. આમ, પાચકવાન્, વામેયવાન્ વગેરે પ્રયોગો કરવામાં અનુશાસનનો વિરોધ નહીં આવે

વિ ન ભા

समाधत्ते - **उद्देश्यांशे** इत्यादि । उत्तरपक्षस्याऽयम् आशयः - बहुव्रीहीतरत्वं समासत्वं च न व्यावर्तकविशेषणम्, किन्तु स्वरूपदर्शकम्, उद्देश्यांशे उपरञ्जकम् । यथा 'श्यामः काकः असुन्दरः' इत्यादौ श्यामत्वं न श्यामेतरकाकव्यावर्तकम्, सर्वेषां काकानां श्यामत्वात्, किन्तु 'काकाः सर्वे श्यामाः भवन्ति' इति एवं काकस्य स्वरूपमेव दर्शयति, असुन्दरत्वलक्षण-विधेयाऽपेक्षया उद्देश्यीभूतकाकांशे उपरञ्जकमिदं विशेषणम् । उपरञ्जकम्, विशेषकम्, विशेषतादर्शकम् इत्यादयः पर्यायाः । श्यामत्वं काकस्य विशेषतादर्शकम्, उपरञ्जकं विशेषणम्, 'काकाः सर्वे श्यामाः भवन्ति' इत्येवं काकस्य श्यामत्वलक्षणविशेषतादर्शकम्, उपरञ्जनविधायकं विशेषणम् इति यावत् तात्पर्यम् ।

'नीलं घटमानय' इत्यादौ घटस्य नीलत्वविशेषणम् उपरञ्जकं न, किन्तु नीलेतरघटव्या-वर्तकम्, पीतादिघटाऽऽनयनस्याऽनभिप्रेतत्वात् । प्रकृते समासत्वं बहुव्रीहीतरत्वं च 'नीलघटः' इत्यादिमहावाक्यस्य उद्देश्यीभूतस्य विशेषणम् । 'नीलघटः' इत्यादिरूपं महावाक्यमेव न्यायदर्शने समासतया व्यवह्रियते नीलाऽभिन्नघटादिरूपाऽर्थे इति **शाब्दबोधमीमांसायां रामानुजाताताचार्य**विर-चितायां **न्यायकोशे** च **भीमाचार्य**विरचिते **जगदीशकृतशब्दशक्तिप्रकाशिका**ऽनुसारेण स्फुटम् । 'नीलघटः' एतादृशमहावाक्योत्तरं मत्वर्थीयप्रत्ययो न भवति । तथा च प्रकृताऽनुशासनेन

य शो ल ता

●

કે જે દૂર કરવા માટે અનુશાસનમાં સમાસત્વનો પ્રવેશ તમારે કરવો પડે. આમ, 'બહુવ્રીહિ સમાસ અર્થબોધક હોય તો મત્વર્થીય પ્રત્યય ન લાગે' આટલું જ અનુશાસન કાફી છે.

ગૌરવનિરાકરણ - સ્વરૂપદર્શક માનીને

उत्तरपक्ष :- (उद्दे.) જુઓ ભાઈ ! તમારી શંકા સાચી જ છે. બહુવ્રીહિઈતર સમાસ લખવા દ્વારા કોઈ જ ફરક પડતો નથી. પણ, ફરક નથી પડતો એટલે તે ન લખાય તેવું નથી. ઉદ્દેશ્યઅંશમાં ઉપરંજક = અન્ય પદાર્થ કરતા વિશેષતા દર્શાવનારા પણ વિશેષણ બની શકે છે. તે માત્ર સ્વરૂપ દર્શક હોય છે. જેમ કે કાળો કાગડો અસુંદર છે. અહીં કાગડાનું વિશેષણ શ્યામત્વ છે. આ શ્યામત્વ વિશેષણ વ્યભિચારવારક તો છે જ નહીં. કારણ કે કાગડા કાળા જ હોય. પણ, કાગડાને ઉદ્દેશીને જ્યારે અસુંદરતાનું વિધાન કરવાનું હોય ત્યારે શ્યામત્વ વિશેષણ, સુંદરપદાર્થો સામાન્યથી શ્વેત હોય તે શ્વેત પદાર્થો કરતા, કંઈક વિલક્ષણતા ઉદ્દેશ્યમાં = કાગડામાં લાવે છે. માટે, શ્યામત્વ વિશેષણ ઉદ્દેશ્ય અંશમાં

વિ ન ભા

महावाक्योत्तरं मत्वर्थीयेनप्रत्ययः निषिध्यते इति महावाक्यानां मत्वर्थीयप्रत्ययाऽयोग्यता विधीयते । ततश्च मत्वर्थीयप्रत्ययाऽयोग्यता विधेयम्, महावाक्यञ्चोद्देश्यम् । मत्वर्थीयप्रत्ययाऽयोग्यता यादृशमहावाक्ये स्यात् तादृशं महावाक्यं समासः एव स्यात्, समासोऽपि बहुव्रीहीतरः एव स्यात् । तथा च मत्वर्थीयप्रत्ययाऽयोग्यताऽपेक्षया उद्देश्यीभूतस्य महावाक्यस्य उपरञ्जकं = स्वरूपदर्शकं समासत्वं बहुव्रीहीतरत्वं विशेषणमिति।

'नीलघटः', 'पीताम्बरम्', 'महाबाहुः' - एतादृशमहावाक्योत्तरं मत्वर्थीयप्रत्ययो न भवति, एतानि सर्वाण्यपि बहुव्रीहीतरसमासरूपाण्येव । यदि 'महाबाहुः' इतिमहावाक्यं बहुव्रीहिसमासरूपं तदा तदुत्तरं मत्वर्थीयप्रत्ययो भवत्येव, 'वामेयम्' - इत्यादितद्धितान्तोत्तरमपि मत्वर्थीयप्रत्ययो भवत्येव । तथा च बहुव्रीहीतरसमासोत्तरमेव मत्वर्थीयप्रत्ययो न भवति, बहुव्रीहीसमासोत्तरं तद्धिताद्युत्तरञ्च मत्वर्थीयप्रत्ययो भवत्येवेत्येवं मत्वर्थीयप्रत्ययाऽयोग्यतारूपविधेयस्योद्देश्यीभूतस्य महावाक्यस्य स्वरूपदर्शकमिदं विशेषणमिति स्थितम् । उपरञ्जकतया स्वरूपदर्शकस्याऽपि विशेषणस्य सार्थक्याऽभ्युपगमान्नाऽत्र बहुव्रीहीतरत्वस्य समासत्वस्य च व्यर्थत्वमिति आशयेनाह - मत्वर्थीयप्रत्ययाऽयोग्यतारूपविधेयाऽपेक्षया उद्देश्यीभूतमहावाक्याद्यंशे उपरञ्जकतया =

●

ઉપરંજક કહેવાય. જ્યારે આવું વિશેષણ જણાવવામાં આવે ત્યારે તે સ્વરૂપબોધક સમજવાનું. વિશેષણ બે પ્રકારના હોય (૧) વ્યભિચારવારક = વ્યાવર્તક (૨) સ્વરૂપદર્શક. જેમ કે 'વશિષ્ઠ બ્રાહ્મણોને જમવા માટે બોલાવો'. અહીં વશિષ્ઠ વિશેષણ વશિષ્ઠબ્રાહ્મણેતરની વ્યાવૃત્તિ કરે છે, બાદબાકી કરે છે. જો વશિષ્ઠપદ ન જણાવવામાં આવે તો વશિષ્ઠ બ્રાહ્મણ સિવાયના પણ જમવા આવી જાય. માટે, વશિષ્ઠ વિશેષણ વ્યાવર્તક હોવાને કારણે સાર્થક વિશેષણ કહેવાય.

જ્યારે 'કાગડો કાળો છે' - આવું કહેવામાં આવે ત્યારે શ્યામત્વ કાગડાના સ્વરૂપને દેખાડે છે કે 'ભાઈ ! કાગડાનું સ્વરૂપ શ્યામ છે.' આ વિશેષણ કોઈ સફેદ કાગડાની બાદબાકી કરનાર નથી. કારણ કે દુનિયામાં સફેદ કાગડા છે જ નહીં. જે કાગડા છે તે કાળા જ છે. આ સ્વરૂપદર્શક વિશેષણ કહેવાય. પ્રસ્તુતમાં પણ જે બહુવ્રીહિઈતરસમાસત્વને વિશેષણ બનાવેલ છે તે સ્વરૂપદર્શક છે. બહુવ્રીહિ સમાસની કે કૃદન્ત - તદ્ધિતાન્ત વગેરેની બાદબાકી કરવા માટે નથી જણાવેલ. મતલબ કે મત્વર્થીય પ્રત્યય જ્યાં બહુવ્રીહિ સમાસ અર્થબોધક હોય ત્યાં અયોગ્ય બને. પીતામ્બરવાન્ અહીં મત્વર્થીયપ્રત્યય અયોગ્ય બને.

उद्देश्यांशे उपरञ्जकस्यापि विशेषणत्वेन स्वरूपबोधनार्थत्वात् ।

●

विशेषतादर्शकतया = 'मत्वर्थीयप्रत्ययाऽयोग्यानि महावाक्यादीनि बहुव्रीहीतरसमासरूपाण्येव भवन्ति' इत्येवं बहुव्रीहीतरत्वस्य समासत्वस्य च उद्देश्यीभूतमहावाक्यादेः विशेषतादर्शकतया, **उद्देश्यांशे उपरञ्जकस्यापि विशेषणत्वेन** = विशेषयणतया स्वीकृतत्वेन बहुव्रीहीतरत्व-समासत्वलक्षण-विशेषणद्वितयस्य **स्वरूपबोधनार्थत्वात्** = स्वरूपबोधनमेव अर्थः = प्रयोजनं यस्य तादृशत्वात्, तथा च उद्देश्यीभूतस्य स्वरूपमेव बोधयति तादृशविशेषणद्वितयम् इति न तस्य नैरर्थक्यमिति भावः ।

●

પીતામ્બર વગેરે પદોને ઉદ્દેશીને મત્વર્થીયપ્રત્યયની અયોગ્યતાનું વિધાન કરવામાં આવે છે. માટે, ઉદ્દેશ્ય પીતામ્બર વગેરે પદો - શબ્દો થયા. આ પદો હંમેશા બહુવ્રીહિઈતરસમાસવાળા જ હશે. બહુવ્રીહિસમાસવાળા કે કૃદન્ત - તદ્ધિતાન્ત પદો એકેય નહીં હોય કે જેમાં મત્વર્થીયપ્રત્યય માટેની અયોગ્યતા હોય. મત્વર્થીયપ્રત્યય માટેની અયોગ્યતા બહુવ્રીહિઈતર-સમાસવાળા પદોમાં જ છે. આમ, પીતામ્બર વગેરે જે ઉદ્દેશ્ય છે તેમાં બહુવ્રીહિઈતરસમાસ પદે વિશેષતા લાવી. માટે, તે ઉપરંજક કહેવાય. અને ઉદ્દેશ્ય અંશમાં ઉપરંજક પણ વિશેષણ બની શકતું હોવાને કારણે આ ઉપરંજકીભૂત સ્વરૂપદર્શી વિશેષણ સાર્થક જ છે. મતલબ કે મત્વર્થીયપ્રત્યયો માટે અયોગ્ય એવા પદોનું એવું સ્વરૂપ છે કે તે બહુવ્રીહિઈતરસમાસ જ હોય. બહુવ્રીહિસમાસ કે કૃદન્ત, તદ્ધિતાન્ત પદો ન હોય - આ રીતે બહુવ્રીહિઈતરસમાસ પદે કોઈની બાદબાકી નથી કરી, કિંતુ ઉદ્દેશ્યનું સ્વરૂપ બતાવેલ છે. સ્વરૂપદર્શી વિશેષણો પણ પ્રયોગમાં વપરાતા જ હોય છે. માટે, પ્રસ્તુત અનુશાસનમાં 'બહુવ્રીહિઈતરસમાસ પછી મત્વર્થીય પ્રત્યય ન લાગે, જો બહુવ્રીહિસમાસ અર્થબોધક હોય તો' - આ રીતે બહુવ્રીહિઈતરસમાસને સ્વરૂપદર્શી વિશેષણ તરીકે મૂકો તો વાંધો નથી. બાકી તાત્પર્યાર્થ તો તમે જણાવેલ તે જ છે કે 'જો બહુવ્રીહિ સમાસ અર્થબોધક બનતો હોય તો મત્વર્થીય પ્રત્યય ન લાગે.'

शब्दार्थ :- આવી શંકા ન કરવી, ઉદ્દેશ્યઅંશમાં ઉપરંજક = વિશેષતા લાવનાર/દર્શાવનાર પણ વિશેષણ બની શકતા હોવાથી ફક્ત ઉપરંજક એવા તે વિશેષણો તે - તે વિશેષ્યના સ્વરૂપને જણાવવાના પ્રયોજનથી જ વપરાય છે. માટે, પ્રસ્તુતમાં પણ સ્વરૂપદર્શી વિશેષણ જ સમજવું. મત્વર્થીયપ્રત્યય જેને ન લાગે તેનું માત્ર સ્વરૂપ જ બહુવ્રીહિઈતરસમાસ પદ જણાવે છે.

ननु 'न कर्मधारयान्मत्वर्थीयः प्रयुञ्जीत, बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः' - इत्येतादृशाऽनुशासनाङ्गीकारे 'साध्याभाववदवृत्तित्वम्' - इत्यत्र 'साध्याभाववद्' - इत्यस्य साध्यस्य अभावः = साध्याभावः, सोऽस्यास्तीति साध्याभाववद् - इत्येवमेव विग्रहस्याऽभ्युपगन्तव्यतया तादृशमतुप्प्रत्ययाऽनुपपत्तिः, उक्तयुक्त्या कर्मधारयपदस्य बहुव्रीहीतरपरतया उक्तानुशासनेन षष्ठीतत्पुरुषोत्तरं मत्वर्थीयनिषेधात् । ततश्च यथा उक्तानुशासनसङ्कोचेन 'साध्याभाववद्' इतिप्रयोगः उपपादनीयः तथा 'साध्याभाववदवृत्ती' इत्येवं प्रयोगोऽप्युपपद्यते ए***वेति चेद् ?***

न; बहुव्रीहिसमासस्य मतुब्बोध्यार्थप्रतिपादकत्वे एव तादृशमतुप्प्रत्ययस्योक्ताऽनुशासनेन असङ्गतत्वसिद्धेः, 'साध्याभाववद्' इत्यत्र मतुब्बोध्यः यः साध्याभावविशिष्टदेशरूपाऽर्थः तत्प्रतिपादकबहुव्रीहिसमासस्य प्रकृते अभावात् ।

अयमाशयः - 'पीताम्बरवान्' - इत्यत्र मतुब्बोध्यस्य पीताऽम्बरविशिष्टरूपार्थस्य 'पीतम् अम्बरं यस्य सः = पीताम्बरः' इत्यादिबहुव्रीहिणा प्रतिपाद्यत्वेन तादृशमतुप्प्रत्ययः असङ्गतः भवति, किन्तु 'साध्याभाववद्' - इत्यत्र मतुब्बोध्यस्य साध्याभावविशिष्टरूपार्थस्य प्रतिपादकः कोऽपि बहुव्रीहिसमासः एव नास्ति, तर्हि कथं 'साध्याभाववद्' - इत्येवं प्रयोगोऽसङ्गतः स्यात् ?, बहुव्रीहेः तादृशार्थप्रतिपत्तिकरत्वे एव उक्तानुशासनेन मत्वर्थीयनिषेधात्, 'न कर्मधारयान्मत्वर्थीयः प्रयुञ्जीत, बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः' इत्यनुशासनाऽऽकाराच्च ।

न च 'न कर्मधारयान्मत्वर्थीयः प्रयुञ्जीत' इत्येवमनुशासनमस्तु 'बहुव्रीहिश्चेत् तदर्थप्रतिपत्तिकरः' - इत्यंशः माऽस्तु, प्रयोजनविरहात्, उक्तांशाऽनिवेशेऽपि 'पीताम्बरवान्' इत्यादिप्रयोगस्याऽसाधुत्वोपपत्तेः । तथा च 'साध्याभाववद्' - इत्यत्र बहुव्रीहेः तादृशार्थाऽप्रतिपादकत्वेऽपि षष्ठीतत्पुरुषोत्तरं मत्वर्थीयः उक्ताऽनुशासनेनाऽसङ्गतः एव स्या***दिति वाच्यम्;***

नित्यसमासोत्तरमत्वर्थीयप्रत्ययानां साधुत्वोपपत्तये तस्याऽवश्यं निवेशनीयत्वात् । अयं भावः - 'खट्वारूढः', 'कृष्णसर्पः' - इत्यादयो नित्यसमासाः, खट्वामारूढः इत्येवं विग्रहकरणे खट्वारूढशब्दप्रतिपाद्यमूर्खरूपाऽर्थः न प्रतीयते, किन्तु खट्वामारूढस्य कस्यचिद् बुद्धस्याऽपि प्रतीतिः भवति, खट्वारूढः - इति नित्यसमासेन च खट्वामारूढः अनारूढः वा मूर्खः एव प्रतिपाद्यते, अतः विभक्तिप्रक्षेपेण स्वार्थाऽबोधकाः समासाः नित्यसमासतया व्यवह्रियन्ते समासविद्भिः । एवमेव 'कृष्णश्च असौ सर्पश्च' इत्येवं विग्रहकरणे कृष्णसर्पशब्दप्रतिपाद्यविलक्षणसर्परूपाऽर्थः न प्रतीयते, 'कृष्णसर्पः' - इति नित्यसमासेन च प्रतीयते विलक्षणसर्पः, सः

कृष्णः स्यान्न वेत्यन्यदेतत् । तथा च विग्रहकरणे 'कृष्णसर्पः' - इतिशब्दः विलक्षणसर्परूपस्वार्थबोधको न भवति, अतः सः नित्यसमासः उच्यते । ये 'खट्वारूढवान् देशः', 'कृष्णसर्पवान् वल्मीकः' इत्यादिप्रयोगाः क्रियन्ते ते साधुप्रयोगाः एव । यदि उक्ताऽनुशासने 'बहुव्रीहिश्चेत् तदर्थप्रतिपत्तिकरः' इति न निवेश्यते तदा एते प्रयोगाः असाधुतया व्यवहर्त्तव्याः स्युः, 'खट्वारूढः' इतिशब्दस्य द्वितीयाविभक्तितत्पुरुषनित्यसमासत्वेन 'कृष्णसर्पः' इतिशब्दस्य कर्मधारयनित्यसमासत्वेन तदुत्तरमपि मत्वर्थीयप्रत्ययस्योक्तानुशासनेन निषेधात् । यदि 'बहुव्रीहिश्चेत् तदर्थप्रतिपत्तिकरः' - इति निवेश्यते तदा 'खट्वारूढवान्' इति शब्दप्रतिपाद्यमूर्खविशिष्टदेशस्य केनाऽपि बहुव्रीहिणा अप्रतिपादनात् तदुत्तरं मत्वर्थीयप्रत्ययस्योक्ताऽनुशासनेन न निषेधः । एवमेव 'कृष्णः सर्पः यत्र सः कृष्णसर्पः वल्मीकः' इत्येवं बहुव्रीह्याश्रयणेऽपि कृष्णरूपविशिष्टसर्पविशिष्टवल्मीकस्यैव भानेन 'कृष्णसर्पवान् वल्मीकः' इत्येवं नित्यसमासप्रतिपाद्यविलक्षणसर्पविशिष्टवल्मीकरूपाऽर्थस्योक्तबहुव्रीहिणाऽप्रतिपादनेन तादृशनित्यसमासोत्तरं मत्वर्थीयः स्यादेव, उक्ताऽनुशासनेन बहुव्रीहेः तदर्थप्रतिपत्तिकरत्वे एव कर्मधारयसमासोत्तरमत्वर्थीयनिषेधादिति भावनीयम् ।

तथा च 'बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः' - इत्यस्यावश्यं निवेशनीयतया 'साध्याभाववद्' - इत्यत्र बहुव्रीहेः तदर्थप्रतिपत्तिकरत्वाभावेन न मतुप्प्रत्ययाऽनुपपत्तिः ।

न च 'साध्यस्याऽभावो यत्र सः साध्याभावः देशः' - इत्येवं बहुव्रीहिः तादृशाऽर्थप्रतिपत्तिकरः भवत्येवेति उक्ताऽनुशासनेन उक्तप्रयोगोऽसङ्गतः एव स्यादिति नैव एतादृशाऽनुशासनमङ्गीकरणीय***मिति वाच्यम्;***

तादृशव्यधिकरणबहुव्रीहेरस्वीकार्यत्वात्, व्यधिकरणबहुव्रीहेः अनन्यगतिकत्वे एव क्वचिदङ्गीकारात् । ***न चा***ऽत्राऽनन्यगतिकत्वमे***वेति वाच्यम्;*** 'साध्यस्य अभावः = साध्याभावः, सोऽस्याऽस्तीति साध्याभाववान्' - इत्येवं षष्ठीतत्पुरुषोत्तरं मत्वर्थीयाऽङ्गीकारे अनुपपत्त्यभावात्, अत एव साध्याभाववद् - इतिप्रयोगः अनुसृतः ।

न च तादृशविग्रहाङ्गीकारे उक्ताऽनुशासनभङ्गः, बहुव्रीह्यङ्गीकारे व्यधिकरणबहुव्रीह्यङ्गीकाराऽऽपत्तिरिति 'इतो व्याघ्रः इतस्तटी'ति न्यायापातः ***इति वाच्यम्;***

अभिप्रायाऽपरिज्ञानात् । 'पीतं च तदम्बरं च = पीताम्बरम्, तदस्याऽस्तीति पीताम्बरवान्' इत्येवं समासाऽसङ्गतत्वाऽऽपादनमुक्ताऽनुशासनेन क्रियते तच्च लाघवार्थमेव, 'पीतम् अम्बरं यस्य सः पीताम्बरः कृष्णः' - इत्येवं बहुव्रीहिरूपैकवृत्त्यैव इष्टार्थबोधसम्भवे तादृशकर्मधारय

-मत्वर्थीयप्रत्ययविधानलक्षणवृत्तिद्वयाङ्गीकारे गौरवात् । किन्तु यदि 'साध्याभाववद्' - इत्यत्र 'साध्यस्य अभावः = साध्याभावः, सोऽस्यास्तीति साध्याभाववद्' इत्येवं विग्रहं निराकृत्य 'साध्यस्य अभावो यत्र तत् साध्याभावम् अधिकरणम्' - इत्येवं व्यधिकरणबहुव्रीहिरुक्ताऽनुशासनवशेनाऽऽश्रीयते तदा महागौरवं स्यात्, व्यधिकरणबहुव्रीह्यङ्गीकारे महागौरवस्य सर्ववादिसम्मतत्वात्, अतः एव तस्य क्वाचित्कत्वस्य सर्ववादिभिः अङ्गीकारात् । तथा च व्यधिकरणबहुव्रीहेः तदर्थप्रतिपत्तिकरत्वेऽपि कर्मधारयान्मत्वर्थीयप्रत्ययः भवत्येव, तदतिरिक्तबहुव्रीहेरेव तदर्थप्रतिपत्तिकरत्वे कर्मधारयान्मत्वर्थीयप्रत्ययः निषिध्यते इति ।

न च साध्याभाववतः अवृत्तिः अस्येति साध्याभाववदवृत्ती - इत्येवं मत्वर्थीयप्रत्ययः उक्ताऽनुशासनेन भवता निषिध्यते । किन्तु अत्र को बहुव्रीहिः तदर्थप्रतिपत्तिकरः येन तादृशप्रत्ययः न स्यादुक्तानुशासनेन ? भवता 'साध्याभाववतः न वृत्तिः यत्र सः साध्याभाववदवृत्तिः' - इत्येवं व्यधिकरणबहुव्रीहिरेवाश्रीयते, ततः व्यधिकरणबहुव्रीह्यपेक्षया उक्तरीत्या अव्ययीभावाद्युत्तरं मत्वर्थीयप्रत्ययः एवाङ्गीकरणीयः स्यात् । तथा च साध्याभाववतः न वृत्तिः यत्रेत्यादिरीत्या व्यधिकरणबहुव्रीह्यङ्गीकारे भवतोक्तरीत्या महागौरवात् 'साध्याभाववतः अवृत्तिः अस्येति साध्याभाववदवृत्ती' - इत्येवं मत्वर्थीयः एव स्वीकार्यः स्या***दिति वाच्यम्;***

'साध्याभाववदवृत्तिरयं हेतुः' इत्यादिस्थले व्यधिकरणबहुव्रीहेरवश्यं स्वीकार्यत्वेनोक्ताऽनुशासनेन अत्र मत्वर्थीयनिषेधात् ।

इदमत्र हृदयम् - 'साध्याभाववदवृत्तिरयं हेतुः' - इत्येवं प्रयोगस्य अन्यथाऽनुपपत्त्या अत्र व्यधिकरणबहुव्रीहिः स्वीकर्तव्यः एव । यदि भवदुक्तरीत्या मत्वर्थीयप्रत्ययः अङ्गीक्रियते तदा 'साध्याभाववदवृत्ती अयं हेतुः' - इत्येवोच्यते । 'साध्याभाववदवृत्तिरयं हेतुः' - इत्येवं प्रयोगः व्यधिकरणबहुव्रीहिस्वीकारे एव सङ्गतः स्यात् । तथा च साध्याभाववदवृत्तिरित्यत्र व्यधिकरणबहुव्रीहिरङ्गीकरणीयः एव, तदा भवदुक्तरीत्या मत्वर्थीयप्रत्ययः नैवाङ्गीकरणीयः, उक्ताऽनुशासनेन तन्निषेधात् । मत्वर्थीयप्रत्ययाङ्गीकारे वृत्तिद्वयाङ्गीकारप्रयुक्तगौरवं व्यधिकरणबहुव्रीहिस्वीकाराऽपेक्षयाऽतिरिच्यते, मत्वर्थीयप्रत्ययाङ्गीकारेऽपि व्यधिकरणबहुव्रीहेरवश्यमङ्गीकरणीयत्वादिति सूक्ष्ममीक्षणीयम् । एवञ्चोक्ताऽनुशासनेन 'साध्याभाववदि'ति प्रयोगो न निषिध्यते, यदि 'साध्याभावमधिकरणम्' इत्येवं स्वरसवाही प्रयोगः स्यात् तदा तत्र व्यधिकरणबहुव्रीहेरवश्यमङ्गीकरणीयतया 'साध्याभाववद्' - इति प्रयोगः असङ्गतः स्यात् । किन्तु तादृशप्रयोगो

नास्ति, अतः 'साध्याभाववदि'त्यत्र व्यधिकरणबहुव्रीह्यङ्गीकाराऽपेक्षया 'साध्यस्याभावः = साध्याभावः, सोऽस्याऽस्तीति साध्याभाववदि'त्येवं षष्ठीतत्पुरुषोत्तरं मत्वर्थीयप्रत्ययाङ्गीकारे लाघवमिति बहुव्रीहेः तदर्थप्रतिपत्तिकरत्वाऽभावान्नोक्ताऽनुशासनेन साध्याभाववदिति प्रयोगाऽनुपपत्तिः ।

अत्र ***केचन*** 'साध्याभाववद्' - इत्येवं प्रयोगोपपत्त्यर्थं 'साध्यमभावः यस्य सः साध्याभावः, सः अस्याऽस्तीति साध्याभाववद्' - इत्येवं विग्रहमङ्गीकुर्वन्ति, साध्याभावाभावस्य साध्यरूपतया 'साध्यम् अभावः यस्य सः' - इत्येवं बहुव्रीहिणा साध्याभावः एव प्रतिपाद्यते । उक्ताऽनुशासनेन च बहुव्रीहीतरसमासोत्तरमेव मत्वर्थीयनिषेधात्तादृशबहुव्रीह्युत्तरं मत्वर्थीयः यदि स्यात् तदा न काऽप्यनुपपत्तिः । तथा च 'साध्याभाववद्' - इतिप्रयोगः नाऽनुपपन्नः । यद्वा 'अभावः अस्ति अस्येति अभाववत्, साध्यस्य अभाववद् इति साध्याभाववद्' - इत्येवं विग्रहमङ्गीकुर्वन्ति केचन । तदुक्तं **शिवदत्तमिश्रेण व्याप्तिपञ्चकमाथुरीवृत्तौ गङ्गा**भिधानायां "**ननु** कर्मधारयपदस्य बहुव्रीहीतरसमासमात्रपरत्वेऽपि साध्याभाववदवृत्तित्वमित्यत्र साध्याभाववत्पदस्य साधुत्वानुपपत्तिः, साध्यस्य अभावः = साध्याभावः इति षष्ठीतत्पुरुषोत्तरमत्वर्थीयस्याऽनुशासनविरुद्धत्वा***दिति चेद् ?***

नः; साध्यम् अभावो यस्येति बहुव्रीह्युत्तरं मतुप्प्रत्ययः, नातो विरोधशङ्काऽपीति । अथवा अभावो विद्यते यत्रासौ अभाववानिति मतुप्प्रत्ययाऽनन्तरं तद्घटकाऽभावपदेन साध्यपदस्य षष्ठीतत्पुरुषः, प्रतियोगिसापेक्षसमासस्येष्टत्वादि" (व्या.प.मा.गङ्गाटीका पृ.१६)ति ।

तत्र चतुरचेतसां चेतसि चकास्ति, साध्यस्याऽभावः = साध्याभावः, सोऽस्याऽस्तीति साध्याभाववद् - इत्येवं षष्ठीतत्पुरुषोत्तरं मत्वर्थीयाङ्गीकारेऽपि उक्तरीत्या क्षत्यभावात् । साध्यस्याभावः... इत्यादिविग्रहाङ्गीकारेऽपि उक्ताऽनुशासनेन अनुपपत्त्यभावात्किमर्थं तादृशविग्रहः अङ्गीकरणीयः ? इति ।

यदि 'साध्यस्याऽभावो यत्र तत् - साध्याभाववद्' - इत्येवं व्यधिकरणबहुव्रीहिः तादृशार्थप्रतिपत्तिकरत्वेन स्वीक्रियते तदा वक्ष्यमाणप्रबन्धाऽनुपपत्तिः, तेनैव तत्रैवाग्रे उक्तस्याऽनुपपत्तिश्च । अयमाशयः - 'न कर्मधारयान्मत्वर्थीयः प्रयुञ्जीत, बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः' इत्यनुशासनं किमर्थमङ्गीक्रियते ? 'न कर्मधारयान्मत्वर्थीयः प्रयुञ्जीत, बहुव्रीहिश्चेत्तत्र सम्भवति' - इत्येवोच्यताम् - इत्याशङ्कायां ग्रन्थकृता इत्थं समाहितं यदुत - बहुव्रीहिश्चेत् तत्र सम्भवतीत्येव कथने 'राजपुरुषवान्' - इतिप्रयोगाऽनुपपत्तिः । 'राज्ञः पुरुषः = राजपुरुषः, सः यत्र विद्यते असौ

राजपुरुषवान्' इत्येवम् अत्र विग्रहः अङ्गीकृतः, अत्र 'राजा पुरुषो यत्र सः राजपुरुषः देशः' - इत्येवं बहुव्रीहिः सम्भवत्येव, किन्तु तादृशबहुव्रीहिणा राजाऽभिन्नपुरुषविशिष्टस्य प्रतिपादनं क्रियते, 'राजपुरुषवान्' - इत्यनेन राजसम्बन्धिपुरुषविशिष्टस्य प्रतिपादनं क्रियते। ततः यदि बहुव्रीहिश्चेत् तत्र सम्भवतीत्येव कथ्यते तदा अत्र बहुव्रीहेः सम्भवाद् 'राजपुरुषवान्' - इतिप्रयोगः उक्ताऽनुशासनेनाऽनुपपन्नः स्यात्, बहुव्रीहेः सम्भवेऽपि षष्ठीतत्पुरुषोत्तरं मत्वर्थीय-विधानात्, 'न कर्मधारयाद् (= बहुव्रीहीतरसमासाद्) मत्वर्थीयः प्रयुञ्जीत, बहुव्रीहिश्चेत्तत्र सम्भवती'त्येव अनुशासनस्याङ्गीकृतत्वाच्च ।

यदि 'बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः' - इत्येवं निवेश्यते तदा 'राजपुरुषवान्' इतिप्रयोगो नाऽनुपपन्नः स्यात्, राजा पुरुषो यत्रेत्यादिबहुव्रीहिणा राजपुरुषवच्छब्दप्रतिपाद्यराजसम्बन्धिपुरुष-विशिष्टरूपाऽर्थस्य अप्रतिपादनात्, उक्तबहुव्रीहिणा राजाऽभिन्नपुरुषविशिष्टरूपाऽर्थस्यैव प्रतिपादनात् । तथा च तादृशबहुव्रीहेः तदर्थप्रतिपत्तिकरत्वाऽभावेन 'राजपुरुषवान्' - इत्येवं षष्ठीतत्पुरुषोत्तरं मत्वर्थीयः स्यादेव, नाऽत्रोक्तानुशासनं बाधकमिति भावः ।

एतच्चाऽनुपदमेव वक्ष्यमाणमनुपपन्नं स्यात् । भवता 'साध्याभाववद्' - इत्यत्र साध्यस्याऽभावो यत्रेत्यादिबहुव्रीह्यङ्गीकारेण उक्ताऽनुशासनेन तादृशप्रयोगाऽनुपपत्तिशङ्का स्वीक्रियते, अतः एव तद्व्यपोहाय साध्यम् अभावो यस्येत्यादिरीत्या विग्रहः अङ्गीक्रियते । एवं सति 'राज्ञः पुरुषो यत्र सः राजपुरुषः देशः' इत्येवं व्यधिकरणबहुव्रीहिरपि राजसम्बन्धिपुरुषविशिष्टरूपार्थप्रति-पादकत्वेन अङ्गीकरणीयः एव, तथा सति तादृशव्यधिकरणबहुव्रीहेः राजपुरुषवच्छब्दप्रतिपाद्यराज-सम्बन्धिपुरुषविशिष्टरूपाऽर्थप्रतिपादकत्वेन 'राज्ञः पुरुषः = राजपुरुषः' - इत्येवं षष्ठीतत्पुरुष-समासोत्तरं 'राजपुरुषो विद्यते यत्र सः राजपुरुषवान्' - इत्येवं मत्वर्थीयः अनुपपन्नः एव स्यात् । तर्हि किमर्थं तत्साधुत्वोपपत्तये 'बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः' इत्येवं प्रवेशनीयम् ? 'बहुव्रीहिश्चेत्तत्र सम्भवति' - इत्येवमेव साधु । अनिष्टं चैतत्, प्रतीतिविरुद्धञ्च ।

न च 'पुरुषो विद्यते यत्र सः पुरुषवान्, राज्ञः पुरुषवान् इति राजपुरुषवान्' - इत्येवमेव विग्रहः अङ्गीकरणीयः, तथा च 'राजपुरुषवान्' इत्येवं प्रयोगोऽप्युपपद्यते एव, पुरुषपदोत्तर-मत्वर्थीयविधाने उक्ताऽनुशासनस्य बाधकत्वाऽसम्भवात् । एतादृशप्रयोगोपपत्त्यर्थमेव अनुशासने 'बहुव्रीहिश्चेत्तत्र सम्भवती'ति एवं निवेशमनादृत्य 'बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः' इत्येवमुक्तम्, अन्यथा राजा पुरुषो यत्र... इत्यादिबहुव्रीहेरत्र सम्भवेन मत्वर्थीयाऽसङ्गतेः ***इति वाच्यम्;***

उन्मत्तप्रलापतुल्यत्वात् । सौम्य ! यदि 'पुरुषः विद्यते अत्रेति पुरुषवान्, राज्ञः पुरुषवान् = राजपुरुषवान्' - इत्येवं विग्रहः कक्षीक्रियते त्वया, तदा बहुव्रीहेरत्र सम्भवेऽपि का तव हानिः ? 'बहुव्रीहिश्चेत्तत्र सम्भवति' - इत्याद्यनुशासनाङ्गीकारेऽपि बहुव्रीहीतरसमासोत्तरमेव मत्वर्थीयनिषेधात्, बहुव्रीहेः सम्भवेऽपि पुरुषपदोत्तरं मत्वर्थीयविधाने न एतदनुशासनं बाधकम् । पुरुषपदस्य च बहुव्रीहेरेवाऽसम्भवात् कुतः तदुत्तरं मत्वर्थीयनिषेधः कर्तुं शक्यते ? बहुव्रीहिश्च राजपुरुषशब्दस्य सम्भवति अतः तदुत्तरं मत्वर्थीयो न स्यादिति अभ्युपगम्यते तथापि पुरुषपदस्य तु बहुव्रीहिः नैव सम्भवति, ततः तदुत्तरं मत्वर्थीयः कथं न स्यात् ? ततश्च 'राजपुरुषवान्' इत्यस्य पूर्वोक्तरीत्या विग्रहाङ्गीकारे 'न कर्मधारयाद् (= बहुव्रीहीतरसमासाद्) मत्वर्थीयः प्रयुञ्जीत, बहुव्रीहिश्चेत्तत्र सम्भवती'त्यनुशासनाङ्गीकारेऽपि न कापि क्षतिः स्यात् । ततः अनुशासने 'बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः' इत्येवं निवेशः निरर्थकः एव स्यादिति ।

किञ्च, **शिवदत्तमिश्रेण** तु राज्ञः पुरुषः = राजपुरुषः, सोऽत्राऽस्तीति राजपुरुषवान् - इत्येवमेव विग्रहः अङ्गीक्रियते, तथा च राज्ञः पुरुषो यत्र इत्यादिव्यधिकरणबहुव्रीहिणा एव तादृशार्थप्रत्यायनेन 'राजपुरुषवान्' इतिप्रयोगोऽनुपपन्नः एव स्यात् । ततश्च तेनाऽपि तत्र दर्शितं, 'बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः' इत्यादिप्रवेशप्रयोजनं फल्गु एव स्यात् ।

तदुक्तं तत्रैव तेनैव "***न च*** 'न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेत्तत्र सम्भवती'त्येव कथं नोक्तम् ? ***इति वाच्यम्;*** राजसम्बन्धिपुरुषसम्बन्धिदेशतात्पर्यके 'राजपुरुषवान्' इत्यत्र षष्ठीतत्पुरुषोत्तरं मतुब् न स्यात्तत्र 'राजा पुरुषो यत्रे'ति बहुव्रीहेः सम्भवाद्" (व्या.प.मा.गङ्गा-पृ.१६-१७) इति ।

यदि साध्यस्य अभावो यत्रेत्यादिव्यधिकरणबहुव्रीहेः तादृशाऽर्थप्रतिपत्तिकरत्वमङ्गीकृत्य 'साध्यस्य अभावः = साध्याभावः, सोऽत्राऽस्तीति साध्याभाववद्' - इत्येवं षष्ठीतत्पुरुषोत्तरं मत्वर्थीयप्रत्ययाऽनुपपत्तिमङ्गीकृत्य 'अभावो विद्यते यत्र असौ अभाववान्, साध्यस्य अभाववान् = साध्याभाववान्' इत्येवं विग्रहोऽङ्गीक्रियते तदा 'राज्ञः पुरुषो यत्रे'त्यादिव्यधिकरणबहुव्रीहेः तादृशाऽर्थप्रतिपत्तिकरत्वमङ्गीकृत्य 'राज्ञः पुरुषः = राजपुरुषः, सोऽत्रास्तीति राजपुरुषवान्' - इत्येवं षष्ठीतत्पुरुषसमासोत्तरं मत्वर्थीयप्रत्ययस्याऽसङ्गतत्वस्वीकारपूर्वं 'पुरुषो विद्यते यत्र असौ पुरुषवान्, राज्ञः पुरुषवान् = राजपुरुषवान्' - इत्येवमेव विग्रहः कक्षीकरणीयः स्यादिति कथं 'बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः' इत्यादिप्रवेशप्रयोजनं यत्प्रदर्शितं तत्सङ्गतिमङ्गति ?

न च 'राज्ञः पुरुषवान् = राजपुरुषवान्' - इत्येवं विग्रहाङ्गीकारे 'राज्ञः' इतिपदप्रतिपाद्यस्य

राजसम्बन्धित्वरूपार्थस्य पुरुषेऽन्वयादेकदेशाऽन्वयाऽऽपत्तिः, 'पदार्थः पदार्थेनाऽन्वेति, न तु तदेकदेशेन' इति व्युत्पत्तिविरोधश्चेति न तादृशः विग्रहोऽङ्गीक्रियते ***इति वाच्यम्;***

"साध्यस्य अभाववत् = साध्याभाववद् - इत्येवं विग्रहाङ्गीकारे यथा तादृशव्युत्पत्तिसङ्कोचः क्रियते तथा 'राज्ञः पुरुषवान् = राजपुरुषवान्' इत्येवं विग्रहाङ्गीकारेऽपि तादृशव्युत्पत्तिः सङ्कोच्यतामि"ति वदतः मुखं पिधातुमशक्यत्वात्, 'शरेण शातितपत्रोऽयं वृक्षः, चैत्रस्य गुरुकुलम्, चैत्रस्य दासभार्या' इत्यादौ शरकरणकत्वस्य शातनक्रियायां चैत्रसम्बन्धित्वस्य च गुरु-दासपदार्थादौ अन्वयस्य दर्शनेन भेदेनैकदेशाऽन्वयस्य स्वीकृतत्वात्, अभेदेनैव एकदेशाऽन्वयस्याऽनङ्गीकारात्, यथा 'ऋद्धस्य राजमातङ्गाः' इत्यत्र ।

किञ्च, 'राज्ञः पुरुषवान्' - इत्यादिरीत्या विग्रहानङ्गीकारेऽपि 'राज्ञः पुरुषः = राजपुरुषः, राजपुरुषो विद्यते यत्राऽसौ राजपुरुषवान्' - इत्येवं षष्ठीतत्पुरुषसमासोत्तरं मत्वर्थीयः तु नैव स्वीकर्तुं शक्यते, भवन्मते राज्ञः पुरुषो यत्रेत्यादिव्यधिकरणबहुव्रीहेः तादृशार्थप्रतिपत्तिकरत्व-सम्भवात्, यथा साध्यस्य अभावो यत्रेत्यादिव्यधिकरणबहुव्रीहेः साध्याभाववच्छब्दप्रतिपाद्या-र्थप्रतिपादकत्वमङ्गीकृत्य साध्याभाववदित्येवं षष्ठीतत्पुरुषोत्तरं मत्वर्थीयप्रत्ययानुपपत्तिरुद्भाव्यते तथा प्रकृतेऽपि 'राजपुरुषवान्' इत्यत्र षष्ठीतत्पुरुषसमासोत्तरं मत्वर्थीयाऽनुपपत्तिः स्यादेव ।

ततश्चैवमवश्यमभ्युपेयम् - साध्यस्य अभावो यत्रेत्यादिव्यधिकरणबहुव्रीहिः 'साध्याभाववद्' इत्यादिप्रतिपाद्यार्थप्रतिपादकः न सम्भवति, तस्य कादाचित्कत्वेन क्वाचित्कत्वेन च अत्राऽनाश्रयणी-यत्वात्, 'साध्याभाववदवृत्तिरयं हेतुः' - इत्यादौ इव क्वचिदेव अनन्यगतिकत्वेन सः आश्रयणीयः । तथा च बहुव्रीहेः तदर्थप्रतिपत्तिकरत्वे एव बहुव्रीहीतरसमासोत्तरं मत्वर्थीयस्योक्ताऽनुशासनेन निषेधात्, बहुव्रीहेः तदर्थप्रतिपत्तिकरत्वाभावे बहुव्रीहीतरसमासोत्तरमपि मत्वर्थीयप्रत्ययविधाने बाधकाभावात् 'साध्यस्य अभावः = साध्याभावः, सः विद्यते यत्र तत् = साध्याभाववद्' - इत्येवं विग्रहाङ्गीकारे न दोषलेशगन्धोऽपि ।

एवञ्च 'राजपुरुषवान्' इत्यत्राऽपि व्यधिकरणबहुव्रीहेः क्वाचित्कत्वेन 'राज्ञः पुरुषो यत्रे'-त्यादिव्यधिकरणबहुव्रीहेः 'राजपुरुषवान्' इतिशब्दप्रतिपाद्यार्थप्रतिपादकतयाऽनङ्गीकार्यत्वाद् 'राज्ञः पुरुषः = राजपुरुषः, स विद्यते यत्र असौ राजपुरुषवान्' - इत्येवं विग्रहः सम्भवत्येव, बहुव्रीहेः तादृशार्थप्रतिपत्तिकरत्वे एवोक्तानुशासनेन कर्मधारयाद्युत्तरं मत्वर्थीयनिषेधेन, बहुव्रीहेः तादृशार्थ-प्रतिपत्तिकरत्वाभावे कर्मधारयाद्युत्तरं मत्वर्थीयप्रत्ययविधाने बाधकाभावात् । ततश्च यदि 'न

य शो ल ता

कर्मधारयान्मत्वर्थीयः प्रयुञ्जीत, बहुव्रीहिश्चेत्तत्र सम्भवती'त्येव अनुशासनमङ्गीक्रियते तदा 'राज्ञः पुरुषः = राजपुरुषः, सः विद्यते यत्र असौ राजपुरुषवान्' - इत्येवं षष्ठीतत्पुरुषोत्तरं मत्वर्थीयाऽनुपपत्तिः, राजा पुरुषो यत्रेत्यादिबहुव्रीहेरत्र सम्भवात् । 'बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः' इति निवेश्यते तदा न काऽप्यनुपपत्तिरित्येवं वक्ष्यमाणप्रबन्धोऽपि उपपद्यते इति । अनुपदमेव सः प्रबन्धः व्याख्यास्यते इत्यवधेयम् ।

किञ्च 'साध्यस्याभावः = साध्याभावः, सः विद्यते यत्रासौ साध्याभाववद्' - इत्येवं विग्रहस्याऽनुपपन्नत्वमुद्भाव्य 'साध्यम् अभावः यस्य सः = साध्याभावः, सोऽस्यास्तीति साध्याभाववद्' - इत्येवं बहुव्रीह्युत्तरं मत्वर्थीयः विधीयते तदा अनुशासनस्थं बहुव्रीहीतरत्वविशेषणं व्यावर्तकं स्यात्, न तु स्वरूपदर्शकम्, अन्यथा बहुव्रीहेः तदर्थप्रतिपत्तिकरत्वसम्भवे बहुव्रीह्युत्तरमपि मत्वर्थीयस्योक्ताऽनुशासनेन निषेधात् । तथा च प्रकृते भवदभ्युपगमाऽनुसारेण 'साध्यस्य अभावः यत्रे'त्यादिबहुव्रीहेः तादृशार्थप्रतिपत्तिकरत्वेन बहुव्रीह्युत्तरमपि मत्वर्थीयः न स्यात्, ततश्च बहुव्रीहीतरत्वं व्यावर्त्तकं विशेषणम्, बहुव्रीह्युत्तरं मत्वर्थीयस्याऽनिषेधादिति तस्य स्वरूपदर्शकत्वं तेनैव तत्रैव यद् व्यवस्थापितं तद् व्याहन्येत ।

तदुक्तं तत्रैव तेनैव "***ननु*** समासपरत्वादित्येव वक्तुमुचितम्, किं बहुव्रीहीतरपदेन ? बहुव्रीह्युत्तर-मत्वर्थीयार्थस्य बहुव्रीहिप्रतिपत्तिकरत्वाभावेन बहुव्रीह्युत्तरमत्वर्थीयप्रत्ययानुपपत्त्यभावाद् ***इति चेद् ?*** **न**; यादृशसमासोत्तरं मत्वर्थीयप्रत्ययार्थो बहुव्रीहिणा प्रतिपाद्यते तादृशसमासपरत्वमावेदयितुं बहुव्रीही-तरपदस्योक्तत्वात्, तथा च बहुव्रीहिपदं वस्तुगतिमनुरुध्योक्तम्" (व्या.प.मा.गङ्गा-पृ.१५) इति । अत्रापि बहुव्रीहीतरत्वविशेषणस्य स्वरूपदर्शकत्वम् अनुपदमेव स्थापितमिति ।

यद्यपि 'अत एव अस्माभिः तादृशबहुव्रीह्युत्तरं मत्वर्थीयप्रत्ययमनादृत्य अभावो विद्यते यत्रेत्यादिविग्रहः प्रदर्शितः' (तस्य पाठः पूर्वमुपदर्शितः अत्राऽनुसन्धेयः) इति वक्तुं शक्यते ***तथापि*** तादृशविग्रहाङ्गीकारेऽपि न निस्तारः इति उक्तमेव (पृ. २४९)।

न च* वामाचरणभट्टाचार्येण मनोरमायां** बहुव्रीहीतरत्वपदं सार्थकमिति समर्थितम्, 'साध्यम् अभावो यस्य सः = साध्याभावः, सोऽस्यास्तीति साध्याभाववद्' - इत्येवं विग्रहस्याऽन्यथाऽनुपपत्त्या तत्सार्थकमिति तदाशयः, तथा च अत्र तस्य स्वरूपदर्शकत्वमुक्तम् अनुपपन्नम् ***इति वाच्यम्;

तत्रापि स्वरूपदर्शकत्वस्यैव अन्ततोगत्वा कक्षीकारात् । तत्सन्दर्भस्त्वेवम् - "***नन्वत्र*** कर्मधारयपदस्य समासमात्रपरत्वाभिधानेन एव सामञ्जस्ये तस्य बहुव्रीहीतरपरत्वाभिधानम् असङ्गतम्

इति चेद् ? न, तथा सति 'साध्याभाववद्' इतिप्रयोगस्य असाधुतापत्तेः । साध्यस्य अभावः = साध्याभावः - इत्याकारकव्युत्पत्तिलभ्यतत्पुरुषस्य कर्मधारयतया तदुत्तरं मतुप्प्रत्ययस्याऽसम्भवेन 'साध्यस्वरूपोऽभावो यस्य साध्याभावस्य स साध्याभावः' - इत्याकारकबहुव्रीह्युत्तरमेव मतुप्प्रत्यये कृते 'साध्याभाववदि'ति प्रयोगस्य साधुत्वोपपत्तेः ।

न चाऽभावो विद्यते यत्रासौ अभाववान्, साध्यस्य अभाववान् = साध्याभाववान् - इत्याकारक-तत्पुरुषस्वीकारेण एव उपपत्तौ कर्मधारयपदस्य बहुव्रीहीतरपरत्वाभिधानमसङ्गतमे***वेति वाच्यम्;*** पदार्थैकदेशान्वयस्याऽप्रामाणिकतया अभाववच्छब्दार्थैकदेशे अभावे साध्यपदार्थस्याऽनन्वयापत्तेः । वस्तुत एकदेशान्वयस्य बहुशोदृष्टतया कर्मधारयपदं समासमात्रपरमेवोपगन्तव्यमिति ध्येयम्" (व्या.प.मा. मनोरमा पृ.९) इति ।

एतावता एष प्रबन्धोऽपि प्रत्याख्यातः, उक्तरीत्या व्यधिकरणबहुव्रीहेरनङ्गीकरणीयतया 'साध्याभाववद्' इत्यत्र बहुव्रीहेः तादृशार्थप्रतिपत्तिकरत्वाभावेन षष्ठीतत्पुरुषोत्तरं मत्वर्थीयविधाने दोषाभावादिति । एवञ्च बहुव्रीहीतरत्वस्य समासत्वस्य च स्वरूपदर्शकत्वमप्यवश्यमभ्युपेयमिति स्थितम् ।

य शो ल ता

बहुव्रीहीतरत्वं व्यावर्तकतया स्थापयन्तः ***केचन एवमाहुः*** - शोभनः शुक्लः (वर्णः) यत्रेत्यादि-बहुव्रीह्युत्तरं मत्वर्थीयप्रत्ययविधानेन 'शोभनशुक्लवान्' इति प्रयोगः शोभनशुक्लरूपविशिष्ट-घटविशिष्टस्य प्रतिपादनं करोति, एतादृशप्रयोगः असङ्गतः स्याद् यदि बहुव्रीहीतरत्वं न निवेश्यते, यतः शोभनः शुक्लः (घटः) यत्रेत्यादिबहुव्रीह्याश्रयणे 'शोभनशुक्लः देशः' इत्यादि-प्रयोगेणाऽपि शोभनेन शुक्लरूपविशिष्टेन घटेन विशिष्टस्य देशस्य भानं भवत्येव । तथा च यादृशस्य देशस्य भानं 'शोभनशुक्लवान्' - इति शब्देन भवति तादृशस्यैव भानं तावत्पदबहुव्रीहिणा भवतीति स्यादेव बहुव्रीह्युत्तरं तादृशमत्वर्थीयप्रत्ययाऽनुपपत्तिः, 'न समासान्मत्वर्थीयः प्रयुञ्जीत, बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः' इत्याकारकाऽनुशासनस्यैव भवता अङ्गीकृतत्वेन बहुव्रीहेरर्थप्रति-पत्तिकरत्वे बहुव्रीह्युत्तरमपि मत्वर्थीयनिषेधात् । शुक्लस्य गुणवाचकत्वेन गुणिवाचकत्वेन च यदि कोऽपि एवं प्रयोगम् असाधुतया स्थापयेत् तम्प्रति बहुव्रीहीतरत्वविशेषणमवश्यं वक्तव्यम् । तथा च शोभनः शुक्लः (घटः) यत्र सः शोभनशुक्लः देशः - इत्येवं बहुव्रीहिणा शोभन-शुक्लवच्छब्दप्रतिपाद्यशोभनशुक्लरूपविशिष्टघटविशिष्टरूपार्थस्य प्रतिपादनेऽपि बहुव्रीहीतर-समासोत्तरमेव मत्वर्थीयनिषेधात् 'शोभनः शुक्लः (वर्णः) यत्र सः शोभनशुक्लः घटः, सः

विद्यते यत्र असौ शोभनशुक्लवान्' इत्येवं बहुव्रीह्युत्तरं मत्वर्थीयप्रत्ययविधाने न काऽप्यनुपपत्तिः, 'न बहुव्रीहीतरसमासान्मत्वर्थीयः प्रयुञ्जीत, बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः' - इत्यनुशासनस्य अभ्युपगतत्वात्, तादृशानुशासनेन च बहुव्रीह्युत्तरं मत्वर्थीयाऽनिषेधादिति, तथा च बहुव्रीहीतरत्वविशेषणं व्यावर्तकम्, न स्वरूपदर्शकमिति ।

तच्चिन्त्यम्, यतः 'शोभनः शुक्लः (वर्णः) यत्र स शोभनशुक्लः घटः, सः विद्यते यत्रासौ शोभनशुक्लवान् देशः' इत्येवं विग्रहेण शोभनशुक्लवच्छब्देन शोभनशुक्लवर्णविशिष्टघटविशिष्टः प्रतिपाद्यते, अत्र घटे वर्तमानः शुक्लवर्णः शोभनः अस्तीति तादृशशब्देन शोभनशुक्लरूपविशिष्टेन अशोभनेनाऽपि घटेन विशिष्टः देशः प्रत्याय्यते । 'शोभनः शुक्लः (घटः) यत्र सः शोभनशुक्लो देशः' - इत्याकारकबहुव्रीह्यङ्गीकारे जलाहरणाद्यपेक्षया शोभनत्वं शुक्लरूपविशिष्टघटे प्रत्याय्यते, शुक्लवर्णस्तु शोभनोऽपि स्यादितरोऽपि वा, ततश्च जलाहरणादिक्रियायाम् अशोभनः शोभनशुक्लवर्णविशिष्टश्च घटः यत्र विद्यते सः देशः 'शोभनशुक्लवान्' - इतिशब्दप्रतिपाद्यः भवति, किन्तु 'शोभनशुक्लः' इतिशब्दप्रतिपाद्यः न भवति । एवञ्च जलाहरणादिक्रियायां शोभनः अशोभनशुक्लवर्णविशिष्टश्च घटः यत्र सः देशः 'शोभनशुक्लः' इतिशब्दप्रतिपाद्यः भवति, 'शोभनशुक्लवान्' इतिशब्दप्रतिपाद्यः न भवति, तथा च 'शोभनः शुक्लो यत्र सः = शोभनशुक्लः देशः' इत्यादिबहुव्रीहेः शोभनशुक्लवच्छब्दप्रतिपाद्यार्थप्रतिपत्तिकरत्वाभावे तादृशबहुव्रीह्युत्तरमत्वर्थीयप्रत्ययः नाऽनुपपन्नः स्याद् अनुशासने बहुव्रीहीतरत्वविशेषणाऽनुपादानेऽपि, 'न समासान्मत्वर्थीयः प्रयुञ्जीत, बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः' - इत्यनुशासनाङ्गीकारेण बहुव्रीहेः तदर्थप्रतिपत्तिकरत्वे एव समासोत्तरं मत्वर्थीयनिषेधादिति ।

य शो ल ता

न च यत्र शोभनशुक्लवर्णविशिष्टः जलाहरणादिषु अपि शोभनश्च घटः वर्तते सः देशः 'शोभनशुक्लः' इतिशब्दवाच्योऽपि भवति, 'शोभनशुक्लवान्' - इति शब्दवाच्योऽपि भवति, तथा च शोभनः शुक्लः (घटः) यत्रेत्यादिबहुव्रीहिणा शोभनशुक्लवच्छब्दप्रतिपाद्यतादृशदेशस्यैव प्रतिपादनेन तादृशबहुव्रीहेः तादृशार्थप्रतिपत्तिकरत्वसम्भवात् स्यादेव तादृशबहुव्रीह्युत्तरमत्वर्थीयाऽनुपपत्तिः इति तद्व्यपोहाय अवश्यमुपादेयं तादृशं विशेषणमिति बहुव्रीहीतरत्वविशेषणं न स्वरूपदर्शकम्, किन्तु व्यावर्तक***मिति वाच्यम्;***

वक्ष्यमाणपरिष्कारेण शोभनशुक्लवर्णविशिष्टघटविशिष्टत्वावच्छिन्नबोधजनकत्वाऽभावेन बहुव्रीहेः तादृशार्थप्रतिपत्तिकरत्वासम्भवात् ।

अयमाशयः - यत्र शोभनशुक्लवर्णविशिष्टः जलाहरणादिषु अपि शोभनश्च घटः सः देशः यद्यपि शोभनशुक्लशब्दवाच्योऽपि, शोभनशुक्लवच्छब्दवाच्योऽपि तथापि 'शोभनशुक्लवान्' इतिशब्देन तादृशदेशस्य शोभनशुक्लवर्णविशिष्टघटविशिष्टत्वेन भानं भवति, 'शोभनशुक्लः' इतिशब्देन जलाहरणादिक्रियायां शोभनः शुक्लवर्णविशिष्टश्च यः घटः तद्विशिष्टत्वेन तादृशदेशस्य भानं भवति, यथा 'इदं द्रव्यमि'ति पदं पुरःस्थघटस्य द्रव्यत्वेन भानं कारयति, 'अयं घटः' इतिपदं तस्यैव घटस्य घटत्वेन भानं कारयति । ततश्च द्रव्यपदं यादृशधर्मावच्छिन्नविषयताकं बोधं जनयति न हि तादृशधर्मावच्छिन्नविषयताकः एव बोधः घटपदेनाऽपि जन्यते, द्वयोः पदयोः समानविषयकबोधजनकत्वेऽपि घटपदेन घटस्य घटत्वावच्छिन्नविषयताकबोधजननात्, द्रव्यपदेन च तस्यैव द्रव्यत्वावच्छिन्नविषयताकबोधजननात् ।

प्रकृते यादृशधर्मावच्छिन्नविषयताकबोधः शोभनशुक्लवच्छब्देन जन्यते तादृशधर्मावच्छिन्नविषयताकबोधः एव यदि शोभनशुक्लशब्देन जन्यते तदैव शोभनशुक्लवच्छब्दप्रतिपाद्यार्थप्रतिपत्तिकरत्वं शोभनशुक्लशब्दस्य स्यात् । अत्र च शोभनशुक्लवच्छब्देन शोभनशुक्लवर्णविशिष्टघटविशिष्टत्वावच्छिन्नविषयताकबोधः जन्यते, शोभनशुक्लशब्देन च शुक्लवर्णविशिष्टशोभनघटविशिष्टत्वावच्छिन्नविषयताकबोधः जन्यते इति कुतः शोभनशुक्लशब्दस्य शोभनशुक्लवच्छब्दप्रतिपाद्यार्थप्रतिपत्तिकरत्वं ? येन शोभनशुक्लपदोत्तरमत्वर्थीयाऽनुपपत्तिः स्यादिति 'बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः' इत्यनेनैव तादृशाऽनुपपत्तिवारणसम्भवेन बहुव्रीहीतरत्वं व्यावर्तकं नैव, स्वरूपदर्शकमेव केवलमिति अङ्गीकार्यमेवेति अलम्, प्रकृतमनुसरामः ।

ननु 'न कर्मधारयान्मत्वर्थीयः प्रयुज्जीत, बहुव्रीहिश्चेत्तत्र सम्भवति' इत्येवाऽनुशासनं स्वीक्रियताम्, बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः - इत्येवं किमर्थं निवेश्यते ?, 'पीतञ्च तद् अम्बरं

●

આ રીતે 'કર્મધારય સમાસ પછી મત્વર્થીય પ્રત્યય ન લાગે, જો બહુવ્રીહિ તેના અર્થને જણાવનાર હોય' - આ અનુશાસન ઉપર આપણે પરિષ્કાર કરતા હતા. પૂર્વાર્ધના પદોનો પરિષ્કાર થઈ ગયો. હવે પાછળના પદોનો પરિષ્કાર કરતા કહે છે કે -

❊ तदर्थप्रतिपत्तिकरत्व शा माटे ? ❊

पूर्वपक्ष :- (न च.) 'કર્મધારય સમાસ પછી મત્વર્થીય પ્રત્યય ન લાગે જો બહુવ્રીહિ ત્યાં સંભવતો હોય તો' - આટલું જ કહો. 'કર્મધારય સમાસ પછી મત્વર્થીય પ્રત્યય ન લાગે જો બહુવ્રીહિ તેના અર્થને જણાવનાર હોય તો' - આ રીતે 'બહુવ્રીહિ તેના અર્થને

च = पीताम्बरम्, तदस्याऽस्तीति पीताम्बरवान्' - इत्येवं प्रयोगः उक्ताऽनुशासनेनाऽपि असाधुः सिध्येदेव, पीतम् अम्बरं यस्य सः = पीताम्बरः इत्येवं बहुव्रीहेः तत्र सम्भवादिति लघुभूतमार्गेणैव इष्टसिद्धौ किमर्थं गुरुतरपथाश्रयण***मिति चेद् ?***

न; 'राजपुरुषवान्' इतिप्रयोगाऽनुपपत्तेः । 'राज्ञः पुरुषः = राजपुरुषः, सः विद्यते यत्रासौ राजपुरुषवान्' - इत्येवं प्रयोगः सर्ववादिसिद्धः लोकव्यवहारेऽपि प्रसिद्धश्च । यदि 'न कर्मधारयान्मत्वर्थीयः प्रयुज्जीत, बहुव्रीहिश्चेत्तत्र सम्भवति' - इत्येवानुशासनमङ्गीक्रियते तदा कर्मधारयपदस्य पूर्वोक्तयुक्त्या बहुव्रीहीतरपरत्वेन तादृशषष्ठीतत्पुरुषसमासोत्तरं मत्वर्थीयः न स्यात्, राजा पुरुषो यत्रेत्यादिबहुव्रीहेः राजाऽभिन्नपुरुषविशिष्टदेशबोधकस्याऽत्र सम्भवात्, उक्ताऽनुशासनेन यत्र बहुव्रीहिः सम्भवति तत्र मत्वर्थीयनिषेधाच्च ।

●

જણાવનાર હોય તો' - આટલું લાંબું કહેવાની જરૂરત શી છે ? વાસ્તવમાં ફક્ત 'બહુવ્રીહિ જ્યાં સંભવતો હોય ત્યાં કર્મધારય પછી મત્વર્થીય પ્રત્યય ન લાગે' - આટલું જ કહેવું પર્યાપ્ત છે. પીતામ્બર શબ્દ પછી મતુપ્પ્રત્યય ન લાગે. કારણ કે **पीतम् अम्बरं यस्य सः** આ રીતે બહુવ્રીહિસમાસ અહીં સંભવે છે. અનુશાસન છે કે 'જ્યાં બહુવ્રીહિસમાસ સંભવતો હોય ત્યાં કર્મધારય પછી મત્વર્થીય પ્રત્યય ન લાગે.' આ અનુશાસનના બળે 'પીતામ્બરવાન્' - આ રીતે પીત અને અમ્બર વચ્ચે કર્મધારય સમાસ કરી મતુપ્ પ્રત્યય નહીં મૂકી શકાય. આમ, ઉક્ત અનુશાસન દ્વારા તમારે જે કાર્ય કરવાનું હતું તે તો થઈ જ જાય છે, 'બહુવ્રીહિ જો અર્થપ્રતિપત્તિકર હોય તો' આવું ન લખવા છતાં પણ. તો પછી લાઘવથી જ પતાવવું જોઈએ. અનુશાસનમાં આ રીતે નિરર્થક ગૌરવ કરવાની જરૂરત શી ?

❀ 'राजपुरुषवान्' - प्रयोगनी अनुपपत्ति ❀

उत्तरपक्ष :- (राज.) જો આવું અનુશાસન માનશો તો **राजपुरुषवान् देशः** - આ પ્રયોગ અસંગત થઈ જશે. કારણ કે **राजा पुरुषो यत्र सः राजपुरुषः देशः** આ રીતે **राजपुरुषवान् देशः**ની જગ્યાએ **राजपुरुषः देशः** આવો બહુવ્રીહિ સમાસ સંભવે જ છે. તમારો નિયમ છે કે જ્યાં બહુવ્રીહિ સમાસ સંભવતો હોય ત્યાં કર્મધારય સમાસ પછી મત્વર્થીય પ્રત્યય ન થાય. પ્રસ્તુતમાં **राजा पुरुषो यत्र...** આ પ્રમાણે બહુવ્રીહિ સમાસ સંભવતો હોવાથી **राज्ञः पुरुषः राजपुरुषः, सोऽस्याऽस्तीति राजपुरुषवान्** આ રીતે ષષ્ઠીતત્પુરુષસમાસ કરી મત્વર્થીય પ્રત્યય ન લગાડી શકાય. તમારું અનુશાસન તેને અટકાવી દેશે. આમ, **राजपुरुषवान्** આ રીતે જે પ્રસિદ્ધ પ્રયોગ છે તે અનુપપન્ન થવાની આપત્તિ તમારા મતે આવે. 'કર્મધારય સમાસ પછી

यदि 'न कर्मधारयान्मत्वर्थीयः प्रयुञ्जीत, बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः' - इत्येवमनुशासनमङ्गीक्रियते तदा 'राजा पुरुषो यत्र सः राजपुरुषः देशः' इत्यादिशब्देन बहुव्रीहिणा राजविशिष्टः यः देशः सः बोध्यते, 'राज्ञः पुरुषः = राजपुरुषः, सः विद्यते यत्रासौ राजपुरुषवान्' - इत्येवं विग्रहादरे तादृशमत्वर्थीययुक्तराजपुरुषशब्देन राजसम्बन्धिपुरुषविशिष्टः देशः प्रत्याय्यते । न हि राजविशिष्टः देशः एव राजसम्बन्धिपुरुषविशिष्टः, राजसम्बन्धिपुरुषविशिष्टो वा राजविशिष्टः, किन्तु विभिन्नौ एव देशौ, राज्ञः सत्त्वे राजपुरुषसत्त्वनियमाभावात् । ततः यं देशं 'राजपुरुषः' इतिशब्दः बोधयति, न हि तमेव देशं 'राजपुरुषवान्' इतिशब्दो बोधयति ततश्च अत्र राजपद-पुरुषपदयोः बहुव्रीहिणा यादृशः अर्थः मतुप्प्रत्ययययुक्तराजपुरुषशब्देन प्रत्याय्यते तादृशः अर्थः नैव प्रतिपाद्यते इति बहुव्रीहेः तदर्थप्रतिपत्तिकरत्वाभावेन न तादृशमत्वर्थीयाऽनुपपत्तिः, 'न कर्मधारयान्मत्वर्थीयः प्रयुञ्जीत, बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः' इत्यनुशासनेन बहुव्रीहेः मत्वर्थीयप्रत्ययसमभिव्याहृतपदजन्यबोधकारकत्वे एव तादृशपदोत्तरं मत्वर्थीयनिषेधादिति 'बहुव्रीहिश्चेत्तत्र सम्भवति' इत्येवं निवेशः न कर्तव्यः, अपि तु बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः इत्येवमेव निवेशः

●

મત્વર્થીય પ્રત્યય ન લાગે, જો બહુવ્રીહિસમાસ તેના અર્થને જણાવનાર હોય તો' - જો આવો અનુશાસનનો આકાર માનો તો અનુપપત્તિ નહીં આવે. કારણ કે **राजपुरुषवान् देशः** કહેવામાં આવે ત્યારે રાજસમ્બન્ધિપુરુષનું વૈશિષ્ટ્ય દેશમાં ભાસે છે. જ્યારે **राजा पुरुषो यत्र सः राजपुरुषः देशः** - આવું કહેવામાં આવે ત્યારે રાજાસ્વરૂપ પુરુષનું વૈશિષ્ટ્ય દેશમાં ભાસિત થાય છે. દેશમાં જ્યારે રાજા હોય ત્યારે તે પ્રદેશમાં રાજાનો પુરુષ હોય જ કે જ્યારે રાજાનો પુરુષ હોય ત્યારે રાજા હોય જ એવું તો છે જ નહીં. માટે, જ્યારે ફક્ત રાજાનો પુરુષ જ દેશમાં હોય, રાજા ન હોય ત્યારે **राजपुरुषवान् देशः** - આવો પ્રયોગ કરવામાં આવે એ વખતે **राजा पुरुषो यत्र सः राजपुरुषः देशः** - આવો પ્રયોગ ન જ થઈ શકે. માટે, બહુવ્રીહિસમાસ મત્વર્થીયપ્રત્યય દ્વારા પ્રતિપાદ્ય જે અર્થ છે તેને જણાવતો નથી. એટલે પ્રસ્તુતમાં **राज्ञः पुरुषः** આ રીતે ષષ્ઠીતત્પુરુષસમાસ કરીને **राजपुरुषवान्** - આ પ્રમાણે મત્વર્થીય પ્રત્યય અસંગત નહીં બને. કારણ કે તાદૃશઅર્થપ્રતિપત્તિકર બહુવ્રીહિ સમાસ પ્રસ્તુતમાં સંભવતો જ નથી. માટે, 'કર્મધારય સમાસ પછી મત્વર્થીય પ્રત્યય ન લાગે, જો બહુવ્રીહિ સમાસ અર્થપ્રતિપત્તિકર હોય તો' - આ પ્રમાણે લખવું જરૂરી છે. ફક્ત 'કર્મધારય સમાસ પછી મત્વર્થીય પ્રત્યય ન લાગે, જો બહુવ્રીહિ સમાસ તે સ્થલમાં સંભવતો હોય તો' - આ પ્રમાણેનું અનુશાસન અધૂરું લેખાય, અવ્યાપ્તિગ્રસ્ત બની જાય. માટે, અમે જે અનુશાસન બનાવ્યું છે તે વ્યાજબી જ છે.

न च *'न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेत् तत्र सम्भवती'त्येव वाच्यम्* ***इति वाच्यम्;***

राजपुरुषवान् इत्यत्र राजा पुरुषो यत्रेति बहुव्रीहेः सम्भवात् ।

●

कर्तव्यः इति स्थितमित्याशयेनादौ पूर्वपक्षमुपस्थापयन्नाह -

न चेत्यादि । **वाच्य**मिति परेणाऽन्वयः । **'न कर्मधारयान्मत्वर्थीयः बहुव्रीहिश्चेत्तत्र सम्भवतीत्येव** अनुशासनं **वाच्यम्** = वक्तव्यम्, न तु 'न कर्मधारयान्मत्वर्थीयः प्रयुञ्जीत, बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः' इत्येवमनुशासनं वाच्यम्, अत्र एवकारस्य अन्ययोगव्यवच्छेदकत्वात्, प्रयोजनविरहेऽपि तादृशनिवेशादरे अतिप्रसङ्गादिति **न च वाच्यमि**त्येवमन्वयः । कुतः न वाच्यमेतदित्याशङ्कायां 'बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः' इत्येवं निवेशस्य सार्थक्यम् उपपिपादयिषुराह - **'राजपुरुषवान्' इत्यत्र** = 'राज्ञः पुरुषः इति राजपुरुषः, सः विद्यते यत्र असौ राजपुरुषवान्' - इत्येवं विग्रहादरेण राजसम्बन्धिपुरुषविशिष्टदेशबोधके 'राजपुरुषवान्' - इत्येवं प्रयोगेऽपि **राजा पुरुषो यत्रेति बहुव्रीहेः** राजाऽभिन्नपुरुषविशिष्टबोधकस्य **सम्भवात्**, तथा च यत्र बहुव्रीहिः सम्भवति तत्र बहुव्रीहीतरसमासान्मत्वर्थीयप्रत्ययस्योक्तानुशासनेन निषेधादुक्तप्रयोगेऽपि यन्मतुप्प्रत्ययविधानं तदसङ्गतं स्यादेव, राजपुरुषवान् - इत्येवं मत्वर्थीयप्रत्ययसमभिव्याहृतराजपुरुषशब्दप्रतिपाद्यराजसम्बन्धिपुरुषविशिष्टदेशाऽबोधकत्वेऽपि राजाऽभिन्नपुरुषविशिष्टदेशप्रतिपादकराजपुरुषशब्दस्य बहुव्रीहेरत्र सम्भवात् । तथा च बहुव्रीहेः सम्भवमात्रेण एव न मतुप्प्रत्ययाऽसङ्गतिरङ्गीकार्या, किन्तु बहुव्रीहेः तादृशार्थप्रतिपत्तिकरत्वे एव तादृशमतुप्प्रत्ययाऽसङ्गतिरङ्गीकार्या इति 'न कर्मधारयान्मत्वर्थीयः प्रयुञ्जीत, बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः' - इत्येवमेवाऽनुशासनमङ्गीकार्यम् । तथा सति 'राजा पुरुषो यत्र सः राजपुरुषो देशः' - इत्यादिबहुव्रीहेः राजाऽभिन्न-

●

शब्दार्थ :- "ભાઈ ! 'કર્મધારય સમાસ પછી મત્વર્થીય પ્રત્યય ન લાગે જો બહુવ્રીહિ ત્યાં સંભવતો હોય તો' આટલું જ અનુશાસન બનાવો ને, આટલું જ અનુશાસન તમારે કહેવું જોઈએ. 'કર્મધારય સમાસ પછી મત્વર્થીય પ્રત્યય ન લાગે, જો બહુવ્રીહિ તેના અર્થને જણાવનાર હોય તો' - આવું કહેવાની જરૂરત શી છે ?" આ પ્રમાણે શંકા નહીં કરવી. કારણ કે **राजपुरुषवान्** આ સ્થલે **राजा पुरुषो यत्र सः राजपुरुषः देशः** આવા પ્રકારનો બહુવ્રીહિ સમાસ સંભવી શકતો હોવાથી **राजपुरुष** પછી = ષષ્ઠીતત્પુરુષ સમાસ પછી જે મત્વર્થીય પ્રત્યય લગાડેલ છે તે અસંગત થઈ જવાની આપત્તિ આવે.

ગૂ ઢા र्थ

या शो ल ता

वि ना भा

पुरुषविशिष्टदेशप्रतिपादकत्वेन मतुप्प्रत्ययसमभिव्याहृतराजपुरुषशब्दप्रतिपाद्यराजसम्बन्धिपुरुषविशिष्टदेशाऽप्रतिपादकत्वेन च बहुव्रीहेः तादृशार्थप्रतिपत्तिकरत्वाभावान्न मत्वर्थीयाऽनुपपत्तिः, 'बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः' इत्येवमनुशासनाङ्गीकारे बहुव्रीहेः तदर्थप्रतिपत्तिकरत्वे एव मत्वर्थीयनिषेधात् ।

न चाऽत्र कोऽपि बहुव्रीहिः राजपुरुषवान् इत्येवं मतुप्समभिव्याहृतराजपुरुषशब्दप्रतिपाद्यराजसम्बन्धिपुरुषविशिष्टदेशरूपाऽर्थप्रतिपादकः वर्तते, राज्ञः पुरुषः यत्रेत्यादिव्यधिकरणबहुव्रीहेः अनादरणीयत्वादिति सङ्गतः एव मतुप्प्रत्ययः इत्यनुसन्धेयम् । 'राजा पुरुषो यत्र' इत्यत्र राज-पुरुषपदयोः समानविभक्तिकत्वात् तयोः समानाधिकरणबहुव्रीहिः, 'राज्ञः पुरुषो यत्र' इत्यत्र विसदृशविभक्तिकत्वाद् व्यधिकरणो बहुव्रीहिः । तथा च 'राजपुरुषवान्' - इत्येवं षष्ठीतत्पुरुषोत्तरं मत्वर्थीयोपपत्त्यर्थं "न कर्मधारयान्मत्वर्थीयः प्रयुञ्जीत, बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः' इत्येवमनुशासनमङ्गीकर्तव्यम्, न तु 'न कर्मधारयान्मत्वर्थीयः प्रयुञ्जीत, बहुव्रीहिश्चेत्तत्र सम्भवती'त्येवमिति ।

पुनः शङ्कते - **न चैवमपी**त्यादिना । पूर्वपक्षस्याऽयमाशयः - ननु 'राजपुरुषवान्' इत्येवं षष्ठीतत्पुरुषोत्तरं विहितमत्वर्थीयप्रत्ययोपपत्त्यर्थं भवता 'बहुव्रीहिश्चेत्तत्र सम्भवति' इत्येवमनिवेश्य 'बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः' - इत्येवं निवेश्यते, किन्तु 'बहुव्रीहिश्चेत् तदर्थप्रतिपत्तिकरः' - इत्येवं निवेशेऽपि 'राजपुरुषवान्' - इत्येवं प्रयोगः अनुपपन्नः एव स्यात्, बहुव्रीहेरत्र तदर्थप्रतिपत्तिकरत्वसम्भवात् । तथा हि - यत्रैकस्मिन्नेव देशे राजा च राजसम्बन्धी पुरुषश्च द्वौ स्तः, तत्र 'राजा पुरुषो यत्र स राजपुरुषः देशः' इत्येवं बहुव्रीहिणा यः देशः प्रत्याय्यते स एव देशः 'राज्ञः पुरुषः = राजपुरुषः, स विद्यते यत्र असौ राजपुरुषवान्' - इत्येवं विग्रहाङ्गीकारे

❀ અનુપપત્તિ તદવસ્થા, પરિષ્કાર પછી પણ ❀

पूर्वपक्ष :- (**न चै.**) આ આપત્તિ તો 'બહુવ્રીહિ જો મત્વથીર્ય પ્રત્યયના અર્થને જણાવતો હોય તો' - આટલું લખ્યા પછી પણ આવવાની જ છે. જે દેશમાં રાજા પણ છે અને રાજાનો પુરુષ પણ છે તે વખતે '**राजपुरुषवान् देशः**' આવું કહેવા દ્વારા જે દેશવિશેષ પ્રતિપાદ્ય છે તે જ દેશવિશેષ **राजपुरुषः** - આવા પ્રકારના બહુવ્રીહિ દ્વારા પણ જણાશે. આમ, **राजपुरुषवान्** નો અર્થ જે દેશવિશેષ તે જ **राजपुरुष** પદ દ્વારા પ્રતિપાદ્ય બનવાથી મત્વર્થીયપ્રત્યયાર્થ જ બહુવ્રીહિ સમાસ દ્વારા વાચ્ય બની જવાને કારણે **राजपुरुषवान्** આવો

न चैवमपि यत्र राजा राजसम्बन्धी पुरुषश्चास्ति, तत्र मतुब्बोध्यस्य गू

●

'राजपुरुषवान्' - इतिशब्देन प्रतिपाद्यते, 'राजपुरुषः' इतिशब्देन राजाऽभिन्नपुरुषविशिष्टस्य 'राजपुरुषवान्' - इतिशब्देन च राजसम्बन्धिपुरुषविशिष्टस्य प्रतिपादनेऽपि प्रकृते राजसम्बन्धि-पुरुषविशिष्टदेशस्यैव राजाभिन्नपुरुषविशिष्टत्वात् । तथा च प्रकृते 'राजपुरुषवान्' - इत्येवं मतुप्प्रत्ययसमभिव्याहृतराजपुरुषशब्दप्रतिपाद्यराजसम्बन्धिपुरुषविशिष्टदेशरूपार्थस्य 'राजपुरुषः' इत्येवं शब्देन बहुव्रीहिणा प्रतिपादनाद् बहुव्रीहेः तादृशार्थप्रतिपत्तिकरत्वं सम्भवत्येवेति स्यादेवाऽनुपपन्नः तादृशमत्वर्थीयः 'बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः' इतिनिवेशेऽपि इत्याह - या शो ल ता

न चेति **वाच्य**मिति परेणाऽन्वयः । **एवमपि** = बहुव्रीहिश्चेत्तत्र सम्भवतीति निवेशमनादृत्य 'बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः' - इत्येवं निवेशादरेऽपि = 'न कर्मधारयान्मत्वर्थीयः बहुव्रीहिश्चेत्तत्र सम्भवती'ति अनुशासनमनादृत्य 'न कर्मधारयान्मत्वर्थीयः बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः' - इत्येव-मनुशासनस्याऽऽदरेऽपि **यत्र** स्थले एकस्मिन्नेव देशे **राजा राजसम्बन्धी पुरुषश्चाऽस्ति**, अत्र राजा अस्ति, राजसम्बन्धी पुरुषश्चाऽस्ति इत्येवं अस्तिपदं द्विरावृत्य अर्थः ज्ञेयः, अन्यथा राजा राजसम्बन्धी पुरुषश्च स्तः इत्येवं वचनविपर्यासेणाऽर्थः ज्ञेयः, **तत्र** स्थले **मतुब्बोध्यस्य** = 'राजपुरुषवान्' इत्येवं 'राज्ञः पुरुषः = राजपुरुषः, सः विद्यते यत्राऽसौ राजपुरुषवान्' -

●

પ્રયોગ ન જ થવો જોઈએ. આમ, તમારા અનુશાસન મુજબ પણ **राजपुरुषवान्** - આવો પ્રયોગ અસંગત બનવાની આપત્તિ આવવાની જ છે.

शब्दार्थ :- 'જો બહુવ્રીહિ સમાસ મત્વર્થીય પ્રત્યયના અર્થને જણાવતો હોય તો' - આવું કહેશો પછી પણ જ્યારે એક જ દેશમાં રાજા અને રાજાસંબંધી પુરુષ બન્ને હાજર હશે ત્યારે **राजपुरुषवान्** આ રીતે મતુપ્પ્રત્યય દ્વારા જણાવવા યોગ્ય જે વિશેષ પ્રકારનો દેશ, **राजपुरुषः** આવા બહુવ્રીહિ સમાસ દ્વારા પણ તે જ દેશવિશેષનો બોધ થઈ શકે છે. માટે, 'જો બહુવ્રીહિ મત્વર્થીયપ્રત્યયાર્થને જણાવતો હોય તો કર્મધારયસમાસ પછી મત્વર્થીય પ્રત્યય ન લાગે' - આ તમારા અનુશાસન મુજબ પણ **राज्ञ पुरुषः = राजपुरुषः, राजपुरुषः अस्ति अस्य = राजपुरुषवान्** આ રીતે ષષ્ઠીતત્પુરુષ સમાસ કરી મત્વર્થીય પ્રત્યય નહીં લગાડી શકાય. કારણ કે **राजा पुरुषो यत्र सः राजपुरुषः देशः** આ રીતે બહુવ્રીહિ સમાસ મત્વર્થીય પ્રત્યયાર્થને જણાવવા માટે સમર્થ જ છે. આમ, તમારા મતમાં પણ **राजपुरुषवान्** આવા પ્રયોગની અનુપપત્તિ 'જસ કી તસ' બની રહેશે. મતલબ કે જે રીતે અમારા મતમાં આ વિ ન મા

गू *देशविशेषस्य बहुव्रीहेः प्रतिपत्तिसम्भवेनाऽनुपपत्तितादवस्थ्यम् **इति वाच्यम्;***

●

इत्यादिविग्रहमादृत्य मतुप्समभिव्याहृतराजपुरुषशब्दप्रतिपाद्यस्य **देशविशेषस्य** राजसम्बन्धिपुरुषविशिष्टदेशस्य भूतलादिरूपस्य, तेन मतुप्प्रत्ययस्य स्वातन्त्र्येण कुत्राऽपि शक्त्यनङ्गीकारेऽपि न क्षतिः, **बहुव्रीहेः** = 'राजा पुरुषो यत्र असौ राजपुरुषः देशः' - इत्येवं राजपुरुषशब्देन बहुव्रीहिणा **प्रतिपत्तिसम्भवेन**, राजाऽभिन्नपुरुषविशिष्टदेशस्यैव राजसम्बन्धिपुरुषविशिष्टत्वेन 'राजपुरुषवान्' इतिशब्दप्रतिपाद्यस्य देशस्य 'राजपुरुषः' इत्येवं शब्देनाऽपि प्रतिपाद्यत्वात् । **अनुपपत्तितादवस्थ्यम्** = 'राजपुरुष' इतिशब्दोत्तरं मत्वर्थीयप्रत्ययस्याऽनुपपत्तिः तदवस्था एवेति भावः ।

य शो ल ता

'बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः' - इत्येवंरीत्या निवेशेऽपि प्रकृते बहुव्रीहिणा मत्वर्थीयसमभिव्याहृतराजपुरुषशब्दप्रतिपाद्यदेशविशेषस्य मतुपः समभिव्याहारं विनाऽपि राजपुरुषशब्देन बहुव्रीहिणा प्रतिपादनाद् बहुव्रीहेः तदर्थप्रतिपत्तिकरत्वसिद्ध्या तादृशषष्ठीतत्पुरुषोत्तरं मत्वर्थीयः नैव स्यात्, उक्ताऽनुशासनेन बहुव्रीहेस्तदर्थप्रतिपत्तिकरत्वे बहुव्रीहीतरसमासोत्तरं मत्वर्थीयनिषेधादिति ।

एतदापत्त्यपाकरणाय परिष्कारं प्रकटयन्नाह - **यत्पदेने**त्यादि । उत्तरपक्षस्याऽयमाशयः - अस्माभिः अनुशासनमेवमङ्गीक्रियते यदुत 'यत्पदेन यादृशधर्मावच्छिन्नविषयताकबोधः मत्वर्थीयप्रत्ययसमभिव्याहृतेन जायते मतुपः समभिव्याहारं विना तेन पदेन बहुव्रीहिणा तादृशधर्मावच्छिन्नविषयताकबोधसम्भवे तत्पदान्मत्वर्थीयप्रत्ययः न प्रयुञ्जीत' इति । यथा 'पीतमम्बरं यस्य सः = पीताम्बरः कृष्णः' इत्येवं पीताम्बरशब्देन बहुव्रीहिणा 'पीतञ्च तदम्बरं च = पीताम्बरम्,

●

પ્રયોગની અનુપપત્તિની આપત્તિ આવે છે તે જ રીતે તમારા મતમાં પણ આ પ્રયોગની અનુપપત્તિની આપત્તિ ઊભી જ રહેશે.

વિ ન ભા

✲ અનુશાસનમાં પરિષ્કાર ✲

ઉત્તરપક્ષ :- (**यत्प.**) અરે ભાઈ ! તમે નિયમ પૂરેપૂરો સમજ્યા નથી. નિયમ છે કે 'મત્વર્થીય પ્રત્યયથી સમભિવ્યાહૃત (સમભિવ્યાહાર = સાંનિધ્ય = સંયોગ. સમભિવ્યાહૃત = સન્નિહિત = સાંનિધ્યમાં રહેલ = સંયુક્ત) એવા જે પદ દ્વારા યાદશધર્મઅવચ્છિન્નવિષયતાનિરૂપક બોધ થાય, ત્યારે મતુપ્ પ્રત્યય લગાડ્યા વિના બહુવ્રીહિસમાસયુક્ત તે પદ દ્વારા જો તાદશધર્મઅવચ્છિન્નવિષયતાનિરૂપક બોધ થઈ શકતો હોય તો તે પદ પછી મત્વર્થીય

तदस्याऽस्ति इति पीताम्बरवान् कृष्णः' - इत्येवं मतुप्समभिव्याहृतपीताम्बरशब्देन यः पीतरूपविशिष्टाऽम्बरविशिष्टत्वावच्छिन्नकृष्णादिनिष्ठविषयताकबोधः जायते सः एव बोधः भवतीति तादृशपीताम्बरशब्दान्मत्वर्थीयः प्रत्ययः न स्यात् । पीताम्बरपदेन पीताम्बरविशिष्टत्वावच्छिन्नविषयताकबोधः मत्वर्थीयसमभिव्याहृतेन जायते, मतुपः समभिव्याहारं विना पीताम्बरपदेन बहुव्रीहिणा तादृशपीताम्बरविशिष्टत्वावच्छिन्नविषयताकबोधः सम्भवत्येवेति तदुत्तरं मत्वर्थीयनिषेधः उक्ताऽनुशासनेनेति भावः ।

प्रकृते 'राज्ञः पुरुषः = राजपुरुषः, सः विद्यते यत्रासौ राजपुरुषवान् देशः' - इत्येवं मतुप्प्रत्ययसमभिव्याहृतेन राजपुरुषशब्देन यद्यपि 'राजा पुरुषो यत्रे'त्येवं बहुव्रीहिणा राजपुरुषशब्देन प्रतिपाद्यस्य देशस्यैव भानं भवति तथापि तादृशराजपुरुषशब्देन मतुप्समभिव्याहृतेन राजसम्बन्धिपुरुषविशिष्टत्वेन तादृशदेशः बोध्यते, मतुप्प्रत्ययसमभिव्याहारं विना तादृशराजपुरुषशब्देन बहुव्रीहिणा राजाऽभिन्नपुरुषविशिष्टत्वेन तादृशदेशः बोध्यते इति । ***यथा*** 'द्रव्यमिद'मित्येवं घटमुद्दिश्य कथने द्रव्यत्वेन घटस्य भानं 'घटोऽयमि'त्येवं कथने घटत्वेन घटस्य भानम्, तथा च द्रव्य-घटपदयोः घटपदार्थविषयकबोधजनकत्वेऽपि न समानधर्मावच्छिन्नविषयताकबोधजनकत्वम्, द्रव्यपदेन द्रव्यत्वावच्छिन्नघटनिष्ठविषयताकबोधजननात्, घटपदेन च घटत्वावच्छिन्नघटनिष्ठविषयताकबोधजननात् । तथा च विषयाऽभेदेऽपि विषयताऽवच्छेदकधर्मभेदान्न तादृशपदयोः समानधर्माऽवच्छिन्नविषयताकबोधजनकत्वं समस्ति; ***तथैव*** राजपुरुषवच्छब्देन राजसम्बन्धिपुरुषविशिष्टत्वेन राजपुरुषशब्देन च बहुव्रीहिणा राजाऽभिन्नपुरुषविशिष्टत्वेन तादृशदेशस्य

●

प्रत्यय न लागे.' प्रस्तुत अनुशासननो आवो अर्थ विवक्षित छे. जेम के **पीतं च तद् अम्बरं च = पीताम्बरम्, पीताम्बरमस्ति अस्य = पीताम्बरवान्** आ रीते मतुप्प्रत्ययथी युक्त पीताम्बरपद द्वारा पीताम्बरत्वविशिष्ट जननो बोध थाय छे. एटले के बोधनिरूपितविषयता जे विशिष्ट जनमां जाय छे तेना अवच्छेदक धर्म पीळा कपडां = पीताम्बरत्व थाय. माटे पीताम्बरत्वअवच्छिन्नविषयताक बोध पीताम्बर पद द्वारा, के जे मतुप्प्रत्ययथी युक्त छे, थाय छे. मतुप् प्रत्यय विनाना अने **पीतम् अम्बरं यस्य सः पीताम्बरः जनः** आ रीते बहुव्रीहिसमासयुक्त पीताम्बरपद द्वारा पीताम्बरत्वविशिष्ट जननो ज बोध थाय छे. एटले के पीताम्बरत्वअवच्छिन्नविषयताक ज बोध थाय छे. माटे, पीताम्बरपद पछी मत्वर्थीय प्रत्यय न लागे. आ प्रमाणे नियम पर्यवसित थयो.

भानमिति न तयोः समानधर्माऽवच्छिन्नविषयताकबोधजनकत्वम्, मतुप्समभिव्याहृतराजपुरुषशब्देन राजसम्बन्धिपुरुषविशिष्टत्वावच्छिन्नदेशनिष्ठविषयताकबोधजननात्, मतुप्प्रत्ययाऽसमभिव्याहृतराजपुरुषशब्देन बहुव्रीहिणा राजाऽभिन्नपुरुषविशिष्टत्वावच्छिन्नदेशनिष्ठविषयताकबोधजननात् । तथा चाऽत्रापि विषयाऽभेदेऽपि विषयतावच्छेदकधर्मभेदः अस्त्येव । उक्ताऽनुशासनेन - राजपुरुषशब्देन मतुप्प्रत्ययसमभिव्याहृतेन यादृशधर्मावच्छिन्नविषयताकबोधः जायते तादृशधर्मावच्छिन्नविषयताकबोध एव यदि राजपुरुषशब्देन बहुव्रीहिणा जायते तदैव तादृशराजपुरुषशब्दोत्तरं मत्वर्थीयप्रत्ययः निषिध्यते । तथा च यदि मतुप्प्रत्ययसमभिव्याहृतेन राजपुरुषशब्देन यः राजसम्बन्धिपुरुषविशिष्टत्वावच्छिन्नविषयताकबोधः जायते स एव बोधः राजपुरुषशब्देन मतुप्प्रत्ययसमभिव्याहारं विना बहुव्रीहिणा जायते तदैव राजपुरुषशब्दोत्तरं मत्वर्थीयप्रत्ययः उक्ताऽनुशासनेन अनुपपन्नः स्यात् ।

य शो ल ता

●

❀ 'राजपुरुषवान्' - प्रयोगनी अनुपपत्तिनुं निवारण ❀

(तथा.) हवे प्रस्तुत प्रयोगमां जोईए. **राजपुरुषवान्** आ प्रमाणे ज्यारे प्रयोग करवामां आवे त्यारे जे देशविशेषनुं भान थाय छे ते ज देशविशेषनुं भान ज्यारे **राजपुरुषः** कहेवामां आवे त्यारे थाय छे. छतां ते देशविशेषनुं भान बन्ने प्रयोग करती वखते एक ज धर्मरूपे नथी थतुं. किंतु जुदा - जुदा धर्मरूपे देशविशेषनुं भान **राजपुरुषवान्** अने **राजपुरुषः** आवा प्रयोगो द्वारा थाय छे. कहेवानुं तात्पर्य एे छे के ज्यारे **राजपुरुषवान्** कहेवामां आवे छे त्यारे **राज्ञः पुरुषः = राजपुरुषः, राजपुरुषः अस्ति अस्य = राजपुरुषवान्** आ रीते विग्रह छे. माटे प्रस्तुतमां 'राजसंबंधी जे पुरुष तत्संयोगसंबंधवान देश छे' - आवुं भान थाय छे. एटले के 'राजसंबंधीपुरुषसंबंधी देश छे' - आवुं भान थाय छे. मतलब के राजसंबंधीपुरुषसंबंधित्व रूपे देशविशेषनुं भान थाय छे. ज्यारे **राजपुरुषः** कहेवामां आवे छे त्यारे **राजा पुरुषो यत्र सः = राजपुरुषः देशः** आ रीते विग्रह थाय छे. एटले के आ समास 'राजाथी अभिन्न जे पुरुष छे तत्संयोगसंबंधवान देश छे' - आवुं ज्ञान करावे छे. एटले के 'राजास्वरूपपुरुषसम्बन्धी देश छे' - आवुं ज्ञान करावे छे. मतलब के ते देशविशेषनुं राजअभिन्नपुरुषसम्बन्धित्वरूपे बहुव्रीहिसमास द्वारा भान थाय छे. आम, विशेष्य एक होवा छतां तेना विशेषणो अलग अलग छे. **राजपुरुषवान्** कहेवा द्वारा राजसंबंधीपुरुषसम्बन्धित्वरूपे देशनुं भान थाय छे. ज्यारे मतुप् रहित **राजपुरुषः** आवा बहुव्रीहिसमासविशिष्ट पद द्वारा राजअभिन्नपुरुषसंबंधित्वरूपे देशनुं भान थाय छे. एटले

वि न भा

अयं सारः - मतुप्प्रत्ययसमभिव्याहृतेन राजपुरुषशब्देन राजसम्बन्धिपुरुषविशिष्टत्वावच्छिन्न-देशनिष्ठविषयताकबोधः जायते, मतुपः समभिव्याहारं विना राजपुरुषशब्देन 'राजा पुरुषः यत्र असौ राजपुरुषः देशः' - इत्येवं बहुव्रीहिणा राजाऽभिन्नपुरुषविशिष्टत्वावच्छिन्नदेशनिष्ठ-विषयताकबोधः जायते । ततश्च यादृशधर्मावच्छिन्नविषयताकबोधः मतुप्प्रत्ययसमभिव्याहृत-राजपुरुषशब्देन जायते तादृशधर्मावच्छिन्नविषयताकबोधः एव मतुप्प्रत्ययाऽसमभिव्याहृतराजपुरुष-शब्देन बहुव्रीहिणा न जायते इति न तादृशराजपुरुषशब्दोत्तरं मत्वर्थीयाऽनुपपत्तिः, पूर्वोक्तरीत्या यादृशधर्मावच्छिन्नविषयताकबोधः मतुप्समभिव्याहृतेन यत्पदेन जायते तादृशधर्मावच्छिन्नविषयताकबोधः एव यदि मतुप्प्रत्ययस्य समभिव्याहारं विना तत्पदेन बहुव्रीहिणा सम्भवति तदैव तादृशपदोत्तरम् उक्ताऽनुशासनेन मत्वर्थीयनिषेधादिति न 'राजपुरुषवान्' - इतिप्रयोगाऽनुपपत्तिः ।

●

नियम मुजब **राजपुरुषवान्** प्रयोग थई शकशे. जुओ - मत्वर्थीय समभिव्याहृत = मतुप्प्रत्यय युक्त राजपुरुष पद द्वारा राजसंबंधिपुरुषसंबंधित्वअवच्छिन्न देशविशेषनिष्ठविषयतानिरूपक बोध उत्पन्न थाय छे. मतुप् प्रत्ययनो समभिव्याहार न होय मतलब के केवल **राजपुरुष** पद द्वारा, जे बहुव्रीहिसमासथी युक्त छे तेना द्वारा, राजसंबंधिपुरुषसंबंधित्वअवच्छिन्न-देशविशेषनिष्ठविषयतानिरूपक बोध उत्पन्न नथी थई शकतो. किंतु राजअभिन्नपुरुष-संबंधित्वअवच्छिन्नदेशविशेषनिष्ठविषयतानिरूपक बोध थाय छे. माटे, मत्वर्थीय प्रत्यय लगाववामां कोई वांधो नथी. जो बहुव्रीहिसमास द्वारा राजपुरुषपदना माध्यमे राजसंबंधि-पुरुषसंबंधित्वअवच्छिन्नदेशविशेषनिष्ठविषयतानिरूपक बोध उत्पन्न थतो होत तो **राजपुरुष** पद पछी मत्वर्थीय प्रत्यय न लागी शकत. परंतु राजपुरुषपद द्वारा बहुव्रीहि समासना माध्यमे राजसंबंधिपुरुषसंबंधित्वअवच्छिन्नदेशविशेषनिष्ठविषयतानिरूपक बोध उत्पन्न नथी थतो. किंतु राजअभिन्नपुरुषसंबंधित्वअवच्छिन्नदेशविशेषनिष्ठविषयतानिरूपक बोध उत्पन्न थाय छे. माटे, प्रस्तुत अनुशासननो विषय **राजपुरुषवान्** प्रयोग नहीं बने. **राजपुरुषवान्** प्रयोग संभवी ज शकशे. प्रस्तुत अनुशासन ए बाबतमां दखलगीरी नहीं करे. माटे, अमारा मतमां **राजपुरुषवान्** प्रयोगनी अनुपपत्तिनी आपत्ति छे ज नहीं. जो 'बहुव्रीहि त्यां संभवतो होय तो मत्वर्थीय प्रत्यय न लागे' - आ प्रमाणे तमे जे मानो छो तेमां तो पूर्वे बताव्युं ते मुजब **राजपुरुषवान्** प्रयोगनी अनुपपत्तिनी आपत्ति वज्रलेपायित बनशे. माटे, 'जो बहुव्रीहि समास मत्वर्थीयप्रत्ययना अर्थने जणावतो होय तो' - आटलुं लखवुं ज जोईए. अने तेनो अर्थ अमे उपर जे बताव्यो ते प्रमाणे करवो जोईए.

गूढार्थतात्पर्यशोलता

यत्पदेन यादृशधर्मावच्छिन्नविषयताको बोधो मत्वर्थीयसमभिव्याहृतेन जायते, मतुपः समभिव्याहारं विना तेन पदेन बहुव्रीहिणा तादृशधर्मावच्छिन्नविषयताकबोधसम्भवे तत्पदान्मत्वर्थीयो न भवतीत्यर्थस्य विवक्षितत्वात् ।

तथा च राजसम्बन्धिपुरुषसम्बन्धित्वावच्छिन्नविषयताको बोधो मतुप्-

●

एतदेवाह - **मत्वर्थीयप्रत्ययसमभिव्याहृतेन यत्पदेन यादृशधर्मावच्छिन्नविषयताको बोधो जायते, मतुपः समभिव्याहारं विना तेन पदेन बहुव्रीहिणा तादृशधर्मावच्छिन्नविषयताकबोधसम्भवे तत्पदान्मत्वर्थीयो न भवतीति अर्थस्य** = अनुशासनार्थस्य **विवक्षितत्वात्**, 'न कर्मधारयान्मत्वर्थीयः प्रयुञ्जीत, बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः' इत्यनुशासनस्योक्ताऽर्थपरत्वाङ्गीकारादिति । यथा मत्वर्थीयप्रत्ययसमभिव्याहृतेन पीताम्बरपदेन पीताऽभिन्नाऽम्बरविशिष्टत्वावच्छिन्नविषयताको बोधः जायते, मतुपः समभिव्याहारं विना पीताम्बरपदेन बहुव्रीहिणाऽपि पीताऽभिन्नाऽम्बरविशिष्टत्वाऽवच्छिन्नविषयताकबोधः एव भवतीति पीताम्बरपदाद् मत्वर्थीयः प्रत्ययः न भवति ।

एतादृशाऽनुशासनाङ्गीकारेण यथा न 'राजपुरुषवान्' इतिप्रयोगाऽनुपपत्तिः तथा दर्शयन्नाह - **तथा च** = एवमनुशासनार्थाङ्गीकारे च **मतुप्समभिव्याहृतेन राजपुरुषपदेन राजसम्बन्धिपुरुषसम्ब-**

●

शब्दार्थ :- मत्वर्थीयसमभिव्याहृतेन यत्पदेन यादृशधर्मावच्छिन्नविषयताकः बोधो जायते.... આ રીતે અન્વય જોડવો. ભાવાર્થ એ છે કે મત્વર્થીય પ્રત્યયથી યુક્ત એવા જે પદ દ્વારા જેવા પ્રકારના ધર્મઅવચ્છિન્નવિષયતાનિરૂપક બોધ ઉત્પન્ન થાય છે, જો મતુપ્પ્રત્યય વિના તે પદ દ્વારા જ બહુવ્રીહિસમાસના માધ્યમે તેવા પ્રકારના જ ધર્મથી અવચ્છિન્નવિષયતાનિરૂપક બોધ થતો હોય તો તે પદ પછી મત્વર્થીય પ્રત્યય ન લાગી શકે. અનુશાસનનો આવા પ્રકારનો અર્થ પ્રસ્તુતમાં વિવક્ષિત છે. જેમ કે **वत्** સ્વરૂપ મતુપ્ પ્રત્યયથી યુક્ત એવા પીતામ્બર પદ દ્વારા પીતામ્બરત્વવિશિષ્ટજનનો = પીતામ્બરત્વઅવચ્છિન્નપીતામ્બરજનનિષ્ઠવિષયતાનિરૂપક બોધ ઉત્પન્ન થાય છે. પ્રસ્તુતમાં મતુપ્પ્રત્યય = **वत्** પ્રત્યય લગાવ્યા વિના પણ કેવલ પીતામ્બર પદ દ્વારા બહુવ્રીહિસમાસના માધ્યમે પીતામ્બરત્વવિશિષ્ટજનનો જ = પીતામ્બરત્વઅવચ્છિન્નપીતામ્બરજનનિષ્ઠવિષયતાનિરૂપક બોધ જ ઉત્પન્ન થાય છે. માટે પીતામ્બરપદ પછી મતુપ્ પ્રત્યય = **मत्,वत्** વગેરે પ્રત્યયો ન થાય. મતલબ કે **पीताम्बरवान्** આવો પ્રયોગ ન થાય. કિંતુ **पीताम्बरः** - આવા પ્રકારનો જ પ્રયોગ થાય.

અનુશાસનનો આવો અર્થ કરવાથી **राजपुरुषवान्** પ્રયોગની અનુપપત્તિનો દોષ નહીં

समभिव्याहृतेन राजपुरुषपदेन जायते, बहुव्रीहिसमासेन तु राजाभिन्नपुरुष-सम्बन्धित्वेनैवेति न दोषः ।

न्धित्वावच्छिन्नदेशनिष्ठ**विषयताको बोधः जायते**, मतुप्समभिव्याहारं विना राजपुरुषपदेन 'राजा पुरुषः यत्रासौ राजपुरुषः' - इत्येवं **बहुव्रीहिसमासेन तु राजाऽभिन्नपुरुषसम्बन्धित्वेन एव** 'तादृशदेशस्य बोधो जायते' - इत्येवमध्याहाराऽनुषङ्गाभ्यां पूरणीयम्, एवकारेण राजसम्बन्धिपुरुष-सम्बन्धित्वेन न तादृशदेशस्य बोधः तादृशपदेन भवतीति सूचितम्, अन्ययोगव्यवच्छेदकत्वात्तस्य । तथा च राजपुरुषपदेन बहुव्रीहिणा राजाऽभिन्नपुरुषसम्बन्धित्वावच्छिन्नदेशनिष्ठविषयताकबोधः एव जायते इत्यर्थः । **इति** = तस्मात्, हेत्वर्थकत्वात्तस्य, **न दोषः** = 'न राजपुरुषपदोत्तरं मत्वर्थीयाऽनुपपत्तिः, पूर्वोक्तयुक्त्या राजपुरुषपदेन मतुप्प्रत्ययसमभिव्याहृतेन, तत्समभिव्याहारं विना बहुव्रीहिणा च समानधर्मावच्छिन्नविषयताकबोधजनने एव तदुत्तरम् उक्ताऽनुशासनेन मत्वर्थीय-निषेधादिति भावः ।

ननु 'मतुपः समभिव्याहारं विना' इत्येतद् व्यर्थम्, बहुव्रीहिसमासेनेत्यनेनैव गतार्थत्वात् । तथा च 'मत्वर्थीयसमभिव्याहृतेन यत्पदेन यादृशधर्मावच्छिन्नविषयताकबोधो जायते तत्पदेन बहुव्रीहिणा तादृशधर्मावच्छिन्नविषयताकबोधसम्भवे तत्पदान्मत्वर्थीयो न भवती'त्येवमेवाऽनुशासन-मङ्गीकार्यम्, अनुपपत्त्यापत्त्यभावा***दिति चेत् ?***

मैवम्, तथा सति तत्पदेन मत्वर्थीयसमभिव्याहृतपदग्रहणसम्भवेन 'पीताम्बरवान्' - इत्येवं प्रयोगस्याऽपि साधुत्वाऽऽपत्तेः । पीताम्बरवत्पदेन मत्वर्थीयसमभिव्याहृतेन पीताम्बरसम्बन्धित्वाव-च्छिन्नविषयताकबोधो जायते, तत्पदेन = पीताम्बरवत्पदेन बहुव्रीहिणा तादृशधर्मावच्छिन्नविषयताक-बोधो नैव जायते, तथा चोक्ताऽनुशासनेन न तदनुपपत्तिः, अत्र मत्वर्थीयसमभिव्याहृतयत्पदविधया पीताम्बरपदमपि गृह्यते, पीताम्बरवत्पदमपि ग्रहीतुं शक्यते इति तु स्पष्टमेव । यदि 'मतुप्प्रत्ययसम-

આવે. કારણ કે મતુપ્ પ્રત્યયથી યુક્ત એવા રાજપુરુષપદ દ્વારા રાજસંબંધિપુરુષસંબંધિત્વ-અવચ્છિન્ન દેશવિશેષનિષ્ઠ વિષયતાનિરૂપક બોધ થાય છે. જ્યારે મતુપ્ પ્રત્યય લગાવ્યા વિના કેવલ રાજપુરુષપદ દ્વારા બહુવ્રીહિ સમાસના માધ્યમે રાજઅભિન્નપુરુષસંબંધિત્વરૂપે જ દેશવિશેષનો બોધ થાય છે એટલે કે રાજઅભિન્નપુરુષસંબંધિત્વઅવચ્છિન્ન દેશવિશેષનિષ્ઠ વિષયતાનિરૂપક બોધ થાય છે. માટે, રાજપુરુષવાન્ પ્રયોગ અસાધુ થવાનો દોષ અમને નહીં આવે.

भिव्याहारं विना' इति निवेश्यते तदा यत्पदेन पीताम्बरवत्पदग्रहणेऽपि तत्पदविधया तद् ग्रहीतुं नैव शक्यते, मतुप्रत्ययसमभिव्याहृतत्वात्तस्येति न काऽप्यनुपपत्तिरिति, स्वरूपदर्शकं वा तदिति सूक्ष्ममीक्षणीयम् ।

ननु यत्पदविशेषणविधया बहुव्रीहीतरत्वं किं न निविष्टम् ? मतुप्समभिव्याहृतेन बहुव्रीहीतर-यत्पदेन यादृशधर्मावच्छिन्नविषयताकबोधो जायते तत्पदेन मतुप्समभिव्याहारं विना बहुव्रीहिणा तादृशधर्मावच्छिन्नविषयताकबोधसम्भवे तत्पदान्मत्वर्थीयो न भवति इत्येवाऽनुशासनं किमर्थं न स्वीकृतम् ? एतादृशमेवाऽनुशासनमङ्गीकर्तव्यम्, अन्यथा 'आरूढवानरवान्' इत्येवं प्रयोगोऽनुपपन्नः स्यात्, अत्र 'आरूढः वानरः यं सः आरूढवानरः वृक्षः, सः विद्यते यत्र सः आरूढवानरवान् देशः' इत्येवं बहुव्रीह्युत्तरं मत्वर्थीयः प्रत्ययः विधीयते, भवदुक्ताऽनुशासनेन पदमात्रान्मत्वर्थीय-निषेधाद् आरूढवानरपदान्मत्वर्थीयः न स्यादेवेति तादृशप्रयोगोऽनुपपन्नः, यदि बहुव्रीहीतरत्वं निवेश्यते तदा तादृशारूढवानरपदस्य बहुव्रीहित्वेन बहुव्रीहीतरत्वाऽसम्भवान्न तदुत्तरं मत्वर्थीयाऽ-नुपपत्तिः अस्मदङ्गीकृताऽनुशासनाऽनुसारेण बहुव्रीहीतरपदोत्तरमेव मत्वर्थीयनिषेधा***दिति चेत् ?***

●

આવો પરિષ્કાર કરવા દ્વારા અન્ય આપત્તિનું નિરાકરણ પણ થઈ ગયું. તે આપત્તિ જ બતાવતા કહે છે કે :-

❁ 'आरूढवानरवान्' प्रयोगनी संगति ❁

प्रश्न :- જ્યારે **आरूढः वानरः यम् सः = आरूढवानरः वृक्षः, सोऽस्ति यत्र = आरूढवानरवान् देशः** આ અર્થમાં કોઈને **आरूढवानरवान्** પ્રયોગ કરવો હોય તો તમારા અનુશાસન મુજબ નહીં થઈ શકે. તમારું અનુશાસન છે - 'કર્મધારય સમાસ પછી મત્વર્થીય પ્રત્યય ન લાગે, જો બહુવ્રીહિ મત્વર્થીય પ્રત્યયાર્થને જણાવતો હોય તો.' આ અનુશાસન મુજબ **आरूढवानरवान्** પ્રયોગ અસંગત થાય છે. કારણ કે **आरूढश्चाऽसौ वानरश्च** આવો કર્મધારય સમાસ કર્યા પછી **आरूढवानरः अस्ति यत्र सः आरूढवानरवान् वृक्षः** આ પ્રમાણે જે પ્રયોગ કરવામાં આવે છે તેનો અર્થ જે થાય તે જ અર્થ **आरूढवानरः वृक्षः = आरूढो वानरः यं सः** - આવા પ્રકારના બહુવ્રીહિ સમાસ દ્વારા જણાઈ શકે છે. માટે, **आरूढवानरवान्** આ રીતે **आरूढवानर** પદ પછી મત્વર્થીય પ્રત્યય લાગી જ ન શકે. તેવી યોગ્યતા જ નથી.

તે જ રીતે **जरन्त्यः चित्रगावः यस्य सः = जरच्चित्रगुः पुरुषः, सोऽस्ति यत्र = जरच्चित्रगुमान्** આવા અર્થને જણાવવા માટે જે **जरच्चित्रगुमान्** પ્રયોગ કરવામાં આવે છે તે

भोः विस्मरणशील ! किमर्थं पुनः पुनः तदेव पृच्छ्यते ? उक्तमेव पूर्वमसकृद् यदुत बहुव्रीहिणा तादृशाऽर्थप्रत्यायने एव मत्वर्थीयः निषिध्यतेऽनुशासनेन, आरूढवानरवान् - इत्येवं शब्देन आरूढवानरसम्बन्धिसम्बन्धित्वाऽवच्छिन्नदेशनिष्ठविषयताकः बोधः जन्यते, आरूढः वानरः यं सः = आरूढवानरः वृक्षः इत्येवं बहुव्रीहिणा आरूढवानरशब्देन आरूढवानरसम्बन्धित्वाऽवच्छिन्नवृक्षनिष्ठविषयताकः एव बोधः जायते इति न आरूढवानरपदेन मतुप्समभिव्याहृतेन, तत्समभिव्याहारं विना बहुव्रीहिणा च समानधर्मावच्छिन्नविषयताकः बोधः जायते, येन उक्ताऽनुशासनेन आरूढवानरशब्दोत्तरं मत्वर्थीयः अनुपपन्नः स्यात् ।

यदि 'आरूढश्चासौ वानरश्च = आरूढवानरः, आरूढवानरः यत्रासौ आरूढवानरवान् वृक्षः' इत्येवं कर्मधारयसमासोत्तरं मत्वर्थीयः विधीयते तदा मतुप्प्रत्ययसमभिव्याहृतेन आरूढवानरपदेन आरूढवानरसम्बन्धित्वावच्छिन्नवृक्षनिष्ठविषयताकबोधः भवति तादृशः एव बोधः आरूढवानरपदेन बहुव्रीहिणा प्रतिपाद्यते इति आरूढवानरपदोत्तरं मत्वर्थीयः अनुपपन्नः स्यादेव, यदि आरूढवानरसम्बन्धिवृक्षरूपाऽर्थबोधतात्पर्येण 'आरूढवानरवान्' इत्येवं प्रयोगः क्रियते तदा । किन्तु आरूढवानरसम्बन्धिसम्बन्धित्वेन वृक्षविशिष्टदेशविषयकबोधतात्पर्येण तु 'आरूढवानरवान्' इत्येवं प्रयोगः

●

પણ અસાધુ બનવાની આપત્તિ આવશે. કારણ કે **जरन्त्यः च ते चित्रगावश्च = जरच्चित्रगावः, ताः सन्ति यस्य = जरच्चित्रगुमान्** આ પ્રમાણે જે 'ઘરડી, જાતજાતની ગાયોવાળો ગોવાળ' - આવો અર્થ જણાવવામાં આવે છે તે જ અર્થ **जरन्त्यः चित्रगावः यस्य सः जरच्चित्रगुः** આ પ્રમાણે બહુવ્રીહિ સમાસ દ્વારા પણ જણાવી શકાય છે. માટે, **जरच्चित्रगु** પદ પછી મત્વર્થીય પ્રત્યય લગાડી ન શકાય. એટલે **जरच्चित्रगुमान्** આવો પ્રયોગ થાય જ નહીં. **जरच्चित्रगु** પછી મત્વર્થીય પ્રત્યય લગાડવાની યોગ્યતા જ નથી. આમ, તમારા અનુશાસન મુજબ **जरच्चित्रगुमान्** આવો પ્રયોગ અસંગત બની જશે. આ રીતે તમારા અનુશાસન મુજબ (૧) **आरूढवानरवान्** અને (૨) **जरच्चित्रगुमान्** આ બન્ને પ્રયોગ અસંગત થઈ જવાની આપત્તિ આવશે.

❁ 'जरच्चित्रगुमान्' प्रयोगनी संगति ❁

उत्तर :- (एव.) હમણાં જ પરિષ્કૃત અનુશાસન દર્શાવ્યું કે "મતુપ્સમભિવ્યાહૃત જે પદ દ્વારા જેવા પ્રકારના ધર્મથી અવચ્છિન્નવિષયતાનિરૂપકબોધ થાય છે, જો મતુપ્ પ્રત્યયના સમભિવ્યાહાર વિના ફક્ત બહુવ્રીહિ સમાસના માધ્યમે તે પદ દ્વારા તેવા પ્રકારના જ ધર્મથી અવચ્છિન્નવિષયતાનિરૂપકબોધ થતો હોય તો તે પદ પછી મત્વર્થીય પ્રત્યય ન લાગે." આ અનુશાસન મુજબ કોઈ વાંધો નહીં આવે. બન્ને દૃષ્ટાંત જોઈ લઈએ - મતુપ્ પ્રત્યય

उच्यते; 'नञाद्यतिरिक्ताऽव्ययेन समम् अव्ययीभावातिरिक्तः समासो न भवती'ति व्युत्पत्त्यङ्गीकारे 'साध्याभाववतः अवृत्तम् = साध्याभाववदवृत्तम्' इत्येवं 'साध्याभाववतः अवृत्ति यत्रासौ साध्याभाववदवृत्ती' इत्येवञ्च समासः कथमङ्गीकृतः भवता ? 'अवृत्तम्' इत्यस्य 'अवृत्ति' इत्यस्य चाऽव्ययीभावसमासत्वेन अव्ययतया साध्याभाववत्पदस्य ताभ्यां समं षष्ठीतत्पुरुषादिसमासस्य अनङ्गीकरणीयत्वात् ।

अस्माकमाशयः एवमेव यदुत 'साध्याभाववदवृत्तम्' इतिवद् अभ्युपगममात्रेण 'भूतलस्योपकुम्भम् = भूतलोपकुम्भम्' - इत्येवमव्ययीभावेन समं षष्ठीतत्पुरुषसमासः स्वीक्रियताम्, तथापि अव्ययीभावस्य पूर्वपदार्थप्रधानत्वेन तदुत्तरपदार्थेन समं भूतलादेरन्वयस्याऽशक्यतया तादृशप्रयोगः असाधुरेव स्यात् । ***यद्यपि*** उक्तनियमेन 'साध्याभाववदवृत्तम्', 'भूतलोपकुम्भम्' - इत्यादयः प्रयोगाः बाधिताः एव सन्ति, ***तथापि*** अभ्युपगमवादेन यथा 'साध्याभाववदवृत्तम्' इतिप्रयोगमङ्गीकृत्य साध्याभाववतः वृत्तित्वेऽनन्वयलक्षणः दोषो दीयते तथा अभ्युपगमवादेनैव 'भूतलोपकुम्भम्' इतिप्रयोगमङ्गीकृत्य तत्र अव्ययीभावेन समं समाससम्भवेऽपि भूतलस्य कुम्भपदार्थे अन्वयस्तु

●

֍ अव्यय साथे समास न थाय ֍

उत्तर : (एवं.) वाह ! आ तो चोर शाहुकारने दंडे ! जो 'नञ्, उप, अधि वगेरे अमुक समस्यमान अव्ययो सिवायना अव्ययीभावसमास वगेरे अव्ययोनी साथे समास न थाय' - आ नियमनुं तमने आटलुं सारुं ज्ञान होय तो पछी **वृत्तस्य अभावः = अवृत्तम्** आ रीते अव्ययीभाव समास करी **साध्याभाववतः अवृत्तम्** आ रीते षष्ठीतत्पुरुषसमास शा माटे करो छो ? अव्ययीभाव समास तो अव्यय छे. तेनी साथे षष्ठीतत्पुरुषसमास शी रीते थशे ? जे रीते तमे **साध्याभाववतः अवृत्तम् = साध्याभाववदवृत्तम्** आ रीते अव्ययीभाव साथे समास स्वीकार्यो ए रीते मानी लो के कदाच **भूतले उपकुम्भम् = भूतलोपकुम्भम्** आवा प्रकारनो प्रयोग थाय छे. (आ अभ्युपगमवादथी ज स्वीकारवानी वात छे. वस्तुतः अव्ययनी साथे समास थाय ज नहीं.) मतलब के जे रीते **साध्याभाववद्अवृत्तम्** आ रीते समास तमे स्वीकार्यो छे ते रीते **भूतलोपकुम्भम् / भूतलोपघटम्** (बन्ने एक ज अर्थवाळा प्रयोग छे) प्रयोगने अभ्युपगमवादथी स्वीकारी पण लो छतां तेमां भूतलवृत्तितानो अन्वय अव्ययीभावसमासघटकीभूतउत्तरपदार्थ घटनी साथे तो नथी ज जणातो. हा ! जो अमे जणाव्यो ते नियम न मानो तो तेवो अन्वय सहुने प्रतीतिमां आववो जोईए. तो **भूतलोपकुम्भम्** आ प्रयोग साचो ठरे. परंतु लोकोने तेवो अन्वय जणातो नथी. माटे अमे जे व्युत्पत्ति जणावी ते

नैव स्यादिति भूतलवृत्तिघटसमीपपदार्थबोधजननेच्छया न हि तादृशप्रयोगः कर्तुं शक्यते । तथा च 'भूतलोपकुम्भम्' इत्यत्र भूतलस्य स्वनिरूपितवृत्तित्वसम्बन्धेन कुम्भपदार्थे यदन्वयः न प्रतीयते तदेवोक्तनियमे मानम्, यतः तादृशान्वयाप्रतीत्या 'पूर्वपदार्थप्रधानसमासोत्तरपदार्थेन समं तत्समासाऽघटकपदार्थस्याऽन्वयः प्रतीतिविरुद्धः' इति सिद्धेः । तथा चाऽभ्युपगमवादेन अव्ययेन समं समासमङ्गीकृत्याऽपि तादृशप्रयोगे भूतलवृत्तिघटसमीपरूपार्थाऽप्रतीतिरेव 'पूर्वपदार्थप्रधान-समासोत्तरपदार्थेन समं तत्समासाऽघटकपदार्थस्याऽन्वयः न भवति' इतिनियमे प्रमाणमिति स्थितम् । प्रयोजनविशेषेण हि स्वाऽनभिप्रेतसिद्धान्ताऽभ्युपगमनम्, स्वाऽनभिप्रेतप्रयोगाऽभ्युपगमनं वा अभ्युपगमवादः ।

'पूर्वपदार्थप्रधानसमासोत्तरपदार्थेन समं तत्समासाऽघटकपदार्थस्य अन्वयो न भवती'ति नियमे मानान्वेषणलक्षणप्रयोजनविशेषेणैव 'साध्याभाववदवृत्तम्', 'भूतलोपकुम्भम्' इत्यादिप्रयोगाः अभ्युपगताः । वस्तुतः 'नञादिकतिपयाऽव्ययातिरिक्ताऽव्ययेन सममव्ययीभावातिरिक्तसमासः न भवती'ति एवं नियमाङ्गीकारे साध्याभाववतः स्वनिरूपितत्वसम्बन्धेन वृत्तित्वेऽनन्वयाऽपेक्षया 'अवृत्तम्' इत्येवमव्ययेन समं साध्याभाववतः समासत्वाऽसम्भवनिबन्धनः बलीयान् दोषः अपि 'साध्याभाववतः अवृत्तम् = साध्याभाववदवृत्तम्' इत्येवं समासाङ्गीकर्तृणां मते इति ध्येयम् ।

●

માનવી જ પડશે. ટૂંકમાં, "**भूतलोपकुम्भम्** પ્રયોગને અસાધુ ઠેરવવા માટે 'પૂર્વપદાર્થપ્રધાન-સમાસઘટકીભૂત ઉત્તરપદાર્થની સાથે તે સમાસમાં અઘટકીભૂત પદાર્થનો અન્વય ન થાય' - આવી વ્યુત્પત્તિ માનવી પડશે" - આવી અમારી વાત તમારી આંખમાં ધૂળ નાંખવા માટેની નથી.

❋ અભ્યુપગમવાદથી પ્રયોગ સંગતિ : ઉત્તરપક્ષ ❋

જુઓ, પ્રસ્તુતમાં વસ્તુસ્થિતિ એવી છે કે **भूतलोपकुम्भम्** પ્રયોગ **भूतले उपकुम्भम्** આ રીતે સપ્તમીતત્પુરુષસમાસ, અવ્યયીભાવસમાસ સાથે થાય પછી જ બને છે. વસ્તુતઃ આવો પ્રયોગ થાય નહીં. પણ, જે રીતે તમે **साध्याभाववतः अवृत्तम् = साध्याभाववदवृत्तम्** આ રીતે અવ્યયીભાવ સમાસ સાથે ષષ્ઠીતત્પુરુષસમાસ કર્યો તે રીતે અભ્યુપગમવાદથી **भूतले उपकुम्भम् = भूतलोपकुम्भम्** આ રીતે અવ્યયીભાવસમાસની સાથે જે સપ્તમીવિભક્તિતત્પુરુષસમાસ કરવામાં આવેલ છે તેને સ્વીકારી લો તો પણ અમે જે નિયમ બતાવ્યો તે મુજબ ભૂતલનો ઘટમાં અન્વય ન થઈ શકે. આ એક રીતે વાત કરી. આમાં **भूतलोपकुम्भम्** પ્રયોગમાં જે

गू ढा *एवं 'साध्याभाववदवृत्तम्' इतिवदभ्युपगममात्रेण 'भूतलोपघटम्' इत्यस्य सत्त्वेऽपि घटे भूतलस्याऽनन्वयः ।*

●

एतत्सर्वं चेतसिकृत्याह - **एवं** पूर्वोक्तमानसमुच्चये, यथा 'भूतलस्याऽघटम्' इत्यत्र भूतलस्य घटेऽनन्वयः उक्तनियमे मानं तथा वक्ष्यमाणः 'भूतलोपकुम्भम्' इत्यत्र भूतलस्य घटेऽनन्वयोऽपि तादृशनियमे मानमिति हृदयम् । ***यद्यपि*** अव्ययेन समम् अव्ययीभावातिरिक्त-समासस्याऽसम्भवेन 'भूतलोपकुम्भम्' इति प्रयोगः असाधुः सिध्यति एव, न तदर्थम् उपदर्शितम् अनुशासनम् अवश्यम् अङ्गीकरणीयमिति, ***तथापि*** **'साध्याभाववदवृत्तम्' इतिवद्** = यथा 'साध्याभाववदवृत्तम्' इत्यत्रापि 'साध्याभाववतः अवृत्तम्' इत्येवमव्ययीभावेन समम् एव समस्ततया तस्यासाधुत्वेऽपि 'साध्याभाववदवृत्तम्' इतिप्रयोगः अभ्युपगमवादेनैवाङ्गीक्रियते तत्र च साध्याभाववतः वृत्तित्वे अनन्वयः प्रतिपाद्यते तद्वद् **अभ्युपगममात्रेण 'भूतलोपघटम्'**

य शो ल ता **इत्यस्य** = 'भूतलोपकुम्भम्' इत्यस्य **सत्त्वेऽपि** = अव्ययेन समं समासाऽभ्युपगमेऽपि अत्र लोकानां भूतलस्य घटाद्युत्तरपदार्थे अन्वयः न प्रतीयते सः **घटे भूतलस्याऽनन्वयः** एव उक्तनियमे मानम् इति शेषः । तथा च 'भूतलोपकुम्भम्' इत्यादिप्रयोगाणाम् 'अव्ययेन समम् अव्ययीभावातिरिक्तसमासः न भवती'ति नियमेन असाधुत्वेऽपि यद्यभ्युपगममात्रेण तादृशसमासः अङ्गीक्रियते तदापि भूतलस्य कुम्भादौ अन्वयः लोकैः नैव प्रतीयते । सः अन्वयः किमर्थं न प्रतीयते ? इत्याशङ्कायामवश्यं वक्तव्यं यदुत 'पूर्वपदार्थप्रधानसमासोत्तरपदार्थेन समं तत्समासाऽघटकपदार्थस्याऽन्वयो न भवति' इतिनियमादेव तादृशप्रतीतिः न भवति, तथा च तादृशप्रतीत्यभावः भूतलस्य घटेऽनन्वयश्चैव उक्तनियमे मानमिति स्थितम् ।

ननु नियमवशेन प्रतीतिः न भवति, प्रतीत्यभावाच्च नियमः अङ्गीक्रियते इति अन्योन्याश्रय-दोषदानवः विडम्बयति अत्र ***इति चेद् ? न,*** "यतः लोकैः पूर्वपदार्थप्रधानसमासोत्तरपदार्थेन समं तत्समासाऽघटकपदार्थान्वयः न प्रतीयते ततः 'पूर्वपदार्थप्रधानसमासोत्तरपदार्थेन समं तत्समासाऽघटकपदार्थान्वयः अव्युत्पन्नः' - इति नियमः सिध्यति, तत्सिद्धौ च सर्वत्र एतन्नियमेनैव पूर्वपदार्थप्रधानसमासोत्तरपदार्थेन समं तत्समासाऽघटकपदार्थाऽन्वयः न भवतीति उच्यते" इत्यभिप्राये

●

वि न **भूतले उपकुम्भम्** આ રીતે અવ્યયીભાવ સમાસની સાથે સપ્તમીતત્પુરુષસમાસ છે તે અસત્ય છે, છતાં પણ અભ્યુપગમવાદથી તેને સ્વીકારી આગળ વિચારણા કરી.

दोषाभावादिति ध्येयम् । अत्र भूतलोपकुम्भम्, भूतलोपघटम्... इत्यादयः समानार्थकाः एव प्रयोगाः इति तत्र तत्र तथा तथा भेदेन प्रयोगोपलम्भे न मोह्यम् ।

ननु 'भूतलोपकुम्भम्' इतिप्रयोगः 'अव्ययेन समम् अव्ययीभावातिरिक्तः समासो न भवती'ति नियमेन असाधुरपि अभ्युपगमवादेन तमङ्गीकृत्य तत्र भूतलस्य घटेऽनन्वयः उक्तव्युत्पत्तौ मानम् - इति भवता यत्प्रतिपाद्यते तद् दुष्टम्, यतः 'भूतलोपकुम्भम्' इत्येवं प्रयोगः 'भूतलस्योपकुम्भम्' इत्येवम् अव्ययीभावेन समं समासाऽसम्भवादसाधुः नास्त्येव, यतः अव्ययीभावेन सममपि समासः अविगानेन प्रतीयते एव । यथा 'शोभनोपकुम्भम्' इत्यत्र 'कुम्भस्य समीपम् = उपकुम्भम्', 'शोभनञ्च तद् उपकुम्भञ्च = शोभनोपकुम्भम्' इत्येवं विग्रहः समाद्रियते एव, 'शोभनं कुम्भसमीपस्थं वस्तु' - इत्याशयेन सः प्रयोगः क्रियते, तत्र शोभनस्याऽभेदेन कुम्भसमीपेऽन्वयः, तथा च समीपपदार्थस्य पूर्वपदार्थत्वेन तेन समं शोभनपदार्थस्याऽन्वये 'पूर्वपदार्थप्रधानसमासोत्तरपदार्थेन समं तत्समासाऽघटकपदार्थान्वयः न भवती'ति नियमः न लब्धावकाशः, तेन उत्तरपदार्थेन सममेव तादृशाऽन्यपदार्थाऽन्वयस्य निषिद्धत्वेन अत्र पूर्वपदार्थेन समं तादृशाऽन्वयस्वीकारे बाधकाभावात् ।

●

ॐ शोभनोपकुम्भम् प्रयोग अंगे विमर्श ॐ

બીજી રીત મુજબ **भूतलोपकुम्भम्** માં જે **भूतले उपकुम्भम्** સમાસ થાય છે તે વ્યાજબી છે. કારણ કે **शोभनोपकुम्भम्** આવો પ્રયોગ દેખાય છે. આનો અર્થ છે : ભૂતલ કે જે કુંભની સમીપ છે તે શોભન છે. માટે, સમાસ આ રીતે થયો - **कुम्भस्य समीपम् = उपकुम्भम्, शोभनं च तद् उपकुम्भञ्च = शोभनोपकुम्भम्** । આ પ્રયોગમાં અવ્યયીભાવ સમાસની સાથે શોભનપદનો કર્મધારય સમાસ થયો જ છે. **शोभनोपकुम्भम्** પ્રયોગને કેટલાંક લોકો અપ્રામાણિક માને છે. જો **शोभनोपकुम्भम्** પ્રયોગને પ્રામાણિક માનો તો એનો મતલબ એ થયો કે નઞ્, ઉપ વગેરે જે સમસ્યમાનતયા પરિગણિત અવ્યયો છે તદતિરિક્ત અવ્યયાત્મક એવા અવ્યયીભાવસમાસની સાથે કર્મધારય વગેરે સમાસ થઈ શકે તેમ તમે સ્વીકારી લીધું. નઞ્, ઉપ, અધિ વગેરે અમુક અવ્યયોની સાથે જે રીતે સમાસના સામાન્યશાસ્ત્ર દ્વારા (= સમાસ અંગેના સામાન્ય નિયમો દ્વારા) સમાસ સ્વીકૃત છે તે રીતે અવ્યયીભાવસમાસની સાથે પણ સમાસ થાય - આવું તમારે સમાસના સામાન્ય નિયમ દ્વારા જ સ્વીકારી લેવું પડે. એટલે કે 'નઞ્, ઉપ, અધિ વગેરે સમસ્યમાનતયા પરિગણિત અવ્યયો સિવાયના અવ્યયોની સાથે સમાસ ન થાય' - આ નિયમની જગ્યાએ તમારે આ પ્રમાણે નિયમ સ્વીકારવો પડશે કે - 'નઞ્, ઉપ, અધિ વગેરે

तथा च 'शोभनोपकुम्भम्' इतिप्रयोगः एव अव्ययीभावेन समं समासाङ्गीकारे प्रमाणम् । ततः अव्ययीभावसमासेन समं समासस्य दृष्टत्वाद् इष्टत्वाच्च 'भूतलोपकुम्भम्', 'साध्याभाववदवृत्तम्' ... इत्यादौ अव्ययीभावेनाऽपि समं समासाङ्गीकारे न काचित् क्षतिः । तत्र भूतलस्य कुम्भपदार्थे साध्याभाववतः वृत्तित्वपदार्थे 'पूर्वपदार्थप्रधानसमासोत्तरपदार्थेन समं तत्समासाऽघटकपदार्थस्याऽन्वयः अव्युत्पन्नः' इतिनियमवशेनाऽनन्वयात्तादृशप्रयोगः असाधुः इत्यादिकथने न नो विद्वेषः, किन्तु 'भूतलस्योपकुम्भम् = भूतलोपकुम्भम्' इत्यादिरीत्या अव्ययीभावसमासेन समं समासाङ्गीकारे एव तादृशप्रयोगनिष्पत्तेः अव्ययीभावेन समं समासस्याऽसम्भवाच्चाऽभ्युपगमवादेनैव तादृशप्रयोगाः स्वीकर्तव्याः... इत्यादिकथनं वयं न सहामहे, उक्तयुक्त्या 'शोभनोपकुम्भम्' इत्यादिप्रयोगे अव्ययीभावसमासेन सममपि समासस्य स्वीकरणीयत्वेन 'भूतलोपकुम्भम्'... इत्यादिप्रयोगाणां वास्तविकत्वस्याऽवश्यमभ्युपेयतयाऽभ्युपगमवादेन तत्स्वीकारोक्तेः व्याहतत्वादिति ।

अस्तु 'पूर्वपदार्थप्रधानसमासोत्तरपदार्थेन समं तत्समासाऽघटकपदार्थाऽन्वयोऽव्युत्पन्नः' इतिनियमेन तत्र भूतलस्य घटेऽनन्वयः, साध्याभाववतः वृत्तित्वे चाऽनन्वयः, किन्तु न ते प्रयोगाः अभ्युपगमवादेनाङ्गीकरणीयाः, 'शोभनोपकुम्भम्' इत्यादिप्रयोगदर्शनेन अव्ययीभावसमासेन समं समाससम्भवे बाधकाभावादित्येव साधनीयमस्माकमिति ।

न च अव्ययीभावस्य अव्ययत्वेऽपि तेन समं समासाङ्गीकारे 'अव्ययेन समं समासो न

●

સમસ્યમાનતયા પરિગણિત અવ્યયો અને અવ્યયીભાવસમાસ આ બન્ને સિવાયના અવ્યયોની સાથે સમાસ ન થાય.' આવો નિયમ માનો એટલે ત્રણ પ્રયોગોના સમાસ કરી શકાય - (૧) **शोभनञ्च तद् उपकुम्भञ्च शोभनोपकुम्भम्** આ રીતે ઉપકુંભસ્વરૂપ અવ્યયીભાવની સાથે શોભનપદનો કર્મધારયસમાસ થઈ જશે. (૨) **भूतले उपकुम्भम् = भूतलोपकुम्भम्** આ રીતે ઉપકુંભની સાથે ભૂતલપદનો સપ્તમીવિભક્તિતત્પુરુષસમાસ થઈ શકશે. તથા (૩) **साध्याभाववतः अवृत्तम् = साध्याभाववद्अवृत्तम्** આ રીતે **अवृत्तम्** સ્વરૂપ અવ્યયીભાવ સમાસની સાથે સાધ્યાભાववત્પદનો ષષ્ઠીતત્પુરુષસમાસ પણ થઈ શકશે. આમ, **भूतलोपकुम्भम्** પ્રયોગ વાસ્તવિક થશે. પણ, આ પ્રયોગમાં ભૂતલવૃત્તિત્વનો અન્વય ઘટપદાર્થમાં જણાતો જ નથી. જો 'અવ્યયીભાવસમાસઘટકીભૂતઉત્તરપદાર્થની સાથે અવ્યયીભાવસમાસઅઘટકીભૂતપદાર્થનો અન્વય થઈ શકે' - આવું માનો તો ભૂતલનો વૃત્તિતાસંબંધથી ઘટમાં અન્વય લોકોને સ્વરસતઃ જણાવો જોઈશે. તો **भूतलोपकुम्भम्** આ પ્રયોગની સાધુતા દુર્વાર બનશે. પરંતુ શિષ્ટ લોકોને તેવો અન્વય માન્ય નથી.

भवती'ति नियमः भज्येत, तथा च चाद्यव्ययेन समं कृतः समासः अपि अङ्गीकरणीयः स्या***दिति वाच्यम्;***

नञाद्यतिरिक्तत्वनिवेशवद् अव्ययीभावातिरिक्तत्वस्याऽपि तत्र निवेशनीयत्वात् । ततश्च 'नञ्-अव्ययीभावसमासाद्यव्ययाऽतिरिक्ताऽव्ययेन समम् अव्ययीभावसमासातिरिक्तः समासः न भवती'त्येव नियमः अङ्गीकार्यः, तथा सति न काऽप्यनुपपत्तिः ।

न च नञ्-अव्ययीभावसमासाद्यतिरिक्ताऽव्ययेन समम्... इत्यादिरीत्या नियमाङ्गीकारे अव्ययीभावस्य नञादिना सह साजात्यसिद्ध्या यथा नञादिना सममव्ययीभावः भवति तथाऽव्ययीभावेन सममपि अव्ययीभावः स्या***दिति वाच्यम्;***

'अव्ययीभावातिरिक्ताऽव्ययेन सममेवाऽव्ययीभावः भवती'ति नियमस्याऽपि अङ्गीकरणीयत्वात् । ततश्च 'अव्ययीभावातिरिक्तकतिपयाऽव्ययेन सममेवाऽव्ययीभावसमासः भवति, अव्ययीभावसमास-नञाद्यतिरिक्ताऽव्ययेन च समम् अव्ययीभावाऽतिरिक्तसमासः न भवति' इत्येवं नियमः अङ्गीकरणीयः ।

●

ॐ બન્ને વિગ્રહપદ્ધતિ ત્યાજ્ય : નિષ્કર્ષ ॐ

આ રીતે **भूतलोपकुम्भम्** પ્રયોગને અસાધુ ઠેરવવા માટે પણ અમે જે નિયમ બતાવ્યો છે તે સ્વીકારવો અનિવાર્ય થઈ પડશે અને તે સ્વીકારવા જતા સાધ્યાભાવવન્નિરૂપિતત્વનો અન્વય વૃત્તિત્વમાં અસંભવિત બની જવાને કારણે **साध्याभाववदवृत्तम्** આ રીતે તમે જે પદ બનાવો છો તે પણ અસાધુ ઠરશે. માટે, તમારે તમારી વિગ્રહપદ્ધતિ તો બદલવી જ રહી. તમે બતાવેલ વિગ્રહપદ્ધતિ એક નહીં તો બીજી રીતે પણ આખરે ગેરવ્યાજબી જ ઠરે છે. બીજા પ્રકારની વિગ્રહપદ્ધતિમાં પણ **अवृत्ति = वृत्तेरभावः** આવા પ્રકારનો અવ્યયીભાવસમાસ કરી **साध्याभाववतः अवृत्ति यत्र सः साध्याभाववदवृत्तिः हेतुः** આ રીતે સાધ્યાભાવવત્પદની સાથે બહુવ્રીહિ સમાસ કરવામાં આવેલ છે. તથા સાધ્યાભાવવન્નિરૂપિતત્વનો વૃત્તિત્વમાં અન્વય કરવામાં આવેલ જ છે કે જે અવ્યયીભાવસમાસઘટકીભૂતઉત્તરપદાર્થ છે. માટે દર્શિત ઉભય વિગ્રહપદ્ધતિમાંથી એક પણ પદ્ધતિ ગ્રાહ્ય નહીં બની શકે. હવે જો તમે **शोभनोपकुम्भम्** આ પ્રયોગને પ્રામાણિક નહીં માનતા હો તો પછી 'નઞ્, ઉપ, અધિ વગેરે સમસ્યમાનતયા પરિગણિત અવ્યય સિવાયના તથા અવ્યયીભાવ સિવાયના અવ્યયોની સાથે સમાસ ન થાય' - આવું માનવામાં કોઈ પ્રયોજન નથી. માટે, 'નઞ્, ઉપ, અધિ વગેરે સમસ્યમાનતયા પરિગણિત અવ્યય અતિરિક્ત અવ્યયોની સાથે સમાસ ન થાય' - આ જ નિયમ ફલિત

तथा च (१) "अव्ययीभावाऽतिरिक्ताऽव्ययेन सममेव अव्ययीभावसमासः भवति" इति (२) "समासनियमाऽनुसारेण ये अव्ययाः समस्यमानतया परिगणिताः = यैरव्ययैः समं समासः भवतीति स्वीकृतम्, तदतिरिक्तस्याऽपि अव्ययीभावस्य 'शोभनोपकुम्भम्' इत्यादिप्रयोगवशेन समस्यमानत्वम् = अव्ययीभावेन सममपि समासः भवति" इति च अभ्युपेतव्यम् । तथा च भूतलस्योपकुम्भम् = भूतलोपकुम्भम्, साध्याभाववतः अवृत्तम् = साध्याभाववदवृत्तम् इत्यादयः प्रयोगाः स्युरेव वास्तविकाः, किन्तु 'पूर्वपदार्थप्रधानसमासोत्तरपदार्थेन समं तत्समासाऽघटकपदार्थस्याऽन्वयोऽव्युत्पन्नः' इतिनियमवशेन तत्र भूतलस्य कुम्भे, साध्याभाववतश्च वृत्तित्वेऽन्वयः न स्यादित्यत्र नास्ति नो विद्वेषः ***इति चेद्*** ?

अस्त्येवम्, का नः हानिः ? 'शोभनोपकुम्भम्' इत्यादिप्रयोगस्य प्रामाणिकत्वे (१) "अव्ययीभावातिरिक्ताऽव्ययेन सममेव अव्ययीभावः भवती"ति अस्य (२) "समाससामान्यशास्त्रेण

●

थशे. આ નિયમ મુજબ **भूतलोपकुम्भम्** પ્રયોગ તો નહીં જ થાય. કિંતુ સાથે સાથે **साध्याभाववदवृत्तम्** પ્રયોગ કરવામાં સાધ્યાભાવવાન્નો વૃત્તિ(= વૃત્તિત્વ)માં અન્વય ન થવા સ્વરૂપ દોષ કરતા પણ અવ્યય સાથે સમાસ ન થવા સ્વરૂપ મોટો દોષ આવશે. સમાસઅઘટકપદાર્થની સાથે વૃત્તિત્વનો અન્વય ન થાય - એ નિયમના ભંગનો દોષ તો છે જ. ઉપરાંતમાં, તેનાથી પણ મોટો 'અવ્યયાત્મક અવ્યયીભાવસમાસ સાથે ષષ્ઠી વિભક્તિ તત્પુરુષ સમાસ કરવો પડશે' - આ દોષ આવી પડશે. માટે,

(ક) (૧) **वृत्तस्य अभावः = अवृत्तम्** (અવ્યયીભાવ સમાસ)
(૨) **साध्याभाववतः अवृत्तम् = साध्याभाववदवृत्तम्** (ષષ્ઠીતત્પુરુષસમાસ)
(૩) **साध्याभाववदवृत्तम् अस्ति अस्येति साध्याभाववदवृत्ती हेतुः** (મતુપ્ પ્રત્યય)
(૪) **साध्याभाववदवृत्तिनः भावः = साध्याभाववदवृत्तित्वम्** (ભાવઅર્થમાં ત્વ પ્રત્યય)

(ખ) (૧) **वृत्तेः अभावः = अवृत्ति** (અવ્યયીભાવ સમાસ)
(૨) **साध्याभाववतः अवृत्ति यत्र सः साध्याभाववदवृत्तिः हेतुः** (બહુવ્રીહિ સમાસ)
(૩) **साध्याभाववदवृत्तेः भावः = साध्याभाववदवृत्तित्वम्** (ભાવઅર્થમાં ત્વ પ્રત્યય)

આ બન્નેમાંથી એક પણ વિગ્રહપદ્ધતિ ગ્રાહ્ય નહીં બને. કારણ કે બન્ને પદ્ધતિમાં (૧) સાધ્યાભાવવન્નિરૂપિતત્વનો અન્વય અવ્યયીભાવસમાસઘટકીભૂતઉત્તરપદાર્થ વૃત્તિ (= વૃત્તિત્વ)માં કરવો પડે છે. (૨) ખાસ તો, અવ્યયાત્મક એવા અવ્યયીભાવ સમાસની સાથે ક્રમશઃ ષષ્ઠીતત્પુરુષ સમાસ અને બહુવ્રીહિ સમાસ કરવા પડે છે.

अव्ययीभावसमासस्याऽव्ययत्वेऽपि शोभनोपकुम्भम् - इत्यादेः गू

समस्यमानतया परिगणिताऽव्ययेभ्योऽतिरिक्तस्याऽपि अव्ययीभावस्य 'शोभनोपकुम्भम्' इतिप्रयोगोपपत्त्यर्थं समाससामान्यशास्त्रेणैव समस्यमानत्वमङ्गीकार्यम् । ***यद्यपि*** समासविषयकसामान्यनियमप्रतिपादकशास्त्राऽनुसारेण नञादिकतिपयाऽव्ययाः एव समस्यमानत्वेन परिगणिताः तैः समभेवाऽव्ययीभावातिरिक्तसमासो भवतीत्येवमङ्गीकृतम्, ***तथापि*** 'शोभनोपकुम्भम्' इत्यादिप्रयोगवशेन तादृशशास्त्रे समस्यमानतया परिगणिताऽव्ययेषु अव्ययीभावस्याऽपि अन्तर्भावः कर्तव्यः, तथा च तेन सममपि अव्ययीभावाऽतिरिक्तसमासो भवति" इति अस्य चाऽवश्यमभ्युपगन्तव्यतया स्यादेव 'भूतलोपकुम्भम्' इतिप्रयोगो वास्तविकः, किन्तु तादृशप्रयोगेऽपि लोकानां भूतलस्य कुम्भेऽन्वयः नैव प्रतीयते इति तादृशाऽनन्वयः एव उक्तनियमे मानं स्यात् । तादृशनियमाऽभ्युपगमे च साध्याभाववतः वृत्तित्वेऽन्वयः नैव स्यादिति भवताऽभ्युपगता विग्रहपद्धतिः त्यक्तव्या एव, साध्याभाववतः वृत्तित्वेऽनन्वयेन साध्याभाववन्निरूपितवृत्तित्वाभावलक्षणाभिप्रेताऽर्थस्य तादृशशब्दादलाभात् । 'साध्याभाववतः अवृत्तम् = साध्याभाववदवृत्तम्, साध्याभाववतः अवृत्ति यत्र असौ = साध्याभाववदवृत्तिः' इत्येवं विग्रहद्वितयेऽपि साध्याभाववतः अन्वयः वृत्तित्वेऽपेक्षितः एव, स चोक्तानुशासनेन न सम्भवति इति अभिप्रेताऽसिद्धेः न तादृशविग्रहद्वितयमङ्गीकरणीयं स्यादिति भावः ।

य शो ल ता

एतदेवाह - **अव्ययीभावसमासस्याऽव्ययत्वेऽपि** = अव्ययीभावसमासस्याऽव्ययत्वेन अव्ययेन

❋ वृत्ति अने वृत्तिता - बन्ने समानार्थी ❋

प्रस्तुतमां वृत्ति तथा वृत्तित्वने एक जणावेल छे. आ अंगे एक स्पष्टता ध्यानमां राखवी के भूतलमां घट वृत्ति छे - आवा गुजराती प्रयोगमां वृत्तिनो अर्थ थाय : रहेनार. वस्तुतः वृत्ति के जे भाववाचक शब्द छे तेने मत्वर्थीय **इन्** प्रत्यय लागी वृत्तिन् = वृत्ती आवुं रूप बने. तेने त्व प्रत्यय लगाडो एटले वृत्तित्व आवुं रूप थाय. जेनो अर्थ थाय - रहेवुं. तथा वृत्ति = **वृत् (वर्त्) वर्तते** आ धातुने **अन्, अ, ति** स्वरूप जे भावकृदन्तना प्रत्ययो तेनो **ति** प्रत्यय लागे त्यारे **वृत्ति** रूप बने. तेनो पण अर्थ थाय - रहेवुं. आम, वृत्तित्व अने वृत्ति उभय एकार्थक थई गया. तेथी उपर क्वचित् वृत्तित्व = वृत्ति आ प्रमाणे दर्शावेल छे.

वि न भा

हवे **एवम्** थी लई छेक **वेदितव्य** सुधीनो शब्दार्थ जोई लईए :-

गू *प्रामाणिकत्वेऽव्ययीभावात्मकाव्ययातिरिक्ताव्ययेनैव अव्ययीभावस्य*
दा *समस्यमानत्वेन परिगणिताव्ययातिरिक्तस्याऽप्यव्ययीभावस्य समास-*

समं समासस्याऽव्युत्पन्नतया तेन समं समासस्याऽव्युत्पन्नत्वेऽपि '**शोभनोपकुम्भम्**' **इत्यादेः** = 'शोभनञ्च तदुपकुम्भञ्चे'त्यादिरीत्याऽव्ययीभावसमासेन समं कर्मधारयसमासेन निष्पन्नस्य 'शोभनोपकुम्भम्' इत्यादिप्रयोगस्य **प्रामाणिकत्वे अव्ययीभावाऽऽत्मकाऽव्ययातिरिक्ताव्ययेन** सममेवाऽव्ययीभावस्य = अव्ययीभावसमासस्य, अस्य '**अभ्युपगमनीयतया**' इतिवक्ष्यमाणपदेनाऽन्वयः, तादृशाऽव्ययेन सममेवाऽव्ययीभावसमासः भवति इति एवमभ्युपगमनीयतया इत्यर्थः । यदि एवं नाभ्युपेयते तदा 'शोभनोपकुम्भम्' इतिप्रयोगवशेन अव्ययीभावेन समं समासाङ्गीकारे अव्ययीभावेन समम् अव्ययीभावसमासोऽपि अङ्गीकरणीयः स्यात्, ततः अव्ययीभावेन सममव्ययीभावस्य कुतोऽप्यदृष्टतया अव्ययीभावेन सममव्ययीभावसमासः न भवति किन्तु तदतिरिक्तकतिपयाऽव्ययेन नञुपादिना सममेव अव्ययीभावः भवतीत्यभ्युपेयमेवेति भावः ।

य शो ल ता

'शोभनोपकुम्भम्' इत्यादिप्रयोगस्य प्रामाणिकत्वे अन्यदपि अभ्युपगमनीयमित्याह - **समस्यमानत्वेन परिगणिताऽव्ययातिरिक्तस्याऽप्यव्ययीभावस्य** = ***यद्यपि*** समस्यमानत्वेन परिगणिताः अव्ययाः नञाद्याः कतिपयाः एव, सामान्येन न तत्र अव्ययीभावस्याऽन्तर्भावः, अव्ययीभावः समस्यमानत्वेन

❁ पदार्थथी पंक्ति सुधी, पंक्तिनो शब्दशः अर्थ ❁

शाब्दार्थ :- जे रीते **भूतलस्य अघटम्** आ स्थलमां भूतलनो घटमां अनन्वय એ "पूर्वपदार्थप्रधानसमासघटकीभूतउत्तरपदार्थनी साथे तत्समासअघटकीभूतपदार्थनो अन्वय न थाय" - आ व्युत्पत्तिमां प्रमाण छे ते रीते साध्याभाववद्वृत्तम् समासनी जेम अभ्युपगममात्रथी स्वीकारेल **भूतलोपकुम्भम्/भूतलोपघटम्** प्रयोग कदाच थई पण जाय छतां तेमां जे भूतलनो घटमां अन्वय नथी थतो ते ज उक्त व्युत्पत्तिमां प्रमाण छे. मतलब के वास्तवमां अव्ययीभाव એ नञ्, उप वगेरे समस्यमानतया परिगणित अव्ययोथी भिन्न अव्यय स्वरूप होवाने कारणे **भूतलोपकुम्भम्** प्रयोग न थाय. छतां अभ्युपगममात्रथी जे रीते साध्याभाववद्वृत्तम् प्रयोग थाय ते रीते **भूतलोपकुम्भम्** प्रयोग स्वीकारी लेवाय छतां तेमां भूतलनो जे घडामां अन्वय नथी थतो ते ज उक्त व्युत्पत्ति स्वीकारवामां प्रमाण छे, जे रीते **भूतलस्य अघटम्** प्रयोगमां भूतलनो घडामां अनन्वय ! अव्ययीभाव समास अव्यय स्वरूप होवा छतां पण जो **शोभनोपकुम्भम्** आ प्रयोगने प्रमाणिक मानवामां आवतो होय तो हवे आगळ जे कहीशुं ते तमारे स्वीकारवुं पडशे. हवे आगळनी पंक्ति आ प्रमाणे

वि न भा

सामान्यशास्त्रेण समस्यमानत्वस्य चाभ्युपगमनीयतया वास्तविके वा गू

परिगणिताः (= येन समं समासः भवति तादृशाः) ये अव्ययाः तदतिरिक्तः, ततः तेन समं न कोऽपि समासः सम्भवति ***तथापि*** 'शोभनोपकुम्भम्' इत्यस्य प्रामाणिकत्वे तदुपपत्त्यर्थम् अव्ययीभावस्य **समाससामान्यशास्त्रेण समस्यमानत्वस्य च अभ्युपगमनीयतया** = 'अव्ययीभावेन समं समासः भवति' - इत्येवं समाससामान्यशास्त्रेण अभ्युपगमनीयतया, चशब्दः पूर्वोक्ताऽभ्युपगमनीय- य शो ल

समજવી - (૧) **अव्ययीभावात्मकाऽव्ययाऽतिरिक्ताव्ययेनैव अव्ययीभावस्य समस्यमानत्वस्य** (૨) **समस्यमानत्वेन परिगणिताऽव्ययेभ्योऽतिरिक्तस्याऽपि अव्ययीभावस्य समाससामान्यशास्त्रेण समस्यमानत्वस्य च अभ्युपगमनीयतया....** મતલબ કે નિયમ એવો છે કે અવ્યયોની સાથે ફક્ત અવ્યયીભાવ સમાસ જ થાય. તે સિવાયના સમાસ નઞ્, ઉપ વગેરે કતિપય અવ્યયોની સાથે જ થાય. નઞ્, ઉપ વગેરે અવ્યયો સિવાયના અવ્યયોની સાથે અવ્યયીભાવ સિવાયના સમાસ ન થાય. મતલબ કે અવ્યયીભાવ સમાસ થાય.

હવે આ નિયમમાં બે ફેરફાર તમારે સ્વીકારવા પડશે -

(૧) અવ્યયીભાવ સમાસની સાથે અવ્યયીભાવ સમાસ ન થાય. માટે, અવ્યયીભાવ-સ્વરૂપ જે અવ્યય તદતિરિક્ત અવ્યયોની સાથે જ અવ્યયીભાવ સમાસ થાય. તથા

(૨) ફક્ત નઞ્, ઉપ, અધિ વગેરે સમસ્યમાનતયા પરિગણિત અવ્યયોની સાથે જ સમાસ થાય તેવું નથી. કિંતુ નઞ્, ઉપ વગેરે સમસ્યમાનતયા પરિગણિત અવ્યયોથી ભિન્ન એવા અવ્યયીભાવ અવ્યયનો પણ સમાસ થતો હોવાને કારણે નઞ્, ઉપ વગેરે સમસ્યમાનતયા પરિગણિત અવ્યયો અને અવ્યયીભાવઆત્મક અવ્યય - આ સિવાયના અવ્યયોની સાથે સમાસ ન થાય - આ પ્રમાણે તમારે સ્વીકારવું જોઈએ. વિ ન મ્રા

જુઓ - મૂળ નિયમ આવો છે કે 'નઞ્, ઉપ, અધિ વગેરે પરિગણિત અવ્યયોથી અતિરિક્ત અવ્યયોની સાથે અવ્યયીભાવ અતિરિક્ત સમાસ ન થાય.' અહીં જો 'અવ્યયીભાવ અતિરિક્ત' આટલું ઉમેરી દઈએ મતલબ કે 'નઞ્, ઉપ વગેરે સમસ્યમાનતયા પરિગણિત અવ્યયો તથા અવ્યયીભાવાત્મક અવ્યય - આ સિવાયના અવ્યયોની સાથે અવ્યયીભાવ-અતિરિક્ત સમાસ ન થાય' - આવું કહીએ તો જે રીતે નઞ્, ઉપ વગેરે અવ્યયોની સાથે અવ્યયીભાવ સમાસ થાય છે તે જ રીતે અવ્યયીભાવઆત્મક અવ્યયની સાથે પણ અવ્યયીભાવસમાસ પ્રાપ્ત થઈ જાય. માટે એક કોલમ એ પણ ઉમેરવી પડે કે અવ્યયીભાવઆત્મક અવ્યયઅતિરિક્ત અવ્યયની સાથે જ અવ્યયીભાવ સમાસ થાય. આમ, (હવે પુનઃ પંક્તિ

गू *भूतलोपकुम्भम् - इत्यादौ भूतलानन्वयः ।*

●

समुच्चये, तथा च 'समस्यमानत्वेन परिगणिताऽव्ययेभ्योऽतिरिक्तेन अपि अव्ययीभावेन समं समासः भवति' - इत्येवं समाससामान्यशास्त्रेण = समासविषयकसामान्यनियमप्रतिपादकशास्त्रेणाऽवश्यमभ्युपगमनीयतया इति समुदितार्थः । यदि नैवमभ्युपेयते तदा अव्ययीभावेन समं समासस्य निषिद्धत्वेन 'शोभनञ्च तदुपकुम्भञ्च' इति विग्रहनिष्पन्नः 'शोभनोपकुम्भम्' इत्येवं प्रयोगो नैव स्यात्, कतिपयाऽव्ययाऽतिरिक्ताऽव्ययेन समं समासस्य समाससामान्यशास्त्रेण निषिद्धत्वात् । यद्येवमभ्युपेयते तदा अव्ययीभावस्याऽपि समस्यमानत्वाङ्गीकरणान्नाऽनुपपत्तिः । तथा च 'शोभनोपकुम्भम्' इतिप्रयोगस्य प्रामाणिकत्वे तत्प्रामाणिकत्वोपपत्त्यर्थम् (१) अव्ययीभावातिरिक्ताऽव्ययेन सममेवाऽव्ययीभावः भवति, (२) अव्ययीभावेन समञ्च अव्ययीभावातिरिक्ताः समासाः भवन्ति - इत्येवमवश्यमभ्युपेयमिति भावः । सामान्येन समासानुशासनप्रतिपादकशास्त्रेऽव्ययीभावस्य परिगणिताव्ययेषु अन्तर्भावो दर्शितो न भवति, किन्तु प्रकृतप्रकरणस्य प्रकृतांशे अन्तर्भावः दर्शितः, एष च विशेषेण समासानुशासनप्रतिपादकः, अतः तद्व्यवच्छेदार्थं **समाससामान्यशास्त्रे**-त्युक्तिरिति चिन्तनीयम् । '**शोभनोपकुम्भमित्यादेः**' - इत्यत्रादिपदेन 'सुन्दरोपकुम्भम्' इत्यादेः ग्रहणम् ।

य शो ल ता

एवमभ्युपगमे च 'भूतलोपकुम्भम्' इत्येवं प्रयोगः वास्तविकः एव स्यात्, 'भूतलस्योपकुम्भम्' इत्येवमव्ययीभावेन समं षष्ठीतत्पुरुषसमासाङ्गीकारे बाधकाभावात् । तादृश**वास्तविके वा 'भूतलोपकुम्भम्' इत्यादौ** कुम्भपदार्थे **भूतलाऽनन्वयः** एवोक्तनियमे मानमिति शेषः । तथा च अभ्युपगममात्रेणाङ्गीकृते 'भूतलोपकुम्भम्' इतिप्रयोगे 'शोभनोपकुम्भम्' इत्यस्य प्रामाणिकत्वे वास्तविके वा 'भूतलोपकुम्भम्' इतिप्रयोगे भूतलस्य कुम्भपदार्थेऽनन्वयः एव 'पूर्वपदार्थप्रधानसमासो-

●

પ્રમાણે -)

વિ न भा

(૧) અવ્યયીભાવઆત્મક અવ્યય અતિરિક્ત અવ્યયની સાથે જ અવ્યયીભાવ સમાસ થાય - આવું અને

(૨) સમસ્યમાનતયા પરિગણિત અવ્યયથી અતિરિક્ત એવા પણ અવ્યયીભાવ સમાસનો સમાસના સામાન્ય નિયમ મુજબ સમાસ થાય - આવું માનવું પડશે. આ બે વાત માનતા **भूतले उपकुम्भम् = भूतलोपकुम्भम्** આ પ્રયોગ વાસ્તવિક થઈ જતા વાસ્તવિક એવા

'शोभनोपकुम्भम्' इत्यस्याऽप्रामाणिकत्वे उक्ताभ्युपगमे प्रयोजन-

●

त्तरपदार्थेन समं तत्समासाऽघटकपदार्थान्तराऽन्वयोऽव्युत्पन्नः' इति नियमे मानमिति सङ्ग्रहः । तादृशनियमसिद्धौ 'साध्याभाववदवृत्तम्' इत्यत्र 'साध्याभाववदवृत्तिः' इत्यत्र वा साध्याभाववतः वृत्तित्वे अनन्वयान्नैतद्विग्रहद्वितयमपि अभ्युपेतुं शक्यते इति भावः ।

यदि 'शोभनोपकुम्भम्' इत्यादिप्रयोगः असाधुरेव - अप्रामाणिकः एव तदा 'नञादिकतिपयाऽव्ययातिरिक्ताऽव्ययेन समं समासः न भवति' इत्येवं नियमोऽङ्गीकार्यः, अव्ययीभावस्य समस्यमानत्वं नाऽभ्युपेयम्, प्रयोजनविरहात् । तथा च अव्ययीभावसमासेन समं नैव कोऽपि समासः भवतीति सिध्यति । ततश्च 'साध्याभाववतः अवृत्तम्' इत्येवं विग्रहनिष्पन्नं 'साध्याभाववदवृत्तम्' इतिपदम्, 'साध्याभाववतः अवृत्ति यत्रासौ साध्याभाववदवृत्तिः' - इत्येवं विग्रहनिष्पन्नं 'साध्याभाववदवृत्तिः' इतिपदञ्च असाधुतया एव सिध्येताम्, उभयत्रापि अव्ययीभावेन समं समासाङ्गीकारात् । ***यद्यपि*** अत्र 'पूर्वपदार्थप्रधानसमासोत्तरपदार्थेन समं तत्समासाऽघटकपदार्थस्याऽन्वयोऽव्युत्पन्नः' - इतिनियमवशेन साध्याभाववतः वृत्तित्वे अनन्वयरूपदोषः पूर्वोक्तः अस्ति एव, ***तथापि*** तादृशदोषाऽपेक्षया बलीयानपि दोषः अत्र स्यात्, यतः 'साध्याभाववतः अवृत्तम्' इत्येवं समासस्यैवाऽसम्भवात् 'साध्याभाववदवृत्तम्' इतिपदमेवाऽसाधु स्यात् । पूर्वोक्तनियमेन साध्याभाववतः वृत्तित्वेऽन्वयः एव असङ्गतः भवति, न तु तादृशपदमेवाऽसङ्गतम् । एतन्नियमवशेन तु तादृशपदमेवाऽसाधु स्यात्, यतः 'अवृत्तम्' इत्यस्य अव्ययीभावतया तेन समं समासः न सम्भवति, तन्निबन्धनः तादृशपदाऽसाधुत्वदोषो बलीयानत्र पक्षे वेदितव्यः ।

एतन्मनसिकृत्याह - **'शोभनोपकुम्भम्' - इत्यस्य अप्रामाणिकत्वे उक्ताऽभ्युपगमे प्रयोजनविरहेण** = (१) 'अव्ययीभावाऽतिरिक्ताऽव्ययेन सममेवाऽव्ययीभावसमासः भवति' इत्यस्य (२) अव्ययी-

●

પણ આ પ્રયોગમાં ભૂતલનો ઘટમાં જે અન્વય નથી થતો તે જ 'પૂર્વપદાર્થપ્રધાનસમાસઘટકીભૂતઉત્તરપદાર્થની સાથે તત્સમાસઅઘટકીભૂતપદાર્થનો અન્વય ન થાય' - આ વ્યુત્પત્તિ સ્વીકારવામાં પ્રમાણ છે. (આ પ્રમાણે અન્વય જોડવો.)

•⁂• અવ્યયીભાવ સાથે સમાસ ન થાય •⁂•

હવે જો **शोभनोपकुम्भम्** પ્રયોગને પ્રામાણિક ન માનતા હો તો 'અવ્યયીભાવાત્મક અવ્યયની સાથે પણ સમાસ થાય' આવું માનવાની કોઈ જરૂરિયાત રહેતી નથી. માટે,

गू ढा *विरहेण साध्याभाववतो वृत्तेरनन्वयापेक्षयाऽवृत्तमित्यव्ययीभावेन साध्याभाववतः समासत्वाऽसम्भवनिबन्धनतादृशपदासाधुत्वरूपो बलीयानपि*

●

भावाद्यतिरिक्ताऽव्ययेन सममेव समासः न भवति इत्यस्य चाऽभ्युपगमे प्रयोजनविरहेण ***यद्यपि*** 'अव्ययीभावातिरिक्ताऽव्ययेन सममेवाऽव्ययीभावः भवती'ति तु अङ्गीकार्यमेव, अव्ययीभावेन सममव्ययीभावस्य केनचित् कुत्रचित् कदाचिदपि अदृष्टत्वात्, ***तथापि*** 'नञ्-अव्ययीभावाद्यतिरिक्ताऽव्ययेन सममेव समासः न भवति' इत्यभ्युपगमे अव्ययीभावस्य नञा सह साजात्यसिद्ध्या नञा सह यथाऽव्ययीभावः भवति तथा तेन सममपि अव्ययीभावः प्रसक्तः, अतः प्रथमनियमाऽभ्युपगमे प्रसक्तं तन्निषिध्यते, किन्तु यदा 'नञाद्यतिरिक्ताऽव्ययेन सममेव समासः न भवति' इत्येवाङ्गीक्रियते तदा अव्ययीभावस्य नञा सह साजात्याऽसिद्ध्या न हि अव्ययीभावेन सममव्ययीभावः प्रसक्तः येन तन्निषेधार्थं तादृशाऽभ्युपगमः आवश्यकः स्यात्, अप्रसक्तस्याऽनिषेधात् । ततश्चोक्ताऽभ्युपगमे प्रयोजनविरहेण **साध्याभाववतः वृत्तेः** = वृत्तौ, षष्ठी-सप्तम्योरभेदात्, **अनन्वयाऽपेक्षया**, यद्वा 'वृत्तेऽनन्वयाऽपेक्षया' इतिपाठाङ्गीकारे **वृत्ते** = वृत्तित्वे, 'अवृत्तम्' इत्यत्रोत्तरपदार्थे इत्यर्थः सुसङ्गच्छते । **'अवृत्तम्' इत्यव्ययीभावेन** समं **साध्याभाववतः समासत्वाऽसम्भवनिबन्धनतादृशपदाऽसाधुत्वरूपः**, 'समासत्व'इति अत्र स्वार्थिक'त्व'प्रत्ययः । तथा च तादृशाऽव्ययीभावेन समं साध्याभाववतः समासः न सम्भवति इति अतः तादृशसमासाऽसम्भवनिबन्धनः तादृशपदस्य = 'साध्याभाववदवृत्तम्' इत्येवं शब्दस्य असाधुत्वरूपः इत्यर्थः। यद्वा महावाक्यस्यैव (= साध्याभाववदवृत्तमित्यादेः) समासत्वेन अव्ययीभावेन समं साध्याभाववतः समासत्वं न सम्भवतीत्यतः तादृशसमासत्वाऽसम्भवनिबन्धनः दोषः..... इत्यादिरीत्याऽर्थः ज्ञेयः । **बलीयानपि दोषः**, अपिना तादृशाऽनन्वयलक्षणदोषोऽत्र नास्तीति नास्तीति सूचितम्, समुच्चायक-

य शो ल ता

●

साध्याभाववतः अवृत्तम् - आवो विग्रह स्वीकारनारना पक्षे साध्याभाववत्पदनो वृत्तिमां (= वृत्तित्वमां) अन्वय न थवा स्वरूप दोष करतां पण वधारे बलवान दोष आवशे के जे **वृत्तस्य अभावः = अवृत्तम्** - आवा अव्ययात्मक अव्ययीभाव समासनी साथे **साध्याभाववतः अवृत्तम् = साध्याभाववदवृत्तम्** आ रीते साध्याभाववत्पदनो समास स्वीकारवाने कारणे आवे छे. आवो बलवान दोष पण एटले के साध्याभाववान्नो वृत्तित्वमां अन्वय न थवानो दोष तो आवे ज छे तदुपरांतमां 'साध्याभाववान्पदनो अवृत्तम्नी साथे समास नहीं थई शके' - आ प्रमाणे वधारे मोटो दोष पण **साध्याभाववतः अवृत्तम्** इत्यादि रीते साध्याभाववद्-

वि ना भा

दोषः तादृशव्याख्याने वेदितव्य इति ।

तस्मात् 'साध्याभाववतो न वृत्तिर्विद्यते यत्र तत्साध्याभाववदवृत्ति,

●

त्वात्तस्याऽत्र, **तादृशव्याख्याने** = 'वृत्तस्याभावः इति अवृत्तम्, साध्याभाववतः अवृत्तम् इति साध्याभाववदवृत्तम्' इत्येवं व्याख्याने 'वृत्तेरभावः = अवृत्ति, साध्याभाववतः अवृत्ति यत्र असौ साध्याभाववदवृत्तिः' इत्येवं व्याख्याने च, एतादृशव्याख्यानद्वितये इत्यर्थः, **वेदितव्यः इति** । अत्र शब्दार्थस्य क्लिष्टत्वेऽपि भावार्थानुसारेण अत्रोक्तरीत्या तदुपपादनं सम्भवतीति ध्येयम् ।

सिद्धान्तमाह - **तस्मादित्यादि** । **तस्मात्** = यतः

(१) 'वृत्तस्याभावः = अवृत्तम्, साध्याभाववतः अवृत्तम् = साध्याभाववदवृत्तम्, तदस्यास्तीति साध्याभाववदवृत्ती, तस्य भावः = साध्याभाववदवृत्तित्वम्' इत्येवम्

(२) 'वृत्तेरभावः = अवृत्ति, साध्याभाववतः अवृत्ति यत्रासौ = साध्याभाववदवृत्तिः, तस्य भावः = साध्याभाववदवृत्तित्वम्' - इत्येवञ्च विग्रहाङ्गीकारे पूर्वोक्तरीत्या दोषजालः प्रसज्यते तस्मादित्यर्थः ।

साध्याभाववतो न वृत्तिर्विद्यते यत्र तत् साध्याभाववदवृत्ति, अत्र विशेष्यस्याऽनिश्चितत्वेन नपुंसकत्वम्, हेतोः विशेष्यविधया अङ्गीकारे 'साध्याभाववतो न वृत्तिर्यत्रासौ साध्याभाववदवृत्तिः' इत्येवमेव समासः विज्ञेयः । अत्र च अव्ययीभावस्यैवाऽसत्त्वाद्, नञादिना सह समासस्य सम्मतत्वाच्च न काऽपि क्षतिरिति ध्येयम् । **तस्य** = साध्याभाववदवृत्तेः **भावः तत्त्वम्** =

●

અવૃત્તિત્વની વ્યાખ્યા કરનારાઓના પક્ષે આવશે. તથા આ જ દોષો **साध्याभाववतः अवृत्ति यत्र सः**... ઈત્યાદિ વ્યાખ્યાકારના પક્ષે પણ જાણવા. આ રીતે **साध्याभाववदवृत्तित्व**ની અન્યોએ કરેલી વ્યાખ્યા અસમીચીન છે - તેવું દેખાડી પોતાને સમ્મત અને સમીચીન એવી વ્યાખ્યા = વિગ્રહ બતાવતા કહે છે કે -

❋ ઉત્તરપક્ષસમ્મત વિગ્રહપદ્ધતિ ❋

(**तस्मा.**) પૂર્વે દર્શાવેલ ઉભયપ્રકારના વિગ્રહમાં આવતા દોષોને કારણે તે તે વિગ્રહો સ્વીકારી નહીં શકાય. માટે, **साध्याभाववतः न वृत्तिः यत्र सः साध्याभाववदवृत्तिः हेतुः** આ રીતે ત્રિપદ વ્યધિકરણ બહુવ્રીહિ કરી **साध्याभाववदवृत्तेः भावः साध्याभाववदवृत्तित्वम्** આ રીતે ભાવઅર્થમાં **त्व** પ્રત્યય લગાડી દેવો - આ પ્રમાણે સાધ્યાભાવવદ્અવૃત્તિત્વનો વિગ્રહ અભિયુક્ત = પ્રાચીન આર્ષ પુરુષો વર્ણવે છે.

गू *तस्य भावस्तत्त्वम्' - इत्येव विग्रहं स्वीकुर्वन्त्यभियुक्ताः ।*

●

साध्याभाववदवृत्तित्वम् - **इत्येव**, एवकारेण पूर्वोक्तविग्रहद्वितयं निराकृतम्, **विग्रहं स्वीकुर्वन्ति अभियुक्ताः** = पूर्वाचार्याः पूज्याः ।

तदुक्तं **व्याप्तिपञ्चकमाथुर्यां** "वस्तुतस्तु साध्याभाववतो न वृत्तिर्यत्रेति त्रिपदव्यधिकरणबहुव्रीह्युत्तरं त्वप्रत्ययः । साध्याभाववतः इत्यत्र निरूपितत्वं षष्ठ्यर्थः । अन्वयश्चाऽस्य वृत्तौ । तथा च साध्याभावाधिकरणनिरूपितवृत्त्यभाववत्त्वमव्यभिचरितत्वमिति फलितम्....." (व्या. माथुरी - पृ.११-१२) इति ।

तद्वृत्तौ विवृत्त्यभिधानायां श्रीवामाचरणभट्टाचार्येण "स्वसिद्धान्तमाह - **वस्तुतस्त्विति** । **न वृत्तिः** = न वृत्तित्वम् । **यत्र** = हेत्वादौ । **इति त्रिपदव्यधिकरणबहुव्रीह्युत्तरम्** = इत्याकारकाऽसमानविभक्तिकविशेष्य-विशेषणवाचकपदत्रयकबहुव्रीह्युत्तरम् । **त्वप्रत्ययः** = भावे त्वप्रत्ययः ।

य शो ल ता

अस्य = षष्ठ्यर्थनिरूपितत्वस्य । **वृत्तौ** = वृत्तित्वे । निरुक्तबहुव्रीहिसमासादिना भावविहितत्वप्रत्ययेन च यादृशार्थलाभः तादृशार्थं प्रदर्शयति - **तथा चेति** । **साध्याभावाधिकरणनिरूपितवृत्तित्वाभाववत्त्वं** = साध्याभावाधिकरणनिरूपितवृत्तित्वाभावः । **अव्यभिचरितत्वम्** = अव्यभिचरितत्वशब्दप्रतिपाद्यम् । **फलितम्** इति । तथा च साध्याभावाधिकरणनिरूपितवृत्तित्वाभाव एवाऽव्यभिचरितत्वशब्दप्रतिपाद्या व्याप्तिः । भवति हि 'वह्निमान् धूमाद्' - इत्यादौ लक्षणसमन्वयः, वह्न्यभावरूपसाध्याभावस्याधिकरणीभूतजलह्रदादिनिरूपितमीनादिनिष्ठवृत्तित्वाभावस्य धूमे सत्त्वात् । 'धूमवान् वह्ने'रित्याद्यसद्धेतौ तु न तथा, धूमाभावाधिकरणतप्तायःपिण्डनिरूपितवृत्तित्वस्य वह्नौ सत्त्वेन तदभावस्य तत्राऽसत्त्वादित्याशयः" (व्या. माथुरीविवृत्ति - पृ.११+१२) इत्युक्तमित्यवधेयम् ।

ननु व्यधिकरणबहुव्रीहिसमासः सर्वत्र न साधुः इत्याशङ्कायामाह - **व्यधिकरणबहुव्रीहिश्चे**त्यादि । 'अयं हेतुः साध्याभाववदवृत्तिः' - इत्येवं प्रयोगः त्रिपदव्यधिकरणबहुव्रीह्यङ्गीकारमन्तरेण कथमुपपद्येत ? अत्र अवृत्तपदोत्तरमत्वर्थीयप्रत्ययो नैव सम्भवति, मत्वर्थीयप्रत्ययसत्त्वे 'साध्याभाव-

●

❀ व्यधिकरणबहुव्रीहि अनुपादेय : तर्क ❀

वि न म्रा

प्रश्न :- ભાઈ ! વ્યધિકરણ બહુવ્રીહિ સમાસ જલ્દી ક્યારેય કરાતો નથી. જ્યારે અન્ય સમાસ કરવા દ્વારા નિર્વાહ ન જ થતો હોય ત્યાં જ વ્યધિકરણ બહુવ્રીહિ સ્વીકારવામાં આવે છે. (વ્યધિકરણ બહુવ્રીહિ = જેના વિગ્રહમાં રહેલા બે પદો સમાન વિભક્તિવાળા ન હોય તે સમાસ) પ્રસ્તુતમાં વ્યધિકરણ બહુવ્રીહિ સમાસ ન સ્વીકારવામાં આવે તો એવો તો કયો નિર્વાહ નથી થવાનો ? અમે જે રીત બતાવી તે સ્વીકારી લો.

व्यधिकरणबहुव्रीहिश्च 'अयं हेतुः साध्याभाववदवृत्तिः'- इत्यादेस्साध्याभाववदवृत्तपदोत्तरेण[1] प्रत्ययादिना निर्वाहासम्भवेन स्वीकरणीयः ।

●

वदवृत्ती' - इत्येवमुल्लेखः स्यात्, अव्ययीभावादिकेन समं समासोऽसङ्गतः अत्र, साध्याभाववतः वृत्तित्वेऽनन्वयोऽपि दोषः । तथा च अन्येन केनचिदपि समासेन अत्र तादृशप्रयोगनिर्वाहाऽसम्भवात् तादृशबहुव्रीहिसमासः एव अङ्गीकार्यः । ततश्च यथा 'साध्याभाववदवृत्तिः' - इत्यत्र व्यधिकरणबहुव्रीहिः अङ्गीकृतः तथाऽत्रापि 'साध्याभाववदवृत्तित्वम्' - इत्यत्र व्यधिकरणबहुव्रीहिरेवाङ्गीकार्यः, साध्याभाववतः वृत्तित्वेऽनन्वयादिरूपदोषकलङ्काऽकलुषितत्वादित्याह - **व्यधिकरणबहुव्रीहिश्च 'अयं हेतुः साध्याभाववदवृत्तिः' इत्यादेः साध्याभाववदवृत्तपदोत्तरेण प्रत्ययादिना** = साध्याभाववदवृत्तपदोत्तरं मत्वर्थीयप्रत्ययादिना, आदिना 'साध्याभाववतः अवृत्ति यत्रासौ' इत्यादेः पूर्वोक्तबहुव्रीहेः परिग्रहः, **निर्वाहासम्भवेन,** निर्वाहासम्भवश्च मत्वर्थीयप्रत्ययस्य तादृशप्रयोगे अदर्शनात्, तादृशबहुव्रीह्यङ्गीकारे च अनन्वयादिपूर्वोक्तदोषजालप्रसङ्गात्, **स्वीकरणीयः** 'साध्याभाववदवृत्तित्वम्' इत्यत्रापि इति भावः ।

●

⁂ अनन्यगति होवाथी उपादेय : तथ्य ⁂

उत्तर :- **अयं हेतुः साध्याभाववदवृत्तिः** आवुं ज्यारे कहेवामां आवे त्यारे तमे जे रीत बतावी हती के **साध्याभाववतः अवृत्तम् = साध्याभाववदवृत्तम्, साध्याभाववदवृत्तम् अस्ति अस्य = साध्याभाववदवृत्ती** - ते रीते तो समास करी ज शकाशे नहीं. कारण के जो आवो समास अभिप्रेत होय तो **अवृत्तिः** आ रीते ह्रस्व 'इ' न आवी शके. **अवृत्ती** आ रीते दीर्घ 'ई' आवे. आम, **अवृत्त** पद पछी मत्वर्थीय **इन्** प्रत्यय लगाडीने तो निर्वाह थई शकशे नहीं.

तथा **साध्याभाववतः अवृत्तिः यत्र** आ विकल्प स्वीकारो तो तेमां पण व्यधिकरण बहुव्रीहि तो स्वीकारवो ज पड्यो. उपरांतमां बे - बे अनुशासनभंगना महादोष पण लागे. आना करता जेमां एक पण दोष न आवे तेवो अमे बतावेल व्यधिकरण बहुव्रीहि समास ज स्वीकारी लेवो जोईए. आम, उक्त प्रयोगनो निर्वाह जो व्यधिकरण बहुव्रीहि समास न स्वीकारो तो शक्य नथी. माटे, **साध्याभाववतः न वृत्तिः यत्र सः = साध्याभाववदवृत्तिः** आवो विग्रह **'साध्याभाववदवृत्तिः अयं हेतुः'** आवा स्थले स्वीकारवो ज पडशे. त्यां आवो विग्रह स्वीकार्यो तेथी **साध्याभाववदवृत्तित्व**मां पण तेवो ज विग्रह (के जेमां एक पण दोष

१. पदोत्तरेन्प्रत्ययादिना इति पाठोऽत्र शोभते, यथाश्रुतेऽनतिदोषत्वं परिभाव्य तदेव आदृतमिति ।

ननु 'अयं हेतुः साध्याभाववदवृत्तिः' - इत्यत्र व्यधिकरणबहुव्रीहिरस्ति अतः 'साध्याभाववद-वृत्तित्वम्' - इत्यत्रापि सः एवाङ्गीकरणीयः - इत्येवं 'साध्याभाववदवृत्तित्वम्' इत्यत्र व्यधिकरण-बहुव्रीहिसिद्ध्यर्थं 'साध्याभाववदवृत्तिः' इति तस्यैव उदाहरणं किमर्थमुपदर्श्यते ? 'चक्रं पाणौ यस्य सः चक्रपाणिः हरिः', 'वज्रं पाणौ यस्य सः वज्रपाणिः इन्द्रः'... इत्यादिषु यथा व्यधिकरण-बहुव्रीहिरङ्गीकृतः सर्वैरविगानेन तथा 'साध्याभाववदवृत्तित्वम्' इत्यत्रापि व्यधिकरणबहुव्रीह्यङ्गीकारे बाधकाभावः इत्येव किमिति नोच्यते ? इत्याशङ्कायामाह - **एवमि**त्यादि । ***यद्यपि*** व्यधिकरण-बहुव्रीहेरुदाहरणाऽन्तराणि सन्ति ***तथापि*** 'चक्रपाणिः' इत्यादौ व्यधिकरणबहुव्रीहिराश्रितः ततः 'साध्याभाववदवृत्तित्वम्' इत्यत्रापि अस्माभिः व्यधिकरणबहुव्रीहिराश्रीयते - इति वक्तुं न शक्यते, यतः व्यधिकरणबहुव्रीहिसमासः गुरुभूतः असार्वत्रिकश्च, न हि सर्वत्र व्यधिकरणबहुव्रीहिः कर्तुं युज्यते, अनन्यगतिकत्वे एव सः आदरणीयः, यदि व्यधिकरणबहुव्रीह्यङ्गीकारं विनाऽपि अभिप्रेताऽर्थलाभः सम्भवति तदा व्यधिकरणबहुव्रीहिर्नैवाङ्गीकार्यः । यदा व्यधिकरण-बहुव्रीह्यङ्गीकारं विना अभिप्रेतार्थलाभः नैव सम्भवति, लोकैश्च तथाभूताः प्रयोगाः स्वारस्येण क्रियन्ते तदैव तादृशप्रयोगोपपत्त्यर्थं व्यधिकरणबहुव्रीहिरङ्गीकर्तुं शक्यते ।

ततश्च 'चक्रपाणिः' इत्यत्र व्यधिकरणबहुव्रीह्याश्रयणेऽपि न हि तद्वशेनाऽत्रापि सः आश्रीयते अतः 'अयं हेतुः साध्याभाववदवृत्तिः' इति प्रयोगः उदाहरणतया उपन्यस्तः, यथाऽत्राऽनन्य-

●

નથી આવતો તે જ) સ્વીકાર્ય બને.

प्रश्न :- ભાઈ ! વ્યધિકરણ બહુવ્રીહિનું પ્રસ્તુતમાં ઉદાહરણ શું ? એટલે કે ક્યાંક વ્યધિકરણ બહુવ્રીહિ થતો હોય તેના આધારે જ તમે પ્રસ્તુતમાં બહુવ્રીહિ કરતા હશો ને ? તો એવું દૃષ્ટાંત કયું કે જેના આધારે તમે પ્રસ્તુતમાં વ્યધિકરણ બહુવ્રીહિ સમાસ કરો છો ?

उत्तर :- એવું એક પણ ઉદાહરણ પ્રસ્તુતમાં ન કહી શકાય.

❋ व्यधिकरणबहुव्रीहि असार्वत्रिक ❋

प्रश्न :- શું નક્કામી વાત કરો છો. **चक्रम् पाणौ यस्य सः = चक्रपाणिः हरि** આ દૃષ્ટાંત છે જ ને. જે રીતે અહીં વ્યધિકરણ બહુવ્રીહિ કરવામાં આવે છે તે રીતે **साध्याभाववदवृत्तित्व**માં પણ વ્યધિકરણ બહુવ્રીહિ કરવામાં આવે છે - આટલું બોલવામાં શું તકલીફ પડી ગઈ ? કે જેથી તમે ઉદાહરણ ન હોવાનું જણાવ્યું.

एवं व्यधिकरणबहुव्रीहेरुदाहरणान्तरस्य सत्त्वेऽपि तद्वशेनात्र व्यधिकरणबहुव्रीहिस्वीकाराऽसम्भवात्तस्याऽसार्वत्रिकत्वादुक्तप्रयोग एवोदाहरण-

गतिकत्वेन व्यधिकरणबहुव्रीहिरङ्गीक्रियते तथा 'साध्याभाववदवृत्तित्वम्' इत्यत्रापि तथैवाऽनन्यगतिकत्वसद्भावात् तादृशबहुव्रीहिः आश्रयणीयः । 'साध्याभाववदवृत्तित्वम्' इत्यत्र मत्वर्थीयः प्रत्ययः स्यादपि, 'अयं हेतुः...' इत्यादिप्रयोगे तु सः नैव सम्भवति, तथा च यथा तादृशप्रत्ययाद्यभावेऽपि व्यधिकरणबहुव्रीहिणा तादृशप्रयोगो लोकैरविगानेन प्रतीयते तथा प्रकृतेऽपि अन्येषां विग्रहाणां बाधितत्वेन व्यधिकरणबहुव्रीहिरेव अङ्गीकार्यः इति भावः ।

एतदेवाह - **एवमिति** नूतनवार्त्तोपन्यासे । **व्यधिकरणबहुव्रीहेरुदाहरणाऽन्तरस्य** 'साध्याभाववदवृत्तिः' - इत्येतदतिरिक्तोदाहरणस्य 'चक्रपाणिः, वज्रपाणिः' इत्यादेः **सत्त्वेऽपि तद्वशेन** = तादृशोदाहरणवशेन **अत्र** = 'साध्याभाववदवृत्तित्वम्' इत्यत्र **व्यधिकरणबहुव्रीहिस्वीकाराऽसम्भवात्**, कुतः ? इत्याह - **तस्य** = व्यधिकरणबहुव्रीहेः **असार्वत्रिकत्वात्**, तथा च तस्याऽसार्वत्रिकत्वेन

※ એક જગ્યાએ કરવાથી સર્વત્ર અનુમતિ નથી મળતી ※

ઉત્તર :- ભાગ્યશાળી ! વ્યધિકરણ બહુવ્રીહિ સમાસ કાદાચિત્ક છે, સાર્વત્રિક નથી. માટે, **चक्रपाणिः हरिः** માં વ્યધિકરણ બહુવ્રીહિ સમાસ કર્યો, તેથી **साध्याभाववदवृत्तित्वम्** માં પણ વ્યધિકરણ બહુવ્રીહિ સમાસ કરવામાં આવે છે - તેવું ન કહી શકાય. કારણ કે જ્યાં અન્ય સમાસ દ્વારા નિર્વાહ ન થતો હોય ત્યાં જ વ્યધિકરણ બહુવ્રીહિ સમાસનો પ્રયોગ થાય. માટે, અમે જણાવ્યું કે એવું કોઈ ઉદાહરણ નથી કે જેના આધારે અમે પ્રસ્તુતમાં વ્યધિકરણ સમાસ કર્યો હોય. પણ, પ્રસ્તુતમાં **'अयं हेतुः साध्याभाववदवृत्तिः'** આવા પ્રયોગોનો નિર્વાહ નથી થતો. માટે, વ્યધિકરણ બહુવ્રીહિનો પ્રયોગ કરવામાં આવે છે. એટલે તમારે ઉદાહરણ કહેવું જ હોય તો કહી શકાય કે **अयं हेतुः साध्याभाववदवृत्तिः** આ પ્રયોગ જ **साध्याभाववदवृत्तित्व**માં વ્યધિકરણ બહુવ્રીહિ સમાસ કરવા માટે ઉદાહરણનું કામ કરી શકે. તે સિવાયનું અન્ય કોઈ ઉદાહરણ ન આપી શકાય.

આ તો એક દિશા સૂચન છે. આ દિશામાં આગળ ઘણું વિચારી શકાય છે.....

※ દીધિતિનો ઉપસંહાર, શબ્દાર્થના સથવારે ※

शब्दार्थ :- साध्याभाववतः अवृत्तम्... ઈત્યાદિ વિગ્રહ અને **साध्याभाववतः अवृत्ति यत्र** ઈત્યાદિ વિગ્રહ કરવામાં દોષ આવતા હોવાને કારણે **साध्याभाववतः न वृत्तिः विद्यते यत्र तत्**

तया वक्तव्य **इति दिक् ।**

●

एकत्र स कृत इति अन्यत्राऽपि तदादरः न सम्भवतीति भावः । ततश्च **उक्तप्रयोगः एव** = 'साध्याभाववदवृत्तिरयं हेतुः' इत्यादिप्रयोगः एव, एवकारेण चक्रपाणिरित्यादेः व्यवच्छेदः, **उदाहरणतया वक्तव्य इति दिक्** । **दिक्**शब्दप्रयोगप्रयोजनं पूर्ववत् ।

अथ परामर्शः - अत्र साध्याभाववदवृत्तित्वादेः पूर्वपक्षसम्मतविग्रहद्वितयं तत्खण्डनार्थं च ये ये नियमाः उपदर्शिताः ते ते **माथुरी**प्रबन्धेऽपि सन्ति । तत्र **माथुरीप्रबन्धः** लेशत उपदर्शितः । अवशिष्टः यथा - "अव्ययीभावसमासोत्तरपदार्थेन समं तत्समासाऽनिविष्टपदार्थान्तराऽन्वयस्याऽव्युत्पन्नत्वात्, यथा - भूतल उपकुम्भम्, भूतले अघटम् इत्यादौ भूतलवृत्तिघटसमीप-तदत्यन्ताभावयोरप्रतीतेः..." (पृ.९+१०) इत्यादि । एतादृशपाठः **विवृत्त्य**लङ्कृते पुस्तके । **शिवदत्तमिश्रेण तु** "अव्ययीभावसमासोत्तरपदार्थेन समं तत्समासाऽनिविष्टपदार्थाऽन्तराऽन्वयस्याऽव्युत्पन्नत्वात्, यथा भूतलोपकुम्भं भूतलाऽघटम् इत्यादौ भूतलवृत्तिघटसमीप-तदत्यन्ताभावयोरप्रतीतेः..." (व्या. मा. गङ्गाटीकायुक्तपुस्तके पृ. १७) इत्येवं पाठः गृहीतः ।

तत्र **गङ्गायां तेन "*ननु* भूतलोपकुम्भम् इत्यत्र भूतलपदेनोपकुम्भरूपाऽव्ययीभावस्य सप्तमीतत्पुरुषत्वाऽप्रसक्त्या तादृशवाक्यस्याऽसाधुतया योग्यत्वाभावेन कथं तादृशप्रतीत्यापत्तिः सङ्गता

●

साध्याभाववदवृत्ति આ રીતે ત્રિપદ વ્યધિકરણ બહુવ્રીહિ કરી **साध्याभाववदवृत्तेः भावः = साध्याभाववदवृत्तित्वम्** - આ રીતે ભાવાર્થક **त्व** પ્રત્યય લગાડી દેવો - આ પ્રમાણે આર્ષ પુરુષો વિગ્રહ વર્ણવે છે. (માથુરીવૃત્તિમાં **મથુરાનાથે** પણ આ જ રીતે પ્રસ્તુત વિગ્રહપદ્ધતિનું સમર્થન કરેલ છે.) **अयं हेतुः साध्याभाववदवृत्तिः** ઈત્યાદિ પ્રયોગોનો નિર્વાહ **साध्याभाववदवृत्त** પદ પછી મત્વર્થીય **इन्** પ્રત્યય લગાડી થઈ શકે તેમ નથી. કારણ કે તેવી રીતે વિગ્રહ કરતા **'वदवृत्ती'** આ રીતે દીર્ઘ ઈકારનો પ્રયોગ થવો જોઈએ. જે થયો નથી. આમ, ઉક્ત પ્રયોગનો નિર્વાહ સંભવતો ન હોવાને કારણે વ્યધિકરણ બહુવ્રીહિસમાસનો સ્વીકાર કરવો જોઈએ.

આ રીતે, જ્યાં નિર્વાહ ન સંભવે ત્યાં જ વ્યધિકરણ બહુવ્રીહિ સ્વીકાર્ય હોવાથી વ્યધિકરણ બહુવ્રીહિના **चक्रपाणिः हरिः** ઈત્યાદિ ઉદાહરણો હોવા છતાં પણ તેના કારણે **साध्याभाववदवृत्तित्व**માં વ્યધિકરણ બહુવ્રીહિનો સ્વીકાર ન કરી શકાય. કારણ કે વ્યધિકરણ બહુવ્રીહિ સાર્વત્રિક નથી. ક્વાચિત્ક = કેટલાંક સ્થલોમાં જ કરવામાં આવે છે. માટે, **अयं हेतुः साध्याभाववदवृत्तिः** આ પ્રયોગ જ ઉદાહરણ તરીકે કહેવો જોઈએ - ઈતિ દિગ્ !

इति चेत् ?

न, अव्ययीभावस्याऽव्ययत्वाऽनङ्गीकर्तृमते तादृशापत्तिसम्भवात्, अत एव सहरीकरोति, सहरीमन्यते, उपकुम्भीभूतम् इत्यादयः प्रयोगाः उपपद्यन्ते, अन्यथा तस्याऽव्ययत्वे 'अव्ययस्य च्वावीत्वं नेति वाच्यमिति' निषेधेनाऽसाधुत्वापत्तिरित्यव्ययीभावश्चेति सूत्रे (१/१/४१) भाष्ये स्पष्टम्" (व्या. माथुरीगङ्गावृत्ति पृ.१७/१८) **इत्युक्तम्;**

तन्न चारुतरम्, अव्ययीभावस्याऽव्ययत्वाऽनङ्गीकर्तृणां मते एव तादृशोपन्यासे ग्रन्थन्यूनताप्रसङ्गात्, न हि तादृशनियमः तथा सति सर्वेषां सम्मतः स्यात् ।

ततश्च अत्र यथा गूढार्थतत्त्वालोककृता दर्शितं तथा उपन्यासः कर्तव्यः यदुत - अभ्युपगममात्रेण स्वीकृते 'भूतलोपकुम्भम्' इत्यादिप्रयोगे 'शोभनोपकुम्भम्' इत्यस्य प्रामाणिकत्वे वास्तविके वा 'भूतलोपकुम्भम्' इत्यादिप्रयोगे यः भूतलस्य घटेऽनन्वयः स एव मानमुक्तनियमे। तथा च सर्वेषामुक्तनियमः अभ्युपेतव्यः स्यात्, न हि कस्यचिन्मतेनैव सम्मतस्योदाहरणतया कथनं युज्यते इति ।

किञ्च, अग्रे **माथुर्यामेव** "अव्ययीभावसमासस्याऽव्ययतया" (व्या. माथुरी पृ.१०) इत्येवमुक्तेः अव्ययीभावस्याऽनव्ययत्वप्रतिपादनं न सङ्गच्छते, उदाहरणञ्चाऽन्येषां मतेन अन्यन्निरूपणं स्वमतेन इत्याद्यभ्युपगमे ग्रन्थैकवाक्यताहानेः । अत्र "पूर्वपदमव्ययम्, परपदमनव्ययम्, तद्वशेन समुदायोऽनन्वयोऽव्ययो भवतीत्यव्ययीभाव इत्यस्याऽभियुक्तैरभिहितत्वाद्" (व्या. मा. विवृत्तिः पृ.११) इति **माथुरीविवृत्तिकृतां श्रीवामाचरणभट्टाचार्याणामुक्तिरपि** स्मर्तव्या इत्यलं प्रसक्तचसूर्या **इति दिक्** ।

एतस्मिन् प्रकरणे 'साध्याभाववदवृत्तित्वम्' इत्यस्य केषाञ्चिन्मतानुसारेण विग्रहद्वितयम्, तदसङ्गतत्वसाधनमनुशासनपरिष्कारा... इत्यादयः पदार्थाः समवगताः अस्माभिः । एवञ्च 'ननु अनुमितिहेतुव्याप्तिज्ञाने का व्याप्तिः ? न तावदव्यभिचरितत्वम्, तद्धि न साध्याभाववदवृत्तित्वम्...' इत्यादि**तत्त्वचिन्तामणिः** सोपस्कारं व्याख्यातः । समारब्धाऽनुमान... इत्यादि**दीधिति**रपि व्याख्याता । अत्र 'साध्याभाववदवृत्तित्वमि'त्यादेः पूर्वञ्च 'अनुमितिहेतुव्याप्तिज्ञाने...' इत्यादेश्च

●

આમ, આ પ્રકરણમાં (૧) **साध्याभाववदवृत्तित्वम्** ના અન્ય સમ્મત બે વિગ્રહ, (૨) પ્રથમ વિગ્રહનું નિરાકરણ '**न कर्मधारयान् ....**' ઈત્યાદિ નિયમથી, (૩) નિયમ પરિષ્કાર, (૪) નિયમનો અસ્વીકાર તથા નવા અનુશાસનનું પ્રદર્શન કે જેના દ્વારા ઉભય વિગ્રહનું

यद्विवरणं प्रदर्शितं तज्**जागदीश्यां दीधितौ** वा नास्ति, **माथुर्याम्** अतिसंक्षेपेण तदुपलभ्यते इति ध्येयम् ।

*॥ इति सकलसङ्घहितचिन्तकाचार्यप्रवर**श्रीभुवनभानुसूरीश्वर**शिष्यरत्न-*
*पूज्यपूनाजिल्होद्धारकाचार्यप्रवर**श्रीविश्वकल्याणसूरीश्वर**शिष्यरत्न-*
*पूज्यसंविन्मूर्त्याचार्यप्रवर**श्रीयशोविजयसूरीश्वर**शिष्यलव-*
मुनिभक्तियशविजयविरचितायां
***व्याप्तिपञ्चकविवृति**वृत्ति**यशोलता**यां*
द्वितीया दीधितिः ॥

●●●

વિ ખંડન, (૫) સિદ્ધાંત મુજબ વિગ્રહપ્રદર્શન..... ઈત્યાદિ બાબતો વિચારી. **इति शम्** ।

॥ મુનિભક્તિયશવિજયરચિત વિનભ્રાવ્યાખ્યામાં
દ્વિતીય દીધિતિનું વિવરણ સંપૂર્ણ ॥

ઊડાનની પરિસીમા
'GSLV' છે,
ઊંચાઈની પરિસીમા
'એવરેસ્ટ' છે,
ઊંડાઈની પરિસીમા
'પેસેફિક' છે,
તેમ વ્યાપ્તિના વિશ્વમાં
તર્કની ઊડાનની....
તર્કની ઊંચાઈની....
તર્કની ઊંડાઈની.....
પરિસીમા છે :

"ગૂઢાર્થતત્ત્વાલોક"

- प्रकाशक -
श्री दिव्यदर्शन ट्रस्ट

9 789382 019664

MULTY GRAPHICS
(022) 23873222 23884222